माणिक्यचन्द्रजैनग्रन्थमालायाः त्रयस्त्रिंशतितमो ग्रन्थः

पुन्नाटसंघीय-श्रीजिनसेनसूरिकृतं

हरिवंशपुराणं

(उत्तरार्द्धम्)

साहित्यरत्न-पण्डित-दरबारीलाल-न्यायतीर्थेन संशोधितं सम्पादितं च

प्रकाशिका—माणिक्यचन्द्र-दिगम्बर-जैनग्रन्थमाला-समितिः

मूल्यं सार्द्धरूप्यकम्

पब्लिशर—
नाथूराम प्रेमी
मंत्री, माणिक्यचन्द्रजैनग्रन्थमाला
हीराबाग, बम्बई, नं० ४

※ ※ ※
※ ※
※

मुद्रक—
वि० बा० परांजपे,
नेटिव ओपीनियन प्रेस,
आंग्रेवाडी, गिरगांव, मुंबई नं. ४.

हरिवंशपुराणस्य विषयसूची ।

विषय	पृष्ठाः	श्लोकाः
एकत्रिंशत्तमः सर्गः	४०१	
वसुदेवस्य सूर्यकेण हरणं	४०१	१
मुक्तेन तेन कुंडपुरे कन्यालाभः	४०१	३
म्लेच्छकन्यया जरया सह विवाहः	४०१	६
जरातो जरत्कुमारजन्म	४०१	७
यौवनवत्याः रोहिण्याः स्वयंवरः	४०१	११
तया गायकवेषिणः वसुदेवस्य वरणं	४०४	३९
स्वयंवरे कुलीनत्वानियमः	४०५	५०
राजभिः सह वसुदेवयुद्धो विजयश्च	४०५	५७
समुद्रविजयेन सह युद्धः परिचयः समागमश्च	४०८	९९
द्वात्रिंशः सर्गः	४१२	
बलदेवजन्म	४१२	१
सर्वपत्नीनामानयनं	४१३	१२
त्रयस्त्रिंशः सर्गः	४१६	
वसुदेवशिष्येण कंसेन सिंहरथबन्धनं	४१६	१
कंसस्य जीवद्यशसा विवाहः मथुरालाभः पितुर्बंधनश्च	४१७	१२
मुनिवाक्यतः कंसस्य भयं	४१९	३२
वशिष्ठाख्यानम्	४२०	४७
रामभद्रादीनाम् पूर्वजन्मानि	४२४	९५

चतुस्त्रिंशः सर्गः	४३०	
वसुदेवस्य नेमिविषयकप्रश्नः	४३०	१
विदेहेऽर्हद्दासो नृपः	४३०	३
जिनपूजारता तस्य पत्नी	४३१	४
अपराजितकुमारः	४३१	५
पुष्करार्धे सूर्याभो भूपतिः	४३१	१६
तस्य त्रयः पुत्राः	४३२	१७
अरिंजयनृपस्य प्रीतिमती कन्या	४३२	१८
गतियुद्धविजेत्रे देया इति कन्यायाः वरयाचनं	४३२	१९
गतियुद्धे कन्यायाः विजयः	४३२	२३
सूर्याभपुत्राणाम् वैराग्यं	४३३	३१
स्वर्गमनं राजपुत्रत्वं च	४३३	३३
अपराजितस्याच्युतेन्द्रत्वं	४३३	४०
ततश्च सुप्रतिष्ठराजपुत्रत्वं	४३४	४३

सुप्रतिष्ठस्य जिनदीक्षा	४३४	४७
सुप्रतिष्ठस्य नानाविधोपवासाः	४३४	५०
उपवासभेदनिरूपणम्	४३४	५२
षोडशकारणभावनाः	४४६	१३२
पंचत्रिंशः सर्गः	४५०	
वसुदेवस्य षट्पुत्राः	४५०	१
श्रीकृष्णजन्म	४५१	११
श्रीकृष्णस्य गोकुले प्रेषणम्	४५३	२२
यशोदासुतायाः नासिकाच्छेदः	४५४	३०
गोकुले कृष्णवर्द्धनं	४५५	३५
कृष्णेन कंसदेवतापराजयः	४५६	३८
कृष्णदर्शनाय देवक्याः गोकुले गमनं	४५७	४९
कृष्णगवेषणाय कंसस्य प्रयत्नः	४६०	६८
कृष्णस्य नागशय्यारोहणादि	४६२	७५

षट्त्रिंशः सर्गः	४६३	
कृष्णेन कालियाहिमर्दनं	४६३	१
कृष्णस्य मल्लयुद्धे विजयः	४६४	११
कंसवधः	४६९	४४
कारागाराद्रुग्रसेनस्य मुक्तिः	४७०	५१
जीवद्यशसः पितुः समीपे गमनं	४७१	५२
सत्यभामया सह कृष्णविवाहः	४७१	५३
विवाहे कुलयोषिताम् नृत्यं	४७२	६२
जरासंघसमीपे जीवद्यशसः रोदनं	४७३	६५
जरासंधपुत्रवधः	४७३	७०
सप्तत्रिंशः सर्गः	४७५	
रत्नवृष्ट्यादि, स्वप्नदर्शनं च	४७५	१
स्वप्नफलकथनं	४७८	२४
अष्टत्रिंशः सर्गः	४८२	
भगवतो नेमेः जन्मकल्याणकं	४८२	१
एकोनचत्वारिंशः सर्गः	४९१	
भगवतः स्तुतिः	४९१	१
मेरुतः आगमनं	४९५	
चत्वारिंशः सर्गः	४९९	
जरासंधभयाद्यादवानां प्रस्थानं	४९९	१
देवताच्छलाज्जरासंधस्य परावर्त्तनं	५०१	२८
एकचत्वारिंशः सर्गः	५०३	
समुद्रे द्वारवतीसृष्टिः	५०३	१
नगरीप्रवेशः	५०६	४०
द्वाचत्वारिंशः सर्गः	५०८	
नारदागमनं	५०८	१
चरमशरीरिणः नारदस्य चरितं	५०९	१२
नारदस्य संयमासंयमत्वं	५१०	१०
सत्यभामया नारदस्य तिरस्कृतिः	५१०	२५
नारदेन कृष्णरुक्मिणीविवाहसंयोजनं	५११	३३

कृष्णसमीपे पत्रप्रेषणं	५१३	५७
रुक्मिणीहरणं	५१४	६७
शिशुपालवधः	५१४	७८
रैवतके गिरौ विवाहो द्वारिकाप्रवेशश्च	५१६	९८
त्रिचत्वारिंशः सर्गः	५१८	
सत्यभामायाः ईर्ष्या तद्दुष्फलं च	५१८	१
प्रद्युम्नादिजन्म	५२१	३१
प्रद्युम्नहरणं	५२१	३९
कालसंवरनृपेण पालनं	५२२	४९
रुक्मिणीविलापः	५२३	६२
नारदागमनं	५२४	७४
सीमंधरान्तिके गमनं	५२५	८९
आग्निवायुभूती	५२६	९९
मुनिसमीपे उभयोः पराजयः	५२६	१०४
पामरकस्य जिनदीक्षा	५२८	१२२
अग्निवायुभूतयोर्मुनिवधाय यत्नः	५२९	१३७
उभयोरणुव्रतग्रहणं	५३०	१४५
उभयोः स्वर्गमनं श्रेष्ठिपुत्रत्वं च	५३०	१४६
तत्पित्रो शुनीचाण्डालत्वं पुनश्च देवत्वं राजपुत्रीत्वं च	५३८	१५१
स्वयंवरगतायाः नवयौवनायाः कन्यायाः प्रव्रज्या	५३०	१५७
पुनःस्वर्गतश्च्युतावग्निवायुभूती मधु-कैटभौ जातौ	५३१	१५८
मधुना परस्त्रियाः चन्द्राभायाः हरणं	५३१	१६५
चन्द्राभायाः महादेवीत्वं	५३२	१७६
उभयोर्वैराग्यं	५३२	१८०
आरणच्युतकल्पे देवत्वं	५३५	२५७
ततश्च प्रद्युम्नादिभवावाप्तिः	५३५	२७७

चतुश्चत्वारिंशः सर्गः	५३८	
जाम्बवतीहरणं	५३८	३
शेषमहादेवीलाभः	५३९	२०
पंचचत्वारिंशः सर्गः	५४२	
कुरुवंशपरिचयः	५४२	१
कौरवपांडवविरोधः	५४५	३९
भार्गववंशः	५४६	४४
संधिदूषणोद्योगः	५४६	४९
पांडवगृहदीपनं तन्निःसरणं च	५४७	५६
युधिष्ठिरे सुदर्शनाया अनुरागः	५४७	६१
वसंतसुन्दर्याः युधिष्ठिरेऽनुरागात्तापसाश्रमे वासः	५४८	७०
भीमेन नरभक्षिराक्षसवधः	५४९	९३
पांडवदाहश्रवणाद्राजकन्यानामणुव्रतत्वं	५५०	९६
अनेकदेशेषु कन्यालाभवचनावाप्तिः	५५०	१०५
हिडंवसुन्दर्याः भीमेन विवाहः	५५१	७७४
द्रौपदीलाभः	५५१	१२०
द्रौपद्याः पञ्चभर्तृकत्वखंडनं	५५४	१५०
षट्चत्वारिंशः सर्गः	५५५	
द्यूते पांडवपराजयः निर्गमनं भ्रमणं च	५५५	७
रामगिरौ जिनप्रतिमावन्दनं	५५६	१८
कीचकपराजयः	५५७	२३
कीचकस्य साधुत्वं उपसर्गजयश्च	५५८	४२
कीचकमोहकारणम्	५५९	४७
सप्तचत्वारिंशः सर्गः	५६०	
द्वारकायाम्पांडवनिवासः	५६०	१
प्रद्युम्नकथा	५६२	२०
प्रद्युम्नस्य षोडशलाभाः	५६३	२९
कनकमालायाः सम्मोहः	५६४	४९
प्रद्युम्नवधप्रयत्नः	५६६	६९

प्रद्युम्नस्य कालसंवरेण सह युद्धः	५६६	७५
द्वारिकाम्प्रति प्रस्थानं	५६६	७९
उदधिकुमारीहरणं	५६७	८४
द्वारिकायां प्रद्युम्नस्य छद्मक्रीड़ाः	५६८	१०२
कृष्णप्रद्युम्नयुद्धः समागमश्च	५७०	१२६
अष्टचत्वारिंशः सर्गः	५७१	
शंबसुभानुकथा	५७१	१
वसुदेवकथाश्रवणं	५७३	२२
कुमारादिपरिचयः	५७४	३८
एकोनपंचाशः सर्गः	५७८	
कृष्णभगिन्याः सौन्दर्यवर्णनम्	५७८	१
तस्याः आर्यात्वं	५७९	१३
वनेचरैर्वरयाचनं	५८२	२७
सिंहेन तद्भक्षणं	५८२	३०
दुर्गारूपेण तस्याःपूजा	५८२	३२
पशुबलिखण्डनं	५८३	३४
पंचाशत्तमः सर्गः	५८६	
जरासंधस्य मंत्रिवचनोपेक्षा	५८६	१
संधिप्रयत्नः	५८९	३२
देवावतारतीर्थस्योत्पत्तिः	५९०	५७
कुरुक्षेत्रे महाभारतयुद्धः	५९१	६५
युन्द्धे श्रीनेमिनाथः	५९२	७७
कर्णकुन्तीवार्तालापः	५९३	८७
चक्रव्यूहः	५९४	१०२
गरुडव्यूहः	५९५	११२
एकपंचाशत्तमः सर्गः	५९७	
विद्याधरागमनं	५९७	१
वसुदेवप्रद्युम्नशंबानाम् विद्याधरलोके गमनं	५९७	६
चक्रव्यूहभेदनं	५९७	९

द्वापंचाशः सर्गः	६००	
जरासंधवधः	६००	१
कर्णदुर्योधनादीनाम् विदुरस्यान्ते जिनदीक्षा	६०७	८८
त्रिपंचाशः सर्गः	६०८	
वसुदेवाद्यागमनम्	६०८	१
कृष्णस्य दक्षिणभारतविजयं कोटिः– शिलोत्क्षेपणं च	६१०	३१
अभिषेकादि	६११	४१
चतुःपंचाशः सर्गः	६१३	
नारदयत्नेन द्रौपदीहरणं	६१३	१
कृष्णपांडवानाम् धातुकीखंडे गमनं	६१५	२९
अमरकंकायान्तेषाञ्जयः	६१६	४१
चक्रचदीतामन्योन्यदर्शननिषेधः	६१७	५५
कृष्णस्य पांडवेषु रोषः	६१८	६३
दाक्षिणमथुरानिवेषः	६१९	७३
पंचपंचाशः सर्गः	६२०	
श्रीनेमिशौर्यप्रकाशनं	६२०	१
उषानुरुद्धविवाहः	६२२	१६
यदूनाम् वसन्तक्रीडा	६२४	२९
जाम्बवत्या भगवतोऽपमानं	६२९	५८
आयुधशालायान्नेमेः पराक्रमः	६३०	६४
विवाहयोजनं	६३१	७२
श्रीनेमेः करुणा	६३३	८५
लौकान्तिकागमनं	६३५	१०१
तपःकल्याणकं	६३६	१०४
जिनकचानाम् क्षीरसागरे क्षेपणं	६३९	१२३
राजीमत्याः जिनदीक्षा	६४०	१३०
षट्पंचाशः सर्गः	६४१	
आध्यात्मिकश्रेणीवर्णनं	६४१	१

कैवल्योत्पत्तिः	६५०	१११
सप्तपंचाशः सर्गः	६५२	
समवसृतिवर्णनं	६५२	१
अष्टपंचाशः सर्गः	६६७	
भगवतो वाणी	६६७	१
जैनतत्त्वोपदेशः	६६७	११
एकोनषष्ठितमः सर्गः	६९२	
भगवतो विहारवर्णनं	६९२	१
विहारदेशाः	७००	१०९
देवकीपुत्राणाम् जिनदीक्षा	७०१	११६
उर्जयन्तागमनम्	७०१	१२६
षष्ठितमः सर्गः	७०३	
देवक्याः पुत्रविषयकः प्रश्नः	७०३	१
सत्यभामायाः पूर्वभवाः	७०३	१०
कन्यादानादिकुदानं	७०३	११
रुक्मिण्याः पूर्वभवाः	७०४	२५
धीवरकन्यायाः तीर्थवन्दना	७०५	३७
जांबवत्याः पूर्वभवाः	७०६	४२
सुसीमापूर्वभवाः	७०७	५६
लक्ष्मणापूर्वभवाः	७०८	७४
गौरीपूर्वभवाः	७१०	९५
पद्मावतीपूर्वभवाः	७११	१०४
गजकुमारेण ब्राह्मणकन्याविवाहः	७१२	१२६
शलाकापुरुषादीनाम् पूर्वभवाः कल्याण-कादि-जनकादिपरिचयः	७१३	१३५
रुद्रनिरूपणम्	७४४	५३४
नारदनिरुपणम्	७४५	५४८
शकराजकालः	७४५	५५१
कल्किराजानः	७४५	५५२
भविष्यत्कुलकरादयः	७४६	५५३

एकषष्ठितमः सर्गः	७४८	
अंतकृत्केवलीगजकुमारः	७४८	१
द्वारिकानाशविषयकप्रश्नः	७४९	१५
कृष्णस्य दीक्षाज्ञा	७५०	३७
द्वीपायनस्य क्रोधः	७५१	४६
द्वीपायनचरेणाग्निकमारेण द्वारिकादाहः	७५३	७१
बलकृष्णयोः व्यर्थः रक्षायत्नः	७५४	८०
चरमदेहानाम् जिनसमीपे आनयनं	७५५	९२
ग्रन्थकर्त्तु उपदेशः	७५५	९३
द्विषष्ठितमः सर्गः	७५६	
बलकृष्णयोर्दक्षिणाशाम्प्रतिगमनं	७५६	१
धार्तराष्ट्रस्योपद्रवः	७५७	६
हरेर्मरणं	७५८	२७
त्रिषष्ठितमः सर्गः	७६२	
बलस्य जलानयनं	७६२	१
बलस्य करुणाविलापः	७६५	२०
बलस्य मोहमूर्च्छा	७६८	४३
जरत्कुमारस्य दक्षिणमथुरागमनं	७६९	४६
पांडवान्तःपुरे विलापः	७६९	५१
बलसंबोधनप्रयत्नः	७७०	५३
बलस्य जागृतिःजिनदीक्षा च	७७२	६७
चतुःषष्ठितमः सर्गः	७८०	
पांडवानाम्पूर्वजन्मनि मुनिधर्मवर्णनञ्च	७८०	१
पंचषष्ठितमः सर्गः	७९२	
भगवतो निर्वाणवर्णनं	७९२	१
शरीराविलयः	७९३	१२
पांडवानामुपरि उपसर्गः	७९३	१८
नारदमुक्तिः	७९४	२४
बलदेवस्योपरि उपसर्गः शमनं स्वर्गगमनंच	७९४	२६

बलदेवचरदेवस्य कृष्णसमीपगमनं	७९५	४३
कृष्णकीर्तिवर्द्धनाम बलदेवप्रयत्नः	७९६	५३
षट्षष्ठितमः सर्गः	७९५	
हरिवंशपरम्परा	७९८	१
वीरस्य निर्वाणं	८००	१५
वीरानन्तरमाचार्यपरम्परा	८०१	२२
ग्रन्थकर्त्तुःपरिचयः	८०३	३३

ग्रन्थमालाके पूर्वप्रकाशित ग्रन्थोंकी सूची ।

[तमाम ग्रन्थ लागत मूल्यपर बेचे जाते हैं, अतएव इसके सभी ग्रन्थ बहुत सस्ते हैं ।]

१ **लघीयस्त्रयादिसंग्रह**—(१ भट्टाकलंकदेवकृत लघीयस्त्रय अनन्तकीर्तिकृत तात्पर्यवृत्तिसहित, २ भट्टाकलकदेवकृत स्वरूपसम्बोधन, ३–४ अनन्तकीर्तिकृत लघु और बृहत्सर्वज्ञसिद्धि) पृष्ठसंख्या २२४ । मूल्य ।=)

२ **सागारधर्मामृत**—पं० आशाधरकृत, स्वोपज्ञभव्यकुमुदचन्द्रिका टीकासहित । पृष्ठसंख्या २६० ।

३ **विक्रान्तकौरवीय नाटक**—कवि हस्तिमल्लकृत । पृ० १७६ । मू० ।=)

४ **पार्श्वनाथचरित**—श्रीवादिराजसूरिप्रणीत । पृ० २१६ । मू० ॥)

५ **मैथिलीकल्याण**—कविवर हस्तिमल्लकृत नाटक । पृ० १०४ । मू० ।)

६ **आराधनासार**—देवसेनकृत मूल और रत्नकीर्तिदेवकृत संस्कृतटीका । पृष्ठ १३१ । मू० ।)॥

७ **जिनदत्तचरित**—श्रीगुणभद्राचार्यकृत काव्य । पृ० १०० । मू० ।)॥

८ **प्रद्युम्नचरित**—महामहत्तर श्रीपप्पटके गुरु आचार्य महासेनकृत काव्य । पृ० २३६ । मू० ॥)

९ **चारित्रसार**—श्रीचामुण्डराय महाराजरचित । पृ० १०८ । मू० ।=)

१० **प्रमाणनिर्णय**—श्रीवादिराजसूरिकृत न्याय । पृ० ८४ । मू० ।-)

११ **आचारसार**—श्रीवीरनन्दिप्रणीत यतिधर्मशास्त्र । पृ० १०४ । मू० ।=)

१२ **त्रिलोकसार**—श्रीनेमिचन्द्रकृत मूल और माधवचन्द्रकृत संस्कृतटीका। मू० १॥)

१३ **तत्त्वानुशासनादिसंग्रह**—(१ श्रीनागसेनमुनिकृत तत्त्वानुशासन, २ श्रीपूज्यपादस्वामिकृत इष्टोपदेश पं० आशाधरकृत संस्कृतटीकासहित, ३ श्रीइन्द्रनन्दिकृत नीतिसार, ४ मोक्षपंचाशिका, ५ श्रीइन्द्रनन्दिकृत श्रुतावतार, ६ श्रीसोमदेवप्रणीत अध्यात्मतरंगिणी, ७ श्रीविद्यानन्दस्वामिप्रणीत बृहत्पंचनमस्कार या पात्रकेसरी-स्तोत्र सटीक, ८ श्रीवादिराजप्रणीत अध्यात्माष्टक, ९ श्रीअमितगतिसूरिकृत द्वात्रिंशतिका, १० श्रीचन्द्रकृत वैराग्यमणिमाला, ११ श्रीदेवसेनकृत तत्त्वसार (प्राकृत), १२ ब्रह्महेमचन्द्रकृत श्रुतस्कन्ध, १३ ढाढसी गाथा (प्राकृत), १४ पद्मसिंहमुनिकृत ज्ञानसार संस्कृतच्छायासहित।) पृष्ठसंख्या १८४। मू० ॥=)

१४ **अनगारधर्मामृत**—पं० आशाधरकृत स्वोपज्ञ-भव्यकुमुदचन्द्रिकाटीकासहित। मू० ३॥)

१५ **युक्त्यनुशासन**—श्रीमत्समन्तभद्रस्वामिकृत मूल, विद्यानन्दस्वामिकृत संस्कृतटीका। मू० ॥-)

१६ **नयचक्रसंग्रह**—(१ श्रीदेवसेनसूरिकृत नयचक्र, २ आलापपद्धति और ३ माइल्ल धवलकृत द्रव्य-गुणस्वभावप्रकाशक नयचक्र) पृष्ठसंख्या १९४। मू० ॥≡)

१७ **षट्प्राभृतादिसंग्रह**—(१ श्रीमत्कुन्दकुन्दस्वामिकृत मूल षट्पाहुड और उसकी श्रुतसागरसूरिकृत संस्कृतटीका, २ श्रीकुन्दकुन्दकृत लिंगप्राभृत, ३ शीलप्राभृत, ४ रयणसार और ५ द्वादशानुप्रेक्षा संस्कृतछाया-सहित।) पृष्ठसंख्या ४९२। मू० ३)

१८ **प्रायश्चित्तसंग्रह**—(१ इन्द्रनन्दियोगीन्द्रकृत छेदपिण्ड प्राकृत छायासहित, २ नवतिवृत्तिसहित

छेदशास्त्र, ३ श्रीगुरुदासकृत प्रायश्चित्तचूलिका, श्रीनन्दिगुरुकृतटीकासहित, ४ अकलंककृत प्रायश्चित्त) । मू० १=)

१९ मूलाचार—(पूर्वार्ध), श्रीवट्टकेरस्वामीकृत मूल, श्रीवसुनन्दिकृत आचारवृत्ति । पृ०५२० । मू०२॥)

२० भावसंग्रहादि—(१ श्रीदेवसेनसूरिकृत प्राकृत भावसंग्रह छायासहित, २ श्रीवामदेवपण्डितकृत संस्कृत भावसंग्रह, श्रीश्रुतमुनिकृत भावत्रिभंगी और ४ आस्रवत्रिभंगी) पृ० ३२८ । मू० २।)

२१ सिद्धान्तसारादिसंग्रह—(१ श्रीजिनचन्द्राचार्यकृत सिद्धान्तसार प्राकृत, श्रीज्ञानभूषणकृत भाष्यसहित, २ श्रीयोगीन्द्रकृत योगसार प्राकृत, ३ अमृताशीति संस्कृत, ४ निजात्माष्टक प्राकृत, ५ अजितब्रह्मकृत कल्याणालोयणा प्राकृत, ६ श्रीशिवकोटिकृत रत्नमाला, ७ श्रीमाघनन्दिकृत शास्त्रसारसमुच्चय, ८ श्रीप्रभाचन्द्रकृत अर्हत्प्रवचन, ९ आप्तस्वरूप, १० वादिराजश्रेष्ठीप्रणीत ज्ञानलोचनस्तोत्र, ११ श्रीविष्णुसेनरचित समवसरणस्तोत्र, १२ श्रीजयानन्दसूरिकृत सर्वज्ञस्तवन सटीक, १३ पार्श्वनाथसमस्यास्तोत्र, १४ श्रीगुणभद्रकृत चित्रबन्धस्तोत्र, १५ महर्षिस्तोत्र, १६ श्रीपद्मप्रभदेवकृत पार्श्वनाथस्तोत्र, १७ नेमिनाथस्तोत्र, १८ श्रीभानुकीर्तिकृत शंखदेवाष्टक, १९ श्रीअमितगतिकृत सामायिकपाठ, २० श्रीपद्मनन्दिरचित धम्मरसायण प्राकृत, २१ श्रीकुलभद्रकृत सारसमुच्चय, २२ श्रीशुभचन्द्रकृत अंगपण्णत्ति प्राकृत, २३ विबुधश्रीधरकृत श्रुतावतार, २४ शलाकाविवरण, २५ पं० आशाधरकृत कल्याणमाला) पृष्ठसंख्या ३६५ । मू० १॥)

२२ नीतिवाक्यामृत—श्रीसोमदेवसूरिकृत मूल और किसी अज्ञातपण्डितकृत संस्कृतटीका । मू०१॥।)

२३ मूलाचार—(उत्तरार्ध) श्रीवट्टकेरस्वामिकृत । पृष्ठसंख्या ३४० । मू० १॥)

२४ **रत्नकरण्डश्रावकाचार**---श्रीमत्स्वामिसमन्तभद्रकृत मूल और आचार्य प्रभाचन्द्रकृत संस्कृतटीका, साथ ही लगभग ३०० पृष्ठकी विस्तृत भूमिका (हिन्दीमें) है, जिसमें स्वामी समन्तभद्रका जीवनचरित और मूल तथा टीकाग्रन्थकी निष्पक्ष तथा मार्मिक समालोचना की गई है। भूमिकालेखक बाबू जुगलकिशोरजी मुख्तार हैं जो इतिहासके विशेषज्ञ हैं। सम्पूर्ण ग्रन्थकी पृष्ठसंख्या ५४०। मू० २)

२५ **पंचसंग्रह**—माथुरसंघके आचार्य श्रीअमितगतिसूरिकृत। इसमें गोम्मटसारका सम्पूर्ण विषय संस्कृतमें श्लोकबद्ध लिखा गया है। प्राकृत नहीं जाननेवालोंके लिए बहुत उपयोगी है। पृष्ठसंख्या २४०। मू० ॥-)

२६ **लाटीसंहिता**—पण्डित राजमल्लजीकृत श्रावकाचारका अपूर्व ग्रन्थ। पृष्ठसंख्या १३२। मू० ॥)

२७ **पुरुदेवचम्पू**—कविवर्य अर्हद्दासकृत। प० जिनदासशास्त्रीकृत टिप्पणसहित। मू० ॥।)

२८ **जैन-शिलालेखसंग्रह**—श्रवणबेल्गोल (जैनबद्री)के तमाम शिलालेखोंका अपूर्व संग्रह, इसका सम्पादन बाबू हीरालालजी जैन, एम्०ए०,एलएल०बी०ने किया है। प्रत्येक लेखका सारांश हिन्दीमें दे दिया गया है। मू०२)

२९-३०-३१ **पद्मचरित**—(पद्मपुराण) आचार्य रविषेणकृत विशाल कथाग्रन्थ। मूल्य ५॥)

नोट—नं० २, ५, ७, ९, १०, ११, १२, १३ के ग्रन्थ अब नहीं मिलते हैं।

नाथूराम प्रेमी, मन्त्री,
माणिकचन्द-जैन-ग्रन्थमाला,
हीराबाग, गिरगाँव, बम्बई।

एकत्रिंशत्तमः सर्गः ।

अथ हर्म्यतले सुप्तः प्रभावत्या सहान्यदा । सूर्यकेण हृतः सौरिर्बुबुधे स चिरेण खे ॥ १ ॥
जघान मुष्टिघातेन विद्विषं चामुचत् स खात् । गोदावर्याः पपातायं ह्रदे देहसुखावहे ॥ २ ॥
तत्र कुंडपुरे लेभे कन्यां पद्मरथस्य सः । माल्यकौशलयोगेन कलाकौशलशालिनीं ॥ ३ ॥
ततोऽपि नीलकंठेन नीत्वा मुक्तोऽपतद् यदुः । चंपासरसि संप्राप्तस्तस्यां सोऽमात्यदेहजां ॥ ४ ॥
जलक्रीडारतस्तत्र स हृतः सूर्पकारिणा । विमुक्तश्च पपातासौ भागीरथ्यां मनोरथी ॥ ५ ॥
पर्यटन्नटवीं तत्र म्लेच्छराजेन वीक्षितः । परिणीय सुतां तस्य जराख्यां तत्र चावसत् ॥ ६ ॥
जरत्कुमारमुत्पाद्य तस्यामुन्नतविक्रमः । अवंतिसुंदरीं प्राप शूरसेनां च शंसितां ॥ ७ ॥
पुरुषान्वेषिणीमन्यां कन्यां जीवद्यशःश्रुतिं । उपयम्यापराश्चासावरिष्टपुरमाययौ ॥ ८ ॥
राजा तत्र तदा धीरो रुधिरो रुधिरोधनः । तस्य मित्रा महादेवी देवीव द्युतिसंपदा ॥ ९ ॥
ज्येष्ठो हिरण्यनाभाख्यस्तनयो नयवित्तयोः । रणशौंडो महासत्त्वः शस्त्रशास्त्रेकृतग्रहः ॥ १० ॥
कलापारमिता रूपयौवनोदयधारिणी । तनया रोहिणीनाम्ना रोहिणीव यशस्विनी ॥ ११ ॥

स्वयंवरविधौ तस्याः संगताः सकलाः नृपाः । जरासंधं पुरोधाय समुद्रविजयादयः ॥ १२ ॥
तत्र चित्रमणिस्तंभधारितेषु यथाक्रमं । ते मंचेषु समासीना नृपा भूषितविग्रहाः ॥ १३ ॥
वसुदेवोऽपि तत्रैव अात्रलक्षितवेषभृत् । तस्थौ पाणविकांतस्थो गृहीतपणवोऽग्रणीः ॥ १४ ॥
ततः स्वयंवरांतर्भूभागं सौभाग्यभूमिका । प्रविष्टा रोहिणी कन्या रोहिणीवातिरूपिणी ॥ १५ ॥
तदा च सर्वभूपालैर्वलितैरलमाकुलैः । साऽलोकि युगपन्नेत्रैरर्चयद्भिरिवांबुजैः ॥ १६ ॥
तद्रूपश्रवणाद् येषां परा प्रीतिरभूत्पुरा । सा रूपदर्शनात्तेषां महत्त्वमगमत्परं ॥ १७ ॥
श्रुतितूलतनौ वृद्धो योऽनुरागतनूनपात् । दर्शनेंधनदीप्तस्य तस्य वृद्धिः किमुच्यतां ॥ १८ ॥
शंखतूर्यरवस्यांते ततो धात्री पवित्रवाक् । धृतप्रसाधनां कन्यां मान्यामाहाभितो नृपान् ॥१९॥
आतपत्रमिदं यस्य चंद्रमंडलपांडुरं । त्रिखंडजयतो लब्धं यशःस्वमिव शोभते ॥ २० ॥
यस्य चाज्ञाकराः सर्वे भूचरास्तु नभश्चराः । वसुंधरेश्वरः सोऽयं जरासंधोऽवतिष्ठते ॥ २१ ॥
वृणीष्व रोहिणी शांतं नृपं त्वच्छाभलोभतः । रोहिणीसंगमुज्झित्वा क्षितिं चंद्रमिवागतं ॥२२॥
तस्मिन्नरागिणीं बुद्ध्वा रोहिणीं साह सात्त्विका । जरासंधसुतास्त्वेते वृणीष्वैषु हृदि स्थितं ॥२३॥
धात्री चेतोविदूचे तां मथुरानाथमग्रतः । उग्रसेननृपं पश्य रोचते यदि ते सुते ॥ २४ ॥

लब्धधीः साह शौर्यादीन् पश्य सौर्यपुराधिपान् । मालामारोपयामीषामेकस्य रुचितस्य ते ॥२५॥
इत्युक्ते तेषु चेतोऽस्या बभार गुरुगौरवं । ततोऽदर्शयदेषास्यै पांडुं विदुरमप्यतः ॥ २६ ॥
दमघोषं यशोघोषं दत्तवक्त्रं सुविक्रमं । शूल्यं शल्यमिवारीणां तथ्यं शत्रुंजयं नृपं ॥ २७ ॥
चंद्राभं चंद्रवत्कांतं मुख्यं कालमुखं ततः । पौंड्रं च पुंडरीकाक्षं मत्स्यं मात्सर्यवर्जितं ॥ २८ ॥
संजयं च जये सक्तं सोमदत्तं नृपोत्तमं । तत्पुत्रं भ्रातृभिर्युक्तं भूरिश्रवसमाश्रयं ॥ २९ ॥
सुनुनांऽशुमताऽत्यंतं कपिलं विपुलेक्षणं । तथा पद्मरथं भूपं सोमकं सोमसौम्यकं ॥ ३० ॥
देवकं देवनाथाभं श्रीदेवं श्रीवधूश्रितं । प्रदर्श्य तान् नृपानित्थं वंशस्थानादिशंसिनी ॥ ३१ ॥
अन्यानपि च कन्यायै धात्री सा न्यायविज्जगौ । एतावंतो नृपा बाले मुख्याः किमिदमास्यते ॥३२॥
कुरु कन्ये गुणं कंठे चित्तस्थस्येह कस्यचित् । त्वत्सौभाग्यगुणाकृष्टराजकस्यास्य संनिधौ ॥३३॥
त्वं प्रकाशय सौभाग्यं कस्यचिच्चित्तहारिणः । योग्यभर्तृपरिप्राप्तिचित्तचिंतास्तनिद्रयोः ॥ ३४ ॥
वृतयोग्यवरा पित्रोर्मुग्धे कुरु सुखासिकां ।
एवमुक्ताऽवदत्कन्यां साधु मातरुदीरितं । किंतु त्वदर्शितेष्वेषु न मनो रज्यते क्वचित् ॥ ३५ ॥
दर्शनानंतरं यत्र स्नेहोऽभिव्यज्यते हृदि । पौनरुक्त्यं भवेद्वाच्यं तत्राप्यत्राप्यनर्थता ॥ ३६ ॥

न रागो न च विद्वेषो न मोहो न च शून्यता । मुनेरिव ममामीषु जातोपेक्षा कुतोऽप्यहो ॥३७॥
यद्यमीभ्यः परः कोऽपि विधिना मे विधित्सितः । वरस्तं दर्शयत्वद्य विधिरेव जगद्गुरुः ॥३८॥
तद्वचोऽनंतरं कन्या शुश्राव पणवध्वनिं । श्रव्यं श्रवणमार्गेण गत्वा चेतोऽतिकर्षिणं ॥ ३९ ॥
इतः पश्य वरारोहे ! त्वन्मनोहरणक्षमं । राजहंसमिति स्पष्टं बभाण पणवः स हि ॥ ४० ॥
परावृत्य ततः कन्या पश्यंती सा व्यलोकत । राजलक्षणसंयुक्तं वसुदेवं वसूपमं ॥ ४१ ॥
अन्योन्यदृष्टिसंपातनिशातशरसंपदा । मनो मनसिजश्चक्रे ततो जर्जरितं तयोः ॥ ४२ ॥
आसाद्य सा ततस्तस्य भूषणस्वनहारिणी । कंठे कंठगुणं चक्रे स्तनचक्रेण संनता ॥ ४३ ॥
मंचस्थस्योपकंठेऽस्य समासीना व्यराजत । रोहिणी हारिणी तारा रोहिणीव कलावतः ॥४४॥
नवसंगमसंजातसाध्वसेन सकंपना । कन्या सा स्वांगसंगेन तस्यांगसुखमाहरत् ॥ ४५ ॥
तं स्वयंवरमालोक्य केचिदूचुरिमं नृपाः । जातोनुरूपयोर्योगो रत्नकांचनयोरिव ॥ ४६ ॥
अहो नैपुण्यमेतस्याः कन्याया यदयं नृपः । कोऽपि गूढकुलः श्रीमान् प्रधानपुरुषो वृतः ॥४७॥
मात्सर्योपहतास्त्वन्ये जगुः पाणविकं वरं । कुर्वत्या पश्यतात्यंतमन्यायः कन्यया कृतः॥ ४८॥
पराभूतिमिमां राज्ञां नैव युक्तमुपेक्षितुं । सर्वदातिप्रसंगः स्यादेवं सति महीतले ॥ ४९ ॥

कुलीनानां समाजेऽस्मिन् परस्यावसरोऽस्य कः । वक्तु वा वक्तुकामश्चेत्कुलीनः कुलमात्मनः॥५०॥
न चेदेवं करोत्येष कोऽपि नीचान्वयोद्भवः । कुध्यतां राजपुत्रस्य कन्याप्यस्त्विह कस्यचित् ॥५१॥
वसुदेवस्ततो धीरः प्रोवाच क्षुभितान् नृपान् । श्रूयतां क्षत्रियैर्दृप्तैः साधुभिश्च वचो मम ॥ ५२ ॥
स्वयंवरगता कन्या वृणीते रुचिरं वरं । कुलीनमकुलीनं वा न क्रमोऽस्ति स्वयंवरे ॥ ५३ ॥
अक्षांतिस्तत्र नो युक्ता पितुर्भ्रातुर्निजस्य वा । स्वयंवरगतिज्ञस्य परस्येह च कस्यचित् ॥ ५४ ॥
कश्चिन्महाकुलीनोऽपि दुर्भगः सुभगोऽपरः । कुलसौभाग्ययोर्नेह प्रतिबंधोऽस्ति कश्चन ॥ ५५ ॥
तदत्र यदि सौभाग्यमविज्ञातस्य मेऽनया । अभिव्यक्तं न वक्तव्यं भवद्भिरिह किंचन ॥ ५६ ॥
अथ पौरुषदर्पेण कश्चिदत्र न शाम्यति । शमयामि तमाकर्णकृष्टमुक्तैः शिलीमुखैः ॥ ५७ ॥
तच्छ्रुत्वाऽऽशु जरासंधः क्रुद्धः प्राह नृपान् नृपाः । गृह्यतामयमुद्वृत्तो रुधिरश्च सुपुत्रकः ॥५८॥
क्षुभिताः पूर्वमेवाऽऽसन् द्विगुणं चक्रिवाक्यतः । खलप्रकृतयो भूपाः सन्नद्धाः योद्धुमुद्यताः ॥५९॥
साधुप्रकृतयः केचित्तत्र क्षत्रियपुंगवाः । तस्थुः पापनिवृत्तेच्छाः पृथक् स्वबलसंगताः ॥६०॥
पक्षास्तु रुधिरस्यैके प्रतिपक्षबिभित्सया । सन्नह्य सहसा प्राप्ताः रुधिरारुणवीक्षणाः ॥ ६१ ॥
रथं हिरण्यनाभः स्वं तस्थावारोप्य रोहिणीं । समस्तबलसंयुक्तो रुधिरोऽपि वरं वरं ॥६२॥

रुधिरो मधुरैर्वाक्यैर्निजयोधानबोधयत् । यूयं महारथो युद्धे कुरुध्वं युक्तमात्मनः ॥६३॥
वरेण श्वशुरोऽवाचि पूज्य ! मे स्यंदनं द्रुतं । समर्पय महानेकशस्त्रास्त्रपरिपूरितं ॥६४॥
कांदिशीकान् करोम्यद्य यद्द्रुतं क्षत्रियानमून् । संख्येऽप्रख्यातवंशस्य सहंतां मे शरानमी ॥६५॥
इत्युक्ते रुधिरोऽतोषि पुरुषांतरवीक्षणात् । आढौकय दृढास्त्राढ्यं यावनाश्वमहारथं ॥६६॥
खेटो दधिमुखः शौरिं शूरो रथवरं स्थितः । मनोरथ इव प्राप्तस्तदा दिव्यास्त्रभासुरः ॥६७॥
प्रणतश्च स तं प्राह रथमारोह मे द्रुतं । सारथिस्तव युद्धेऽहं जहि शत्रुकदंबकं ॥६८॥
आरुरोह रथं शौरिस्तस्य तुष्टः परिष्कृतः । चापी च कवची चित्रशरसंघातसंकुलं ॥६९॥
द्विसहस्ररथं सैन्यं षट्सहस्रमदद्विपं । चतुर्दशसहस्राश्वं लक्षात्मकपदातिकं ॥७०॥
रौधिरं युधि सान्निध्यं शौरेराशु तदाश्रितं । शत्रुसैन्यविनाशाय कृतनिश्चयमाबभौ ॥७१॥
चतुरंगेण तेनाशु बलेन बलशालिना । अदृष्टपारमध्यं च शौरिः शत्रुबलोदधिं ॥७२॥
संपातश्च तयोर्जातः सैनयोश्चतुरंगयोः । समुद्रघोषयोः शंखतूर्यादिरवरौद्रयोः ॥७३॥
हस्त्यश्वरथपादातमौचित्येन यथायथं । हस्त्यश्वरथपादातमभ्येत्यायुध्यदाहवे ॥७४॥
नीरंध्रशरजालेन नभोरंध्रपिधायिना । न सहस्रकरोऽदर्शि रणेऽन्यत्रैव कथैव का ॥७५॥

असिचक्रगदाघातरक्तधारांधकारिते । निरुद्धः पादसंचारो रणे तेजोनिधेरपि ॥७६॥
पतद्भिर्मत्तमातंगैः पर्वतैरिव सर्वतः । नरैरश्वै रथैर्घोषः शौर्यमार्णर्महानभूत् ॥७७॥
अथ सेनामुखं खिन्नं चिरं कृतरणं निजं । शौरिर्हिरण्यनाभश्च साधारयितुमुद्यतौ ॥७८॥
तौ दृष्टिमुष्टिसंधानप्रयोगानभिलक्षितौ । शनैश्छादयितुं लग्नौ परं योधानितस्ततः ॥७९॥
न नागो न रथो नाश्वो न नरो वा महाहवे। यो न जर्जरितस्ताभ्यां मुंचद्भ्यां निशितान् शरान् ॥८०॥
द्विट्प्रयुक्तशरासारं वायव्यास्त्रेण सोऽकिरत् । शौरिर्माहेंद्रबाणेन निचकर्त्त धनूंष्यपि ॥८१॥
छत्राणि शशिशुभ्राणि शत्रूणां स यशांसि च । सुतुंगान्मूर्धजान्मान्यान् शरपातैरपातयत् ॥८२॥
युध्यमाने तथा तस्मिन् वीरे वीरभयानके । हिरण्यनाभवीरेण रणे पौंड्रः पुरस्कृतः ॥८३॥
कुमारयोस्तयोस्तत्र सुमहारथवर्त्तिनोः । शरैर्युद्धमभूद्रौद्रं यथा सिंहकिशोरयोः ॥८४॥
अपातयद् ध्वजं छत्रं रौधिरिः सारथिं रिपोः । रथस्य तुरगान् वेगादध्यक्षांश्च शरैः शितैः ॥८५॥
ततश्चंडरुषा पौंड्रो वज्रदंडनिभैः शरैः । कृतानुरूपमस्यारेः स चकार तदेव हि ॥८६॥
ततो हिरण्यनाभोऽपि बिभेद कवचं द्विपः । केतुं छत्रं च बाणौघै रथसारथिवाजिनः ॥८७॥
विरथीकृत्य पौंड्रोऽपि तमाशु शितिसायकैः । सद्यः प्राणहरं तस्य संधत्ते यावदाशुगं ॥८८॥

वसुदेवोऽर्द्धचंद्रेण तावच्छित्त्वाऽस्य तद्धनुः। चक्रे हिरण्यनाभं च त्वरयाऽश्वरथे स्थिरे ॥८९॥
छाद्यमाने तथा पौंड्रे शौरिणा शरवर्षिणा। ववृषुः शरसंघातानेकीभूय बहुद्विषः ॥९०॥
शरैः शरान् निवार्याऽसौ बिभेद निशितैः शरैः। शत्रुं शत्रुवितीर्णोच्चैः साधुकारः पदे पदे ॥९१॥
अथ साधुनृपैस्तत्र न्यायविद्भिरितीरितं। न दृष्टन्यमिदं युद्धमेकस्य बहुभिः सह ॥९२॥
ततो जगौ जरासंधो धर्मयुद्धदिदृक्षया। अनेन सह कन्यार्थमेकैको युध्यतामिति ॥९३॥
ततः शत्रुंजयो लग्नः शौरिणा योद्धुमुद्यतः। शेषास्तु प्रेक्षका जाता क्षत्रियाः क्षत्रमत्सराः ॥९४॥
शरान् शत्रुंजयोत्क्षिप्तान् शौरिः प्रक्षिप्य दूरतः। तं ध्वस्तरथसन्नाहं विह्वलीकृत्य मुक्तवान् ॥९५॥
दत्तवक्त्रस्ततो दत्तचिरयुद्धो मदोद्धतः। विरथीकृत्य निर्मुक्तो निःसारीकृतपौरुषः ॥९६॥
रिपुं कालमुखं प्राप्तं रणे कालमिवोद्धतं। प्राणशेषमसौ कृत्वा विससर्जोर्जितो यदुः ॥९७॥
शल्यं रथेन संप्राप्तं तीक्ष्णसायकमोचकं। जृंभणास्त्रेण रौद्रेण बबंधांधकवृष्णिजः ॥९८॥
समुद्रविजयं प्राह जरासंधस्ततो द्रुतं। त्वं हरास्य रणे दर्पं पार्थिवास्त्रविशारदः ॥९९॥
अपि न्यायविदुत्तस्थौ स राजा राजशासनात्। युद्धे प्रायोऽनुवर्तंते प्रभुं न्यायविदोऽपि हि॥१००॥
समुद्रविजयादेशात्पुनः सारथिना रथः। दधावोच्चैर्ध्वजच्छत्रो वसुदेवं रथं प्रति ॥१०१॥

दृष्ट्वा ज्येष्ठरथं दूरात् कनीयान् सारथिं जगौ । ज्यायांसं मम जानीहि समुद्रविजयं त्विमं॥१०२॥
मंदमत्र गुरौ वाह्यो रथो दधिमुख ! त्वया । सापेक्षं हि मया योध्यमनेन गुरुणा रणे ॥ १०३ ॥
यथोदिष्टं ततस्तेन रथः सारथिना रणे । नोदितोऽपि ययौ मंदः स्यंदनं गुर्वधिष्ठितं ॥१०४॥
निजसारथिमाजिस्थः समुद्रविजयो जगौ । भद्र ! योधमिमं दृष्ट्वा सस्नेहं मे मनः कुतः ॥१०५॥
दक्षिणाक्षिभुजास्पंदो बंधुसंबंधगंधनः । युधि बध्यस्य सान्निध्ये वद संबध्यते कथं ॥१०६॥
सुनिमित्तविसंवादो नानुभूतश्च जातुचित् । विरुद्धदेशकालत्वात्संवादोऽपि न युज्यते ॥१०७॥
इत्युक्ते सोऽवदत् स्वामिन्नभ्यमित्रमितस्य ते । अवश्यं बंधुसंबंधो जितजेयस्य जायते ॥ १०८ ॥
परै राजन्नजय्यस्य राजलोकस्य सन्निधौ । परस्य विजये पूजां राजराजादवाप्स्यसि ॥१०९॥
सोऽभिनंदिततद्वाच्यः कार्मुकी तं सकार्मुकं । शरधेः शरमुद्धृत्य जगादोद्धृतसायकं ॥११०॥
भो धीर ! ते यथादृष्टं मृधे धनुषि कौशलं । तथा निर्वहणं तस्य त्वं कुरुष्व ममाग्रतः॥१११॥
शौर्यशैल ! तवोत्तुंगमानशृंगमनावृतं । आवृणोमि शरैर्मेघैः समुद्रविजयस्त्वहं ॥११२॥
कुमारः स्वरभेदेन जगौ किं नो बहूदितैः । आवयोरिह राजेंद्र ! रणे व्यक्तिर्भविष्यति ॥११३॥

---

१ 'जितये यस्य जायते' इति क.ग पुस्तकयोः ।

समुद्रविजयस्त्वं चेन्संग्रामविजयस्त्वहं । न चेत्प्रत्येषि तत्क्षिप्रं क्षिप संधाय सायकं ॥११४॥
इत्युक्ते मुक्तमाध्यस्थो वैशाखस्थानमास्थितः। संधाय शरमाकृष्य विव्याध क्रोधतो नृपः॥११५॥
प्रतिक्षिप्तेन स क्षिप्रमाशुगेन तमाशुगं । दूरादेव च चिच्छेद वैशाखस्थानमंडितः ॥११६॥
मुक्तान्मुक्तान्नृपेणासाविषूनिषुभिराहवे । प्रत्युन्मुक्तैरतिक्षिप्रं दूरादेव निराकरोत् ॥११७॥
वायव्यवारुणाद्यैस्तौ दिव्यास्त्रैरस्त्रकोविदौ । युयुधाते नृदेवानां साधुकारैःस्तुतौ चिरं ॥११८॥
ज्येष्ठो मुमोच यान्बाणान् योद्धृसारथिवाजिनां।तान् कनिष्ठोऽच्छिनद्बाणैर्वैनतेय इवोरगान्॥११९॥
एकैकं स त्रिधा छित्त्वा क्षुरप्रं भ्रातृयोजितं । युवा विव्याध तस्यास्त्रै रथसारथिवाजिनः ॥१२०॥
दृष्ट्वास्त्रकौशलं तस्य शशंसुरवनीश्वराः । शिरष्कंपांगुलिस्फोटसाधुवादविधायिनः ॥१२१॥
ज्यायानज्ञातसंबंधः पुनः संधाय सायकं। दिव्यमस्त्रसहस्राणां सहस्रममुचद् रुषा ॥१२२॥
अस्त्रं ब्रह्मशिरः शीघ्रमस्त्रच्छादनमप्यसौ। युवा क्षिप्त्वाऽच्छिनद्रौद्रं ज्यायसा क्षिप्तसायकं॥१२३॥
परं कौशलमस्त्रेषु वसुदेवस्य यद्रणे। चिच्छेदास्त्राणि चित्राणि ररक्ष च निजाग्रजं॥१२४॥
इत्थं कृतरणक्रीडः कनीयान् ज्यायसे ततः। प्रजिघाय घनस्नेहः स्वनामांकं निजं[१] शरं॥१२५॥

१ 'शनैः' इति ख पुस्तके ।

अनुकूलमिषुं राजा तमादायेत्यवाचयत्। अज्ञातो निर्गतो योऽसौ महाराज! तवानुजः ॥१२६॥
सोऽयं वर्षशतेऽतीते संप्राप्तः स्वजनांतिकं। पादप्रणाममद्यार्य! वसुदेवः करोति ते॥१२७॥
भ्रातृस्नेहसमुद्रेकात्समुद्रविजयस्ततः। क्षिप्तचापो रथात्तूर्णमुत्तीर्यापि निजानुजं ॥१२८॥
उत्तीर्णः स्यंदनादाशु वसुदेवोऽपि दूरतः। प्रणतः पादयोस्तेन दोर्भ्यामालिंग्य चोद्धृतः॥१२९॥
आश्लिष्य रुदतोर्भ्रात्रोः साश्रुलोचनयोस्तयोः। प्राप्याक्षुभ्यादयः सर्वे कंठलग्नास्ततोऽरुदन्॥१३०॥
श्वसुरास्तस्य यावंतः सपुत्रास्तत्रसंगताः। बांधवाश्चापरे लग्ना रुरुदू रणरंगगाः ॥१३१॥
जरासंधादयस्तुष्टा दृष्ट्वा भ्रातृसमागमं। शशंसू रोहिणीं कन्यां तद्भ्रातृपितृबांधवाः ॥१३२॥
यथास्वं शिबिरस्थानं दिनांते ते ययुर्नृपाः। वसुदेवकथाशक्तो निशा निन्युर्दिनान्यपि ॥१३३॥
ततस्तिथौ प्रशस्तायां रोहिणीचंद्रसंगमे। रोहिणीमुपयेमेऽसौ समुद्रविजयानुजः ॥ १३४ ॥
दृष्ट्वा विवाहमुर्वीशास्तुष्टिपुष्टिसमन्विताः। वर्षं तस्थुर्जरासंधसमुद्रविजयादयः ॥१३५॥
कृतसाहायकः संख्ये वसुदेवः स पूजितः। आपृच्छ्य प्रययौ प्रीतो निजं दधिमुखः पदं ॥१३६॥
वरो नववधूहारिवक्त्रांभोजमधुव्रतः। न सस्मार स्मराशक्तः पूर्वभुक्तवधूलताः ॥१३७॥

प्रादुर्भूतसमस्तभूतलमहाभूपाललोकैः समं
संभूयाद्भुतविक्रमैकशरणप्राणै रणप्रांगणे ॥
प्रारब्धोऽप्यतिलुब्धबुद्धिभिरभूज्जय्यो न यद्दोःसखः
शौरिः शौर्यगिरिर्जिनोक्ततपसस्तस्य तत्प्राभवं ॥ १३८ ॥

इति " अरिष्टनेमिपुराणसंग्रहे " हरिवंशे जिनसेनाचार्यकृतौ रोहिणीस्वयंवर भ्रातृसमागमवर्णनो नाम एकत्रिंशः सर्गः ।

द्वात्रिंशः सर्गः ।

अथ सा रोहिणी भर्त्रा विचित्रे शयनेऽन्यदा । प्रसुप्ता चतुरः स्वप्नान् ददर्श शुभसूचिनः ॥ १ ॥
रुद्रं चंद्रं समच्छायं गजेंद्रं मंद्रगर्जितं । समुद्रं सांद्रनिर्घोषं महींद्रोच्चैर्महोर्मिकं ॥ २ ॥
चंद्रं चंद्रमुखी पूर्णं दृष्ट्वा पूर्णमनोरथा । कुंदशुभ्रं मृगेंद्रं सा ददर्शास्यप्रवेशिनं ॥ ३ ॥
विबुद्धा च प्रभाते तान् विबुद्धांबुजलोचना । पत्ये न्यवेदयत्सोऽस्या इति स्वप्नफलं जगौ ॥ ४ ॥
उत्पत्स्यते सुतः क्षिप्रं धीरोऽलंघ्यः शशिप्रभः । एकवीरो भुवो भर्त्ता प्रिये ! ते जनताप्रियः ॥ ५ ॥

इति पत्या समादिष्टं श्रुत्वा स्वप्नफलं शुभं। हारिणी रोहिणी हृष्टा शिश्रिये श्रियमैंदवीं ॥ ६ ॥
च्युत्वा कल्पान्महाशुक्रान्महासामानिकः सुरः। गर्भेऽभूदिह रोहिण्या धरण्या इव सन्मणिः ॥७॥
ततः पूर्णेषु मासेषु सुखं संपूर्णदोहला। साऽसूत सुतपृक्षेषु शुभेषु शशिसंनिभं ॥ ८ ॥
तस्य जन्मोत्सवं दृष्ट्वा जरासंधपुरःसराः। यथास्थानं ययुः प्रीताः पार्थिवाः कृतपूजनाः ॥ ९ ॥
अभिरामः स रामाख्यां प्रख्याप्य पृथिवीतले। वर्द्धते वर्द्धयन् प्रीतिं पित्रोर्बंधुजनस्य च ॥ १० ॥
श्रीमंडपस्थितान् सर्वानेकदा रौधिरास्पदे। समुद्रविजयाद्यांस्तान् वसुदेवहितोद्यतान् ॥ ११ ॥
खावतीर्णाभिनंद्यैका दिव्या विद्याधरी श्रिता। वसुदेवमितः प्राह सुखासनकृतासना ॥ १२ ॥
देव! वेगवती पत्नी बालचंद्रा च मे सुता। पादयोस्तव संपत्य वांछति प्रियदर्शनं ॥ १३ ॥
कुमारी त्वद्गतप्राणा बालचंद्राऽत्रतिष्ठते। गत्वा तां त्वं विवाह्याऽऽशु कुरु तच्चित्तनिर्वृतिं ॥ १४॥
तदाऽऽकर्ण्य वचस्तेन दृष्टिर्ज्येष्ठे समर्पिता। अभिप्रायविदा तेन लब्धेहीति विसर्जिताः ॥ १५ ॥
तमादाय गता साऽपि पुरं गगनवल्लभं। समुद्रविजयाद्याश्च ययुः शौर्यपुरं नृपाः ॥ १६ ॥
भार्यां वेगवतीं दृष्ट्वा शौरिर्गगनवल्लभे। बालचंद्रामुवाहाऽत्र पूर्णचंद्रसमाननां ॥ १७ ॥
नववध्वा तया सार्द्धं वेगवत्या च हृद्यया। रममाणोऽवसत्तत्र दिनानि कतिचित्सुखी ॥ १८ ॥

ताभ्यां जिगमिषोस्तस्य शीघ्रं शौर्यपुरं पुरं । चक्रे वनवती देवी विमानं रत्नभास्वरं ॥ १९ ॥
पिता कांचनदंष्ट्रोऽथ परिवारं ददौ परं । समस्तं बालचंद्राद्या वेगवत्याश्च सोऽग्रजः ॥ २० ॥
कामगेन विमानेन सोऽनेन वनितासखः । अरिंजयपुरं गत्वा विद्युद्वेगं निरीक्ष्यत ॥ २१ ॥
प्रियां मदनवेगां तामनावृष्णिं च देहजं । आदायाऽऽशु विमानेन तेनैव वियदुद्ययौ ॥ २२ ॥
पुरं गंधसमृद्धं द्राक् श्रीसमृद्धमवाप्य सः । सुतां गांधारराजस्य पश्यति स्म प्रभावतीं ॥ २३ ॥
समारोप्य विमाने तां परिवारसमन्वितां । प्राप्तः प्राप्तमहाहर्षः सहसाऽसितपर्वतं ॥ २४ ॥
सिंहदंष्ट्रात्मजां दृष्ट्वा स नीलयशसं प्रियां । तत्रारमत्तया चित्तं प्रविमुक्तं समेतया ॥ २५ ॥
तामप्यादाय संप्राप्तः किन्नरोद्गीतमत्र च । नीलोत्पलदलश्यामां कामं श्याममानयत् ॥ २६ ॥
श्यामामादाय संप्राप्तः श्रावस्तीमनयत्ततः । प्रियंगुसुंदरीं शौरिस्तां च बंधुमतीं प्रियां ॥ २७ ॥
महापुरात्समादाय सोमश्रियमसौ प्रियां । इलावर्धनतो निन्ये मान्यां रत्नावतीं च तां ॥ २८ ॥
नगरे भद्रिलाभिख्ये गृहीत्वा चारुहासिनीं । पौंड्रं संस्थाप्य तत्रैव गत्वा जयपुरं ततः ॥ २९ ॥
अश्वसेनामुपादाय गत्वा शालगुहं पुरं । पद्मावतीं समादाय वेदसामपुरं ययौ ॥ ३० ॥
कपिलं तत्र पुत्रं स्वमभिषिच्य ततोऽपि च । गृहीत्वा कपिलां प्रापदचलग्राममत्र च ॥ ३१ ॥

मित्रश्रियं प्रगृह्यागाञ्चगरं तिलवस्तुकं । कन्या पंचशतं ग्राही पुरं गिरितटं गतः ॥ ३२ ॥
ततः सोमश्रिया युक्तश्चंपां प्राप महापुरीं । अतोऽमात्यसुतां निन्ये सह गंधर्वसेनया ॥ ३३ ॥
पुरे विजयखेटे च सूनुमक्रूरदृष्टिकं । दृष्ट्वा विजयसेनां स निन्ये कुलपुरं ततः ॥ ३४ ॥
पद्मश्रियमुपादाय तथैवावंतिसुंदरीं । सूरसेनां सपुत्रां च जरां जीवयशोन्वितां ॥ ३५ ॥
गृहीत्वाऽन्याः स्वभार्याः स वसुदेवः ससंमदः । आययौ प्रमदं प्राप्तो विमानेनाशुगामिना ॥३६॥
आससाद विमानं तच्चारुसंगीतसंगतं । आशु शौर्यपुरं सूर्यविमानमिव भास्वरं ॥ ३७ ॥
ततो धनवती देवी समुद्रविजयं स्वयं । प्राग् दृष्टयाऽवर्धयत्तुष्टया वसुदेवागमाख्यया ॥ ३८ ॥
कारयित्वा ततः पौरैः पुरशोभां नृपो मुदा । निर्ययौ बंधुभिः सार्द्धं तस्याभिमुखमादृतैः ॥३९॥
सोऽवतीर्य विमानाग्रादग्रजान् गुरुबांधवान् । प्रणनाम प्रियायुक्तः प्रणतः प्रणयात् परैः ॥४०॥
देव्यः शिवादयो नम्रं सयोषं साश्रुलोचनाः । तमाश्लिष्याशिषो भूयः खेऽविश्लेषफला ददुः ॥४१॥
सन्मानितयथायोगजनताजनितादरः । स रेमे रोहिणीशोऽस्मिन् बंधुसिंधुहितोदयः ॥ ४२ ॥
समुद्रविजयं दृष्ट्वा वसुदेवं च देवता । ययौ वेगवती प्रीता निजं स्थानं हितोद्यता ॥ ४३ ॥

लोकः शौर्यपुरोद्भवोऽपि च तदा शौर्यार्जितं निर्जित-
क्ष्माभृच्चक्रमुदारचारुचरितं विद्याधरीवल्लभं।
देवाभं वसुदेवमाप्तविभवं दृष्ट्वातितुष्टोऽगदीद्
धर्मस्यैष जिनोदितस्य महिमा पूर्वार्जितस्येत्यसौ ॥ ४४ ॥

इति "अरिष्टनेमिपुराणसंग्रहे" हरिवंशे जिनसेनाचार्यकृतौ सकलबंधुवधूसमागमवर्णनो नाम द्वात्रिंशः सर्गः।

त्रयस्त्रिंशः सर्गः।

अथ स प्रार्थितः प्राज्यैः पार्थिवैः पार्थिवात्मजैः। शास्त्रोपदेशमातन्वन्नास्ते सूर्यपुरे यदुः ॥१॥
दृष्ट्वा कंसस्य कौशल्यं वसुदेवो जगौ तकं। वरं वृणीष्व तेनोक्तं तिष्ठत्वार्य! तवांतिके[1] ॥२॥
जातु कंसादिभिः शिष्यैर्धनुर्वेदविचक्षणैः। गतो राजगृहं शौरिर्जरासंधदिदृक्षया ॥३॥
अश्रौषीद् घोषणां राज्ञः पुरे राजकराजिते। सावधानस्य लोकस्य समाकर्ण्य यतस्तदा ॥४॥
यः सिंहरथमुद्वृत्तं तं सिंहपुरवासिनं। सत्यसिंहरथारूढमारूढपुरुषौरुषं ॥ ५ ॥

१ ख ग पुस्तकयोर्नायम् श्लोकोऽत्र, किंतु एकादशश्लोकार्धस्यानन्तरं।

जीवग्राहं गृहीत्वाऽसौ दर्शयिष्यति मेऽग्रतः। स एव पुरुषो लोके शूरः शूरतरोऽपि च ॥६॥
तस्य मानधनस्यांते पीतशत्रुयशोंऽबुधेः। आनुषंगिकमप्येतत्फलमन्यसुदुर्लभं ॥७॥
जीवद्यशसमाक्रांतविश्रांतयशसं गुणैः। सुतामीप्सितदेशेन सह दास्यामि सुंदरीं ॥८॥
श्रुत्वा तां घोषणां श्रव्यां वीरैकरसभावितः। कंसेनाग्राहयद्धीरः पताकां यदुनंदनः ॥ ९ ॥
गत्वाऽसौ स समारुह्य विद्यासिंहमयं रथं। सिंहशृंखलमच्छैत्सीत् शरैस्ते हरयोऽप्यगुः ॥१०॥
शत्रुमुत्पत्य कंसस्तं बबंध गुरुशासनात्। दर्शितो वसुदेवेन जरासंधाय सोप्यरिः ॥११॥
दृष्ट्वा च तेन तुष्टेन सुतोपनयनं प्रति। वसुदेवः समादिष्टः कंसेनारेर्ग्रहं जगौ ॥१२॥
पृष्टः कंसो नृपेणाख्यत् स्वजातिमिति भूपते। मम रंजोदरी माता कौशांब्यां शौधुकारिणी ॥१३॥
कंसवाक्यमिति श्रुत्वा ततो राजेत्यचिंतयत्। आकृतिः कथयत्यस्य नायं सीधुकरीसुतः ॥१४॥
आनीनयन्नृपं मंक्षु कौशांब्यास्तां निजैस्ततः। प्राप्ता रंजोदरी त्वात्तमंजूषा नाममुद्रिका ॥१५॥
पृष्टा पूर्वापरं राज्ञा व्यजिज्ञपदिति प्रभो। यमुनायाः प्रवाहेऽयं लब्धो मंजूषया सह ॥१६॥
संवर्द्धितः शिशू राजन् मया कारुण्ययुक्तया। उपालंभसहस्राणां भूयो भाजनभीतया ॥१७॥
स्वभावाच्चंडरुंडोयमर्भकान् दुर्भगोऽर्भकः। रमयन्न शिरस्ताडाद्विना क्रीडति पुण्यवान् ॥१८॥

गृहं सीधगृहीत्यर्थं वेश्यानां बालिकाः श्रिताः। पाणिनाऽऽकृष्य वेणीस्ताः मुखलीकृत्य मुंचति॥१९॥
लोकोपालंभतो भीत्या मयकाऽयं निराकृतः। कृतवान् शस्त्रशिक्षार्थी शिष्यतां किल कस्यचित्॥२०॥
कंसमंजूषिका ह्येषा माता तिष्ठति नाहकं । तद्गुणैरस्य दोषैर्वा न स्पृश्ये स्पृश्यतामियं ॥२१॥
इत्युक्ते दर्शितायां च तया तस्यां व्यलोकत । तन्नाममुद्रिकां राजा ततो वाचयति स्म सः ॥२२॥
गर्भस्थोऽपि सुतोऽत्युग्रः पद्मावत्युग्रसेनयोः । जीवताद्वरमात्मीयैः कर्मभिः कृतरक्षणः ॥२३॥
वाचयित्वेति विज्ञाय राजा स्वस्त्रीयमात्मनः । हृष्टः कन्यां ददौ तस्मै संपन्नगुणसंपदां ॥२४॥
सद्यो जातं पिता नद्यां मुक्तवानिति स क्रुधा । वरीत्वा मथुरां लब्ध्वा सर्वसाधनसंगतः ॥२५॥
कंसः कालिंदसेनाया सुतया सह निर्घृणः । गत्वा युद्धे विनिर्जित्य बबंध पितरं द्रुतं ॥२६॥
महोग्रो भग्नसंचारमुग्रसेनं निगृह्य सः । अतिष्ठिपत् कनिष्ठाशः स्वपुरद्वारगोचरे ॥२७॥
वसुदेवोपकारेण हृतः प्रत्युपकारधीः । न वेत्ति किंकरोमीति किंकरत्वमुपागतः ॥ २८॥
अभ्यर्थ्य गुरुमानीय मथुरां पृथुभक्तितः । स्वसारं प्रददौ तस्मै देवकीं गुरुदक्षिणां ॥२९॥
आस्ते कंसोपरोधेन मथुरायां ततो यदुः । प्रदीव्य दिव्यदीप्त्याऽसौ देवक्या हारिवाक्यया ॥३०॥
सूरसेनमहाराष्ट्रराजधानीं द्विषंतपः । शशास मथुरां कंसो जरासंधातिवल्लभः ॥३१॥

जातुचिन्मुनिवेलायामतिमुक्तकमागतं । कंसज्येष्ठं मुनिं नत्वा पुरः स्थित्वा साविभ्रमं ॥३२॥
हसंती नर्मभावेन जगौ जीवद्यशा इति । आनंदवस्त्रमेतत्ते देवक्याः स्वसुरीक्ष्यतां ॥३३॥
तस्या निर्बंधचित्ताया प्रमत्ताया निवृत्तये । वचोगुप्तिमसौ भित्त्वा संसारस्थितिविज्जगौ ॥३४॥
अहो क्रीडनशीलायास्तवेयमतिमूढता । शोकस्थाने प्रपन्नासि यदानंदमनिंदिनि ॥ ३५ ॥
भविता यो हि देवक्या गर्भेऽवश्यमसौ शिशुः । पत्युः पितुश्च ते मृत्युरितीयं भवितव्यता ॥३६॥
ततो भीतमतिर्मुक्त्वा मुनिं साश्रुनिरीक्षणा । गत्वा न्यवेदयत्पत्ये सत्यं हि यतिभाषितं ॥३७॥
श्रुत्वा कंसोऽपि शंकावानाशु गत्वा पदानतः । वसुदेवं वरं वव्रे तीव्रधीः सत्यवाग्व्रतं ॥३८॥
स्वामिन्! वरप्रसादो मे दातव्यो भवता ध्रुवं । प्रसूतिसमये वासो देवक्या मद्गृहेऽस्त्विति ॥३९॥
सोऽप्यविज्ञातवृत्तांतो दत्तवान् वरमस्तधीः । नापायः शंक्यते कश्चित्सोदरस्य गृहे स्वसुः॥४०॥
पश्चाद्विदितवृत्तांतः पश्चात्तापहतांतरः । सहकारवनांतस्थमतिमुक्तकमाप्तवान् ॥ ४१ ॥
देवक्या सह वंदित्वा चारणश्रमणं स तं । दत्ताशिषमुपासृत्य पप्रच्छ मनसि स्थितं ॥४२॥
भगवन्नत्र कंसोऽयं कृतेनान्यत्र जन्मनि । पितुरेव रिपुर्जातः कर्मणा केन दुर्मतिः ॥ ४३ ॥
कथं वा मम पुत्रोऽस्य कंसस्य भविता विभो । हिंसकः पापचित्तस्य वद वांछामि वेदितुं ॥४४॥

इति पृष्टो मुनिः प्राह स दीप्रावधिलोचनः। संशयच्छेदिनी यस्मात्प्रवृत्तिर्दिव्यचक्षुषः ॥ ४५ ॥
आकर्णयस्व देवानांप्रिय ! सर्वजनप्रियः। कथयामि यथाप्रश्नं वस्तु जिज्ञासितं नृप ॥ ४६ ॥
मथुरायामिहैवासीदुग्रसेने तु राजनि। प्राक् पंचाग्नितपोनिष्ठो वसिष्ठो नाम तापसः ॥ ४७ ॥
एकपादस्थितश्चासावूर्ध्वबाहुर्वृहज्जटः। यमुनायास्तटे सोऽज्ञः तपस्तपति तापसः ॥ ४८ ॥
जलार्थं तत्र लोकानां घटदासीभिः सा तथा। भणिता जिनदासस्य चेटिकाऽहितबुद्धिभिः॥४९॥
प्रियंगुलतिके त्वस्य प्रणामं कुरु सत्वरं। सा चावादीन्न मे भक्तिरस्योपरि करोमि किं ॥ ५० ॥
ततो हठान्नामिताभिः सा जगौ धीवरस्य हे। पातिताह पदद्वंद्वे श्रवणाद्दुष्टो मूढधीः॥ ५१ ॥
गतो राजसमीपेऽसौ जगावाक्रोशितोप्यहं। श्रेष्ठिना जिनदत्तेन प्रभोऽहं कारणाद्विना ॥ ५२ ॥
राज्ञाऽऽनाय्य पृष्टोऽसौ जिनदत्तो बभाण तं। अस्य मे दर्शनं नास्ति किं शाप्यमब्रवीन्मुनिः॥५३॥
शापितश्चास्य दास्याऽहं पृष्टा आनाय्य तेन सा। कथं न नमसे पापे मुनिर्निंदयसि क्रुधा ॥५४॥
तयोक्तं न मुनिस्त्वेष धीवरोऽस्ति प्रभो कुधीः। जटाभारस्य नो अस्य शुद्धिः कुत्रापि दृश्यते॥५५॥
शोधिते बहवो मत्स्याः सूक्ष्मास्तेभ्यश्च निर्गताः। लज्जितो हसितो लोकैर्मृषावादी त्वसौ मुनिः॥५६॥

यदा परीक्षितो राज्ञा तदा कोपं विधाय सः । प्रकाशितनिजाज्ञानो मथुराया विनिर्गतः ॥५७॥
वाराणसीं समासाद्य समासादितनिश्चयः । गत्वा वाह्यश्च गंगायाः संगमे कुरुते तपः ॥ ५८ ॥
वीरभद्रगुरुश्चागात् सपंचशतशिष्यकः । तद्देशं तत्र चैकेन नवप्रव्रजितेन सः ॥ ५९ ॥
प्रशंसितो वशिष्ठोऽयमहो घोरतपा इति । वारितः स तपः कीदृगज्ञानस्येति सूरिणा ॥ ६० ॥
वशिष्ठेन किमज्ञोऽहमित्युक्तो गुरुरब्रवीत् । त्वं षड्जीवनिकायानां पीडनादज्ञ इत्यसौ ॥ ६१॥
पंचाग्नितपसि प्रायो नियोगो दहनस्य हि । दह्यंते तेन चावश्यं पंचैकविकलेंद्रियाः ॥ ६२ ॥
पृथिव्यप्तेजसां वायोः प्राणिनां च वनस्पतेः । प्रघाते ज्ञानहीनस्य कुतः स्यात् प्राणिसंयमः॥६३॥
विरागस्यापि मिथ्यादृग्ज्ञानचारित्रमानिनः । संज्ञानपूर्वको जंतोः कुतश्चेंद्रियसंयमः ॥ ६४ ॥
केवलं कायसंतापं भजमानस्य मानिनः । सम्यक्संयमहीनस्य तापस्यं मुक्तये कुतः ॥ ६५ ॥
जैन एव हि सन्मार्गे संयमस्तप एव च । दर्शनं चापि चारित्रं ज्ञानं चाशेषभासनं ॥ ६६ ॥
अवेहि तापसात्मीयं पितरं व्यालतां गतं । ज्वालाधूमावलीव्याप्ते दह्यमानमिहेंधने ॥ ६७ ॥

---

१ श्रेष्ठिनो जिनदत्तस्य भृत्यथाऽज्ञान इत्यसौ । हेतोः कुतोऽप्यधिक्षिप्तः प्रियंगुलतिकाख्यया ॥
क्रुद्धो राजानमद्राक्षीद् राज्ञा चापि परीक्षितः ॥ इति ख घ पुस्तकयोः ।

इत्युक्ते तापसः काष्ठं कुठारेण विपाट्य सः । ददर्श दंदशूकं तं दह्यमानं तदाकुलं ॥ ६८ ॥
कृततापसधर्मस्य ब्रह्माख्यस्वपितुर्गतिं । कुत्सितां भवगम्यासावज्ञत्वं चापि चात्मनः ॥ ६९ ॥
ज्ञात्वा च जैनधर्मस्य ज्ञानपूर्वकतां तथा । वीरभद्रगुरोरंते वशिष्ठोऽधिष्ठितस्तपः ॥ ७० ॥
एको लाभांतरायस्य कर्मणः परिपाकतः । तपस्यतामभूत् साधुः स भिक्षालब्धिवर्जितः ॥ ७१ ॥
स पर्युपासनाहेतोरागमागमनाय च । शिवगुप्तयतेर्यत्नात् गुरुणापि समर्पितः ॥ ७२ ॥
संतप्तस्य स षण्मासान् वीरदत्ते न्ययोजयत् । तथा सोऽपि सुमत्याख्ये षण्मासान् सोऽप्यपालयत् ॥७३॥
यतिधर्मविधानज्ञः परीषसहस्ततः । बभूवैकविहारी स वशिष्ठो विदितः क्षितौ ॥ ७४ ॥
मथुरायामथ संप्राप्तो विहरन् स महातपाः । पूज्यते च प्रजापालप्रजाभिर्गुरुवत्तया ॥ ७५ ॥
धृतातपनयोगं तं मुदा पर्वतमस्तके । समेत्योचुस्तपोवश्याः किं कुर्मस्तेऽथ देवताः ॥ ७६ ॥
कर्तव्यं मम नास्तीति स निषिध्य तपोधनः । व्यसर्जयद्धि तद्वश्या गताश्च वनदेवताः ॥ ७७ ॥
मासोपवासिने तस्मै निस्पृहाय तपस्विने । पारणास्वन्नदानाय स्पृहयंत्यखिलाः प्रजाः ॥ ७८ ॥
उग्रसेनोऽन्यदा दातुं पारणां तमयाचत । न्यवारयत्तदा दातॄन् मथुरावासिनोऽखिलान् ॥ ७९ ॥
पारणासु नृपस्तस्य विसस्मार तिसृष्वपि । दृताग्निद्विरदक्षोभव्यासंगेन प्रमादवान् ॥ ८० ॥

अटित्वा मथुरां सर्वामलाभे श्रमपीडितः । श्रमणोंऽते विशश्राम नगरद्वारि सोऽन्यदा ॥ ८१ ॥
तं दृष्ट्वा केनचित्प्रोक्तो हा कष्टं भूभृता कृतं। भिक्षां स्वयं न दत्तेऽस्मै परानपि निषिद्धवान् ॥८२॥
तदाऽऽकर्ण्य रुषा तेन ध्यातास्ताः पूर्वदेवताः। कार्यं कुर्यात मेऽन्यस्मिन् जन्मनीति विनिर्ययौ॥८३॥
निकारायोग्रसेनस्य प्रकृतोग्रानिदानतः । स मिथ्यात्वमितो मृत्वा पद्मावत्युदरेऽवसत् ॥ ८४ ॥
तस्मिन् गर्भस्थिते देवीमेकांते कृशविग्रहां । नृपः पप्रच्छ तां कांते दौहृद्यं ते किमित्यसौ ॥८५॥
नाथावाच्यमचिंत्यं च गर्भदोषेण चिंतितं । इत्युक्ते स त्वयाऽवश्यं वाच्यमित्यवदन्नृपः ॥ ८६ ॥
साऽस्य निर्बंधतो वाचा दुःखगद्गदयाऽगदीत् । विपाद्य जठरं पातुं रुधिरं तव मे स्पृहा ॥ ८७ ॥
सचिवोपायतस्तस्या दौहृदं विहिते ततः । असूत तनयं देवी भ्रकुटीकुटिलाननं ॥ ८८ ॥
गर्भप्रभृतिरौद्रं तं कंसमंजूषिकाकृतं । देव्यमोचयदेकांते प्रवाहे यामुने भयात् ॥ ८९ ॥
अवीवृधदसौ लब्ध्वा कौशांब्यां सीधुकारिणी । कृतकंसाभिधं शेषं तदापि विदितं नृप ॥ ९० ॥
निदानदोषदुष्टोऽयं कृतवान् पितृनिग्रहं । उग्रसेननृपं चापि मोचयिष्यति ते सुतः ॥९१॥
नृपोक्तः कंससंबंधः पितृबंधनिबंधनः । वच्मि ते पुत्रसंबंधं शृणु संधाय मानसं ॥९२॥
देवक्याः सप्तमः सुनुः शंखचक्रगदासिभृत् । निहत्य कंसपूर्वारीन् निःशेषां मोक्ष्यति क्षितिं ॥९३॥

चरमोत्तमदेहास्तु शेषाः षडपि सूनवः। न तेषामपि मृत्युः स्यादाधिव्याधिमतस्त्यज ॥९४॥
रामभद्रसमेतानां तेषां जन्मांतराणि ते। भणामि श्रणु सस्त्रीकश्चित्तप्रीतिकराण्यहं ॥९५॥
सूरसेननृपे पाति मथुरां भानुरित्यभूत्। इभ्यो द्वादशकोटीशो यमुना तस्य भामिनी ॥९६॥
सुभानुर्भानुकीर्तिश्च भानुषेणस्तथा परः। शूरश्च सूरदेवश्च शूरदत्तस्तथैव च ॥९७॥
शूरसेनश्च सप्तैते यमुनाभानुसूनवः। अभिरामाः स्वभावेन तेऽन्योऽन्यानुगतास्तदा ॥९८॥
कालिंदी तिलका कांता श्रीकांता सुंदरी द्युतिः। चंद्रकांता च तत्कांता क्रमेण कुलबालिकाः ॥९९॥
भानुः प्राव्रजदंतेऽसौ गुरोरभयनंदिनः। तथा यमुनदत्तापि जिनदत्तार्यिकांतिके ॥१००॥
द्यूतवेश्याप्रसंगेन विनाश्य द्रविणं पितुः। चौर्यार्थं भ्रातरः सर्वे गतास्तूज्जयिनीं पुरीं ॥१०१॥
कनीयांसं महाकाले संतत्यर्थं निधाय ते। प्राविशन् निशि निःशंकाः पुरीं षडपि चेतरे ॥१०२॥
कमलायास्तदा भर्त्ता राजाऽत्र वृषभध्वजः। वप्रश्रीवल्लभस्तस्य दृष्टमुष्टिर्भटोत्तमः ॥१०३॥
स वज्रमुष्टये मंगीं स्वांगजायांगजार्त्तये। राज्ञा विमलचंद्रेण विमलाजामदापयत् ॥१०४॥
सातिवल्लभिका तस्य वल्लकीवांगवर्तिनी। श्वश्रूशुश्रूषया मंगी संगता नानुवर्त्तते ॥१०५॥
अंतःकलुषिणी साऽस्याः सततापायचिंतनी। उपायं चिंतयंत्यास्ते छद्मना तद्वियोजने ॥१०६॥

सा वसंतोत्सवे रंतुं वनं प्रमदपूर्वकं । द्राङ् मामन्वेहि मंगीति राज्ञा मा प्रागतेऽगजे ॥१०७॥
माल्यदानापदेशेन तामादिष्टां वधूं कुधीः । संदष्टां दंदशूकेन धूपिनेन घटोदरे ॥१०८॥
मूर्च्छितां विषवेगेन श्वश्रूर्भृत्यैरजीहरत् । श्मशानं तन्महाकालं कालस्यापि भयंकरं ॥१०९॥
स रात्रौ गृहमागत्य ज्ञात्वा वृत्तांतमाविशत् । महाकालं महास्नेहादन्वेष्टुं स्वप्रियां प्रियः ॥११०॥
खड्गदीप्रकरः सोऽयं तच्छ्मशानमशंकितः । रात्रिप्रतिमयाऽपश्यद् वरधर्ममुनिं स्थितं ॥१११॥
त्रिःपरीत्य स तं नत्वा जगौ ते पादपूजनं । कुर्वे पद्मसहस्रेण मुने ! मंगीं लभे यदि ॥११२॥
उक्त्वेति प्रगतो लब्ध्वा स तामानीय मानिनीं । महामुनिपदस्पर्शान्निर्विषां विदधे वधूं ॥११३॥
मुनिपादोपकंठेऽसौ तावत्तिष्ठेत्युदीर्य तां । सुदर्शनं सरो यातः पद्मानामानिनीषया ॥११४॥
सूरसेनस्तमादर्श्य महास्नेहं प्रियां प्रति । स जिज्ञासुर्मनस्तस्या रूपी रूपमदर्शयत् ॥११५॥
गूढधीः कृतसल्लापस्तया सकृतमंत्रणः । तस्य दर्शनमात्रेण जाताऽसौ कामविह्वला ॥११६॥
तमागत्याब्रवीद् देव ! मामिच्छ कृपयान्वितः । स बभाण करोम्येवं कथं भर्तरि जीवति ॥११७॥
बिभेम्यतः प्रियेऽवश्यं वीर्यान्वितभटादहं । त्वं मा कुर्वीर्भयं नाथ ! सा तं प्राह सुरक्तधीः ॥११८॥
असिना घातयाम्येनं तेनाभ्युपगतं यदा । तत्र गूढतनुस्तस्थौ तत्कृत्यं तद्दिदृक्षया ॥११९॥

आगत्याभ्यर्च्य साध्वंह्री नमतोऽस्य शिरस्यसिः। मुक्तस्तया निरुद्धो द्राक् शूरसेनेन तेन सः॥१२०॥
अंतर्हितवपुर्यातः सूरसेनो विरक्तधीः। ततोऽनु मायया मंगी तस्य स्पर्शेण शंकिता ॥१२१॥
स्वदोषच्छादनायासौ पपात धरणीतले। भर्त्रा पृष्टा प्रिये किं तु केनचिद् भीषिताऽत्र हि ॥१२२॥
न किंचिदपि चास्त्यत्र तां प्रबोध्य भयातुरां। वज्रमुष्टिर्मुनिं नत्वा सकांतः स्वगृहं गतः॥१२३॥
चौरास्ततः समागत्य चौर्याल्लब्धधनं तदा। विभज्य समभागेन स्वं गृहाणेति तं जगुः॥१२४॥
अनिच्छन् शूरसेनोऽपि जगौ दारार्थमर्थिनः। घटंतेऽनर्थकार्ये ते वज्रमुष्टिस्त्रियः समाः॥१२५॥
दृष्ट्वा श्रुत्वा च वृत्तांतं षट् कनिष्ठाः विरागिणः। प्राव्रजन् वरधर्मांते ज्येष्ठेभ्योऽप्यनयद् धनं॥१२६॥
सप्तसु श्रुतवार्त्तासु निष्क्रांतास्वथ तास्वपि। तस्यैव म गुरोरंते सुभानुः प्राव्रजत्सुधीः ॥१२७॥
मुनीन् कालांतरेणामूनागतान् वीक्ष्य सूरिणा। दीक्षाहेतुमसौ पृष्ट्वा वज्रमुष्टिरदीक्षत ॥१२८॥
आर्यिकास्तास्तथा पृष्ट्वा जिनदत्तापुरःसराः। मंगी संस्मृतवृत्तांता प्रवव्राज दृढव्रता ॥१२९॥
भृतघोरतपोभाराः सर्वेऽप्याराध्य तेऽभवन्। सौधर्मे चार्णवायुष्कास्त्रायस्त्रिंशत्सुरोत्तमाः॥१३०॥
पूर्वस्मिन् धातकीखंडे भारते रौप्यपर्वते। च्युत्वा दक्षिणश्रेण्यां नित्यालोकपुरोत्तमे ॥१३१॥
चित्रचूलमनोहर्यो ज्येष्ठचित्रांगदोऽग्रजः। यज्ञे त्रिद्वंदगर्भास्तु क्रमेणैव तथोत्तरे ॥१३२॥

कांतौ गरुडसेनौ द्वौ गरुडध्वजवाहनौ । चूलौ मणिहिमादी च व्योमानंदचरौ वरौ ॥१३३॥
अभिरूपतमाः सर्वे भूरिविद्योद्यताः स्थिताः । चित्रचूलसुता मूर्ध्नि ते चूलामणयो नृणां ॥१३४॥
राजा मेघपुरे चैव सर्वश्रीशो धनंजयः । धनश्रीरिति विख्याता तस्य कन्यातिरूपिणी ॥१३५॥
स्वयंवरमगुस्तस्या विश्वे विद्याधरात्मजाः । तत्रात्ममैथुनं बव्रे कन्याऽसौ हरिवाहनं ॥१३६॥
वयं स्वयंवरव्याजात्स्वविवाहाय मायया । समाहूता इति क्रुद्धास्तत्पित्रे गगनायनाः ॥१३७॥
परस्परवधं चक्रुस्ते तत्कन्यार्थिनस्ततः । चित्रचूलसुता निंद्यं दृष्ट्वा क्षत्रवधं तकं ॥१३८॥
पापहेतुं विनिंद्याक्षविषयान् विषमानमी । भूतानंदजिनस्यांते प्रव्रज्यां ते प्रपेदिरे ॥१३९॥
सप्ताप्याराध्य माहेंद्रे सप्ताब्ध्युपमजीविताः । सामानिकसुरा भूत्वा सुखं बुभुजिरे चिरं ॥१४०॥
ततश्च्युत्वाऽग्रजोऽत्रैव भारते हास्तिनाह्वये । नगरे श्रेष्ठिनः शंखो बंधुमत्यामभूत्सुतः ॥१४१॥
इतरे गंगदेवस्य तत्पुरेशस्य भूपतेः । नंदना नंदयशसो द्वंद्वभूतास्तु जज्ञिरे ॥१४२॥
गंगश्च गंगदत्तश्च गंगरक्षतकस्तथा । नंदश्चापि सुनंदश्च नंदिषेणश्च सुंदरः ॥१४३॥
सप्तमस्तु सुतो देव्या गर्भे दौर्भाग्यदग्धया । त्यक्तः संवर्धितश्चासौ धात्र्या रेवतिकाख्यया ॥१४४॥
शंखो जातोऽन्यदाऽऽदाय तं निर्नामकनामकं । हृद्यं मनोहरोद्यानं पौरलोकसमाकुलं ॥१४५॥

भुंजानानाह राजन्याँस्तत्र राजसुतैः सह । भोक्तुं नाहूयते कस्मादयं निर्नामकोऽनुजः ॥१४६॥
आहूतस्तैरसौ भोक्तुमासीनः सोदरैः सह । राज्ञामागतया मात्रा कोपात्पादेन ताडितः ॥१४७॥
धिग् मदुधेतोरयं दुःखं निर्नामा प्राप्तवानिति । दुःखी शंखस्तमादाय गत्वा गजादिभिर्वने ॥१४८॥
द्रुमषेणर्षिमेकांते दृष्ट्वा नत्वा स पृष्टवान् । निर्नामकस्य जन्मानि सावधिः सोऽभ्यधान्मुनिः ॥१४९॥
आसीच्चित्ररथो राजा नगरे गिरिपूर्वके । कामिनी गुणिनी यस्य कांता कनकमालिनी ॥१५०॥
मांसप्रियस्य तस्यासीत्सूदोऽमृतरसायनः । राज्ञा च मांसपाकज्ञो दशग्रामेश्वरः कृतः ॥ १५१ ॥
मांसदोषं नृपः श्रुत्वा सुधर्मात्त्रिशतैर्नृपैः । क्षिप्त्वा मेघरथे लक्ष्मीमदीक्षिष्ट मुमुक्षया ॥ १५२ ॥
नवराजेन सूदोऽपि श्रावकेन सता ततः । निर्मदीकृत्य मास्पाको ग्राममात्रपतिः कृतः ॥१५३॥
सूदेन कुपितेनासौ मुनिर्मांसनिषेधनः । कट्वालांबुविषाहारं दत्त्वा प्राणैर्वियोजितः ॥ १५४ ॥
उर्जयंतगिरौ मृत्वा स्वयोगादूर्जितादभूत् । द्वात्रिंशदाब्धितुल्यायुः सोऽहमिंद्रोऽपराजिने ॥१५५॥
सूपकारो मृतः प्राप पृथिवीं बालुकाप्रभां । त्रिसमुद्रोपमं कालं नारकं दुःखमन्वभूत् ॥ १५६ ॥
ततश्चोद्वर्त्य पर्यटच्य तिर्यग्गतिमहाटवीं । सोऽगी मलयराष्ट्रांतःपलाशग्रामवर्त्तिनोः ॥ १५७ ॥
कुटुंबिनोर्जडप्रायोर्यक्षिलायक्षदत्तयोः । यक्षस्थावरजो नाम्ना सूनुर्यक्षलिकोऽभवत् ॥ १५८ ॥

स भ्रात्रा वार्यमाणोऽपि पर्यटन् शकटं शठः। उपरिष्टात्ततोग्राहेरवाहयदनिष्टकृत्॥ १५९॥
भग्नभोगा भुजंगी तु म्रियमाणातिदुःखतः। अकामनिर्जरायोगात् मानुष्यगतिमार्जयत्॥१६०॥
मृत्वा श्वेतांबिकापुर्यां वासवस्य महीपतेः। जाता वसुंधरी गर्भे देवी नंदयशास्त्वियं॥१६१॥
सोऽयं यक्षलिको नाम्ना निर्नामा मुनिमारणात्। निर्दयत्वाच्च पूर्वत्र मात्रा विद्वेषतां गतः॥१६२॥
श्रुत्वा तद्द्विशतक्षत्रै राजा संसारभीरुधीः। देवनंदे श्रियं न्यस्य तस्यांते दीक्षितो मुनेः॥१६३॥
राजपुत्राश्च ते सर्वे श्रेष्ठी शंखश्च दीक्षितः। सुनिर्मलं तपश्चक्रुर्भवचक्रनिवृत्तये॥ १६४॥
राज्ञी चापि सधात्रीका बंधुमत्या सहाश्रिता। प्रव्रज्यां सुव्रतार्यांते सुव्रतव्रातभूषितां॥ १६५॥
कुर्वन्निर्नामकस्तीव्रं सिंहनिःक्रीडितं तपः। निदानमकरोदन्यजनने जनकांतिकं॥ १६६॥
धात्री मानुष्यकं प्राप्ता पुरे भद्रिलसाह्वये। सुदृष्टिश्रेष्ठिनो भार्या वर्तते ह्यलकाभिधा॥ १६७॥
गंगाद्या देवकीगर्भे षडपि द्वंद्वभाविनः। उत्पत्स्यंते क्रमेणैकविक्रमैकमहार्णवाः॥ १६८॥
हारिणा स्वर्गिणा धात्रीं सूत्रामादेशकारिणा। प्राप्स्यंते यातमात्रेण तत्राप्स्यंति च यौवनं॥१६९॥
नृपदत्तोऽग्रजस्तेषां देवपालस्तथाऽपरः। तृतीयोऽनीकदत्तस्तु तुरीयोऽनीकपालकः॥ १७०॥
शत्रुघ्नजितशत्रुस्ताविति नामभिरीरिताः। रूपेण सदृशाः सर्वे भविष्यंति तवात्मजाः॥ १७१॥

हरिवंशशशांकस्य जिनस्य त्रिजगद्गुरोः । शिष्यतां ते करिष्यंति गमिष्यंति च निर्वृतिं॥१७२॥
आगत्य देवकी गर्भे निर्नामा देवकीसुतः । उत्पद्य भविता वीरो वासुदेवोऽत्र भारते ॥ १७३ ॥

श्रुत्वा कंसभवांतरं तदुदयं संचिंत्य पुण्योदयात्
सोपेक्षांतरमित्रतामुपगतोऽप्यत्राभवत्कालवित् ॥
आकर्ण्याष्टसुतप्रियासुचरितं चामुत्र चेहात्र च
प्राप्तः सम्मदमुन्नतं जिनमतश्रीशंसनो यादवः ॥ १७४ ॥

इति "अरिष्टनेमिपुराणसंग्रहे" हरिवंशे जिनसेनाचार्यकृतौ कंसोपाख्यानबलदेववासुदेवदेवकीतनयानगार चारित्रवर्णनो नाम त्रयस्त्रिंशः सर्गः ।

चतुस्त्रिंशः सर्गः ।

स्ववंशभाविनं श्रुत्वा जिनेंद्रं देवकीप्रियः । हृष्टः श्रेणिक ! नत्वेति पृष्टवानतिपुक्तकं ॥१॥
कथं नाथ ! जिनो भावी हरिवंशविशेषकः । चरितं श्रोतुमिच्छामि तस्येत्युक्तेऽवदन्मुनिः ॥२॥
द्वीपेऽत्रैव सुपद्मायां शीतोदायास्त्वपाक्तटे । अभूत् सिंहपुरे भूभृदर्हद्दासो महार्हतः ॥३॥

जायाऽस्य जिनदत्ताऽसौ कृतोरुजिनपूजना । लेभे श्रीभमृगेंद्राकचंद्रसुस्वप्नदृक् सुतं ॥ ४ ॥
अपराजित इत्याख्यां स परैरपराजितः । पितृभ्यां लंभितो द्यावापृथिव्योः प्रथितां ततः ॥५॥
पुत्रीं चक्रभृतस्तत्र पवित्रगुणमालिनीं । कन्यां प्रीतिमतीं मान्यामुपयेमे स यौवने ॥६॥
तमन्योऽन्यातिशयिन्यो मानिन्यो गुणमंडनाः । कन्याश्चारीरमद्रन्याः सहस्रगणनाः पतिं ॥७॥
राजा मनोहरोद्याने वंद्यं देवैर्विवंदिषुः । अन्येद्युः ससुतो यातो जिनं विमलवाहनं ॥८॥
प्रवव्राज नृपोऽस्यांते पंचराजशतान्वितः । बभ्रेऽपराजितो राज्यं सम्यक्त्वं चैव निर्मलं ॥९॥
जिनेंद्रपितृनिर्वाणं गंधमादनपर्वते । श्रुत्वा कृत्वाऽष्टमं भक्तं कृतनिर्वाणभक्तिकः ॥ १० ॥
जिनार्चां चैत्यगेहार्चां समर्च्य धनदार्पितां । आसीनो जातु जायाभ्यो धर्मं स प्रौषधोऽबुधत् ॥११॥
काले तत्र मुनी व्योमचारणाववतेरतुः । नत्वा क्षितौ सुखासीनौ पप्रच्छेति कृतांजलिः ॥१२॥
तोषः साधुषु मे नाथौ ! जैनस्याकृत्रिमो युवां । अपूर्वौ वीक्ष्य किं जातः सहजस्नेहवर्त्मनः ॥१३॥
अस्ति तत्पूर्वसंबंधः स्नेहाधिक्यप्रबोधनः । राजन्नित्याह तत्राद्यः स्रवन्निव गिरामृतं ॥१४॥
पाश्चात्यपुष्करार्द्धस्य विदेहस्यापरस्य हि । रौप्याद्रेरुत्तरश्रेण्यामस्ति गण्यपुरं पुरं ॥१५॥
सूर्याभवित्तु (नु) रस्यासासीत्सूर्याभ इति भूपतिः । धारिणी धारिणीवार्या गृहिणी तस्य हारिणी॥१६॥

पुत्रास्त्रयस्तयोश्चिंतामनश्चपलपूर्वकाः । गत्यंता वेगवंतस्ते स्नेहवंतः सुपौरुषाः ॥ १७ ॥
तत्रैवारिंजयो राजा पुरेऽरिंजयसंज्ञके । कन्याऽस्याजितसेनायां जाता प्रीतिमती वरा ॥ १८ ॥
सिद्धविद्या प्रसिद्धाऽसौ स्त्रैणगर्हणकारिणी । गुरुं प्राह वरं देहि पितरेकमभीप्सितं ॥ १९ ॥
कन्याकूतविदूचे स वृणीष्व वरमीप्सितं । तपसोऽन्यमितीदं च श्रुत्वाऽह प्रीतिमत्यपि ॥ २० ॥
तपो वरप्रसादो मे पितर्यदि न दीयते । गतियुद्धे विजेत्रेऽहं देयत्येष वरोऽस्तु मे ॥ २१ ॥
तथाऽस्त्वित्यभिधायासावाजुहाव नभश्चरं । स्वयंवरे स्वकन्याया गतियुद्धजिगीषया ॥ २२ ॥
विश्वान् विद्याधरान् प्राप्तान् प्राह कन्यापिता ततः । गतियुद्धे समर्थोऽस्या ददातुर्दुहितुर्मम २३॥
मेरुं प्रदक्षिणीकृत्य कृत्वा जिनवरार्चनं । प्राप्तस्येह द्वयोः पूर्वमेकस्य विजयो मतः ॥ २४ ॥
जीयेत येन कन्येयं गतियुद्धेऽतिवेगिना । परिणेया तेन वीरेण मन्मनोरथपूरिणा ॥ २५ ॥
श्रुत्वेति खचरास्तस्थुर्ज्ञात्वा विद्याधिकाममूं । विद्यावेगोद्यता योद्धुमुत्तस्थुर्धारिणीसुताः ॥२६॥
ततः परिकरं बद्ध्वा चेतसा च समं तदा । करमास्फाल्य लोकेन मुक्ता माध्यस्थमीयुषा ॥२७॥
अहंयवो दधावुस्ते सार्द्धमर्द्धपथं पथा । मारुतां मेरुमुद्दिश्य हरंतो मरुतां रयं ॥ २८ ॥
अतिक्रम्य तथा कन्या परीत्य सुरपर्वतं । भद्रशालवनेऽभ्यर्च्य जिनार्चाः प्राङ् न्यवर्तत ॥२९॥

वेगश्रमागतस्वेदलवमुक्ताफलार्चिता । प्राप्य नत्वा ददौ पित्रे सिद्धशेषां प्रमोदिने ॥ ३० ॥
ततो लब्धजया पित्रा मुक्ता मुक्तैहिकस्पृहा । [1]निर्वृत्त्यंते प्रवव्राज व्रतव्रातविभूषिता ॥ ३१ ॥
गतियुद्धे जितास्तेऽपि चिंतागत्यादयस्तथा । दीक्षां दमवरस्यांते त्रयोऽपि भ्रातरो दधुः ॥३२॥
अंते माहेंद्रकल्पांते प्राप्तसप्ताब्धिजीविनः । सामानिकास्त्रयोऽप्यत्र दिव्यं बुभुजिरे सुखं ॥ ३३ ॥
प्रच्युत्य पुष्कलावत्यामुदक्श्रेण्यां ततो नृपः । मध्यमावरजौ जातौ पुरे गगनवल्लभे ॥ ३४ ॥
सुतौ गगनसुंदर्यां गगनेंदोः क्रमेण तौ । प्रथमोऽमितवेगाख्योऽमिततेजास्ततोऽनुजः ॥ ३५ ॥
दीक्षित्वा पुंडरीकिण्यां स्वयंप्रभजिनांतिके । श्रुत्वा पूर्वभवांस्तस्मात्तावावामिह पार्थिव ॥३६॥
पूर्वं प्रच्युत्य माहेंद्रात्प्रजातमपराजितं । ज्यायांसं द्रष्टुमायातौ त्वां चिंतागतिपूर्वकं ॥ ३७ ॥
अरिष्टनेमिनामार्हन् भविता भरतावनौ । हरिवंशमहावंशे त्वमितः पंचमे भवे ॥ ३८ ॥
आयुर्मासावशेषं ते सांप्रतं पश्यमात्मनः । क्रियतामिति तावुक्त्वा तमापृच्छ्य गतौ यती ॥३९॥
श्रवणीयं वचः श्रुत्वा चारणश्रमणस्य सः । प्रहृष्टोऽपि चिरं दध्यौ तपः कालव्यतिक्रमं ॥४०॥
अष्टाहं प्रविधायासौ जिनेंद्रमहिमां ततः । प्रीतिंकरे श्रियं न्यस्य शरीरादिषु निस्पृहः ॥४१॥

१ निर्वृत्तिनामिकार्यिकासमीपे ।

स द्वाविंशत्यहोरात्री प्रायोपगमनांचितौ । आराध्यापाच्युतेंद्रत्वं द्वाविंशत्यब्धिजीवितः ॥ ४२ ॥
च्युत्वा गजपुरे जज्ञे जिनेंद्रमतभावितः । श्रीचंद्रश्रीमतीसूनुः सुप्रतिष्ठः प्रतिष्ठितः ॥ ४३ ॥
सुप्रतिष्ठं प्रतिष्ठाप्य राज्ये श्रीचंद्रचंद्रमाः । सुमंदिरगुरोरंते दीक्षित्वा मोक्षमाप्तवान् ॥ ४४ ॥
श्रीचंद्रात्मजराजोऽसौ दानं मासोपवासिने । यशोधराय दत्त्वाऽऽप वसुधारादिपंचकं ॥ ४५ ॥
कार्तिक्यामन्यदा रात्रावष्टस्त्रीशतवेष्टितः । तिष्ठन्पतनमुल्काया दृष्ट्वा लक्ष्मीं सुदृष्टये ॥४६॥
सुनंदासूनवे दत्वा सुमंदिरमहागुरोः । सुप्रतिष्ठोऽप्यदीक्षिष्ट दृष्टोल्कासदृशं श्रियं ॥ ४७ ॥
चतुःसहस्रसंख्याताः सहस्रकिरणौजसः । प्रातिष्ठंत तपस्युग्रे सुप्रतिष्ठेन पार्थिवाः ॥४८॥
ज्ञानदर्शनचारित्रतपोवीर्यविवृद्धिमान् । अध्यैष्ट सोंऽगपूर्वाणि सरहस्यान्यतंद्रितः ॥ ४९ ॥
तपोविधिविशेषैः स सर्वतोभद्रपूर्वकैः । वपुर्विभूषयांचक्रे सिंहनिःक्रीडितोत्तरैः ॥५०॥
श्रवणादपि पापघ्नानुपवासमहाविधीन् । शृणु यादव ! ते वच्मि समाधाय मनः क्षणं ॥५१॥
एकादिषूपवासेषु पंचांतेषु यथाक्रमं । अंतयोः कृतयोरादौ शेषभंगसमुद्भवे ॥५२॥
कल्पितश्चतुरस्रोऽयं प्रस्तारः पंचभंगकः । सर्वतोऽप्युपवासाश्च गण्याः पंचदशाऽत्र हि ॥५३॥
पंचभिर्गुणितास्ते स्युः संख्यया पंचसप्ततिः । ताडिताः पंचभिः पंच पारणाः पंचविंशतिः ॥५४॥

सर्वतोभद्रनामायमुपवासविधिः कृतः[1] । विधत्ते सर्वतोभद्रं निर्वाणाभ्युदयोदयं ॥५५॥
पंचादिषु नवांतेषु भद्रोत्तरवसंतकः[2] । विधिस्तत्रोपवासास्तु पंचत्रिंशत्समं परं ॥५६॥
सप्तांतेष्वेकपूर्वेषु प्रस्तारे सप्तभंगके । आद्ययोः कृतयोरंते सर्वभंगेष्वनुक्रमं ॥५७॥
अष्टाविंशतिरिष्टास्ते सर्वतः सप्तपारणाः । स महासर्वतोभद्रः[3] सर्वतोभद्रसाधनः ॥५८॥
पंचाद्या यत्र रूपांता द्व्याद्यास्ते चतुरंतकाः । आद्या रूपांतकाः स त्रिलोकसारः स्मृतो विधिः॥५९॥

---

१ सर्वतोभद्रयंत्रोऽयम् —

पारणा	१	१	१	१	१
उपवास	१	२	३	४	५
पा.	१	१	१	१	१
उ.	४	५	१	२	३
पा.	१	१	१	१	१
उ.	२	३	४	५	१
पा.	१	१	१	१	१
उ.	५	१	२	३	४
पा.	१	१	१	१	१
उ.	३	४	५	१	२

२ वसंतभद्र	१	१	१	१	१
	५	६	७	८	९

३—१, २, ३, ४, ५, ६, ७ । ३, ४, ५, ६, ७, १, २ । ५, ६, ७, १, २, ३, ४ । ७, १, २, ३, ४, ५, ६ । २, ३, ४, ५, ६, ७, १ । ४, ५, ६, ७, १, २, ४ । ६, ७, १, २, ३, ४, ५ । एषाम् सप्तपंक्तयः, एकैकांकरूपा सप्तपारणापंक्त्यश्च महासर्वतोभद्रे ।

प्रस्तारश्चास्य विन्यस्य त्रिलोकाकृतिरत्र तु । धारणा पारणाश्चापि त्रिंशदेकादशक्रमात् ॥६०॥
फलमस्य विधेः श्रेष्ठं कोष्ठबीजादिबुद्धयः । त्रिलोकसारभूतं च त्रिलोकशिखरे सुखं ॥६१॥
क्रमेणाद्यंतमध्येषु यः पंचकोपवासकः । वज्रमध्यो विधिः स स्याद् गण्याः पारणधारणाः॥६२॥
शक्रचक्रिगणेशत्वं समनःपर्ययोऽवधिः । प्रव्रज्याश्रमणतो मोक्षो वज्रमध्यविधेः फलं ॥६३॥
द्व्याद्यास्ते यत्र पंचांता द्व्यंताश्च चतुरादयः । विधिर्मृदंगमध्योऽयं मृदंगाकृतिरिष्यते ॥६४॥
क्षीरश्राविक्त्वमक्षीणमहानसगुणादिकाः । लभ्यते विधिरेते च फलं निर्वाणमस्य च ॥६५॥
पंचादयो द्विपर्यंताः पंचांता द्व्यादयः परे । विधिर्मुरजमध्योऽस्य फलं चानंतरं श्रुतं ॥६६॥
चतुर्थकानि यत्र स्युश्चतुर्विंशतिरेव सा । एकावली फलं तस्याः सुखमेकावलीस्थितं ॥६७॥
यत्र षष्ठोपवासाः स्युश्चत्वारिंशत्तथाष्ट च । द्विकावलीयमुद्दीता लोकद्विकसुखावली ॥६८॥
एकाद्या यत्र पंचांता एकांताश्चतुरादिकाः। मुक्तावलीयमाख्याता ख्याता मुक्तावली यथा॥६९॥
नांतरीयकमेतस्या लोकालंकरणं फलं । मुक्तालयपरिप्राप्तिस्ते चात्यंतिकं फलं ॥ ७० ॥
पंचांता यत्र चैकाद्याः पंचाद्येकांतिका पुनः । रत्नावलीयमस्याश्च फलं रत्नावलीगुणाः ॥७१॥
रूपांतराख्यं च दशावसाना रूपांतराः षोडश यत्र चाग्रे ।
रूपोनकास्तत्परमंतरूपाः मुक्तावलीयं खलु रत्नपूर्वा ॥ ७२ ॥

द्विशत्यशीतिश्चतुरुत्तराः स्युरत्रोपवासाः परिगण्यमानाः ।
एकोनषष्टिश्च हि भुक्तिकालाः फलं तु रत्नत्रयसारलब्धिः ॥ ७३ ॥

एको द्वौ च नव त्रिकाण्यपि ततश्चैकादिभिः षोडश
प्राग्भिस्तद्गणिताश्चतुस्त्रिकयुतं त्रिंशत्त्रिकाण्येव तु ।
रूपांतान्यपि षोडशप्रभृतयो रंध्रं द्विकं त्र्येकके
यत्रैषा कनकावली प्रकुरुते लौकांतिकत्वं फले ॥ ७४ ॥

द्विघ्ने संकलिते हि षोडशगते त्रिघ्नात्मकोचैश्चतुः-
पंचाशत् त्रिकयोज्ययोजितचतुःशत्याश्चतुस्त्रिशता ।
द्विघ्नैकादश षोडशान्वितचतुस्त्रिंशद्दिनैः शासनै-
र्वर्षं द्वादशवासरैरभिहिताः पंचेह मासा विधौ ॥ ७५ ॥

---

१ एकः द्वौ, नववार त्रय, एकः द्वौ त्रयः इत्यादि षोडशपर्यंताः, ततः चतुस्त्रिशद्वारं उपवासत्रिकं (तेला) ततः षोडश पञ्चदश इत्याद्येकपर्यंताः, तत. नववारं उपवासत्रिकं ततो द्वावेकश्च इति कनकावली । २ कनकावली [illegible] एको वर्षः पंच मासाः द्वादशदिनानि ।

एकद्वित्रिचतुर्द्विकानि सहितैस्ते षोडशैकादिभि–
विज्ञेयानि शतां चतुर्द्विकयुतं त्रिंशद्‌द्विकान्यादरात् ।
एकांताः खलु षोडशादय इह ह्यष्टौ द्विकान्येव तु
त्रिद्व्यैकोऽपि च यत्र ते प्रकथिता रत्नावलीयं परा ॥ ७६ ॥
षट्पंचाशद्‌द्विकोत्थे द्विकपरिगुणिते मिश्रिते षोडशोत्थ–
द्वासप्तत्या द्विशत्याशनिरसनगणो गण्यते मिश्रितेस्मिन्
अष्टाशीत्या शताहैरिह भवति विधौ कालसंख्याप्यहोभि–
र्द्वाविंशत्या त्रिरत्नद्युतिकृतिसुकृते वर्षमेकं त्रिमास्या ॥ ७७ ॥
द्वौ द्वौ त्वेकादयः शस्ताः पंचपर्यवसानकाः । हीते ह्युभयतः षष्टिःसिंहनिष्क्रीडिते विधौ ॥७८॥

---

१ रत्नावली समयः एको वर्षः त्रयो मासाः द्वाविंशतिदिनानि ।

२ जघन्यसिंहनिष्क्रीडिताविधिः—

१ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १
१, २, १, ३, २, ४, ३, ५, ४, ५, ५, ४, ५, ३, ४, २, ३, १, २, १,

त एव चाष्टपर्यंता नवं च शिखराः पुनः । मध्यमेप्युपवासाःस्युस्त्रिपंचाशं शतं स्फुटं ॥ ७९ ॥
पूर्वे पंचदशांतास्तु शिखरे षोडशाधिकाः । उत्कृष्टे तत्र ते वेद्याः षण्णवत्या चतुःशती ॥ ८० ॥
पंचानां संकलिते चतुर्गुणो षष्टिरेवमष्टानां । नवभिर्मिश्रितमध्यः पंचदशानां च षोडशभिः ॥८१॥
विंशतिश्च त्रयस्त्रिंशदेकषष्टिश्च पारणाः । जघन्यमध्यमोत्कृष्टसिंहनिष्क्रीडितं क्रमात् ॥ ८२ ॥
वज्रसंहननोऽनंतवीर्यसिंह इवाभयः । अणिमादिगुणः सिद्धयेत्फलेनास्य नरोऽचिरात् ॥ ८३ ॥
प्रतिदधिमुखं चत्वारस्ते निरस्तमनोमलाः प्रतिरतिकरं चाष्टौ यत्र ह्युपोषितवासराः ।
प्रतिदिशमथो षष्ठं कार्यं तथांजनकान्प्रति व्रतविधिरयं श्रेष्ठो नंदीश्वरो जिनचक्रिकृत् ॥ ८४ ॥

१ मध्यमसिंहनिःष्क्रीडितविधिः—सर्वे १५३ उपवासाः ।

१ १
१, २, १, ३, २, ४, ३, ५, ४, ६, ५, ७, ६, ८, ७, ८, ९, ८, ७, ८, ६, ७, ५, ६, ४, ५, ३, ४, २, ३, १, २, १,

२ उत्तमासिंहनिष्क्रीडितविधिः—

१, २, १, ३, २, ४, ३, ५, ४, ६, ५, ७, ६, ८, ७, ९, ८, १०, ९, ११, १०, १२, ११, १३, १२, १४, १३, १५, १४, १५, १६, १५, १४, १५, १३, १४, १२, १३, ११, १२, १०, ११, ९, १०, ८, ९, ७, ८, ६, ७, ५, ६, ४, ५, ३, ४, २, ३, १, २, १, सर्वे ४९६ उपवासाः ।

मेरुषु प्रतिवनं तु षष्ठतः प्रत्यगारमुदिता चतुर्थकान् ।
मेरुपंक्तिविधिरेष मेरुषु प्रापयिष्यति महाभिषेचनं ॥ ८५ ॥
चतुश्चतुर्थान्वितषष्ठकेन त्रिषष्ठितावेष्टनभागषष्ठे
विधानपंक्तिर्विधिरस्य कर्ता विमानपंक्तीश्वरभावकर्ता ॥ ८६ ॥
रूपमादिरधि यत्र पंच ते त्रिस्ततो भवविरूपमप्यतः
शातकुंभविधिरेष संभवे शांतकुंभसुखदस्तृतीयके ॥ ८७ ॥
एकादयः प्रणीता विधयोऽमी शातकुंभपर्यंताः ।
पंचनवषोडशांता भवंत्यपि प्रथममर्ध्यमोत्कृष्टाः ॥ ८८ ॥
यथोक्तमेषां हि तपोविधीनां विधीरसक्ता उपवाससंख्या
यथात्मशक्तिस्वहितप्रवृत्तैश्चतुर्थषष्ठाष्टमतोऽपि पूर्याः ॥ ८९ ॥
योऽमावस्योपवासी प्रतिपदिकवलाहारमात्रः पुरस्ता—

१–८० उपवासाः २० षष्ठानि । २–६५७ दिनेषु समाप्यते अत्र ३१६ स्थानानि । ३–४५ उपवासाः १७ पारणाः । ४–१५३ उपवासाः ३३ पारणाः । ५–४९६ उपवासाः ६१ पारणाः ।

सद्वृद्ध्यां पौर्णमास्यामुपवसनयुतोऽह्रासयन् ग्रासमग्रे
सामावस्योपवासः स भजति तपसश्चंडगत्यानुपूर्व्या
चार्व्यां चंद्रायणस्य प्रविततयशसः कर्तृणः कर्तृभावं ॥ ९० ॥
प्रागुपोष्य कवलस्य भोजनं सप्तमांतमपि सैकवृद्धिकं ।
सप्तकृत्व इति यत्र तु क्रिया सप्तसप्तमतपोविधिस्त्वसौ ॥ ९१ ॥
अष्टाष्टमनवनवमौ दशदशमैकादशो विधयः ।
द्वात्रिंशद्द्वात्रिंशद्विध्यंता एवमात्मका बोध्याः ॥ ९२ ॥
एकद्वित्रिचतुःपंचषट्सप्ता भुक्तिपिंडकाः ।
प्रत्येकं सप्तमं ता स्युः सप्तसप्तमकेऽथवा ॥ ९३ ॥
अष्टांतादिषु विज्ञेयः शेषेष्वपि विधिस्त्वयं ।

---

१ —अमावस्यामुपवासः प्रतिपदि एककवलाहारः एवं क्रमेण चतुर्दश्याम् चतुर्दशकवलाहारः तत उपवासः कृष्णप्रातिपदि चतुर्दशकवलाहारः एवमूनक्रमेण पुनरमावस्यायामुपवासः। २ प्रथमदिने उपवासः पुनरेकैकवृद्धिक्रमेण अष्टमदिवसे सप्तकवलाहारः पुनर्हानिक्रमेणोपवासः एवं सप्तवारं कर्तव्यं ।

क्रमेणैकोपवासादिकवलक्रमसंज्ञकः ॥ ९४ ॥
आचाम्लवर्धमाने भवंति सौवीरयुक्तयस्त्वेकाद्याः ।
सोपोषिता दशांता दशादयश्चापि रूपांताः ॥ ९५ ॥
निर्विकृतिं पूर्वार्धः सैकस्थानस्तु पश्चिमार्धस्य ।
आचाम्लवर्धमानाः क्रमेण विधयो विधेयास्ते ॥ ९६ ॥
अष्टाविंशतिरिष्टसाधनयतौ चैकादशांगेषु ते
द्वाविष्टौ परिकर्मणोऽष्टसहिताशीतिस्तु सूत्रस्य हि
एकौ चाद्यनुयोगकेवलकृतौ द्विःसप्तपूर्वेष्वमी
षट्पंचावधिचूलिके श्रुतविधौ द्वौ तौ मनःपर्यये ॥ ९७ ॥
प्रत्येकमष्टावुपवासभेदा निश्शंकिताद्यष्टगुणव्यपेक्षाः ।
त्रिदर्शनानामपि ते विधेयास्तपोविधौ दर्शनशुद्धिसंज्ञे ॥ ९८ ॥
द्वावेकः पुनरेक एव हि परे पंचैक एकः क्रमात्

१– १५८ उपवासस्थानानि । २–२४ उपवासस्थानानि ।

षोढा बाह्यतपस्यमी क्रमगताः पुण्योपवासाः पृथक्
अंतस्थे दश साधिकश्च नवभिस्त्रिशद्दश व्याहता
पंच द्वौ पुनरेक एव च तपःशुद्धौ विधेया विधौ ॥ ९९ ॥

चतुर्दशस्वहिंसार्थं जीवस्थानेषु भाविता। त्रियोगनवकोटिघ्ना ते षड्विंशं शतं स्फुटं ॥१००॥
मीप्सास्वपक्षपैशून्यक्रोधलोभात्मशंसनैः। द्वासप्ततिर्नवघ्नैस्ते परनिंदान्वितैरिति ॥ १०१ ॥
ग्रामारण्यखलैकांतैरन्यत्रोपध्यभुक्तकैः। संपृष्टग्रहणैः प्राग्वद्द्वासप्ततिरमी मताः ॥ १०२ ॥
नृदेवचित्रतिर्यक्स्त्रीरूपैः पंचेंद्रियाहतैः। नवघ्नैः ब्रह्मचर्यैःस्युःशतं तेऽशीतिमिश्रितं ॥ १०३ ॥

चतुष्कषाया नव नोकषाया मिथ्यात्वमेते द्विचतुःपदे च।
क्षेत्रं च धान्यं च हि कुप्यमांडधनं च यानं शयनाशनं च ॥ १०४ ॥
अंतर्बहिर्भेदपरिग्रहास्ते रंध्रैश्चतुर्विंशतिराहतास्तु।
ते द्वे शते षोडशसंयुते स्युर्महाव्रते स्यादुपवासभेदाः ॥ १०५ ॥

षष्ठे दशोपवासाः स्युरनिच्छा नव कोटिभिः। प्रत्येकं नव विज्ञेया त्रिगुप्तिसमितित्रिके ॥१०६॥

१—७८ उपवासाः १२ पारणाः। २ अहिंसाव्रतोपवासाः १४×९=१२६। ३—७२ उपवासाः।
४—७२ उपवासाः। ५—१८०।

मनोवाचोपमान्यवहारप्रतीत्यसंभावनासुभाषायां। जनपदसंवृतिनामस्थापनारूपा दश नवघ्नाः ॥
षट्चत्वारिंशद्दोषानेषणासमितौ मतान्। नवघ्नान्निघ्निस्तुं कार्यास्तावंत उपवासकाः ॥ १०८ ॥
त्रयोदशविधस्यैव चरित्रस्य विशुद्धये। विधौ चरित्रशुद्धौ स्युरुपवासाः प्रकीर्तिताः ॥ १०९ ॥
निर्विकृतिपाश्चिमाद्धारैकस्थानं तथोपवासश्च। आचाम्ल-मुक्तमेकं तपोविधिस्त्वेककल्याणः ॥११०॥
पंचकृत्वः कृतावश्या पंचकल्याण उच्यते। चतुर्विंशतिसंख्यान् सा कार्यस्तीर्थकरान् प्रति॥१११॥
तुर्यव्रतोपवासैस्तु शीलकल्याणको विधिः। पंचविंशतिसंख्यैस्तैर्भावनाविधिरिष्यते ॥११२॥
पंचविंशतिकल्याणभावानाविधिरत्र तैः। तावद्भिरेव बोद्धव्यो विद्वद्भिरुपवर्णितः ॥११३॥
सम्यक्त्वविनयज्ञानशीलिसत्त्वश्रुतश्रुताः। समित्यकांतगुप्तीनां भावना धर्मशुक्लमाः ॥११४॥
स क्लेशेच्छानिरोधस्य संवरस्य च भावना। प्रसुप्तयो संवेगकारणाद्वेगभावनाः ॥११५॥
भोगसंसारनिर्वेदमुक्तिवैराग्यमोक्षजाः। मैत्र्युपेक्षा प्रमादांतः ख्याताः कल्याणभावनाः ॥११६॥
प्रतीत्य सप्तभूमीनां जघन्यपरमायुषां। चतुर्दशोपवासास्तु विधेया विधिवद्बुधैः ॥११७॥
तिर्यग्गतावपर्याप्तपर्याप्तानां नृणां गतौ। प्रत्येकमपि चत्वारः प्रशमांते प्रबुद्धयन् ॥११८॥
द्वाविंशतिरतस्तूर्ध्वमच्युतांतेष्वमी ततः। ग्रैवेयकेषु कर्तव्या अष्टादश नवस्वपि ॥११९॥

द्वौ नवानुदिशेष्वेतौ द्वौवानुत्तरपंचके। अष्टाषष्टिरमी सर्वे स्युर्दुःखहरणे विधौ ॥१२०॥
नामतस्त्रिनवत्वाद्दीरुत्तरप्रकृतीः प्रति। ते चत्वारिंशदष्टाभिः कर्मक्षयविधौ स तं ॥१२१॥

कल्याणातिविशेषैः प्रतिकार्यैः प्रातिहार्यकारणागः।
जिनगुणसंपत्तिस्तैः पंचचतुस्त्रिंशदष्टषोडशभिः ॥ १२२ ॥
द्वात्रिंशता चतुःषष्ट्या ह्यष्टोत्तरशतेन तैः।
दिव्यलक्षणपंक्तिःस्याद्दिव्यातिमहतः पराः ॥ १२३ ॥
स्यात्परस्परकल्याणाश्चतुर्विंशतिवारतः।
आदौ षष्ठोपवासःस्यात्समाप्तावष्टमस्तथा ॥ १२४ ॥
त्रिधीनामिह सर्वेषामेषा हि च प्रदर्शना।
एकश्चतुर्थकाभिख्यो द्वौ षष्ठं तु त्रयोष्टमः।
दशमाद्यास्तथा वेद्या षण्मास्यंतोपवासकाः ॥ १२५ ॥
पंचदशीपर्यंता उपवासाः प्रतिपदादि तिथिषु कार्या।
बहुभेदा विज्ञेया जिनमार्गे सर्वसौख्यसंपन्नाः ॥ १२६ ॥

भाद्रपदशुक्लपक्षे सप्तम्यामप्यनंतफलसुखदः ।
परिनिर्वाणाख्यविधिः प्रतिवर्षमुपोषणीयस्तु ॥ १२७ ॥
एकादश्यां प्रातिहार्यप्रसिद्धिः तुल्यां तुल्यैः संफलत्यस्य चैव ।
एकादश्यां कृष्णजायामशीतिः षट् पूर्वांशं सविधत्ते ह्यनंतं ॥ १२८ ॥
शुद्धस्य मार्गशीर्षस्य तृतीयस्यामनंतकृत् । विमानपंक्तिवैराज्यः चतुर्थ्यां षष्ठतो विधिः ॥१२९॥
एतेषु विधयः कार्या यथाशक्ति शरीरिभिः । स्वर्गापवर्गसौख्यस्य पारंपर्येण हेतवः ॥१३०॥
इत्युक्तविधिकर्त्तासौ सुप्रतिष्ठो यतिस्तदा । ववंध तीर्थकृन्नाम शुद्धैः षोडशकारणैः ॥१३१॥
निशंकाद्यष्टगुणा जिनकथिते मोक्षसत्पथे श्रद्धा ।
दर्शनविशुद्धिराद्यस्तीर्थकरप्रकृतिकृद्धेतुः ॥ १३२ ॥
ज्ञानादिषु तद्वत्सु च महादरो यः कषायविनिवृत्त्या ।
तीर्थकरनामहेतुः स विनयसंपन्नताभिख्यः ॥१३३ ॥
शीलव्रतरक्षायां कायमनोवचनवृत्तिरनवद्या ।
वेद्यो मार्गोद्युक्तैः स शुद्धशीलव्रतेष्वनतिचारः ॥ १३४ ॥

अज्ञाननिवृत्तिफले प्रत्यक्षपरोक्षलक्षणज्ञाने ।
नित्यमभियुक्ततोक्तस्तज्ज्ञैर्ज्ञानोपयोगस्तु ॥ १३५ ॥
जन्मजरामरणामयमानसशारीरदुःखसंभारात् ।
संसाराद्भीरुत्वं संवेगो विषयतृट्छेदी ॥ १३६ ॥
आहाराभयदानं तद्दिनभवदुःखनुद्यथायोगं ।
संसारदुःखहरणं ज्ञानमहादानमिष्यते त्यागः ॥ १३७ ॥
अनिगूहितवीर्यस्य हि विशारारुशरीरमशुचिर्मृतकामं ।
संयोजयतः कार्ये तपोऽपि मार्गानुगामेशः ॥ १३८ ॥
भांडागारहुताशोपशमनवज्जातविघ्नमनुपद्य ।
संधारणं हि तपसः साधूनां स्यात्समाधिरिह ॥ १३९ ॥
गुणवत्साधुजनानां क्षुधातृषाव्याधिजनितदुःखस्य ।
व्यपहरणे व्यापारो वैय्यावृत्त्यं वसुद्रव्यैः ॥ १४० ॥
अर्हत्सु योनुरागो यश्चाचार्ये बहुश्रुते यश्च ।

प्रवचनविनयश्चासौ चातुर्विध्यं भजति भक्तिः ॥ १४१ ॥
आवश्यकक्रियाणां षण्णां काले प्रवर्तनं क्रियते ।
तासां साऽपरिहाणिर्ज्ञेया सामायिकादीनां ॥ १४२ ॥
सावद्ययोगविरहं सामायिकमेकभागगं चित्तं ।
गुणकीर्तिस्तीर्थकृतां चतुरादिर्विंशतिस्तवकः ॥ १४३ ॥
द्व्यासनया सुविशुद्धा द्वादशवर्ता प्रवृत्तिषु प्राज्ञैः ।
सशिरश्चतुरानतिका प्रकीर्तिता वंदना वंद्या ॥ १४४ ॥
द्रव्ये क्षेत्रे काले भावे च कृतप्रमादनिर्हरणं ।
वाक्कायमनःशुद्धया प्रणीयते तु प्रतिक्रमणं ॥ १४५ ॥
आगंतुकदोषाणां प्रत्याख्यानं तु वर्ण्यते यो ज्ञैः ।
कायोत्सर्गः काले मितकायं निर्ममत्वं तु ॥ १४६ ॥
परमतभेदसमर्थज्ञानतपोजिनमहामहैर्जगति ।
मार्गप्रभावना स्यात्प्रकाशनं मोक्षमार्गस्य ॥ १४७ ॥

धेनोरिव निजवत्से सौत्सुक्यधियः सधर्मणि स्नेहः।
प्रवचनवत्सलता स्यात्सस्नेहःप्रवचने यस्मात् ॥१४८॥
तीर्थकरनामकर्मणि षोडश तत्कारणान्यमून्यनिशं।
व्यस्तानि समस्तानि च भवंति सद्भाव्यमानानि ॥१४९॥
त्रैलोक्यासनकंपसक्तसुबृहत्पुण्यप्रकृत्यात्मकः।
प्रत्याख्याय स सुप्रतिष्ठमुनिर्भक्तं ततो मासिकं ॥
आराध्याथ चतुर्विधां बुधनुतामाराधनां शुद्धधी-
द्वात्रिंशज्जलधिस्थितिः पुरुसुखं स्वर्गं जयंतं स्थितः ॥ १५० ॥
भुक्त्वा संसृतिसारसौख्यमतुलं तत्राहमिंद्रोचितं।
सज्ज्ञानत्रयदृष्टनेत्रसकलत्रैलोक्यनेत्रास्थितिः ॥
च्युत्वातो भविता समुद्रविजयाद्देव्यां शिवायां शिवो।
नेमीशो हरिवंशशैलतिलको द्वाविंशसंख्यो जिनः ॥१५१॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ महोपवासविधिवर्णनो नाम चतुस्त्रिंश. सर्गः।

पंचत्रिंशः सर्गः ।

अरिष्टनेमेश्चरितं निशम्य यदुः परं श्रेणिक संप्रहृष्टः ।
प्रणम्य भावादतिभुक्तिकर्षि जगाम कांतासहितो निशांते ॥ १ ॥
यथा पुरा तौ मथुरासुपुर्यां यथेष्टमाक्रीडनयातिसक्तौ ।
सुदंपती तस्थतुरिष्टभोगौ सशंककंसेन समर्च्यमानौ ॥ २ ॥
बभार गर्भं युगलात्मकं सा सुदेवकी कंसभयस्य हेतुं ।
सहायभावो हि विपक्षयोगान्महाभयस्योपनिपातहेतुः ॥ ३ ॥
अथ प्रसूतौ सुतयुग्ममस्याः सुरेण संक्रामितमिंद्रवाक्यात् ।
सुनैगमेतिश्रुतिना सुभद्रं सुभद्रिलोद्भूतपुरोक्तधात्र्याः ॥ ४ ॥
प्रजातमात्रं खलु दैवयोगात् सुदृष्टिजायाव्यंसुपुत्रयुग्मं ।
स देवकीसूतिगृहे निधाय जगाम देवो निजदेवलोकं ॥ ५ ॥

---

१ मृत ।

प्रविश्य कंस स्वसृसूतिगेहं निरीक्ष्य निर्जीवितजीवयुग्मं ।
प्रगृह्यपादेषु निषादरौद्रः शिलातले ताडितवान् सशंकः ॥ ६ ॥
क्रमेण स द्वंद्वयुगं प्रयातं निनाय देवोऽप्यलकां सुकामां ।
पुनश्च कंसोप्यमुविप्रयुक्तमताडयत्पूर्ववदेव पापी ॥ ७ ॥
षडप्यविघ्ना वसुदेवपुत्रा स्वपुण्यरक्ष्यास्त्वलकातिहृद्या ।
पुरोक्तसंज्ञासुखलालितास्ते शनैरवर्धंत ततोऽतिरूपाः ॥ ८ ॥
प्रवर्धमानेष्वथ तत्र तेषु सुदृष्टिसुश्रावकभूतिवृद्धिः ।
अपूर्वनानाविधवस्तुलाभैस्तदात्यशेतापरभूपभूमिः ॥ ९ ॥
इतोऽपि देवक्यपि भर्तृवाक्यादपाकृतापत्यवियोगदुःखा ।
शनैः प्रपेदे प्रतिपत्कलेव दिनोत्तरैः पूर्ववदेव कांतिं ॥ १० ॥
अथैकदा चंद्रशिते निशांते निशांतकांते शयने शयाना ।
ददर्श सप्तोदयशंसिनः सा पदार्थकान् स्वप्न इमान्निशांते ॥ ११ ॥
प्रदीप्तमुद्यंतमिनं तमोऽतं समंतकांतं शशिनं प्रपूर्णं ।

श्रियं सदिग्नागमहाभिषेकां विमानमाकाशतलात्समच्च ॥ १२ ॥
ज्वलद्बृहज्ज्वालहुताशमुच्चैः सुरध्वजं रत्नमरीचिचक्रं ।
मृगाधिपं चाननमाविशंतं निशाम्य सौम्या बुबुधे सकंपा ॥ १३ ॥
अपूर्वसुस्वप्नविलोकनात्सा सविस्मयाहृष्टतनूरुहा तान् ।
जगौ प्रभाते कृतमंगलांगा समेत्य पत्येऽभिदधे स विद्वान् ॥ १४ ॥
प्रतापविध्वस्तरिपुः सुतस्ते प्रियोऽतिसौभाग्ययुतोऽभिषेकी ।
दिवोवतीर्यातिरुचिस्थिरोऽभीर्भविष्यति क्षिप्रमिमो[१] जगत्याः ॥ १५ ॥
निशम्य सा स्वप्नफलं स्वभर्तुस्तथास्त्विति प्रीतमतिः प्रपद्य ।
व्यवस्थिता गर्भमधत्त चाशु जगद्धितं द्यौरिव तापशांत्यै ॥ १६ ॥
यथा यथासौ परिवर्धतेऽस्या प्रवर्धमानांगमनःसुखायाः ।
तथा तथावर्धत भूतधात्र्यां जनस्य सर्वस्य च सौमनस्यं ॥ १७ ॥
ररक्ष गर्भं प्रसवव्यपेक्षः स्वसुः स संक्षोभगतस्तु कंसः ।

---

१ इनः स्वामी ।

दिनानि मासानसमंजसात्मा गुणानपेक्ष्यो गणयन्नलक्ष्यः ॥ १८ ॥
अथोदयादिश्रमणे तु पक्षे ह्यधोक्षजो भाद्रपदस्य शुक्ले ।
पवित्रयन् द्वादशिकां तिथिं तामलक्षितः सप्तम एव मासे ॥ १९ ॥
स शंखचक्रादिसुलक्षितांगः स्फुरन्महानीलमणिप्रकाशः ।
स देवकीसूतिगृहं स्वदीप्त्या प्रदीपवान् द्योतयतिस्म कृष्णः ॥ २० ॥
स्वपक्षगेहेषु तदाऽऽविरासन् स्वतो निमित्तानि शुभावहानि ।
विपक्षगेहेषु भयावहानि प्रभावतस्तस्य नरोत्तमस्य ॥ २१ ॥
तदा च सप्ताहमहातिवर्षे प्रवर्तमाने निशि जातमात्रं ।
हली स्वपित्रा विधृतातपत्रं हरिं गृहीत्वा गृहतो निरैद्द्राक् ॥ २२ ॥
अलक्षितः कंसभटैः प्रसुप्तैः प्रसुप्तपौरे समये पुरस्य ।
स गोपुरद्वारकपाटसंधिं विपाट्य विष्णुक्रमयुग्मसंगात् ॥ २३ ॥
पयःकणे घ्राणपुटं प्रविष्टे शिशोस्तडिद्घातगभीरनादे ।
क्षुते चिरंजीव जयत्वविघ्नस्त्वमित्यनुश्रुत्य तदोपरिष्टात् ॥ २४ ॥

प्रियोग्रसेनेन नृपेण दत्तां प्रियाशिषं तोषयुतोऽगदीत्तं ।
रहस्यरक्षा क्रियतां प्रतीक्ष विमुक्तिरस्मात्तव दैवकेयात् ॥ २५ ॥
प्रवर्धतां भ्रातृशरीरजायाः सुतोयमज्ञातमरेरितीष्टं ।
तदोग्रसेनीमभिवंद्य वाचममू विनिर्जग्मतुराशु पुर्याः ॥ २६ ॥
ज्वलद्विषाणो वृषभः पुरस्तात्प्रदीपयन्मार्गमगात्स तूर्णं ।
महानुभावादमुना हरेद्राक् बभूव विच्छिन्नमहाप्रवाहा ॥ २७ ॥
धुनीं समुत्तीर्य ततोऽभिगम्य वनं च वृंदावनमत्र गोष्ठे ।
सुनंदगोपं सयशोदमाप्तं क्रमागतं तौ निशि दृष्टवंतौ ॥ २८ ॥
समर्प्य ताभ्यामहरस्यमेदं प्रवर्द्धनीयं निजपुत्रबुद्ध्या ।
शिशुं विशालेक्षणमीक्षणानां महामृतं कांतिमयं स्रवंतं ॥ २९ ॥
ततश्च तत्कालभवां यशोदाशरीरजां विश्वसनाय शत्रोः ।
अरं समादाय समेत्य देव्यै प्रदाय तौ तस्थतुरप्रलक्ष्यौ ॥ ३० ॥
स्वसुः प्रसूतिं प्रति विक्षकंसः प्रसूत्यगारं निघृणः प्रविश्य ।

विलोक्य बालाममलाममुष्याः पतिः कदाचित्प्रभवेदरिर्मे ॥ ३१ ॥
विचिंत्य शंकाकुलितस्तदेति निरस्तकोपोऽपि स दीर्घदर्शी ।
स्वयं समादाय करेण तस्या प्रनुद्य नासां चिपिटींचकार ॥ ३२ ॥
स देवकीमानसतापकारी सुतांतदर्शी किल निर्वृतात्मा ।
अतिष्ठदंतर्हितरौद्रभावः सुखेन तावत्कतिचिद्दिनानि ॥ ३३ ॥
ततो व्रजस्थः कृतजातकर्मा स्तनंधयोसौ कृतकृष्णनामा ।
प्रवर्धते नंदयशोदयोस्तु प्रवर्धयन् प्रीतिमभूतपूर्वां ॥ ३४ ॥
गदासिचक्रांकुशशंखपद्मप्रशस्तरेखारुणपाणिपादः ।
स गोपगोपीजनमानसानि सकाममुत्तानशयो जहार ॥ ३५ ॥
सुरूपमिंदीवरवर्णशोभं स्तनप्रदानव्यपदेशगोप्यः ।
अहंयवः पूर्णपयोधरास्तमतृप्तनेत्राः पपुरेकतानं ॥ ३६ ॥
इतः कदाचिद्वरुणेन कंसो निमित्तविज्ञेन हितैषिणोक्तः ।
नृपैधते ते रिपुरत्र कश्चित्पुरे वने वा परिमृग्यतां सः ॥ ३७ ॥

ततोऽष्टमाख्यानशनं तपोऽसौ चकार कंसो रिपुनाशबुद्धया ।
पुराभ्युपेतार्थसमर्थनाय सुदेवताः प्रोचुरुपेत्य तास्तं ॥ ३८ ॥
पुरा तपः साधितदेवतास्ता इमा वयं ते वद वस्तु कृत्यं ।
विहाय शीरायुधचक्रपाणी क्षणेन कः कंसरिपुर्निरस्यः ॥ ३९ ॥
जगावसौ कोऽपि ममास्ति वैरी प्रवर्धमानः क्वचिदप्यलक्ष्यः ।
तमाशु यूयं परिमृग्य मृत्योर्मुखे कुरुध्वं करुणानपेक्षाः ॥ ४० ॥
इतीरितं ताः प्रतिपद्य याता प्रदृश्य चैकोग्रशकुंतरूपा ।
प्रतुद्य हंत्री हरिणात्ततुंडा प्रचंडनादा प्रणनाश भीता ॥ ४१ ॥
कुपूतना पूतनभूतमूर्तिः प्रपाययंती सविषस्तनौ तं ।
स देवताधिष्ठितनिष्ठुरास्यो व्यरीरटच्चूचुकभूषणेन ॥ ४२ ॥
स्वपक्षिषीदन्नुरसा प्रसर्पन् पदं ददन् सस्खलितं प्रधावन् ।
कलाभिलापो नवनीतमद्यन्नजीगमज्जिष्णुरहार्दिनानि ॥ ४३ ॥

अंतः शरीरामपरां पिशाचीं स चापतंतीं घनपादघाती ।
विर्भार्त्रभंजांजनशैलशोभी पृथूदयस्तां पृथुकोऽपि कोपि ॥ ४४ ॥
यशोदया दामगुणेन जातु यदृच्छयोदूखलबद्धपादः ।
निपीडयंतौ रिपुदेवतांगौ न्यपातयत्तौ जमलार्जुनौ सः ॥ ४५ ॥
स नंदगोपेन यशोदया च सुदृष्टशक्तिः शुभशैशवादौ ।
स विस्मिताभ्यामभिनंद्यमानो बालः स दृश्यो ववृधे वनांते ॥ ४६ ॥
स गोपतिं दृप्तमशेषघोषमितस्ततो दृष्टमुदग्रघोषं ।
महार्णवं वा प्रतिपूर्णयंतं जघान कंठोद्गलनात्सुकंठः ॥ ४७ ॥
कुदेवपाषाणमयातिवर्षैरनाकुलो व्याकुलगोकुलाय ।
दधार गोवर्धनमूर्ध्वमुच्चैः स भूधरं भूधरणोरुदोर्भ्यां ॥ ४८ ॥
अमानुषं कृष्णविचेष्टितं तत्सकर्णमाकर्ण्य बलेन वर्ण्यं ।
कृतोपवासव्यपदेशतोगाद्व्रजं सवित्री सुतदर्शनाय ॥ ४९ ॥

१–अनः इति ख पुस्तके । ‘ एनः ’ वा भवितुमर्हति । २–जमलार्जुनवृक्षरूपौ देवौ ।

सुकंठगोपालकलोपगीतं सुतारघंटाध्वनि गोधनाढ्यं ।
महीध्रपादे वनरंध्रमागा पुरंध्रिरध्यास परां धृतिं सा ॥ ५० ॥
कचिच्चितं स्निग्धसुकृष्णवर्णैः कचिच्च सोद्यद्धलमद्रशुभ्रैः ।
गवां गणैर्वीक्ष्य वनं जहर्ष भवत्यपत्यप्रतिमं हि दृष्ट्वा ॥ ५१ ॥
तृणांबुतृप्ताःस्तनलग्नवत्सा प्रदुह्यमानाश्च परा घटोघ्नीः ।
ददर्श गा गोष्ठगतास्तदैषा प्रवृत्तरोमांचसुखाभिरामाः ॥ ५२ ॥
सवत्सधेनुध्वनयोऽतिधीरा रवाश्च गोपीदधिमंथनोत्थाः ।
मनोभिजव्हे हरिमातुरुच्चैर्गभीरनादा न हरंति किं वा ॥ ५३ ॥
ततोऽभिनंदी हृदि नंदगोपो यशोदयोत्पेत्य यशोविशुद्धां ।
स देवकीं स्वामिनिकां निकायैर्मनस्विनीं भक्तियुतो ननाम ॥ ५४ ॥
सुपीतवासोयुगलं वसानं वनेवतंसीकृतवार्हिवर्हं ।
अखंडनीलोत्पलमुंडमालं सुकंठिकाभूषितकंबुकंठं ॥ ५५ ॥

१–' कुलोपगीतं ' इति क पुस्तके ।

सुवर्णकर्णाभरणोज्ज्वलाभं सुबंधुजीवालिकमुच्चमौलिं ।
हिरण्यरोचिर्वलयः प्रकोष्ठं सुपादगोपालकसानुवंशे ॥ ५६ ॥
यशोदयानीय यशोदयाढ्यं प्रणामितं पुत्रमसौ सवित्री ।
सुगोपवेषं निकटे निषण्णं परामृशंती चिरमालुलोके ॥ ५७ ॥
जगौ च देवी विपिनेऽपि वासस्तवेदशापत्यदशो यशोदे ।
यशस्विनि श्लाघ्यतमो जगत्यां न राज्यलाभोऽभिमतोऽनपत्यः ॥ ५८ ॥
जगाद गोपी भवती यथाह तथैव मे स्वामिनि सत्यमेतत् ।
तथैव संतोषविशेषदोषी प्रियाशिषा जीवतु नित्यभृत्यः ॥ ५९ ॥
इहांतरे सा सुतदर्शनेन सुनिर्भरप्रस्तुतसुस्तनौ तौ ।
शशाक नो संवरितुं क्षरंतौ न संवृतिः स्यात्सति चित्तभेदे ॥ ६० ॥
रिपोर्भयात्पुत्र वियोजितोऽसि न दुष्टबुद्ध्येति विशुद्धिमंतः ।
स्तनक्षरत्क्षीरनिभेन राज्ञी प्रदर्शयंतीव तदा रराज ॥ ६१ ॥
प्रकाशभीरुः सहसा ततोसौ हलायुधः क्षीरघटेन दक्षः ।

तदाभ्यषिंचत्स्वयमंचितास्थां न मुह्यति प्राप्तकृतौ कृती हि ॥ ६२ ॥
ततो हरिप्रेक्षणलब्धसौख्या हली समानीय समाप्तकार्यौ ।
प्रवेश्य साध्वीं मथुरां पुनस्तं न्यवेदयद्वृत्तमपि स्वपित्रे ॥ ६३ ॥
कलागुणान् प्रत्यहमेत्य दक्षमशिक्षयत्केशवमाशु शीरी ।
स्थिरोपदेशे प्रणते न शिष्ये गुरूपदेशाः क्षपयंति कालं ॥ ६४ ॥
स बालभावात्सुकुमारभावस्तथैवमुद्भिन्नकुचाः कुमारः ।
सुयौवनोन्मादभराः सुराशैरीरमत्केलिषु गोपकन्याः ॥ ६५ ॥
करांगुलिस्पर्शसुखं स रासेष्वजीजनद्गोपवधूजनस्य ।
सुनिर्विकारोऽपि महानुभावो सुमुद्रिकानद्धमणिर्यथार्घ्यैः ॥ ६६ ॥
यथा हरौ भूरिजनानुरागो जगाम वृद्धिं हृदि वृद्धिसूची ।
तथास्य तेने विरहानुरागो विहारकाले विरहातुरस्य ॥ ६७ ॥
द्विषं तमन्वेष्टुमितः प्रविष्टः स शंकया कंसरिपुः कदाचित् ।
व्रजं निजैरावजदच्युतोऽस्मात्पुरोभ्युपायाद्गमितो जनन्याः ॥ ६८ ॥

स नाटवीं स्पष्टकृताट्टहासां कुराक्षसीं रूक्षनिरीक्षणास्यां।
अधोक्षजो वीक्ष्य विवृद्धकायां शरीरयष्ट्यां विकृतां जघान ॥ ६९ ॥
सुशाल्मलीखंडसुमंडपस्य सुदुर्भरास्तंभततिः परेषां।
तमुत्क्षिपंतं त्वदयं विदित्वा न्यवर्तयत्सा जननी विशंका ॥ ७० ॥
निवृत्य कंसः पुरघोषणां स्वैरघोषयद्देवविदुक्तकारी।
गवेषणार्थं द्विषतो निजस्य स पापशापाभिमुखः सुखार्थी ॥ ७१ ॥
भुजंगशय्यामिह सिंहवाहशरासनं चाप्यजितं जयंतं।
सपांचजन्याब्जमथारुहेद्यः करोत्यधिज्यं परिपूरयेच्च ॥ ७२ ॥
ददाति तस्मै पुरुषोत्तमाय पराजिताशेषपराक्रमाय।
अलभ्यलाभं समभीष्टमिष्टः प्रहृष्टकंसः स रुषांतरज्ञः[1] ॥ ७३ ॥
इति प्रवृत्तिश्रवणात्प्रवृत्तास्ततस्तदारोहणपूर्विकासु।
क्रियासु निस्तर्जितवृत्तयश्च महीक्षितो जग्मुरतो विलक्षाः ॥ ७४ ॥

१ पुरुषांतरज्ञः इति ख पुस्तके।

अथानयद्भानुरुपेंद्रमर्थी सहोदरोऽसौ खलु कंसवक्त्राः ।
तदीयसामर्थ्यमुदीक्ष्य जातु प्रजाततोषो मथुरापुरीं तां ॥ ७५ ॥
महाहिशय्यामिह सज्जितांतं व्यलोकय चेंद्रस्य पदे स पृष्ट्वा ।
समारुहद्भीषणभोगिभोगां स्वभावशय्यामिव शौरिराशु ॥ ७६ ॥
धनुस्ततोधिज्यमसौ व्यधत्त भुजंगमोद्गीर्णविकीर्णधूमं ।
अपूरयच्छंखमखेदमाशाः प्रपूरयंतं निखिला निनादैः ॥ ७७ ॥
जनस्तदालोक्य तदातिलोकं तदीयमाहात्म्यमुदीयमानं ।
अघोषयत्क्षुब्धसमुद्रघोषो महानहो कोप्ययमित्यशेषः ॥ ७८ ॥
कुकंसशंकां वहताग्रजेन निजेन नीत्या प्रहितो हरिस्तु ।
महानुकूलो व्रजमात्मनीनैः सहाव्रजत्तीव्रगुणानुरागैः ॥ ७९ ॥
गर्भाधानात्पूर्वमर्वाक् प्रसूतेरावर्द्धांतर्वैरभावोऽपि शत्रुः ।
मत्तः कुर्यात्किं ह्युदात्तस्य पुंसो जैनाद्धर्मात्पूर्वजन्मप्रयातात् ॥ ८० ॥

इति "अरिष्टनेमिपुराणसंग्रहे" हरिवंशे जिनसेनाचार्यस्य कृतौ कृष्णबालक्रीडावर्णनो नाम पंचत्रिंशः सर्गः ।

षट्त्रिंशः सर्गः ।

अथ विरुवदलिज्यारूढवाणासनायां कलरवकलहंसीशंखशय्याश्रितायां ।
रिपुशिखिमदपक्षक्षोदपक्षोदयायां शरदि हरिनवश्रीलीलयाध्यासितायां ॥ १ ॥
घननिवहविघाताद्द्यौरभाच्चंद्रहासा विघटितघनपका मेदिनी कासहासा ।
कतिपयदिनभाविप्रौढकंसाभिघातप्रकटितहरिहासाकारविद्योततीव ॥ २ ॥
विपुलपुलिनकेन व्याजतः स्वच्छनद्यः सहजजलसरस्यः पुंडरीकापदेशात् ।
सितकुसुमनिभेन स्वैर्वनांतैश्च शैला हरियश इव शुभ्रं द्राग्दधाना विरेजुः ॥ ३ ॥
फलकुचगुरुभाराक्रांतिराक्रांतसस्यप्रचुररुचिरकासात्कंचुकोद्भासमाना ।
प्रमदवशविकासिन्युर्वरा सर्वतोऽभादभिनवहरिकंठाश्लेषणोत्कंठितेव ॥ ४ ॥
प्रसवभरविभूतिव्यग्रताव्यग्रगर्भग्रहणसमयहृष्यद्गोवृषोद्घोषघोषाः ।
शरदि हृदयतोषं तोषयंतिस्म विष्णोः प्रसभमिह रिपूणां पेषणं घोषयंतः ॥ ५ ॥
विदितहरिसमीहश्चापि कंसस्तदानीं पुनरपि तदपाये पापधीर्गोपवर्गे ।
कमलहरणहेतोर्दुर्गमत्यगभाजां हृदमपि विषमाहिग्राहिणोद्यामुनं सः ॥ ६ ॥

निजभुजबलशाली हेलयैवावगाह्य हृदमपि कुपितोत्थं कालियाहिं महोग्रं ।
फणिमणिकिरणौघोद्गीर्णवह्निस्फुलिंगव्यतिकरमतिकृष्णं मंक्षु कृष्णो ममर्द ॥ ७ ॥
तटरुहविटपाग्रव्यग्रगोपप्रणादस्फुटहलधरधीरध्वानसंहृष्टभेदः ।
भुजनिहतभुजंगः संसमुच्छित्य पद्मानुपतटमटतिस्म द्राक् मरुत्वानिवासौ ॥ ८ ॥
प्रविलसदतिभास्वत्पीतवासा बलेन प्रमदभरवशेन प्रोल्लसन्मेचकेन ।
सरभसमुपगूढश्चोद्वृतोऽभाद्भुजाभ्यामशितशितशिलाग्रेणैव सोब्दःसविद्युत् ॥ ९ ॥
निहितकमलभारान् गोपकैरग्रतोरिः परगुणमसहिष्णुः सोष्णमुच्छ्वस्य दृष्ट्वा ।
समभणदिति शीघ्रं नंदगोपात्मजाद्याः सरभसमिह गोपामल्लयुद्धाय संतु ॥ १० ॥
इति विहितमहाज्ञो मल्लयुद्धाय मल्लानतिकठिनकनिष्ठज्येष्ठमध्यप्ररूढान् ।
द्रुततरमुपकंठे स्वस्य चक्रे सचक्रक्रकचनिशितचित्तःकर्तुकामस्तदानीं ॥ ११ ॥
चरितमिदमकालक्षेपि विज्ञाय शत्रोः स्थिरमतिवसुदेवश्चाप्यनावृष्टियुक्तः ।
ज्ञपयितुमपि सर्वं ज्येष्ठवर्गं सः वार्तामगमयदिह शीघ्रं सन्निधानाय तस्य ॥ १२ ॥
विदितरिपुविचेष्टास्ते नवज्येष्ठमुख्या रथतुरगपदातिप्रोन्मदेभैः स्वसैन्यैः ।

सरभसमभिजग्मुर्भूतलं भूषयंतः शठहृदयमकस्मात्सस्मयं दारयंतः ॥ १३ ॥
चिरवियुतकनीयोदर्शनव्याजतस्तान्पृथुतरमथुरां तामागतान् यादवेंद्रान् ।
अभिमुखमपशंको वेत्य कंसः सशंको निभृतकृतनतिः प्रावेशयत्सानुजान् सः ॥ १४ ॥
पुरपुरुगृहशोभादर्शनात्त्रत्रवेत्रास्तदधिपतिनियुक्ता वासकास्ते यथेष्टं ।
प्रतिदिनमुपसेव्या दानमानप्रणामैः प्रणयमिव वहंतस्तस्थुरंतर्विदाहाः ॥ १५ ॥
हलधृदवधृतार्थो मल्लयुद्धाभिलाषं वृषलवधविशेषोदंतविज्ञो विधित्सुः ।
अतिनिपुणमतिस्तां सन्निधौ तस्य धीरो वदति लघु यशोदां स्नानमाकल्पयेति ॥ १६ ॥
चिरयसि किमिति त्वं विस्मृतात्मीयदेहे न सकृदसकृदुक्ता न स्वभावं जहासि ।
न हि शुचिशुभशुक्त्युत्पादितोदारमुक्तामणिरतिभृतवेला चापलं स्वं जहाति ॥ १७ ॥
इति सह चिरवासेप्युक्तपूर्वा न जातु ह्यतिचकितमया सा साश्रुनेत्रा निरुक्तिः ।
द्रुततरमुपकल्प्य स्नानमन्नप्रसिद्धयै प्रकृतमकृत यत्नं स्नातुमेतौ नदीं तौ ॥ १८ ॥
अवददिति बलस्तं कृष्णमेकांतवर्ती किमिति मुखमिदं ते दीर्घनिश्वाससास्रं ।
हिमहतरुचिपद्मच्छायमच्छायमद्य प्रथयति पृथुमंतस्तापमाचक्ष्व हेतुं ॥ १९ ॥

प्रणयसहितमित्थं प्रश्नितः प्राह कृष्णः प्रहसितमुखपद्मं पद्ममालोक्य वाक्यं ।
शृणु वचनमिहार्ये त्वं मदीयं प्रसिद्धं स्फुटवदनविकाराल्लक्षितं चित्तदुःखं ॥ २० ॥
श्रुतगुरुरसि विद्वान् वेत्सि लोकानुवृत्तिं त्वमुपदिशसि मार्गं चार्य वर्यं पुरस्य ।
तदिह भण सुपूज्यां युज्यते मे यशोदामतिपरुषवचोभिस्ते तिरस्कर्तुमद्य ॥ २१ ॥
इति सुविहितमन्युं गंगदत्तं गदंतं हृषिततनुरुहोसौ गाढमाश्लिष्य दोर्भ्यां ।
अवददविरलश्रुपातसंसूचितांतःकरणविशदवृत्तिः सर्ववृत्तांतमस्मै ॥ २२ ॥
मुनिवचनमवंध्यं तज्जरासंधजायाः पटुमदवशवृत्तेर्हेतुतो वृत्तमादौ ।
निधनमपि च षण्णां देवकीगर्भजानां क्षुभितहृदयकंसापादितं कोपहेतुं ॥ २३ ॥
प्रसवसमयतोऽर्वाग्गोकुले लीनवृत्तिं रिपुविहितमनेकापायमप्यत्र बाल्यात् ।
प्रभृति सकलमग्रे मल्लसंग्राममुग्रं विरचितमवधार्य द्विड्वधेऽधत्त चित्तं ॥ २४ ॥
हरिरिति हरिवंशं रौहिणेयादशेषं पितृजनगुरुबंधुं भ्रातृवर्गं विदित्वा ।
प्रमदपुरुमुवाहश्रीमुखांभोजलक्ष्मीर्हरिरिव गुरुभूभृद्भूरिरक्षासनाथः ॥ २५ ॥
हितसहजतयोत्थस्नेहसंपृक्तभावौ सुसरिति यमुनायां तौ महामीनलीलौ ।

जलविहरणदक्षौ स्नानमासेव्य सेव्यौ निजसदनमगातामन्वितौ गोपवर्गैः ॥ २६ ॥
शुभपरिमलसद्यस्तापहैयंगवीनं स्फुटसुरससुसूपव्यंजनक्षीरदघ्नः ।
विरचितमणिभूमौ हेमपात्र्यां सहेतौ मृदुविशदसुसिक्थं शालिभक्तं हि भुक्त्वा ॥ २७ ॥
सुमृदुसुरभिगंध्युद्वर्तितास्यस्वपाणी स्वकरकिसलयौ तौ दिग्धदिव्यानुलिप्तौ ।
पलितहरितपूगैलादितांबूलरागप्रविततमुखरागाद्भासमानाधरोष्ठौ ॥ २८ ॥
विविधकरणदक्षौ मल्लविद्यानवद्यौ कृतचलनसुवेषौ नीलपीतांबराभ्यां ।
बृहदुरसि विधायोदारसिंदूरधूलीरभिनववनमालामालतीमुंडमालौ ॥ २९ ॥
स्थिरमनसि विधाय ध्वंसनं कंसशत्रोश्चलचरणनिघातैर्धारिणीं क्षोभयंतौ ।
समभरमतिघोरैर्मल्लवेषैः सवर्गैः पुरमभि मथुरां तौ चेलतुर्गोपवर्गैः ॥ ३० ॥
अभिपतदुरगेंद्रं रासभं दूरसंतं पथि हि पुरनिवेशे विघ्नयंतं बृहध्वं ।
विवृतवदनरंध्रं चापतंतं दुरंतं कुतुरगमवधीत्तं केशवः केशिनं सः ॥ ३१ ॥
नगरमभिविशंतौ वारितौ वारणेद्रावविरतमदलेखामंडितापांडुगंडौ ।
युगपदरिनियोगादापतंतौ विदित्वा तुतुषतुरिव दृष्ट्वा युद्धरंगादिमल्लौ ॥ ३२ ॥

सललितमभितस्थौ चंपकं शीरपाणिः फणिरिपुरपि नागं तत्र पादाभराख्यं ।
अभवदभिनवं तद्विस्मयापादिपुंसां नरवरकरिमल्लद्वंद्वयोर्द्वंद्वयुद्धं ॥ ३३ ॥
दृढपदहतिगाढाक्रांति चोत्पाटयंतौ कुटिलितकररुद्धादंतिदंतानभातां ।
पृथुभुजबललीलोत्पाद्यमानारवाद्ये क्षितिभृदुरगचेष्टप्रौढवंशांकुरान्वा ॥ ३४ ॥
अदयमथसमूलोन्मूलितोल्लासिताभास्वरदनैपरिघातैर्घोरनिर्घोषघोषैः ।
विरसविरटितेभौ तौ निहत्य प्रविष्टौ पुरमुरुरववेला क्ष्वेडिता स्फोटगोपैः ॥ ३५ ॥
कमलकिसलयोद्यत्तोरणद्वारशोभां नृपजनपदशुंभच्चक्रवालालयालिं ।
भुजशिखरनिघृष्टज्येष्टमल्लांसकूटौ विशदमविशतां तौ तां महारंगभूमिं ॥ ३६ ॥
स्वचरणभुजदंडाकुंचिताकारशोभान्यभिनयदृढदृष्टिक्षेपरम्याणि रेजुः ।
चलितचलनवस्त्रप्रांतकांतानि रंगे हरिहलधरहेलावल्गितास्फोटितानि ॥ ३७ ॥
रिपुरयमिह कंसोऽयं जरासंधलोकः सलिलधिविजयाद्यास्ते दशामी सपुत्राः ।
सहलसहरिचक्रालोकिनो लांगलीत्थं प्रतिपुरुषमशेषं संज्ञयादर्शयत्तान् ॥ ३८ ॥

१ 'वदन' इति क पुस्तके । २ समुद्रविजय ।

बहुजनपदराजप्राज्यलोकावलोके क्षुभितसकलमल्लास्फोटवल्गाभिरामे।
क्रमसहितमिहान्ये तावदादेशभाजो वनमहिषविदग्धा मल्लयुद्धं प्रचक्रुः॥ ३९॥
अथ गिरिगुरुभित्तिव्यूढवक्षोविभाग–स्फुटदृढभुजयंत्रोत्पीडितो दृप्तमल्लं।
हरिमभि खलकंसो युक्तचाणूरमल्लं विषमितविपदृष्ट्या पृष्ठतो मुष्टिकं च॥ ४०॥
खरनखरकठोरौ मुष्टिबंधौ विधाय प्रकटितपदसिंहाकारसंस्थानभेदौ।
स्थिरचरणनिवेशौ शौरिचाणूरमल्लावनिभृतमभिलग्नौ मुष्टिसंघट्टयुद्धे॥ ४१॥
कुलिशकठिनमुष्टिं मुष्टिकं पृष्ठतस्तं समपतितसकामं राममल्लः सलीलं।
अलमलमिह तावत्तिष्ठ तिष्ठेति साशीः शिरसि करतलेनाक्रम्य चक्रे गतासुं॥ ४२॥
हरिरपि हरिशक्तिः शक्तचाणूरकं तं द्विगुणितमुरसि स्वे हारिहुंकारगर्भः।
व्यतनुतभुजयंत्राक्रांतनीरंध्रनिर्यद्बहलरुधिरधारोद्गारमुद्गीर्णजीवं॥ ४३॥
दशशतहरिहस्तिप्रोद्बलौ साधिषूभावित्तिहठहतमल्लौ वीक्ष्य तौ शीरिकृष्णौ।
प्रचलितवति कंसे शालनिस्त्रिंशहस्ते व्यचलदखिलरंगांभोधिरुत्तुंगनादः॥ ४४॥
अभिपतदरिहस्तात्खड्गमाक्षिप्य कोशेष्वतिदृढमतिगृह्य हत्य भूमौ सरोषं।

विहितपरुषपादाकर्षणस्तं शिलायां तदुचितमिति मत्वा स्फाल्य हत्वा जहास ॥ ४५ ॥
क्षुभितमभिपतंतं कंससैन्यं च रामः कुटिलभृकुटिमंचस्तंभमुत्पाद्य कोपात् ।
कुलिशसदृशघातैः सर्वतो गर्वदत्तैरकृत कृतविरावं कांदिशीकं क्षणेन ॥ ४६ ॥
यदुषु विषमदृष्टिष्वेककालं बलैःस्वैश्चलितजलधिनादैरुत्थितेषूद्धतेषु ।
क्षुभितमपि समस्तं कंसकार्ये नियुक्तं व्यनशदवशमत्तं तज्जरासंधसैन्यं ॥ ४७ ॥
रथमथ चतुरस्रं तावनावृष्टियुक्तौ सपदि समभिरुढौ मल्लनेपथ्ययुक्तौ ।
सदनमगमतां तत्पैतृकं यादवौघैर्जलधिविजयपूर्वैः पूर्णमुर्वीभृदीशैः ॥ ४८ ॥
क्रमयुतमवनत्या पूजयित्वा दशार्हप्रभृतिगुरुजनान् तौ तत्र दत्ताशिषौ तैः ।
चिरविरहजमंतस्तापमस्तं सयोगप्रथमसलिलधारासंगतौ निन्यतुस्तं ॥ ४९ ॥
वसुनिभवसुदेवो देवकी चात्मजस्य प्रशमितरिपुवह्वेर्वीक्ष्य विश्रब्धमास्यं ।
सुखमतुलमगातामेकनासा च कन्या भुवि सुतसहजानां संप्रयोगः सुखाय ॥ ५० ॥
गतनिगलकलंकः कंसशंकाविमुक्तश्चिरविरहकृशांगं राज्यलक्ष्मीकलत्रं ।
यदुनिवहनियोगादुग्रसेनस्तदानीमभजत मथुरायां कंसमाथिप्रदत्तं ॥ ५१ ॥

स्वजननिजवधूनां क्रंदनाद्यैः सभावे श्रितवति लघु कंसेप्यंगसंस्कारमंत्यं।
यदुषु कुपितचित्ताः प्राप्य जीवद्यशायां स्वकपितुरुपकंठे वाष्पसंरुद्धकंठा॥ ५२॥
अथ गगनसमुद्रे मोदरंगत्तरंगे त्वरितगतिरनूनामुद्वहन्मीनलीलां।
खचरनृपतिदूतोऽलोकि लोकैः समस्तैः स्फुरितमणिविभूषो माथुरैरून्मुखाब्जैः॥ ५३॥
तनुविशददुकूलश्चंदनार्द्रीकृतांगः स्फुट इव कलहंसो मानसस्थानसेवी।
सुरसरितमिवाप्तो माथुरीं सोऽथ रथ्यां दिशि दिशि धृतशोभां संचरद्राजहंसैः॥ ५४॥
परिषदमथ दत्तद्वारपालप्रवेशो यदुभिरवहितात्मा भूषितां संप्रविश्य।
कृतविनतिनिषण्णो विष्णुमूचेऽरिजिष्णुं प्रभुमवसरवेदी यादवानां समक्षं॥ ५५॥
शृणु विनुतमराजा राजताद्रौ सुकेतुर्नमिविनमिकुलश्रीवैजयंतीसुकेतुः।
अधिवसति रथं यो नूपुरं चक्रवालं पुरमिह नयदक्षो दक्षिणश्रेण्यधिष्ठं॥ ५६॥
जलजशयनचापैस्त्वां परीक्ष्यामुनाहं तव निकटमिहाशु प्रेषितः प्रेमपूर्वं।
भज वरदवृतस्त्वं सत्यभामावरत्वं खचरभुवनभूत्यै सर्वकल्याणमूलं॥ ५७॥
सकलयदुमनोज्ञं दूतवाक्यं निशम्य प्रतिवचनमुपेंद्रोऽदादिति प्रीतचित्तः।

खगधनपतिसृष्टा रत्नशैले मयि द्राक् निपततु वसुधारा सत्यभामाभिधाना ॥ ५८ ॥
प्रतिविहितसुपूजः खेचरेंद्रस्य दूतः प्रमुदितमतिरित्वा स्वास्पदं स्वामिनेऽसौ ।
वरगुणनुतिपूर्वं सर्वकार्यस्य सिद्धिं समभणदिति तेषां तोषणे सप्रियाय ॥ ५९ ॥
भुवि हरबलदेवौ भ्रातरौ भ्राजमानौ प्रतिहतपरतेजोरूपकांती विदित्वा ।
निजवचनहरास्यात्खेचरेंद्रः सुकेतुः खचरप-रतिमालश्चागतौ कन्यकाभ्यां ॥ ६० ॥
रतिमिव रतिमालो रूपतो रेवतीं स्वां दुहितरमतिकांतां देहजां ज्यायसेऽदात् ।
अतिमुदितसुकेतुः सत्यभामां प्रभायाः स्वयमुपपदवत्या गर्भजां केशवाय ॥ ६१ ॥
कुचकलशकलत्रोदारभारातिखिन्नाः शिथिलवसनकांचीकेशपाशोत्तरीयाः ।
ननृतुरिह विवाहे नूपुरारावरम्याः क्षितिचरखचराणां योषितः शोचिवेषाः ॥ ६२ ॥
प्रथमनववधूकौ नीलपीतांबरौ तौ विविधमणिविभूषाज्योतिरुद्भासितांगौ ।
यदुनृपतिपरीतौ वीक्ष्य पुत्रावतोषीद्यदुयुवतिसमग्रा रोहिणी देवकी च ॥ ६३ ॥
प्रथममदनरंगे शार्ङ्गिणः सत्यभामा हृदयमहरदिष्टा रेवती शीरपाणेः ।
गुणितगुणकलानां सुप्रयोगौ तयोस्तावुचितकरणकाले न स्खलंति प्रगल्भाः ॥ ६४ ॥

अथ सकलुशभावा सा जरासंधराजं जलनिधिमिव वेला व्याकुला क्षोभयंती ।
अतिविततमाला नीलकेशाप्यरोदीद्यदुकुलकृतदोषं कंसयोषिद्रुदंती ॥ ६५ ॥
त्वयि सकलधरित्रीं शासति ध्वस्तनाथा कथमहमुपयाता तात वैधव्यदुःखं ।
इदमपि खलु सोढं वैरनिर्यातनार्थं मदमुदितयदूनां रक्तपंकैः शिरोभिः ॥ ६६ ॥
दुहितुरिति विलापप्रायमाकर्ण्य वाक्यं नरपतिरुदवोचन्मुंच बालेऽतिशोकं ।
जगति हि भवितव्यं भाविनो दैवयोगादगणितपरवीर्यं दैवमत्र प्रधानं ॥ ६७ ॥
पशुरपि निरपायं निर्गमोपायमार्गं विमृशति वधशंकः क्षेत्रमादौ विविक्षुः ।
स्फुटमिदमपि वृत्तं विस्मृतं मर्तुकामैस्तव पतिमतिमत्तैर्यादवैर्मारयद्भिः ॥ ६८ ॥
तव पदशरणाशाकंटका यद्यपि स्युः सहबलकुलशाखास्ते तथाप्याशु वत्से ।
श्रुतिपथमतिमत्ताः संति मत्क्रोधवर्षद्दवदहनशिखाभिर्भस्मिता ध्वस्तसंज्ञाः ॥ ६९ ॥
प्रियवचनपयोभिर्देहजाक्रोधवह्निं प्रततिमुपशमय्य क्षुब्धकोपानलः सः ।
यवननिधनकालं कालकल्पं तनूजं यदुजनिधनहेतोरादिदेशाशु राजा ॥ ७० ॥
चलजलधिसमानेनाभ्यमित्रं बलेन द्विपचतुरतुरंगस्यंदनाद्येन गत्वा ।

स लघु दश च सप्त व्युग्रयुद्धानि युद्धा यदुभिरतुलमालावर्तशैले ननाश ॥ ७१ ॥
पुनरपि जितजेयं भ्रातरं मागधो द्रागजितमपरपूर्वं प्राहिणोत्प्राणतुल्यं ।
प्रलयशिखिशिखालीघस्मरः स स्वयोगात्स्वबलपवननुन्नो द्विड्जगद्ग्रासलोलः ॥ ७२ ॥
तुमुलरणशतानि त्रीणि संप्रीणितास्ते यदुभिररिषु चत्वारिंशतं षट् च युद्धा ।
श्रमनुदामिव शूरो वीरशय्यां यशस्वी हरिशरमुखपीतप्राणसारोऽध्यशेत ॥ ७३ ॥
प्रमदमथ वहंतः संततं संवहंतो हरिरिपुमथुरायां माथुरैः पौरलोकैः ।
हरिहलधरवीरावार्यवीर्यावलेपप्रतिहतरिपुशंका शौरयो रेमिरेऽमी ॥ ७४ ॥
शमयति रिपुलोकोदारदावावलेपं जनयति जनबंधुर्बंधुलोकप्रहर्षं ।
जिनमतघनचर्यावारिधाराततिर्भूवलयफलसमृद्धिः श्रीयशोमालिनीयं ॥ ७५ ॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कंसापराजितवधवर्णनो नाम षट्त्रिंशः सर्गः।

---

१ 'वंशहेतोः' इति ख पुस्तके।

सप्तत्रिंशः सर्गः।

अथात्र यद्वृत्तमतीव पावनं पुरैव तु श्रेणिक लोकहर्षणं।
दशार्हमुख्यस्य सुसौर्यवासिनः शृणु प्रवक्ष्येऽवहितस्तदद्भुतं॥ १॥
जिनस्य नेमेस्त्रिदिवावतारतः पुरैव षण्मासपुरस्सराः सुरैः।
प्रवर्तिता तज्जननावधिर्गृहे हिरण्यवृष्टिः पुरुहूतशासनात्॥ २॥
तया पतंत्या वसुधारयार्धभाक् त्रिकोटिसंख्यापरिमाणया जगत्।
प्रतर्पितं प्रत्यहमर्थि सर्वतः क पात्रभेदोऽस्ति धनप्रवर्षिणां॥ ३॥
दिशां मुखेभ्यः समितास्तदाश्रिताः दिशां कुमार्यः परिचर्यया शिवां।
दिशां च चक्रस्य जयं जगत्त्रये दिशंत्यपत्येन जिनेन जिष्णुना॥ ४॥
समेत्य पत्यातिशयप्रदर्शनादतीव संहृष्टमतिः शिवान्यदा।
ददर्श सा स्वप्न इमान्निशांतरे प्रशंसितान् स्वप्नवरान् हि षोडश॥ ५॥
समंततोऽश्रांतमदांबुनिर्झरः प्रतिध्वनिव्याप्तदिगिंद्रपो द्विपः।

तया तमालासितभृंगझंकृतिरलोकि कैलाश इवाचलोचलः ॥ ६ ॥
सुशृंगमुत्तुंगककुत्स्वनत्खुरं प्रलंबसास्नायतबालधींक्षणं ।
सितं घनोद्रेकितधीरमंबिका–महोक्षमाक्षिप्रियमैक्षत क्षणं ॥ ७ ॥
विलंबितक्ष्माभृतमग्रशैलगं मृगांकलेखांकुशदंष्ट्रमायतं ।
दिगंतविश्रांत निनादमाविशत्–शरत्पयोदाभमिभारिमैक्षत ॥ ८ ॥
महेभकुंभाभकुचाभिभिः शुभैः कृताभिषेकां कुटगंधवारिभिः ।
करश्रितांभोजपुटां ददर्श सा विकासिपद्मासनवर्तिनीं श्रियं ॥ ९ ॥
स्रजौ प्रलंबे विमलांबरे वरे रजोरुणीभूतषडंघ्रिमंडले ।
भुजे निजे वा कुसुमातिकोमले सजागरे वावहिता व्यलोकत ॥ १० ॥
निरस्य नैशं निशितैरुपागतं करैस्तमोजालमलं निशाकरं ।
निरभ्रिते व्योम्नि प्रपश्यतिस्म सा स्थिराट्टहासं रजनीवरस्त्रियाः ॥ ११ ॥
दिनं दिनं दृश्यमुखं दिवाकरं सुसाध्यसिंदूरपरागपिंजरं ।

१ चलाचलः इति ख ग पुस्तकयोः । २ करोद्धृताम्भोजपुटां इति ख पुस्तके ।

पुरंदराशासु पुरंध्रिनंदनं चिरं धृतं दृष्टिसुखं ददर्श सा ॥ १२ ॥
तडिच्चलांगं सरसीवरांगनाविलोलसल्लोचनयुग्ममायतं ।
परस्परस्नेहभरं तयारमद् व्यलोकि सन्मत्स्ययुगं विमत्सरं ॥ १३ ॥
सुसौरभांभोभरकुंभयुग्मकं मुखावहितांभोरुहमंबुजेक्षणा ।
सुशातकुंभात्मकमभ्यलोकत स्वभावसोद्यत्कुचकुंभसन्निभं ॥ १४ ॥
शुभांबुपूर्णं जलपुष्पराजितं सुराजहंसादिविहंगसंगतं ।
महासरोऽदर्शि ततो मनोहरं मनो निजं वा शुचिनिर्मलं तया ॥ १५ ॥
प्रघूर्णितोत्तुंगतरंगभंगुरं प्रवालमुक्तामणिपुष्पशोभितं ।
महार्णवं फेनिलमुद्धतं भ्रमद्विभीषणग्राहगृहं निरैक्षत ॥ १६ ॥
नखाग्रदंष्ट्रादृढदृष्टिभासुरज्वलत्सटाटोपमृगेंद्रधारितं ।
मणिप्रभारंजितदिग्वधूमुखं ददर्श सिंहासनमासनं श्रियः ॥ १७ ॥
विचित्रभक्तिद्विजकोटिसंचलं सुवैजयंतीभुजमालयानटत् ।
प्रलंबमुक्तामणिमालिकोज्ज्वलं विमानमालोकि तया नभस्तले ॥ १८ ॥

फणामणिद्योतविभिन्नभूर्तमः फणींद्रकन्याकलगीतसंकुलं।
ज्वलन्मणि प्रैक्षि भुवः समुद्गतं फणींद्रभास्वद्भवनं महत्तया ॥ १९ ॥
सपद्मरागोज्ज्वलवज्रपूर्वकं प्रकृष्टमाणिक्यमहाशिखाकुलं।
व्यलोकतेंद्रायुधरुद्धदिङ्मुखं सुरत्नराशिं गगनस्पृशं शुभा ॥ २० ॥
शिखाकरालं शिखिनं मुखं दिशां प्रकाशयंतं शुचि रोचिषां निशि।
ददर्श संदर्शितसौम्यविग्रहं सविग्रहा श्रीरिव तोषपोषिणी ॥ २१ ॥
अनंतरं स्वप्नगणस्य कंपयन् सुरासनान्याविशदंबिकाननं।
सितेभरूपो भगवान् दिवश्च्युतः प्रकाशयन् कार्तिकशुक्लषष्ठिकं ॥ २२ ॥
पुनः पुनर्जागरणेन सांतराननंतरायानिति तान्विलोक्य सा।
विनिद्रनेत्रा जयगीतमंगलैरनालसा तल्पतलं ततोऽत्यजत् ॥ २३ ॥
प्रभातकाले कृतमंगलांगिका कुतूहलादेत्य पतिं प्रणामिनी।
क्रमेण तान् स्वप्नवरान्न्यवेदयत् प्रसन्नधीरित्यगदीत्स तत्फलं ॥ २४ ॥

१—भुवोऽन्धकारः।

प्रिये यदुत्पत्तिमियं वदत्यहर्दिनं पतंती वसुवृष्टिरद्भुता ।
सुदिक्कुमार्यो भवतीमुपासते यदर्थमास्थात्स हि सोद्य तीर्थकृत् ॥ २५ ॥
किमत्र ते स्वप्नफलं निगद्यते वरोरु यत्तीर्थकरप्रसूरसि ।
प्रपत्स्यते सोऽपि महान् महीयसां जगत्त्रये यत्तदवैहि कथ्यते ॥ २६ ॥
अनेकपोऽनेकपलोकनादलं विलंबितानेकपविभ्रमो गतैः ।
जगत्त्रये ते तनयस्तनूदरि प्रकाममेकाधिपतित्वमेष्यति ॥ २७ ॥
अलंकरिष्यत्यकलंकधीः कुलं जगत्त्रयं चात्र जगद्गुरुर्गुणैः ।
गवां कुलं वा वृषभो वृषेक्षणाद्वृषेक्षणः स्कंधधृतिः सुतस्तव ॥ २८ ॥
महावलेपानखिलाननेकपानुकरिष्यते सिंहवदुज्झितोन्मदान् ।
अनंतवीर्यः स हि सिंहदर्शनात् महैकधीरोऽततपोवनेश्वरः ॥ २९ ॥
यदैक्षि लक्ष्मीरभिषेकिणी ततः प्रसूतमात्रस्य गिरींद्रमस्तके ।
सुरासुरेंद्रैर्दयितेऽभिषिच्यते गिरिस्थिरः क्षीरसमुद्रवारिभिः ॥ ३० ॥
स्रजोः सुगंधायतयोः प्रदर्शनाज्जगत्रयव्यापियशाः सुगंधिभाक् ।

निरंतरं लोकमलोकमप्यसावनंतदृग्ज्ञानदृशा तनिष्यति ॥ ३१ ॥
स चंद्रसंदर्शनतः सुदर्शने महोदयाचंद्रिकया सुदर्शनः ।
जिनेंद्रचंद्रो जगतां तमोऽतकृन्निरंतराह्लादकरो भविष्यति ॥ ३२ ॥
समस्ततेजस्विजनस्य भूयसा निजेन तेजांसि विजित्य तेजसा ।
जगंति तेजोनिधिरर्कदर्शनात्करिष्यति ध्वस्ततमांसि ते सुतः ॥ ३३ ॥
सुखं कृतक्रीडझषद्वयेक्षणादवाप्य सौख्यं विषयोपयोगजं ।
अनंतमंते सुखमाप्स्यति ध्रुवं शिवालयेऽसौ शिवदेवि ! नंदनः ॥ ३४ ॥
सुपूर्णकुंभद्वयदर्शनात्ततो गृहं प्रपूर्णं निधिभिर्भविष्यति ।
जगन्मुदापूर्णमनोरथस्य हि प्रभावतस्तस्य शरीरजस्य ते ॥ ३५ ॥
विचित्रपुष्पांबुजखंडदर्शनादशेषसल्लक्षणलक्षितः सुतः ।
विदाहितृष्णातृषितान्वितृष्णधीरिहैव निर्वाणमयान् करिष्यति ॥ ३६ ॥
महासमुद्रस्य महामृतात्मनः समुद्रगंभीरमतिर्विलोकनात् ।
श्रुतांबुधिर्नीतिमहासरिद्धितं स पाययिष्यत्युपदेशकृज्जनान् ॥ ३७ ॥

सुरत्नसिंहासनदर्शनेन स स्फुरन्मणिद्योतिकिरीटपाणिभिः ।
परीतमारोक्ष्यति देवदानवैः परार्घ्यसिंहासनमूर्ध्वशासनः ॥ ३८ ॥
विमाननाथोऽमरनाथकोटिभिः प्रपूजितांघ्रिः सुविमानदर्शनात् ।
विमानसाधिः महतो महोदयो विमानमुख्यादवतीर्णवानिह ॥ ३९ ॥
भवेत्तु भेत्ता भवपंजरस्य स फणींद्रनिर्यद्भवनावलोकनात् ।
सुतोन्वितश्चापि मतिश्रुतावधिप्रधाननेत्रत्रितयेन जायते ॥ ४० ॥
बहुप्रकारस्फुरदंशुरंजितं द्युरत्नराशिप्रविलोकनात्सुतं ।
प्रतीहि नानागुणरत्नराशिना श्रयिष्यमाणं शरणाश्रिताश्रयं ॥ ४१ ॥
शिखावलीलीढनभस्तलोज्वलात्प्रदक्षिणावर्तविधूमवन्हितः ।
निरीक्षितादूध्यानमहाहुताशनः स कर्मकक्षं सकलं प्रधक्ष्यति ॥ ४२ ॥
किरीटसत्कुंडलपूर्वभूषणाः प्रभावतस्तस्य मदीयशासनं ।
अलंकरिष्यत्यनुकूलसेवकाः सुरेश्वराः प्राकृतपार्थिवा इव ॥ ४३ ॥

श्लथात्मधम्मिल्लसन्निजस्रजः समेखलानूपुरमंजुशिंजिताः।
प्रसाधनादावनुभावतोस्य ते सुरेंद्रसुंदर्य उपासनोद्यताः ॥ ४४ ॥
जनिष्यमाणेन जिनेंद्रभानुना प्रतीहि तेनात्र पवित्रकर्मणा।
स्ववंशमात्मानमिमं च मां जगत्पवित्रितं भूषितमुद्धतं तथा ॥ ४५ ॥
निशम्य सा स्वप्नफलं पतीरितं प्रतुष्टचित्ता सुतमंकवर्तिनं।
विचिंत्य चक्रे जिनपूजनादिकाः क्रियाः प्रशस्ता जनतामनोहराः ॥ ४६ ॥
जिनोद्भवे स्वप्नफलानुकीर्तनं पवित्रमुस्तोत्रमिदं दिने दिने।
प्रभातसंध्यासमये पठन् जनः स्मरंश्च शृण्वन् श्रयते जिनश्रियं ॥ ४७ ॥
इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ स्वप्नफलकथनो नाम सप्तत्रिंशः सर्गः।

अष्टत्रिंशः सर्गः।

जिनेंद्रपितरौ ततो धनपतिः सुरेंद्राज्ञया स्वभक्तिभरतोऽपि च स्वयमुदेत्य तीर्थोदकैः।
शुभैः समभिषिच्य तौ सुरभिपारिजातोद्भवैः सुगंधवरभूषणैर्भुवनदुर्लभैः प्रार्चयत् ॥ १ ॥

पुरैव परिशोधिते विदितदिक्कुमारीगणैर्बभार विमलोदरे प्रथमगर्भमुद्यत्प्रभं।
स्वबंधुजनसिंधुवृद्धिकरमस्ततापोदयं शिवाय जगतां शिवा शशिनमंबरश्रीरिव ॥ २ ॥
चकार न वियोजितत्रिवलिभंगशोभामसौ न च श्वसनबाधिताधरसुपल्लवं बालसां।
स्तनस्तवकभारनम्रतनुमध्यसुश्रीलतां नितांतकृपयेव तां फलभरो न चाबाधत ॥ ३ ॥
निगूढनिजगर्भसंभवतनोरिव व्यक्तये पयोधरभरो ययावतितरां पयःपूर्णतां।
तदुद्वहनगौरवादिव विशेषविस्तीर्णतां जगाम जघनस्थली निविडमेखलाबंधना ॥ ४ ॥
मनोभुवनरक्षणे सकलतत्त्वसंवीक्षणे वचोऽपि हितभाषणे निखिलसंशयोत्पेषणे।
वपुर्व्रतविभूषणे विनयपोषणे चोचितं बभूव जिनवैभवादतितरां शिवायास्तदा ॥ ५ ॥
महामृतरसाशनैः सुरवधूभिरापादितैरनंतगुणकांतिवीर्यकरणैः समास्वादितैः।
जिनेंद्रजननीतनुस्तनुरपि प्रभाभिर्दिशो दशापि कनकप्रभा विदधतीव विद्युद्बभौ ॥ ६ ॥
करींद्रमकरस्फुरत्तुरगतुंगमीनावली महारथसुयानपात्रनृपवाहिनीसन्मुखैः।
विशद्भिरनुकूलगैः समभिवर्धितोद्धोर्मिभिः समुद्रविजयोऽन्वहं पृथु समुद्रलीलां वहन् ॥ ७ ॥
जिनेन्द्रजनकौ जगद्वलयवेलयाभ्यर्चितौ परस्परविवर्धमानपृथुसम्मदौ नित्यशः।

महेंद्रवरशासनाभिरतदेवदेवीकृतप्रभूतिविभवान्वितौ गमयतः स्म मासान्नव ॥ ८ ॥
ततः कृतसुसंगमे निशि निशाकरे चित्रया प्रशस्तसमवस्थिते ग्रहगणे समस्ते शुभे ।
असूत तनयं शिवा शिवदशुद्धशुच्यग्रज–त्रयोदशतिथौ जगज्जयनकारिणं हारिणं ॥ ९ ॥
त्रिबोधशुचिचक्षुषा दशशताष्टसल्लक्षणैः सुलक्षितसुनीलनीरजवपुर्वपुर्विभ्रता ।
जिनेन जिनरोचिषा बहुगुणीकृतं मंडलं प्रसूतिभवनोपरे मणिगणप्रदीपार्चिषां ॥ १० ॥
विपांडुरपयोधरां दिवमखंडचंद्राननां निशि स्फुरिततारकानिकरमंडनाहारिणीं ।
तरंगभुजपंजरोदरविवर्तिनीं स्वेच्छया चुचुंब मदनांबुधिः सति जिनेंद्रचंद्रोदये ॥ ११ ॥
गभीरगिरिराजनाभिकुलशैलकंठाकुलस्तनोच्छलद्वाहिनी निवहहारभाराधरा ।
चचाल कृतनर्तनेव मुदितात्र जंबूमती समुद्रचलयांबरा रणितवेदिकामेखला ॥ १२ ॥
अनुत्तरमुखोज्वलः शिवपदोत्तमांगस्तदा नवानुदिशसद्धनुर्नवविमानकग्रीवकः ।
सुकल्पवपुरंतराधरजगत्कटीजंघकस्त्रिलोकपुरुषोऽचलत्कटिकरो नटित्वा स्फुटं ॥ १३ ॥
अभूद्भवनवासिनां जगति तारशंखस्वनो रराट पटहः पटुर्झटिति भौमलोकेऽखिले ।
रवेर्जगति सिंहनाद उरुघोषघंटानदत्सुकल्पभवने जिनप्रभववैभवाद्वै स्वयं ॥ १४ ॥

जगत्त्रितयवासिनश्चलितमौलिसिंहासनास्ततोऽसुरसुराधिपाः प्रणहितावधिस्वेक्षणाः ।
प्रबुध्य जिनजन्मजातपुरुसम्मदाः संपदा प्रचेलुरिह भारतं प्रति चतुर्णिकायामरैः ॥ १५ ॥
विशुद्धतमदृष्टयो मुकुटकोटिसंघटित--स्फुरत्कटकरत्नरश्मिखचिताखिलाशामुखाः ।
प्रणेमुरहमिंद्रदेवनिवहास्तु तत्र स्थिताः पदान्यभिसमेत्य सप्त हरिविष्टरेभ्यो जिनं ॥ १६ ॥
क्षितेरसुरनागविद्युदनलानिलद्वीपसत्सुपर्णसुमहोदधिस्तनितदिक्कुमाराभिधाः ।
समुद्ययुरितस्ततो भवनवासिनो भास्वरास्तदा विदधतो दिशो दश दशप्रकारामराः ॥ १७ ॥
सुकिंपुरुषकिन्नरामरमहोरगा राक्षसाः पिशाचसुरभूरिभूतवरयक्षगंधर्वकाः ।
मनोहरणदक्षगीतबहुनृत्ययुक्तांगनाः समीयुरिह मध्यलोकरतयोऽष्टधा व्यंतराः ॥ १८ ॥
गणाश्च शुचिरोचिषां प्रथितपंचधाज्योतिषां ग्रहर्क्षशशिभास्करप्रतततारकाख्यायुषां ।
बभौ युगपदापतन्निजविमानकेभ्योऽधिकं विधातुमिव चोद्यतो जगदिहापरं ज्योतिषां ॥ १९ ॥
यथास्वमपि सप्तभिः प्रथमकल्पनाथादयोऽप्यनीकनिवहैर्वृता युगपदच्युतेंद्रोत्तराः ।
प्रतिस्वमपि सप्तभिः सकलकल्पजैः षोडश प्रमोदवशवर्तिनः समभिजग्मुरिंद्राः सुरैः ॥ २० ॥

१ चतुर्निकायाः सुराः इति क पुस्तके ।

अनेकमुखदन्तसत्कमलखंडपत्रावलीसुरूपसुरसुंदरीललितनाटकोद्भासिनं ।
हिमाद्रिमिव जंगमं निजवधूभिरैरावतं करींद्रमधिरूढवानभिरराज सौधर्मपः ॥ २१ ॥
अनीकमथ योधजं रचितसप्तकक्षांतरं गृहीतवलयाकृतिप्रकृतिपौरुषाधिष्ठितं ।
परीत्य कुलिशायुधं कुलिशपूर्वशस्त्राटवीनिरुद्धगगनांतरं भृशमशोभत त्रैदशं ॥ २२ ॥
जवेन लघु लंघयद्द्रुतसमीरणं हेषितप्रयोजितवियोजितत्रिभुवनांतरालं तथा ।
वृहद्बहिरवर्तत प्रवितत हयानीकमप्यरं गगनवारिधेरधितरंगरंगायितं ॥ २३ ॥
सुमुग्धमुखकौशिकैर्नयनपुंडरीकैर्निजैलसत्ककुदवालधिश्रुतिसुगात्रसास्नापुटैः ।
सुवर्णखुरशृंगकैः प्रतिवृषं वृषानीकमप्युवाह परितःस्थितं विपुलकांतिमिंदुप्रभां ॥ २४ ॥
विभिन्नमपि सप्तधा स्वयमभेद्यमप्यद्रिभिर्नभोवलयसागरे त्रिदशयानपात्रायितं ।
प्रभाविजितविस्फुरद्रविरथं रथानीकमप्यभादतिमनोहरं वलयवत्परिक्षेपकं ॥ २५ ॥
विकीर्णघनशीकरैः करिभिरूर्ध्वलीलाकरैः प्रवृत्तगुरुगर्जितैर्गुरुतरैरिवांभोधरैः ।
महामरुदधिष्ठितैः सुघटितं गजानीकमप्यनेकरचनांतरं व्यतनुत श्रियं प्रावृषः ॥ २६ ॥

१—' हयानीकपं परं गगनवारिधेः ' इति क पुस्तके ।

स्वरैरपि च सप्तभिर्मधुरमूर्छनाकोमलैः सवीणवरवंशतालरवमिश्रितैराश्रितैः ।
अपूर्णभुवनोपरं बहिरतोप्यनीकं बभौ युवत्यमरबंधुरं धृतिकरं तु गंधर्वजं ॥ २७ ॥
समस्तरसपुष्टिकं बलमहारिगात्रोत्करैः मनःकुसुममंजरीरमरभूरुहामाहरत् ।
प्रनृत्य पुरुनर्तकीमथमनीकमप्यंबरैर्नितंबमरमंथरं निचितमाविरासीत्तथा ॥ २८ ॥
सहस्रगुणितोदिता चतुरशीतिरेषु स्फुटं प्रमाणपि सप्तसु प्रथमसप्तकक्षास्वतः ।
परं द्विगुणमेतदेव सफलेषु कक्षांतरेष्वनीकवलयेष्वियं क्रमभिदा समाप्तेः स्थितिः ॥ २९ ॥
यथापथमनीकिनः सकलनाकलोकाधिपा जिनेंद्रजननाभिषेककरुणाय यावद्ययत् ।
वितत्य पुरमाव्रजंति मुदितास्तु तावद्दिशां कुमार्य उपकुर्वते निखिलजातकर्मोद्यताः ॥ ३० ॥
तथाहि विजया स्मृता जगति वैजयंती परा परोक्तिरपराजिता प्रवदिता जयंती परा ।
तथैव सह नंदया भवति चापरानंदया सनंद्यभिधवर्धनां हृदयनंदिनंदोत्तरा ॥ ३१ ॥
कुचानिव निजानिमा विगलदंगभृंगारसद्रसेन भरितान् भृशं विपुलतुंगभृंगारकान् ।
समूहुरभिरामकानमलहारभारोज्वला ज्वलन्मणिविभूषणश्रवणकुंडलोद्भासिताः ॥ ३२ ॥
तथैव सयशोधरा प्रथितसुप्रबुद्धामरी सुकीर्तिरपि सुस्थिता प्रणधिरत्र लक्ष्मीमती ।

विचित्रगुणचित्रया सह वसुंधरा चाप्यमूः गृहीतमणिदर्पणा दिश इवेंदुमत्यो बभुः ॥ ३३ ॥
इला नवमिकासुरासहितपीठपद्मावती तथैव पृथिवी परप्रवरकांचना चंद्रिका।
प्रभास्फुटिततारकाभरणभूषिता भास्वराः सचंद्ररजनीनिभा धृतसितातपत्रा बभुः ॥ ३४ ॥
श्रिया च धृतिराशया च वरवारुणी पुंडरीकिणी स्फुरदलंबुसा च सह मिश्रकेशी ह्रिया।
सचामरकरा इमा बभुरुदारफेनावलीतरंगकुलसंकुला इव कुलापगाः संगताः ॥ ३५ ॥
कनत्कनकचित्रया सहितया पुनश्चित्रया त्रिलोकसुरविश्रुतत्रिशिरसा च सूत्रामणिः।
कुमार्य इव विद्युतो विलसितैर्जिनस्यांतिके तमोनुद इवाबभुर्जलधरस्य विद्युल्लताः ॥ ३६ ॥
सहैव रुचकप्रभा रुचकया तदध्यासया परा च रुचकोज्वला सकलविद्युदग्रेसराः।
दिशां च विजयादयो युवतयश्चतस्रो वरा जिनस्य विदधुः परं सविधि जातकर्माश्रिताः ॥ ३७ ॥
चतुर्विधसुरासुरा लघु समेत्य तावत्पुरं कुबेरजनिताद्भुतप्रथमशोभमुच्चैर्ध्वजं।
परीत्य जिनभक्तितास्त्रिदशनाथलोकश्रियं विजेतुमिव चोद्यतं ददृशुरादृताः सेंद्रकाः ॥ ३८ ॥
प्रविश्य नगरं ततः शतमखः स्वयं सत्सखः शिवास्पदसमीपगः स्थितिविदादिदेशादृतां।

शचीं शुचिमचापलां समुपनेतुमीशं शिशुं प्रसूतिगृहमाविशन्निति तदा बभासादरा ॥ ३९ ॥
विकृत्य सुरमायया शिशुमिहापरं निद्रया प्रयोज्य जिनमातरं प्रणतिपूर्वकं यत्नतः ।
प्रगृह्य मृदुपाणिना शिशुमदादसौ स्वामिने प्रणम्य शिरसा ददावमरराट् कराभ्यां जिनं ॥४०॥
जिनेंद्रमुखचंद्रकं विजितपुंडरीकेक्षणं विशेषविजितासितोत्पलवनश्रियं तं श्रिया ।
निरीक्ष्य जिनपद्मपाणिचरणं सहस्रेक्षणः सहस्रगणनेक्षणैरपि ययौ न तृप्तिं तदा ॥ ४१ ॥
विधाय स सुरद्विपस्फटिकभूभृतो मस्तके जिनेंद्रशिशुमिंद्रनीलमणितुंगचूडामणिं ।
चचाल चलचामरातपनिवारणोच्चैरुचिश्चलोर्मिकुलसंकुलो जलनिधिर्यथा फेनिलः ॥ ४२ ॥
सुरेभवदनत्रिके दशगुणे द्वयोश्चाष्ट ते रदाः प्रतिरदं सरः सरसि पद्मिनी तत्र च ।
भवंति मुखसंख्यया सहितपद्मपत्राण्यपि प्रशस्तरसभाविताः प्रतिदलं नटंत्यप्सराः ॥ ४३ ॥
तथाविधविभूतिभिः समुपगम्य मेरुं सुराः परीत्य पृथु पांडुकाख्यवनखंडमभ्येत्य ते ।
जिनेंद्रमतिरुद्रपांडुकशिलातले कोमले सुपंचशतकार्मुकोच्चहरिविष्टरेऽतिष्ठपन् ॥ ४४ ॥
ततश्च धृतपूजनोपकरणेषु देवांगनागणेषु परितःस्थितेष्वभिनवोत्सवानंदिषु ।

१ मुदितचापलां इति क पुस्तके ।

नटत्सु कृतपोत्कटप्रकटनाटकेषु स्फुटप्रकृष्टरसभावहावलयरंजितस्वर्गिषु ॥ ४५ ॥
रटत्पटहशंखशब्दहरिनादभेरीरवैर्गिरीद्रसुबृहद्गुहाग्रनिनिनादसंवर्धितैः ।
दिगंतरविसर्पिभिर्जिनगुणैरिवप्रस्फुटैरशेषभुवनोदरे श्रुतिसुखावहैः पूरिते ॥ ४६ ॥
नभस्तलमितस्ततस्थगयति स्फुरत्सौरभे विचित्रपटवासधूपपटले सुपुष्पोत्करे ।
सुगंधयति बंधुरे परमगधहृद्ये दिशां मुखानि सुखपांडुकप्रभवमातरिश्वन्यलं ॥ ४७ ॥
गृहीतबहुविग्रहः सुरपरिग्रहो वासवः समारभत भक्तितो जिनमहाभिषेकं स्वयं ।
विधातुममराहृतैस्तु मणिहेमकुंभच्युतैः पयोमयपयोनिधेः शुभपयोभिरुद्‌गांधिभिः ॥ ४८ ॥
बहुत्रिदशपंक्तिभिः प्रमदपूरिताभिर्नभः स्फुरन्मणिगणोज्वलत्कलशपाणिभिः सर्वतः ।
सुमेरुगिरि पंचमांबुनिधिमध्यमध्यासितं रराज बहुरज्जुभिस्तदवनीयमानं तदा ॥ ४९ ॥
गृहाण कलशं लघु क्षिप नयाशु संधारय प्रभं च मम सन्मुखं त्वमिति कर्णरम्यारवैः ।
करात्करमितस्ततः सुरगणस्य कुंभावली श्रिया श्रयति पांडुकं वनमिवोरुहंसावली ॥ ५० ॥
सुवर्णमयरूपकांतिमयकुंभकाल्यो बभुः प्रवेगमरतां वशा रविशशांकमाला यथा ।
सुपक्षपुंटदीप्तिभिः खचितदिङ्मुखा खे रयोत्पतद्गरुडहंसपंक्तय इव यथानेकशः ॥ ५१ ॥

शताध्वरभुजोद्धृतैर्जलधरैरिवोद्गर्जितैः सहस्रगणनैर्घटैः शुचिपयोभिरावर्जितैः।
जिनोऽभिषवमाप्नुयाद्धवलमद्रिराजं व्यधाद्धाति धवलात्मतामधवलो हि शुद्धाश्रयात् ॥ ५२ ॥
सतोषमपरेऽपि ते निखिलकल्पनाथादयो यथेष्टमभिषेचनं विदधुरंबुभिर्निर्मलैः।
जिनस्य जिनशासनाधिगमशस्तरागोदयः प्रकाशिततनूरुहास्तनुतरात्मजन्माधयः ॥ ५३ ॥
ततः सुरपतिस्त्रियो जिनमुपेत्य शच्यादयः सुगंधितनुपूर्वकैर्मृदुकराः समुद्वर्तनं।
प्रचक्रुरभिषेचनं शुभपयोभिरुच्चैर्घटैः पयोधरभरैर्निजैरिव समं समावर्जितैः ॥ ५४ ॥
दुकूलमणिभूषणस्रगनुलेपनोद्भासितं प्रयोज्य शुभपर्वतं विभुमरिष्टनेम्याख्यया।
सुरासुरगणास्ततः स्तुतिभिरित्थमिंद्रादयः परीत्य परितुष्टुवुर्जिनमिति सपृथ्वीश्रियं ॥ ५५ ॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ जन्माभिषेकवर्णनो नाम अष्टत्रिंशः सर्गः।

एकोनचत्वारिंशः सर्गः।

सकलश्रुतमत्यवधिप्रविकासिविशुद्धविलासविनिद्र-
विशिष्टविलोचनदृष्टिविदृष्टसमस्तचराचरतस्त्वजगत्त्रितय।

त्रितयात्मकदर्शनबोधचरित्रविनिर्मलरत्नविराजित-
पूर्वभवोग्रतपोयुतषोडशकारणसंचिततीर्थकरप्रकृते ॥
प्रकृतेः स्थितितोऽनुभवाच्च विशिष्टतराद्भुतपुण्यमहोदय-
मारुतवेगविचालितदेवनिकायकुलाचलसेवितपादयुग।
युगमुख्यमुखांबुजदर्शनतृप्तिविवर्जितभव्यमधुव्रतधीर-
तरस्तवनध्वनिबृंहितदुंदुभिनादनिवेदितशुद्धयशः ॥
यशसा धवलीकृतजन्मपवित्रितभारतवर्षमहाहरिवंश-
महोदयशैलशिखामणिबालदिवाकरदीप्तिजितार्कवपुः।
वपुषाधिककांतिभृताजितपूर्णशशांकविभो! हरिनीतमणि-
द्युतिमंडलमंडित दिङ्मुखमंडल नेमिजिनेंद्र! नमो भवते॥
भवतेह भुवां त्रितये भवता गुरुणा परमेश्वरविश्वजनीन-
महेच्छधिया प्रतिपादितमप्रतिमप्रतिमारहितं
हितमुक्तिपथं प्रथितं विधिवत्र प्रतिपद्य विधायि तपोविविधं

विधिना प्रविधूय कुकर्ममलं सकलं भुवि भव्यजनः प्रणतः ॥
प्रणतिप्रिय ! संप्रति जन्मजरामरणामयभीममहाभवदुःख-
समुद्रमपारमतीत्य समेष्यति मोक्षमशेषजगच्छिखरं ।
शिखराग्रसमग्रगुणाश्रयसिद्धमहापरमेष्ठिमहोपचयं
प्रविदंति चयं मुनयः परमं पदमेकमिहाक्षरमात्महितं ॥
महितं महतां महदात्मगतं सततोदयमंतविवर्जितमूर्जित-
सत्त्वसुखं प्रतिलभ्यमभव्यजनैः खलु यत्र सुखं ।
सुखमत्र यदीश्वरविश्वजगत्प्रभुताप्रतिबुद्धमपि त्रिद-
शेंद्रनरेंद्रपुरस्सरदेवमनुष्यविशेषमहाभ्युदयप्रभवं ॥
प्रभवप्रलयस्थितिधर्मपदार्थनिरूपणनैपुणशासन
तावकशासनसेवनयैव भविष्यति नान्यमताश्रयतः ।
श्रयतामिति निश्चयमेत्य भवंति भवत्यभिभूतिमतिप्रवणाः
सततं तनुभृन्निवहा भुवि येऽत्र त एव जिनेंद्रकृतित्वमिताः ॥

प्रियसर्वहितार्थवचोविभवं विभवं सुरभीकृतदिग्विवरं
वरसंहतिसंस्थितिरूपयुतं युतसर्वसुलक्षणपंक्तिरुचिं ।
रुचिमत्पयसा समदेहरसं रसभावविदं मलमुक्ततनुं
तनुजस्विदहीनमनंततया ततया सहितं भुवि वीर्यतया ॥
यतयात्मधिया जितयात्मभुवं भुवमच्यंतरां सुखसस्यभृतं
भृतविश्व ! भवंतमनंतगुणं गुणकांक्षितया वयमीश नताः ।
योजनभूरिसहस्रनभोगं भोगकरत्वमिवाचलनाथं
नाथ ! परं स्नपनासनमिद्धमिद्धमतिः कुरुते क उदारः ॥
ईदृशमीश विभुत्वममानं मानधनामरमानवमान्यं
मान्यतमोऽन्यतमो भुवि नाको नाकभवोऽपि जिनेति यथा त्वं ॥
शैशव एव जनतिगसत्व सत्वहितो भुवनत्रय नूतः
नूतनभक्तिभरेण नतानां तानव मानव[1]सौख्यकर त्वं ॥

---

1 मानस इति ख पुस्तके ।

कामकरींद्रमृगेंद्र नमस्ते क्रोधमहाहिविराज नमस्ते
मानमहीधरवज्र नमस्ते लोभमहावनदाव नमस्ते ।
ईश्वरताधरधीर नमस्ते विष्णुतया युत देव नमस्ते
अर्हदचिंत्यपदेश नमस्ते ब्रह्मपथप्रतिबंध नमस्ते ॥
सत्यवचोनिवहैः सुरसंघा इत्यभिनुत्य जिनं प्रणिपत्य
तारकमुग्रभवाद्वरमेकं याचितवंत इनं वरबोधिं ।
अथ मथितमहामृतांभोधिसंशुद्धपीयूषपिंडातिपानातिदोषाच्चिराज्जीर्यमाणेष्विवोद्गीर्णमाणेषु तत्खंडखंडेषु शंखेषु खे खेदमुक्तैः सुरैस्तोषपोषादनीषन्मनीषैर्भृशं पूर्यमाणेषु तद्यथा वाद्यमानोरुगंभीरभेरीमृदंगानकादिप्रभूताततातोद्यशब्देषु संवृत्तजैनेंद्रजन्माभिषेकोत्सवोद्घोषणायेव निश्शेषलोकांतदिक्चक्रवालोत्तराक्रांतिमभ्युत्थितेषु प्रनृत्यत्सुविद्याधरव्रातदेवांगनातुंगसंगीतनादाभिरामातिशृंगारहास्याद्भुतोद्यद्रसोदारवारांगसत्वस्फुटाहार्यहार्यात्मादिव्याभिनेयप्रवृत्ताप्सरोवृंदबंधेषु सौधर्मकल्पाधिपःसंभ्रमाद्विभ्रमभ्राजमानोद्यदैरावतस्कंध-

मारोप्य संवृत्यधीरं जिनेंद्रं शितच्छत्रशोभं चलच्चामरालीभिरावीज्यमानं प्रगीताप्सरो
लोकसंगीयमानातिशुद्धात्मकीर्तिं चचालाचलेंद्रादनेकैरशेषैरशेषं नभोभागमापूर्वशै
लैरलं यादवेंद्रैर्मृगेंद्रैरिवाध्यासितं प्रथितविबुधनिकायैः पथि प्रस्थितैः स-
प्रमोदैः प्रणामप्रणुतिप्रगीतिप्रयोगप्रवृत्तैर्यथायोगमभिनंद्यमानो महानंद
मापादयत् पादपद्मोपसेवासनाथस्य नाथस्त्रिलोकामराधीशलोकस्य लोका
तिवर्तिप्रवृत्तं परंपारमैश्वर्यमन्यद्भुतं संदधानः शिवानंदनो नंद वर्धस्व
जीवेति वेत्यादि पुण्याभिधानैस्तदा स्तूयमानः कुलाद्रिप्रसूतिप्रसूतच्छतोयापगा
वीचिसंतानसंसर्गसीतात्मना भोगभूभूरुहाणां विचित्रप्रसूतप्रतानप्रसंगेन
सौगंध्यमत्यद्भुतं बिभ्रता संभ्रमेणातिदूराच्च खेदापनोदार्थमभ्युत्थितेनेव
मित्रेण गात्रानुकूलेन मंदानिलेन प्रभुस्तीर्थकृत्कोमलांगः समालिंग्यमानो मनोहा
रिबाल्यानुरूपं वरोद्भासिभूषाविशेषोध्यमाल्योज्वलो बालकल्पद्रुमोद्दामशो-
भातिशायी घनश्याममूर्तिः सितोद्गंधिसच्चंदनेनोपदग्धस्फुरत्सांद्र
चंद्रातपाश्लिष्टरुद्रेंद्रनीलाद्रिलक्ष्मीधरो देवसेनावृतः शीघ्रमुल्लंघ्य काष्ठा-

मुदीचिमधिष्ठानमात्मीयमुच्चैर्ध्वजव्रातवादित्रधीरध्वनिव्याप्तदिक् चक्र-
वालां वरं दिव्यगंधांबुवर्षाभिषिक्ता पतत्पुष्पवर्षोपरुद्धोरुरथ्या यथा श्रीनिधानं
निधानेन मांगल्यसंसंगिना चारुशौर्यं पुरं प्रापदैश्वर्यमाश्चर्यभूतं भुवि
प्राकटं विश्वलोकस्य कुर्वन्नसौ नेमिनाथः शिशुर्माशु(?)सुश्रियं शौरिसार्य
प्रजाशुं(सुं)भदंभोजिनीबालभास्वंतमुत्तुंगमातंगराजोत्तमांगस्थमादाय तं मातु-
रुत्संगमानीय शक्रः स्वयं विक्रियाशक्तियुक्तः सहस्र भुजां भासुरांसस्थल-
श्रीयुषां स प्रकृत्यपसार्योरुसौंदर्यसंदर्भगर्भामरश्री (स्त्री) सहस्राणि चित्रं प्रनृत्यंति
विभ्रद्भुजेष्वग्रतो यादवानां मुदा पश्यतां विश्वकाप्यस्य (?) धीशत्वलाभादपि
प्राज्यलाभं हृदि ध्यायतां स्फारिताक्षं क्षणारब्धसत्तांडवाखंडशोभाश्रयो
गान्वितं बाह्यजातिप्रतातप्रवृत्ताभिनेयं सभ्रूक्षोभलीलं सदिचक्रभेदं सभूमि-
प्रयातं महानंदसन्नाटकं राज्यदक्षो ननाट स्फुटीभूतनानारसोदारभावं
ततोर्हद्गुरुं देवराजः प्रणम्य प्रपूज्यान्यमर्त्यैरनर्घ्यैरलभ्यैर्विभूषादिभि-
र्भूषयित्वा जिनस्यामृताहारमुख्यं करांगुष्ठके दक्षिणे न्यस्य रक्षानिमित्तं

वयस्यान् कुमारान् सुराणां सुरेंद्रः कुमारस्य सम्यग्निरूप्याप्रमत्तं
कुबेरं वयोभेदकालर्तुयोगं विभोः क्षेमयोग्यं विधेयं समस्तं त्वयेति
स्थिरं ज्ञापयित्वा समापृच्छ्य जैनौ गुरू तावनुज्ञां ततः प्राप्तसंप्राप्तलाभः
कृतार्थं निजं मन्यमानो यथायातमन्यैरशेषैः सुरेंद्रैश्चतुर्भेददेवानुगैर्यात–
वान् सिद्धयात्रस्ततो दिक्कुमार्योऽपि संवृत्तकार्या समासाद्य तामार्यपुत्रीं
सपुत्रां शिवां संप्रणम्य प्रहृष्टाः प्रजग्मुर्निजस्थानदेशान् दिशस्ता दश द्योतयंत्यः
शरीरप्रभाविर्जगन्नेमिचंद्रोऽपि शुभ्रैर्गुणग्रामसांद्रांशुजालैः समाह्लादयन्
बालभावेऽप्यबालक्रियो लालितो बंधुवर्गामरैर्वर्धमानो रराज श्रिया ।
स्तवनामिदमरिष्टनेमीश्वरस्येष्टजन्माभिषेकाभिसंबंधमाक्रांतलोकत्रयाति-
प्रभावस्य पापापनोदस्य पुण्यैकमार्गस्य संसारसारस्य मोक्षोपकंठस्य
भव्यप्रजानां प्रमोदस्य कर्तुः प्रमादस्य हर्तुर्धर्मस्योपनेतुर्मुदा श्रूयमाणस्य
स्मर्यमाणस्य च संकीर्त्यमानस्य संकीर्तनं पठ्यमानं समाकर्ण्यमानं
सदा चिंत्यमानं सम्यक्त्वज्ञानचारित्ररत्नत्रयस्याभिसंपत्करं चैनं शारीर-

सौख्यप्रदं शांतिकं पौष्टिकं तुष्टिसंपत्तिसंपादि साक्षादिहामुत्र चानेककल्याण-
संप्राप्तिहेतोः प्रपुण्यास्रवस्य स्वयं कारणं वारणं सर्व पापाश्रवाणां
सहस्रस्य विध्वंसकरणं दारुणस्यापि पूर्वत्र सर्वत्र चानेहसि स्नेहमोदिभावेन
संचितस्यैनसः स्तोत्रमुख्यं जिनेंद्रे विधेयादिदं भक्तिभारं परं।

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ जन्माभिषेकवर्णनो नाम एकोनचत्वारिंशः सर्गः।

चत्वारिंशः सर्गः।

अथ श्रुत्वा जरासंधो भ्रातुर्बधमसौ मृधे। शोकसिंधौ निमग्नोऽरिक्रोधपोतेन धारितः ॥१॥
समस्तयदुनाशाय समस्तनयपौरुषः। सोऽभ्यमित्रमभीर्गंतुं मित्रवर्गमजिज्ञपत् ॥२॥
प्रभोस्तस्य समादेशान्नानादेशाधिपा नृपाः। चतुरंगबलोत्तुंगाः श्रिताः स्वामिहितैषिणः ॥३॥
दत्तप्रयाणमेनं त्वनंतसैन्याब्धिवर्तिनं। विविदुर्यदुशार्दूलाश्चराश्चारचक्षुषः ॥४॥
ततः श्रुतवयोवृद्धा वृष्णिभोजकुलोत्तमाः। कर्तुमारेभिरे मंत्रमिति तत्त्वनिरूपिणः ॥५॥

१ जनपदाधिपाः।

त्रिखंडाखंडिताज्ञोऽन्यैः प्रचंडश्चंडशासनः । चक्रखड्गगदादंडरत्नाद्यस्त्रबलोद्धतः ॥६॥
कृतज्ञः कृतदोषेषु प्रणतेषु कृतक्षमः । अस्मास्वनपकारः[1] प्रागुपकारैकतत्परः ॥७॥
जामातृभ्रातृघातोत्थपराभवरजोमलं । प्रमार्ष्टुं कोपवानस्मान्मागधोऽभ्येत्य विभ्यतः ॥८॥
दैवपौरुषसामर्थ्यमस्मदीयमतिस्मयः । प्रकटीभूतमप्येष पश्यन्नपि न पश्यति ॥९॥
कृष्णस्य पुण्यसामर्थ्यं पौरुषं च बलस्य च । बाल्यादारभ्य निःशेषमिदं परमवैभवं ॥१०॥
नेमितीर्थकरस्यापि देवेंद्रासनकंपिनः । प्रभुत्वं च स्फुटीभूतं बालस्यापि जगत्त्रये ॥११॥
यस्यानुपालने व्यग्राः समग्रा लोकपालिनः । तत्तीर्थकृत्कुले को वा मानुषोऽपकरिष्यति ॥१२॥
करेण कः स्पृशेदज्ञः कृशानुमकृशार्चिषं । तीर्थकृद्बलकृष्णान्वा कोऽभ्येति विजिगीषया ॥१३॥
प्रतिशत्रुरयं राजा जरासंधोऽस्य हिंसकौ । ध्रुवमत्र समुद्भूतौ रामनारायणाविमौ ॥१४॥
तदत्र यावदापत्य सपक्षः कृष्णपावके । प्रतिशत्रुपतंगोऽयं भस्मीभवति न स्वयं ॥१५॥
तावदाशु वयं शूरं शौरिमेस्मद्वशं[3] परं । विगृह्यासनयोगेन योजयामो जयोन्मुखं ॥१६॥
स्वीकृत्य वारुणीमाशां कानिचिद्दिवसानि वै । विगृह्यासनमेवं हि कार्यसिद्धिरसंशया ॥१७॥

१ अस्मास्वनपकारेषु प्रागुपकारतत्परः । २ पूर्ण इत्यपि । ३ वसुदेवपुत्रं ।

आसीनानेवमप्यस्मानभ्येति यदि मागधः । रणातिथ्यं प्रकृत्यैनं प्रेषयामो रणप्रियं ॥१८॥
इति संमंत्र्य ते मंत्रं प्रकाश्य कटके स्वके । आनंदिनीनिनादेन प्रयाणकमज्ञिज्ञपन् ॥१९॥
श्रेयोस्तस्या रवं श्रुत्वा चतुरंगबलं ततः । यदुभोजकुलक्ष्माभृत्प्रधानमच्चलद्बलं ॥२०॥
माधुर्यैः शौर्यपूर्यैश्च वीर्यपूर्यैः प्रजास्तदा । समं स्वाम्यनुरागेण स्वयमेव प्रतस्थिरे ॥२१॥
प्रजाः प्रकृतिभिः सर्वाश्चातुर्वर्ण्याः सधार्मिकाः । प्रस्थानं मेनिरे स्थानादुद्यानक्रीडया समं ॥२२॥
अष्टादशेति संख्याता कुलकोट्यः प्रमाणतः । अप्रमाणधनाकीर्णा निर्यांति स्म यदुप्रियाः ॥२३॥
प्रशस्ततिथिनक्षत्रयोगवारादिलब्धयः । सुलब्धसुकुला भूपा जग्मुरल्पैः प्रयाणकैः ॥२४॥
देशानुल्लंघ्य निःशेषान् प्रतीचीं प्रति गच्छतां । बभूव विपुलस्तेषामुपांते विंध्यपर्वतः ॥२५॥
गजकाननरम्यस्य सिंहशार्दूलशालिनः । शृंगालीडांबरस्यास्य श्रीर्जहार मनो नृणां ॥२६॥
अनुवर्त्म जरासंधं तत्रायातं निशम्य ते । प्रत्यैक्षंत महोत्साहा यदवोऽपि युयुत्सवः ॥२७॥
अल्पमंतरमालोक्य देवताः सेनयोस्तयोः । भरतार्द्धनिवासिन्यः कालदैवनियोगतः ॥२८॥
विकृत्य दिव्यसामर्थ्यादंतरे चितिकाश्च ताः । अग्निज्वालापरीतास्तान् दर्शयांचक्रिरे रये ॥२९॥
चतुरंगबलं तच्च दह्यमानमितस्ततः । पश्यति स्म जरासंधो ज्वालालीलीढविग्रहं ॥३०॥

ज्वालारुद्धपथस्तत्र विश्रांतनिजसाधनः। अपृच्छद्रुदतीमेकां स्थविरीभूय देवतां ॥३१॥
दह्यते विपुलः कस्य स्कंधावारोऽयमाकुलः। किमर्थं रोदिषि त्वं च वद वृद्धे! यथास्थितं ॥३२॥
इति पृष्टा समाचष्टे तस्मा अश्राविलेक्षणा। शोकं निगृह्य कृच्छ्रेण रुद्धे कंठेऽपि मन्युना ॥३३॥
वदामि शृणु तेजस्विन्! यथादृष्टं यतो जनः। निवेद्य महते दुःखान्महतोऽपि विमुच्यते ॥३४॥
अस्ति राजगृहे राजा जरासंध इति श्रुतिः। सत्यसंधः स यः शास्ति सागरांतां वसुंधरां ॥३५॥
वाडवार्चिश्छलेनास्य नूनमंबुनिधावपि। प्रज्वलंति द्विषां शांत्यै प्रतापदहनार्चिषः ॥३६॥
आत्मापराधबाहुल्यात्सशल्यहृदयास्ततः। यादवाः क्वापि संत्रस्ताः प्रयांतः प्रियजीविताः॥३७॥
ते काश्यप्यामपश्यंतः संतःसशरणं क्वचित्। प्रविश्य दहनं याताः शरणं मरणं परं ॥३८॥
कुलक्रमागता तेषां भुजिष्या भूभुजामहं। स्वामिदुर्मतिदुःखार्ता रोदिमि प्रियजीविता ॥३९॥
यादवाः कौरवा भोजाः प्रजाः प्रकृतिभिः सह। अनुलग्नजरासंधाः प्रलीना हुतभुग्मुखे॥४०॥
अहं तु दुःखसंभारनिलयीकृतविग्रहा। सग्रहेव वियोगार्त्ता प्राणिमि प्राणवल्लभा ॥४१॥
श्रुत्वेति जरतीवाक्यं जरासंधोऽतिविस्मितः। श्रद्धयान्धकवृष्णीनामन्वयांतममन्यत ॥४२॥
द्राग् निवृत्य निजं स्थानं सोऽध्यास्य सह बांधवैः। विपक्षेभ्यो जलं दत्त्वा कृतकृत्य इव स्थितः॥४३॥

यदवोऽपि ययुः स्वेच्छमुपकंठमुदन्वतः। एलावनलतासंगसद्गंधानिलवीजितं ॥ ४४ ॥
अपरार्णवमासृत्य दूरदेशनिवेशनाः। यथास्वं ते नृपास्तस्थुः प्रजाः प्रकृतयस्तथा ॥४५॥

पार्ष्णिग्राहितयानुमार्गमघृणो लग्नोऽतिनिर्बंधतः।
संधावन् परनाशमाशु कुपितः कर्तुं च मर्तुं स्वयं ॥
ज्वालारुद्धपथो न्यवर्त्तत रिपुर्यद्वन्यसर्वक्रिया–
स्तज्जैनाः कथयंति तावदनयोः पुण्योदयः श्रूयतां ॥ ४६ ॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनेसनाचार्यकृतौ हरिवंशयादवप्रस्थानवर्णनो नाम चत्वारिंशः सर्गः।

एकचत्वारिंशः सर्गः।

दिदृक्षया ततो याताः क्षत्रियाः क्षुब्धतोयधेः। ते दशार्हमहाभोजविष्णुनेमीश्वरादयः॥१॥
ततः शीकरिणं मत्तमिव दिक्करिणं मुहुः। झषस्फुरणलीलेषदुन्मीलननिमीलनं ॥ २ ॥
महत्त्वस्पर्द्धयेवोर्ध्वमूर्मिदोर्मंडलैश्चलैः। आस्फालयितुमाकाशमाशानुगतमूर्जितं ॥३॥
घूर्णमानमुदीर्णोग्रमकरग्राहविग्रहं। मकराकारमैक्षंत मकरीकारिणीवृतं ॥४॥

अलब्धपारमुद्युक्तैरप्यनुत्पन्नबुद्धिभिः। अतिगंभीरतायोगादलंघितनिजस्थितिं ॥५॥
तुंगभंगतरंगौघदंगपूर्णमहार्णसं। पुराणमार्गसंपातनदीमुखमनोहरं ॥६॥
अनर्घ्यात्ममहारत्नमुक्ताकरमनादिकं। वैपुल्यस्वच्छतासंगादंगीकृतनभःश्रियं ॥७॥
आत्मांतःस्थापितानंतजीवरक्षादृढक्षमं। अलंघितपदं सर्वैर्वादिभिर्विजिगीषुभिः ॥८॥
निरस्यं तमनंतानुबंधितापमुपाश्रितं। सुखेन स्पर्शनेनापि स्वावगाहेन किं पुनः ॥९॥
निशम्यार्णवमुद्दीर्णमिव शास्त्रार्णवं जिनैः। विप्रिये राजकं राजदाकीर्णकुसुमांजलिः ॥१०॥
नेमिनाथागमोद्भूतसम्मदेनेव भूरिणा। नृत्यन्निवोर्मिदोर्वार्द्धिर्बभौ शंखस्वनोद्धुरः ॥११॥
प्रवालमौक्तिकैरर्घ्यं स्वतरंगकरैः किरन्। स्वागतं व्याजहारेव हरये मुखरांबुधिः ॥१२॥
युगप्रधानमंभोधिर्बलं वीक्ष्य मषेक्षणः। अंभःस्थलैः समुद्यद्भिरभ्युत्तिष्ठादिवाबभौ ॥१३॥
समुद्रविजयाक्षोभ्यभोजादिविषयां मुदं। आविष्कुर्वन्निवाभात्स्वां समुद्रः फेनमंडलैः ॥१४॥
ततस्तिथौ प्रशस्तायां कृतमंगलसंनिधिः। कृष्णः स्थानेप्सया चक्रे सबलोऽष्टमभक्तकं ॥१५॥
दर्भशय्याश्रिते तस्मिन् कृतपंचगुरुस्तवे। नियमस्थितया धीरे समुद्रस्य तटे स्थिते ॥१६॥
गौतमाख्यः सुरो वार्द्धिं सौधर्मेंद्रानिदेशतः। न्यवर्तयदरं शक्तः कृतकालांतरस्थितिं ॥१७॥

वासुदेवस्य पुण्येन भक्त्या तीर्थकरस्य च । सद्यो द्वारवतीं चक्रे कुबेरः परमां पुरीं ॥१८॥
नगरी द्वादशायामा नवयोजनविस्तृतिः । वज्रप्राकारवलया समुद्रपरिखावृता ॥१९॥
रत्नकांचननिर्माणैः प्रासादैर्बहुभूमिकैः । रुंधाना गगनं रेजे साऽलकेव दिवश्च्युता ॥२०॥
वापीपुष्करिणीदीर्घदीर्घिकासरसीहृदैः । पद्मोत्पलादिसंछन्नैरक्षया स्वादुवारिभिः ॥२१॥
भास्वत्कल्पलतारूढकल्पवृक्षोपशोभितैः । नागवल्लीलवंगादिपूगादीनां च सद्वनैः ॥२२॥
प्रासादाः संगतास्तस्यां हेमप्राकारगोपुराः । सर्वत्र सुखदा रेजुर्विचित्रमणिकुट्टिमाः ॥२३॥
रथ्याभिरभिरामांतःप्रपाभिश्च सदादिभिः । राज्ञां सर्वप्रजानां च वासयोग्या व्यराजत ॥२४॥
सर्वरत्नमयैस्तुंगैर्जिनेंद्रभवनैरसौ । प्राकारतोरणोपेतै रेजे सोपवनैः पुरी ॥२५॥
आग्नेयादिषु मध्येऽस्या दिक्षु प्रासादपंक्तयः । समुद्रविजयादीनां दशानां क्रमतो बभुः ॥२६॥
तन्मध्ये सर्वतोभद्रः कल्पवृक्षलतावृताः । प्रासादः केशवस्याभात्तदाष्टादशभूमिकः ॥२७॥
अंतःपुरसुतादीनां योग्याः प्रासादमालिकाः । शौरिसौधमुपाश्रित्य परितोऽतिबभासिरे ॥२८॥
स्वांतःपुरगृहालीभिः प्रासादः परिवारितः । शुशुभे बलदेवस्य वाप्युद्यानादिभूषितः ॥२९॥
तत्प्रासादपुरःशक्रसभामंडपसंनिभः । श्रीसभामंडपोभासीन्मार्तंडकरखंडनः ॥३०॥

उग्रसेनादिभूपानां योग्या भवनकोटयः। साष्टकक्षांतरास्तत्र सर्वेषामपि रेजिरे ॥३१॥
अशक्यवर्णनां दिव्यां बहुद्वारवतीं पुरीं। निर्माय वासुदेवाय राजराजो न्यवेदयत् ॥३२॥
किरीटं वरहारं च कौस्तुभं पीतवाससी। भूषा नक्षत्रमालादि वस्तु लोके सुदुर्लभं ॥३३॥
गदां कुमुद्वतीं शक्तिं खड्गं नंदकसंज्ञकं। शार्ङ्गं धनुश्च तूणीरयुग्मं वज्रमयान् शरान् ॥३४॥
सर्वायुधयुतं दिव्यं रथं सगरुडध्वजं। चामराणि सितच्छत्रं हरये धनदो ददौ ॥३५॥
मेचकं वस्त्रयुगलं मालां च मुकुटं गदां। लांगलं मुशलं चापं सशरं शरधिद्वयं ॥३६॥
रथं दिव्यास्त्रसंपूर्णमुच्चैस्तालं ध्वजोर्जितं। कुबेरः कामपालाय ददौ छत्रादिभिः सह ॥३७॥
भ्रातरोऽपि दशार्हास्ते वस्त्राभरणपूर्वकैः। संप्राप्तपूजनास्तेन भोजाद्याश्च नृपाः कृताः ॥३८॥
तीर्थकृत्पुनरन्यूनैर्वयोयोग्यैः सुवस्तुभिः। प्राज्यैः पूजनमेवासौ किं तत्र बहुवर्णनैः ॥३९॥
प्रविशंतु पुरीं सर्वे भवंत इति रैपतिः। तानुक्त्वा पूर्णभद्रं च संदिश्यांतर्हितः क्षणात् ॥४०॥
ततो यादवसंघातस्तावभिषिच्यांबुधेस्तटे। जयशब्देन संघुष्य हृष्टा हलगदाधरौ ॥४१॥
विविशुर्द्वारिकां भूत्या चतुरंगबलान्विताः। सप्रजाः कृतपुण्यास्ते प्राप्तां दिवमिव स्वयं ॥४२॥

१ बलभद्राय। २ कुबेरः।

पूर्णभद्रोपदिष्टेषु भद्रेषु भुवनेष्वमी । यथास्वेच्छं[1] सुखं तस्थुः प्रजाश्च निजसंस्थया ॥४३॥
माथुराः सौरजा वीरपुरपौराः पुरा यथा । यथास्वं कृतसंकेतसंनिवेशा ययुर्धृतिं ॥४४॥
पुर्यामर्धचतुर्थानि दिनानि धनदाज्ञया । यक्षा ववृषुरक्षीणधनधान्यादि धामसु ॥४५॥
तत्र स्थितस्य कृष्णस्य प्रतापेन वशीकृताः । अपरांतिकभूपालाः शासनं प्रतिपेदिरे ॥४६॥
बहुराजसहस्राणां तनयाः ससहस्रशः । परिणीय ततो रेमे यथेष्टं द्वारिकापतिः ॥४७॥
तत्र नेमिकुमारोऽपि कुमार इव चंद्रमाः । संवर्धते स्म निःशेषकलानिलयविग्रहः ॥४८॥
दशार्हवदनांभोजविकाशकरणोदयः । बालभानुर्बभासेऽसौ ज्योतिर्भूततमस्तरः ॥४९॥
रामदामोदरानंदं प्रत्यहं प्रतिवर्धयन् । चकार क्रीडितं बाल्ये पौरनेत्रमनोहरं ॥५०॥
समस्तयदुपत्नीनां करात्करमितस्ततः । अलंकुर्वन्नलंरूपी स ययौ यौवनोदयं ॥५१॥
प्रव्यक्तलक्षणे तत्र यूनि श्यामांबुजेक्षणे । विश्रांतदृष्टिमन्यत्र नेतुं शेकुर्न योषितः ॥५२॥
जिनरूपशरो दूराज्जगतो हृदयस्थलीं । बिभेद न पुनर्जैनीं पररूपशरायतिः ॥५३॥
नोपमा जिनरूपस्य नोपमेयं क्षितौ यतः । उपमानोपमेयार्थे खिद्यतेस्म हरिस्ततः ॥५४॥

[1] यथायथमित्यपि पाठः ।

स्वांतरंगजनैर्जातु क्रियमाणासु केलिषु । स्वविवाहकथास्वीशः स्मेरास्यो लज्जते स्वयं ॥५५॥
बोधत्रयांबुनिर्धूतमोहनीयकलंकजं । न तस्य भूतिधूलीभिर्धूसरीकृतमांतरं ॥५६॥
जैनैर्वार्ष्णैर्वैष्णवैर्बालभद्रैश्चंद्रालोकप्रकटैः सद्गुणौघैः ।
स्पष्टात्यर्थं हृष्टलोकोर्मिरामाद्वेलेवाब्धेर्द्वारिका द्वारकांता ॥५७॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ द्वारवतीनिवेशवर्णनो नाम एकचत्वारिंशः सर्गः ।

द्वाचत्वारिंशः सर्गः ।

अथ सभ्यसमाकीर्णामन्यदा यादवीं सभां । आजगाम नभोगामी नारदो नभसो मुनिः ॥१॥
आपिशंगजटाभारश्मश्रुकूर्चः शशिद्युतिः । विद्युद्वलयविद्योतिशारदांबुधरोपमः ॥२॥
विचित्रवर्णविस्तीर्णयोगपट्टविभूषितः । परिवेषवतां बिभ्रदौषधीशस्य विभ्रमं ॥३॥
चलद्दुकूलकौपीनपरिधानपरिच्युतः । दिवोऽनुग्रहबुद्ध्येव जगतः कल्पपादपः ॥४॥

देहस्थितेन शुद्धेन त्रिगुणेनोज्ज्लीकृतः। यज्ञोपवीतसूत्रेण सरत्नत्रितयेन वा ॥५॥
असाधारणरूपेण गौरवाधानहेतुना। नैष्ठिकब्रह्मचर्येण पांडित्येनैव मंडितः ॥६॥
शुद्धप्रकृतिरत्यंतमरिषड्गर्गवर्जितः। राज्योदय इवोदारो राजलोकस्य पूजितः ॥७॥
द्वारिकाविभवालोकसंशिरःकंपविग्रहं। तेऽवतीर्णं तमालोक्य सहसोत्थाय पार्थिवः ॥८॥
नमस्यासनदानादि सोपचारेण सक्रमं। पूजयंति स्म सन्मानमात्रेण परितोषिणं ॥९॥
जिनकृष्णबलालोकसंभाषणसुखामृतं। पीत्वाप्यतृप्तनेत्रस्तमध्यतिष्ठत्सभार्णवं ॥१०॥
पूर्वापरविदेहानां जिनेंद्राणां कथामृतैः। समेरुवंदनोदंतैर्मनोऽमीषामतर्पयत् ॥११॥
प्रस्तावेऽत्र गणिज्येष्ठं श्रेणिकोऽपृच्छदित्यसौ। क एष नारदो नाथ! कुतो वाऽस्य समुद्भवः॥१२॥
गण्युवाच वचोगण्यः शृणु श्रेणिक भण्यते। उत्पत्तिरंत्यदेहस्य नारदस्य स्थितिस्तथा ॥१३॥
आसीत्सौर्यपुरस्यांते दक्षिणे तापसाश्रमः। वसंति तापसास्तस्मिन् फलमूलादिवृत्तयः ॥१४॥
सुमित्रस्तापसस्तत्र स सोमयशसि स्त्रियां। उंछवृत्तिः शशिच्छायं पुत्रमेकमजीजनत् ॥१५॥
तमुत्तानशयं यावत्तौ संस्थाय तरोरधः। उंछवृत्त्यर्थमायातौ नगरं क्षुत्पिपासितौ ॥१६॥

१ स्वशिरःकंपविभ्रमं इत्यपि। २ चरमशरीरस्य।

संक्रीडमानमेकांते तावत्तं जृंभकामराः । दृष्ट्वा पूर्वभवस्नेहान्नीत्वा वैताढ्यपर्वतं ॥१७॥
मणिकांचनसंज्ञायां गुहायां तत्र तं शिशुं । कल्पवृक्षसमुद्भूतैर्दिव्याहारैरवर्द्धयन् ॥१८॥
स्नेष्टाय तेऽष्टवर्षाय सरहस्यं जिनागमं । देवास्तस्मै ददुस्तुष्टा विद्यां चाकाशगामिनीं ॥१९॥
नारदो बहुविद्योऽसौ नानाशास्त्रविशारदः । संयमासंयमं लेभे साधुः साधुनिषेवया ॥२०॥
कंदर्पस्य विजेतापि कंदर्पनिभविभ्रमः । सकंदर्पप्रियो हासशीलोऽभूल्लोभवर्जितः ॥२१॥
अंत्यदेहः प्रकृत्यैव निःकषायोऽप्यसौ क्षितौ । रणप्रेक्षाप्रियः प्रायो जातो जल्पाकभास्करः ॥२२॥
जिनजन्माभिषेकादिमहातिशयदर्शने । कुतूहलितया लोकं परिभ्रमति विभ्रमी ॥२३॥
स एष नारदो राजन् परिपृच्छय यदृत्तमान् । केशवांतःपुरं द्रष्टुं प्रविष्टोंऽतःपुरालयं ॥२४॥
तत्र विष्णोर्महादेवीं प्राणेभ्योऽपि गरीयसीं । धृतप्रसाधनां साध्वीं करस्थे मणिदर्पणे ॥२५॥
प्रेक्षमाणां निजं रूपं सत्यभामां विदूरतः । अद्राक्षीन्नारदः साक्षाद् दृष्टे रतिमिव स्थितां ॥२६॥
स्वरूपालोकनाक्षिप्तचेतसा सत्यया यतिः । न दृष्टः सहसा रुष्टो निर्जगाम ततो द्रुतं ॥२७॥
दध्याविति स लोकेऽस्मिन् सविद्याधरभूचराः । मामुत्थाय नमस्यंति राज्ञामंतःपुरस्त्रियः ॥२८॥

१ कंदर्पेण सह वर्तते इति सकंदर्पास्तेषां प्रियः । २ वाचालभानुः ।

सत्यभामा त्वियं रूपमदगर्वितमानसा । धिग् मां नालोकतेस्मापि धृष्टा विद्याधरात्मजा ॥२९॥
तदस्या रूपसौभाग्यगर्वपर्वतचूरणं । प्रतिपक्षवधूवज्रसंतापेन करोम्यहं ॥३०॥
रूपसौभाग्यतो धन्यां सत्यभामातिशातिनीं । हरिर्लघु लभेत् कन्यां बहुरत्ना वसुंधरा ॥३१॥
ततः पश्यामि भामाया निश्वासश्याममाननं । कुतोऽनर्थविमोक्षः स्यात् कुपिते मयि नारदे ॥३२॥
इति ध्यायन् खमुत्पत्य कुंडिनाख्यमयात्पुरं । यत्र भीष्मो नृपस्तिष्ठत्यरिभीष्मो महान्वयः ॥३३॥
रुक्मीति तनयस्तस्य नयपौरुषपोषणः । रुक्मिणी च शुभा कन्या कलागुणविशारदा ॥३४॥
तां ददर्श च शुद्धांते शुद्धांतःकरणश्रितां । पितृष्वसानुरागिण्या संध्ययेवोदयश्रियं ॥३५॥
सौलक्षण्यं च सौरुप्यं सौभाग्यं त्रिजगद्गतं । गृहीत्वेव हरे पुण्यैः परमैस्तां विनिर्मितां ॥३६॥
पाणिपादमुखांभोजजंघोरुजघनश्रिया । रोमराजिभुजानाभिकुचोदरतनुत्विषा ॥३७॥
भ्रूकर्णाक्षिशिरःकंठघोणाधरपुटोभया । अभिभूयोपमा सर्वा स्थितां जगति तां परां ॥३८॥
दृष्ट्वाऽसौ विस्मितो दध्यौ दृष्टानेकांगनोत्तमः । अहो रूपस्य पर्यंते कन्येयं वर्त्तते भुवि ॥३९॥
संयोज्य हरिणा कन्यामनन्यसदृशीमिमां । भनज्मि सत्यभामाया रूपसौभाग्यदुर्मदं ॥४०॥
इति ध्यायंतमायातं नारदं वीक्ष्य रुक्मिणी । अभ्युत्तस्थौ रणद्भूषा स्वभावविनयैकभूः ॥४१॥

सांजलिः प्रणनामासौ प्रत्युपेत्य तमादरात् । द्वारिकापतिपत्याप्त्या सोऽभ्यनंदयदानतां ॥४२॥
प्रश्रितेन तया तेन द्वारावत्या विकीर्त्तने । कृतेऽनुरागिणी कृष्णे रुक्मिणी नितरामभूत ॥४३॥
कृष्णं भीष्मसुताचित्तभित्तौ नारदचित्रकृत् । वर्णरूपवयोविद्धं विलिख्य वहिरुद्ययौ ॥४४॥
विलिख्य पट्टके स्पष्टं रुक्मिण्या रूपमद्भुतं । हरयेऽदर्शद्दत्वा चित्तसंमोहकारणं ॥४५॥
दृष्ट्वा चित्रगतां कन्यां श्यामां स्त्रीलक्षणाचितां । पप्रच्छ हरिरित्येवं द्विगुणादरसंमतः ॥४६॥
कस्येयं भगवन् ! कन्या विचित्रा पट्टके त्वया । दुष्करं मानुषी क्षिप्ता विचित्रासुरकन्यका॥४७॥
इति पृष्टोऽवदत्सोऽस्मै यथावृत्तमवंचकः । श्रुत्वा सौरिरपि प्राप्ताश्वितां कन्याकरग्रहे ॥४८॥
काले पितृष्वसा तस्मिन्नेकांते हितकाम्यया । रुक्मिणीमित्यभाषिष्ट सर्ववृत्तांतवेदिनी ॥४९॥
आकर्णय वचो बाले कदाचिदतिमुक्तकः । दिव्यचक्षुरिहायातस्त्वां दृष्ट्वाऽवददित्यसौ ॥५०॥
स्त्री लक्षणवती लक्ष्मीरिव वक्षःस्थलाश्रिता । बालेयं वासुदेवस्य भविष्यति भविष्यतः ॥५१॥
षोडशानां सहस्राणां विष्णोः स्त्रीगुणसंयुजां । अंतरंतःपुरस्त्रीणां प्रभुत्वमियमेष्यति ॥५२॥
इत्यादिश्य तदायातः सिद्धादेशो महामुनिः । कथा चांतर्हिता विष्णोः कियंतं चिदनेहसं ॥५३॥
पुनर्जन्मकथेवेयं नारदेन कथा कृता । यदि सत्यमिदं सर्वं सत्यं वेद्मि मुनेर्वचः ॥५४॥

त्वं पुनः शिशुपालाय बाले ! बांधवतां युजे । सुप्रभुत्वभृता भ्रात्रा रुक्मिणी किल दीयते ॥५५॥
विवाहसमयस्तेऽपि प्रत्यासन्नस्तु वर्तते । अद्य श्वो वा त्वदर्थं च शिशुपालः किलैष्यति ॥५६॥
विदर्भपतिपुत्री तन्निशम्य वचनं जगौ । कथमस्य मुनेर्वाक्यमन्यथा भवति क्षितौ ॥५७॥
तन्मदीयमभिप्रायं कथंचिदपि सत्वरं । द्वारिकापतये यत्नात् प्रापयेति स मत्प्रियः ॥५८॥
इति श्रुत्वा मनो ज्ञात्वा कन्यकायाः पितृष्वसा । विससर्ज रहस्येनं लेखमाप्तेन सत्वरं ॥५९॥
त्वन्नामग्रहणाहारप्रीणितप्राणधारिणी । हरे ! कांक्षति ते रक्ता रुक्मिणी हरणं त्वया ॥६०॥
शुक्लाष्टम्यां हि माघस्य यदि माधव ! रुक्मिणीं । त्वमेत्य हरसि क्षिप्रं तवेयमविसंशयं ॥६१॥
अन्यथा तु वितीर्णायाश्चैद्याय गुरुबांधवैः । त्वदलाभे भवेदस्याः शरणं मरणं हरे ! ॥६२॥
नागवल्यपदेशेन बाह्योद्यानस्थितामिमां । तदवश्यं त्वमागत्य स्वीकुरुष्व कृपापरः ॥६३॥
लेखार्थमिति तत्त्वार्थमधिगम्य स माधवः । सावधानमनास्तस्थौ रुक्मिणीहरणं प्रति ॥६४॥
कन्यादानकृतारंभविदर्भेश्वरवाक्यतः । चेदीनामीश्वरः प्राप्तो वैदर्भपुरमादरात् ॥६५॥
बलेन महता तस्य चतुरंगेण रागिणा । मंडिताशांतरं जातं कुंडिनं नगरं तदा ॥६६॥

१ शिशुपालः ।

इतश्चावसरज्ञेन नारदेन रहस्यरं । चोदितो हरिरप्याप्तो गूढवृत्तः सहाग्रजः ॥६७॥
दत्तनागवलिः कन्या पुरोपवनवर्तिनी । पितृष्वस्रादिभिर्युक्ता माधवेन निरीक्षिता ॥६८॥
श्रुतींधनसमृद्धोऽनुरागबंधहुताशनः । अतिवृद्धिं तदा प्राप्तस्तयोर्दर्शनवायुना ॥६९॥
कृतोचितकथस्तत्र रुक्मिणीमाह माधवः । त्वदर्थमागतं भद्रे ! विद्धि मां हृदयस्थितं ॥७०॥
सत्यं यदि मयि प्रेम त्वया बद्धमनुत्तरं । तदेहि रथमारोह मन्मनोरथपूरणि ॥७१॥
पितृष्वस्राऽपि साऽवाचि योऽतिमुक्तकभाषितः । स एव तव कल्याणवरः पुण्यैरिहाहृतः ॥७२॥
यत्रापि पितरौ भद्रे ! दातारौ दुहितुर्मतौ । तत्राऽपि विधिपूर्वौ तौ ततो ज्येष्ठो विधिर्गुरुः ॥७३॥
सानुरक्तां त्रपायुक्तां श्रीमत्यास्तनया ततः । रथमारोपयद्दोर्भ्यामुत्क्षिप्यामीलितेक्षणः ॥७४॥
निर्वाहकस्तयोरासीदन्योन्यसुखावहः । सर्वांगीणस्तनुस्पर्शः प्रथमो मन्मथार्त्तयोः ॥७५॥
सुगंधिमुखनिश्वासस्तयोरन्योन्ययोगतः । वास्यवासकभावस्थो वशीकरणतामगात् ॥७६॥
विमुखीकृतचैद्येन सम्मुखीकृतविष्णुना । विधिनैकेन रुक्मिण्यास्तत्कल्याणमनुष्ठितं ॥७७॥
रुक्मिणः शिशुपालस्य भीष्मस्य च हरिस्ततः । रुक्मिणीहरणोदंतं दत्वा रथमचोदयत् ॥७८॥
पांचजन्यमतो दध्मौ मुखरीकृतदिग्मुखं । सुघोषं तु बलः शंखं चुक्षोभाखिलं ततः ॥७९॥

रुक्मी विदितवृत्तांतः शिशुपालश्च सत्वरौ। धीरौ धीरौ परिप्राप्तौ रथिनौ रथिनौ प्रति ॥८०॥
रथैः षष्टिसहस्रैस्तैः करिणामयुतेन च। त्रिभिः शतसहस्रैश्च वाजिनां वायुरंहसां ॥८१॥
असिचक्रधनुःपाणिबहुलक्षपदातिभिः। ग्रसमानौ दिशो शेषा निकटत्वमुपागतौ ॥८२॥
अर्धासनसुखासीनां सान्त्वयन् भीष्मजां हरिः। ग्रामाकरसरःसिंधूर्दर्शयन् प्रययौ शनैः ॥८३॥
अथ रौद्रं बलं प्राप्तमन्वीक्ष्य हरिणेक्षणा। रुक्मिण्युवाच भर्त्तारमपायपरिशंकिनी ॥८४॥
भ्राता मे कुपितः प्राप्तः संप्रत्येव महारथः। शिशुपालश्च तन्नाथ न मन्ये स्वंतमात्मनः ॥८५॥
युवयोः पृथुसेनाभ्यामाभ्यां जाते महारणे। विजयं प्रति संशीतिरहो मे मंदभाग्यता ॥८६॥
ब्रुवाणामिति तां शार्ङ्गी मा भैषीर्मृदुमानसे। बहुत्वेन किमन्येषां मयि सत्त्ववति स्थिते ॥८७॥
तथोक्तं मुनिरादेशः सप्ततालानृजून् पुमान्। यच्छिनत्त्येकबाणेन स हरिर्नान्यथा शुभे ॥८८॥
तद्वचः शौरिणा श्रुत्वा क्रमेणाक्रम्य तत्स्थिरं! स चिच्छेद क्षुरप्रेण रिज्वतां तालमंडली ॥८९॥
इत्युक्त्वाऽसौ क्षुरप्रेण क्षिप्रमप्राकृतास्त्रवित्। अयत्नेनैव चिच्छेद तालवृक्षं पुरःस्थितं ॥९०॥

---

१ लक्षेण। २ अष्टाशीतिनवाशीतितमौ श्लोकौ ख पुस्तके न स्तः इदंच सुष्ठु प्रातिभाति। ३ "आक्रम्य क्रमतः स्थिरं" इत्यपि। ४ तालवृक्षान् पुरःस्थितान् इत्यपि।

अंगुलीयकनद्धं च वज्रं संचूर्ण्य पाणिना। तस्याः संदेहमामूलं चिच्छेद यदुनंदनः ॥९१॥
ततः सा प्रांजलिः प्राह प्रियसामर्थ्यवेदिनी। नाथ! यत्नेन मे भ्राता रक्षणीयस्त्वयाहवे ॥९२॥
एवमस्त्विति संत्रस्तां शांतयित्वा प्रियां हरिः। न्यवर्त्तयद्रथं वेगादस्य मित्रं हली तथा ॥९३॥
रुष्टयोः शरजालेन द्विष्टसैन्यं ततोऽनयोः। श्लिष्टं ननाश विध्वस्तक्लिष्टदर्पमभिद्रुतं ॥९४॥
हरिणेव रणे रौद्रे हरिणा दमघोषजः। हलिना भीष्मजो राजा भीष्माकारः पुरस्कृतः ॥९५॥
द्वंद्वयुक्ते शिरस्तुंगं शिशुपालस्य पातितं। विष्णुना यशसा साकं सायकेन विदूरतः ॥९६॥
हली जर्जरितं कृत्वा रथेन सह रुक्मिणं। प्राणशेषमपाकृत्य कृती कृष्णयुतो ययौ ॥९७॥
रुक्मिणीं परिणीयासौ गिरौ रैवतके हरिः। विभूत्या परया तुष्टः सबंधुरविशत् पुरीं ॥९८॥
स्वं विवेश गृहं शीरी रेवतीदर्शनोत्सुकः। शार्ङ्गपाणिरपि प्रीतो नववध्वा युतो निजं ॥९९॥
अनेकरथचक्रचूर्णिविजिगीषुतेजोहरं निरीक्ष्य शिशुपालघातचरितं हरेराहवे।
वपुः स्वमुपसंहरन् करसहस्रतीक्ष्णोऽप्यरं गतोस्तगिरिगह्वरं ग्रहणशंकयेवांशुमान् ॥१००॥
अनेन घनरागिणा समनुवर्त्तिता रागिणी महोदयनिषेविणाप्यनुरतेन पूर्वं तु या।
तयाऽस्तमितसंपदं तमनुवृत्तया संध्यया कुसुंभकुसुमाभया तदनुरक्तता दर्शिता ॥१०१॥

१ शिशुपालः।

ततोऽजनमहारजोमलिनमूर्त्तिभिर्मोहनैः प्रभंजनवशैरिव प्रतिभयावहैरुद्धतैः ।
तमःपटलपातकैरभिपतद्भिरत्युन्मुखैः खलैरिव निरंतरैर्जगदभिद्रुतं च द्रुतं ॥१०२॥
किरन्नमृतदीधितिर्बहलमंधकारं करैः तृषेव जनलोचनैः सपदि पीयमानस्ततः ।
जगन्मदनदीपनस्तपनजातसंतापनुत् सखा सुमुखिनामपि प्रकटमुज्जगामोदयं ॥१०३॥
विकाशमगमद् विधोः कुमुदिनी करामर्शनाज्जगत्यखिलजंतुभिः सह निजप्रियाप्रोषितैः ।
तदा न खलु पद्मिनी विरहदीप्तचक्राह्वयैरहो प्रमदहेतवोऽपि सुखयंति नो दुःखितान् ॥१०४॥
प्रदोषसमये ततो मुषितमानिनीमानके प्रवृत्तवति दंपतिप्रमदसंपदापादने ।
सुधाधवलचंद्रिकाधवलितेषु हर्म्येषु ते मनोज्ञवनितासखास्तु परिरेमिरे यादवाः ॥१०५॥
मुरारिरपि रुक्मिणीतनुलताद्विरेफस्तदा चिरं रमितया तयाऽरमत रम्यमूर्त्तिर्निशि ।
अशेत शयनस्थले मृदुनि गूढगूढांगनाघनस्तनभुजाननस्पर्शलब्धनिद्रासुखः ॥१०६॥
ततः प्रमितयामिनीनिखिलयामभेदा मदप्रसुप्तयदुकामिनीजनभियेव नीचोच्चकैः ।
क्रमेण पटुपक्षपातसुभगाश्चुकूजुः कलं क्षपाक्षयनिवेदिनो विविधचूडकाः कुक्कुटाः ॥१०७॥

---

१ सुसुखिनामपि ।

तथा प्रथमबुद्धया प्रथमसंभ्रमेयेवोषसि प्रशस्तकरपद्मया विहितदेहसंवाहनः ।
विबुध्य हरिराश्रितां श्रियमिव व्यलोकिष्ट तां रतिव्यतिकरस्फुरत्परिमलां ह्रिया सन्नतां ॥१०८॥
प्रभातपटहस्फुटध्वननशंखसंगीतकप्रघोषघनगर्जितांबुधिनिनादिनी द्वारिका ।
गृहं गृहमितोऽमुतो बुधितराजलोकाभवत् यथायथमनुष्ठितस्वकनियोगसर्वप्रजा ॥१०९॥
परैर्घटितमप्यतो विघटयन् पदार्थे झटित्युपेत्य प्रतिपत्य दुर्विघटितं समर्थक्रियः ।
परं भुवनचक्षुरुज्ज्वलमनिद्रमभ्युद्ययौ यथा जिनवचपथो विधिरिवाऽथ वा भानुमान् ॥११०॥

इति "अरिष्टनेमि" पुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ रुक्मिणीहरणवर्णनो नाम द्वाचत्वारिंशः सर्गः ।

त्रिचत्वारिंशः सर्गः ।

सत्यभामागृहाभ्यर्णमाकीर्णं द्रव्यसंपदा । धिष्ण्यं विष्णुर्ददौ दिव्यं रुक्मिण्यै परिचारवत् ॥१॥
महत्तरप्रतीहारीभृत्यादिपरिवारतः । यानाश्वरथयुग्यादि पत्या गौरविताऽतुषत् ॥२॥
ज्ञात्वा भामा हरीष्टां तां भामां भामातिशायिनीं । सा सेर्ष्याऽपि हरिं धीरा रहः क्रीडास्वरीरमत्॥३॥

---

१. 'परिवारतः', अथवा 'परिवारवत्' इत्यपि ।

एकदा मुखतांबूलं निष्ठ्यूतं भीष्मजन्मना। सोऽशुकांत्येन संगोप्य सत्यभामागृहं गतः ॥४॥
स्वभावमुखसौगंध्यबद्धभ्रांतालिमंडलं। अहरत्सत्यभामा तद् भ्रांत्या सद्गंधवस्त्विति ॥५॥
वर्णगंधाढ्यमापिष्य समालभत चादरात्। हसिता हरिचंद्रेण सा चुक्रोश तमीर्ष्यया ॥६॥
सौभाग्यातिशयं सत्या सपत्न्या हरिचेष्टितैः। विदित्वा रूपलावण्यं द्रष्टुमभ्युत्सुकाऽभवत् ॥७॥
अवदच्च पतिं नाथ! रुक्मिणीं मम दर्शय। श्रोत्रयोरिव संहृष्टिं नेत्रयोरपि मे कुरु ॥८॥
प्रतिपद्य स तद् वाक्यमंतर्गूढो विनिर्गतः। मणिवाप्यास्तटे कांतां संस्थाप्य पुनरागतः ॥९॥
आनयामि तवाभीष्टां विशोद्यानमिति प्रियां। संप्रेष्यानुगतस्तस्थौ गुल्मसंगूढविग्रहः ॥१०॥
तावच्च मणिवाप्यंते मणिभूषणधारिणीं। पादाग्रेण स्थितां चूतलतामालंब्य पाणिना ॥११॥
प्रोल्लसत्स्थूलधम्मिल्लां वामहस्तेन बिभ्रतीं। स्तनभारनतामूर्ध्वफलन्यस्तायतेक्षणां ॥१२॥
निरूप्य रुक्मिणीं सत्या देवतामिव रूपिणीं। देवतेयमिति ध्यात्वा विकीर्य कुसुमांजलिं ॥१३॥
निपत्य पादयोस्तस्याः स्वसौभाग्यमयाचत। विपक्षस्य तु दौर्भाग्यमीर्ष्याशल्यकलंकिता ॥१४॥
अंतरेऽत्र हरिः सत्यां हारिस्मितमुखोऽवदत्। अपूर्वं दर्शनं स्वस्रोरहोवृत्तं नयान्वितं ॥१५॥
श्रुत्वा तत्सत्यभामोचे ज्ञाततत्त्वा रुषान्विता। किं भवाभयदित्थं नौ दर्शनं किं तवेति तं ॥१६॥

कृतकृष्णवचोभामां रुक्मिणी विनयाच्चतः । ननाम कुलजातानां विनयः सहजो मतः ॥१७॥
विहृत्य चिरमुद्यानं लतामंडपमंडितं । ताभ्यामधोक्षजो यातो निवृत्तो भवनं निजं ॥१८॥
ताभ्यामेकदिनौपम्यमनेकेषु दिनेष्वतः । तस्य यात्सु सुखांभोधिवर्त्तिनः शौर्यशालिनः ॥१९॥
दुर्योधनोऽन्यदा दूतं हरये प्रियपूर्वकं । प्रजिघाय घनस्नेहः स हास्तिनपुराधिपः ॥२०॥
यः प्रागुत्पत्स्यते यस्या रुक्मिणीसत्यभामयोः । सुनुरुत्पत्स्यमानायाः स वरो दुहितुर्मम ॥२१॥
इति दूतवचः श्रुत्वा प्रीतः संपूज्य तं हरिः । विससर्ज स पत्येऽतः कार्यसिद्धिं न्यवेदयत् ॥२२॥
तां वार्त्तामुपलभ्याऽसौ भामा भीष्मजांतिकं । व्यसृजन्निजदूतीस्ताः पादयोः प्रणता जगुः ॥२३॥
स्वामिनि ! स्वामिनी नस्त्वामिति वक्ति वचो वरं । अव्रतसमिव श्लाघ्यं कुरु कर्णे मनस्विनि॥२४॥
आवयोः प्रथमं यस्यास्तनयोऽत्र भविष्यति । सुतां दुर्योधनस्यासौ भाविनीं परिणेष्यति ॥२५॥
तत्रापत्यविहीनाया विलूनालकवल्लरीं । स्नास्येते तावधः कृत्वा पादयोस्तु वधूवरौ ॥२६॥
प्रशस्यं च यशस्यं च यशोभागिनि भागिनि । यदि ते रोचते कार्यमिदमार्येऽनुमन्यतां ॥२७॥
कर्णामृतमिवाकर्ण्य तन्निवृत्य जगावसौ । तथाऽस्त्विति ततो गत्वा ताः स्वामिन्यै न्यवेदयत्॥२८॥
रुक्मिणी तु शिरःस्नाता शयिता शयने निशि । स्वप्ने हंसविमानेन विजहार किलांबरे ॥२९॥

विबुद्धा च समाचख्यौ पत्ये स्वप्नमसौ जगौ। सुपुत्रस्ते वियच्चारी भविताऽत्र महानिति॥३०॥
वचः पत्युरसौ श्रुत्वा विकाशमगमद् वधूः। तेजसांऽशुमतः श्लिष्टा पद्मिनीव दिनानने॥ ३१॥
अवतीर्याऽच्युतेंद्रस्तु रुक्मिणीगर्भमाश्रितः। पूरयन् परमानंदमुपेंद्रस्य जनस्य च॥ ३२॥
तत्काले सत्यभामाऽपि शिरःस्नातवती सती। अधत्त स्वश्च्युतं गर्भे सुतं सुस्वप्नपूर्वकं॥३३॥
वर्धमानौ च तौ गर्भौ वर्धमानयशोलतौ। वर्द्धमानां मुदं मात्रोः पितुश्चाकुरुतां परां॥ ३४॥
पूर्णप्रसवमासेऽत्र प्रसूता रुक्मिणी सुतं। नरलक्षणसंपूर्णं सत्याऽपि युगपन्निशि॥ ३५॥
प्रहिताश्च हितास्ताभ्यां युगपन्निशि वर्द्धकाः। शिरोंऽते सत्यया विष्णोः पादांते तस्थुरन्यया॥३६॥
प्रबुद्धश्च हरिर्दृष्ट्वै रुक्मिणीपुत्रजन्मना। आनंदितो ददौ तेभ्यः स्वांगस्पृष्टं विभूषणं॥ ३७॥
परावृत्य पुनः पश्यन् सत्यभामाजनैः स्तुतः। पुत्रोत्पत्त्या ददौ तुष्टस्तेभ्योऽप्यर्थं जनार्दनः॥३८॥
तस्यामेव च वेलायां बलवान् नभसा व्रजन्। धूमकेतुर्विमानस्थो धूमकेतुरिवासुरः॥ ३९॥
स्तंभितेन विमानेन कथंचिदपि विस्मितः। अधोऽवलोकमानोऽसौ विभंगज्ञानलोचनः॥ ४०॥
रुक्मिण्याः सुतमालोक्य रोषाऽरुणनिरीक्षणः। दर्शनेंधनसद्दीप्तपूर्ववैरविभावसुः॥ ४१॥
महारक्षाधिकारस्य परिवारजनस्य सः। रुक्मिण्याश्च महानिद्रां निपात्यापत्यपातकः॥ ४२॥

शिशुमुद्धृत्य बाहुभ्यां महीध्रमिव गौरवात् । नभः समुद्ययौ नीलो नीलबुद्धिर्महासुरः ॥४३॥
हस्ताभ्यां किमु मृद्नामि पूर्ववैरिणमेनकं । खगेभ्यो नखनिर्भिन्नं खे वलिं विकिरामि किं ॥४४॥
नक्रचक्रमहारौद्रे मकरग्राहसंकुले । पातयामि समुद्रे किं क्षुद्रं मे द्रोहिणं रिपुं ॥ ४५ ॥
अथवा मांसपिंडेन मारितेनामुनाऽत्र किं । त्यक्तश्वापदरक्षस्तु स्वयमेव मरिष्यति ॥ ४६ ॥
इति संचित्य पुण्येन शिशोरेव महासुरः । पश्यन्नवततारातो विदूरखदिराटवीं ॥ ४७ ॥
अधस्तक्षशिलायास्तं निधायार्भकमाशु सः । धूमकेतुरिवादृश्यो धूमकेतुरभूत्ततः ॥ ४८ ॥
तदनंतरमेवाऽत्र मेघकूटपुराधिपः । कालसंवर इत्याख्यः सार्द्धं कनकमालया ॥ ४९ ॥
प्राप्तो भौमविहारेण विमानेन वियच्चिरः । शिशोस्तस्य प्रभावेण खंडिताऽस्य गतिस्तदा ॥५०॥
किमेतदित्यसौ ध्यात्वा परं विस्मयमागतः । अवतीर्य शिलां पृथ्वीमुच्छ्वसंतीं व्यलोकत ॥५१॥
समुत्क्षिप्य शिलां स्वैरमपसार्य स दृष्टवान् । अक्षतांगमनंगाभमर्भकं कनकप्रभं ॥ ५२ ॥
गृहीत्वा करुणोपेतः प्रियायै दातुमुद्यतः । तनयस्तेऽनपत्याया गृहाणेति प्रियंवदः ॥ ५३ ॥
प्रसार्य करयुग्मं सा पुनः संकोच्य कोविदा । अनिच्छंतीव संतस्थे खेचरी दीर्घदर्शिनी ॥ ५४ ॥
प्रिये ! किमिदमित्युक्त सा जगौ तव सूनवः । महाभिजनसंपन्नाः संति पंचशतानि ते ॥ ५५ ॥

तैरज्ञातकुलं दृष्टैस्ताड्यमानं शिरस्यमुं । न शक्नोमि तदा दृष्टुं तन्मे वरमपुत्रता ॥ ५६ ॥
इत्युक्ते शांतयित्वा तां गृहीत्वा कर्णपत्रकं । युवराजोऽयमित्युक्त्वा पट्टमस्य बबंध सः ॥५७॥
ततो जग्राह तुष्टा सा तनयं नयशालिनी । सपुत्रौ तौ प्रविष्टौ च मेघकूटपुर पुरं ॥ ५८ ॥
गूढगर्भा महादेवी प्रसूता तनयं शुभं । इति वार्त्तां पुरे कृत्वा कोविदः कालसंबरः ॥ ५९ ॥
नृत्यद्विद्याधरीवृंदं सिंजत्सिंजीरबंधुरं । तस्य पुण्यनिधानस्य जन्मोत्सवमकारयत् ॥ ६० ॥
प्रकृष्टद्युम्नधामत्वात् प्रद्युम्न इति संज्ञितः । कुमारो वर्द्धते तत्र कुमारशतसेवितः ॥ ६१ ॥
इतश्च रुक्मिणी सूनुं विबुद्धा नेक्षते यदा । वृद्धधात्रीभिरित्युच्चैः सह दृष्टुं ततस्ततः ॥ ६२ ॥
विललाप च हा पुत्र ! हृतः केनाऽपि वैरिणा । विधिना निधिमादर्श्य नेत्रं मेऽपहृतं कथं ॥६३॥
वियोजिता मया नूनमपत्येन भवांतर । काचन स्त्री न हीदृक्षं भवेत्फलमहेतुकं ॥ ६४ ॥
विलापमिति कुर्वंत्यां रुक्मिण्यां करुणावहं । रोदनध्वनिरुत्तस्थौ परिवारस्य मांसलः ॥ ६५ ॥
ततो विदितवृत्तांतो वासुदेवः सबांधवः । संप्राप्य सहसा तत्र कलत्रैः सकलत्रिभिः ॥६६॥
आक्रंदनस्वनप्राप्तसंक्रंदनपुरःसरः । निनिंद भुजवीर्यं स्वं प्रमादं च सनंदकः ॥ ६७ ॥
अवदच्च वचोदक्षो दैवपौरुषयोः परं । दैवमेव परं लोके धिक् पौरुषमकारणं ॥ ६८ ॥

अन्यथा कथमुत्खातखड्गधारावभासिनः । न्हियेत वासुदेवस्य ममापि तनयः परैः ॥ ६९ ॥
इत्यादि बहुवादी स रुक्मिणीमाह मा प्रिये । शोकिनी भूरिहात्यर्थं धीरे ! धारय धीरतां ॥७०॥
नाल्पः कल्पच्युतः पुत्रो जातस्तव ममापि यः । भवितव्यमिहैतेन भुवने भोगभागिना ॥७१॥
गवेषयामि तल्लोकं तं लोकनयनोत्सवं । सूक्ष्मदृष्टिरिवोद्विंबं प्रतिपच्चंद्रमंबरे ॥ ७२ ॥
शांत्वयित्वाश्रुसंधौतकपोलयुगलां प्रियां । माधवोऽन्वेषणे सूनोरुपायपरमोऽभवत् ॥ ७३ ॥
काले तत्र हरिं प्राप्तो नारदोऽनारतोद्यमः । श्रुतवार्त्तश्च शोकेन क्षणं निश्चलतां गतः ॥७४॥
आननानि यदूनां स पश्यतिस्म सविस्मयः । क्लांतानि हिमदग्धानि पद्मानीव समंततः॥७५॥
ततो निरस्तमन्युश्च प्रत्युवाच जनार्दनं । वीर ! शोककलिं मुंच सुतवार्त्तामहं लभे ॥७६॥
योऽतिमुक्तक इत्यासीदवधिज्ञानवान् मुनिः । स केवलमयं नेत्रं लब्ध्वा निर्वाणमाश्रितः ॥७७॥
योऽपि नेमिकुमारोऽत्र ज्ञानत्रयविलोचनः । जानन्नपि न स ब्रूयान्न विद्मो केन हेतुना ॥७८॥
अतः पूर्वविदेहेषु गत्वा सीमंधरं जिनं । संपृच्छ्य पुत्रवार्त्तां ते प्रापयामीति नारदः ॥७९॥
दत्तोत्तरो विनिर्गत्य रुक्मिणीभवनं गतः । शोकप्रालेयनिर्दग्धं दृष्ट्वा तन्मुखपंकजं ॥८०॥
शोकवानपि चित्तेन बहिर्धैर्यमुपाश्रितः । अभ्युत्थायार्चितस्तस्या न्यषीदन्निकटासने ॥८१॥

सा तं पितृसमं दृष्ट्वा रुरोदोन्मुक्तकंठकं । सज्जनोपनिधौ शोकः पुराणोऽपि नवायते ॥८२॥
तस्याः शोकसमुद्रं स प्रक्षिपन्निव[१] दक्षिणः । आह्लादयन्मनोऽत्रादीदिति नारदसन्मुनिः ॥८३॥
त्यज रुक्मिणि ! शोकं त्वं क्वचिज्जीवति ते सुतं । कथंचिदपि नीतोऽपि केनचित्पूर्ववैरिणा ॥८४॥
दीर्घजीवितसद्भावं ननु तस्य महात्मनः । निवेदयति संभूतिर्वासुदेवात् त्वयि ध्रुवं ॥८५॥
संयोगाश्च वियोगाश्च प्राणिनां प्राणवत्सले । वत्से भवंति संसारे सुखदुःखविधायिनः ॥८६॥
तत्र कर्मवशज्ञानां ज्ञानोन्मीलितधीदृशां । प्रभवंति न ते वत्से यदूनामिव शत्रवः ॥८७॥
जिनशासनतत्त्वज्ञा संसृतिस्थितिवेदिनी । मा भूः शोकवशा वार्ता त्वत्सुतस्य लभे लघु ॥८८॥
इति तां नारदस्तन्वीमनुशिष्य वचोऽमृतैः । प्रयातो वियदुत्पत्य सीमंधरजिनांतिकं ॥८९॥
विषयेषु पुष्कलावत्यां नृसुरासुरसेवितं । नगर्यां पुंडरीकिण्यामर्हंतं स तमैक्षत ॥९०॥
कृतांजलिपुटस्तोत्रपवित्रीकृतवाग्मुखः । प्रणम्य जिनमासीनः स नरेंद्रसभांतरे ॥९१॥
तत्र पद्मरथश्चक्री पंचचापशतोच्छ्रितिः । दशचापोच्छ्रितिं पश्यन्नारदं नरशंसितं ॥९२॥
कौतुकात्करपद्माभ्यामास्थायापृच्छदीश्वरं । मर्त्याकृतिरयं नाथ ! कीटः किमभिधानकः ॥९३॥

१ क्षपयन्नित्यपि ।

ततः प्राह जिनस्तत्त्वं जंबूद्वीपस्य भारते। नारदो वासुदेवस्य नवमस्य हितोद्यतः ॥९४॥
किमर्थमागतो मर्त्यरिहायमिति पृच्छति। मूलतः कथितं सर्वं चक्रिणे धर्मचक्रिणा ॥९५॥
प्रद्युम्न इति नाम्नाऽसौ पितृभ्यां योक्ष्यते पुनः। संप्राप्ते षोडशे वर्षे प्राप्तषोडशलाभकः ॥९६॥
स प्रज्ञप्तिमहाविद्याप्रद्योतितपराक्रमः। देवानामपि सर्वेषामजय्योऽत्र भविष्यति ॥९७॥
कीदृशं चरितं तस्य हृतो वा केन हेतुना। इति पृष्टो जिनोऽभाणीत्तस्मै नारदसन्निधौ ॥९८॥
इह भारतवर्षेऽभूद्विषये मगधाभिधे। शालिग्रामेऽग्रजन्मासौ सोमदेव इति श्रुतः ॥९९॥
अग्निला ब्राह्मणी तस्य स्वाहेवाग्नेः सुखावहा। अग्निभूतिरभूत्तस्या वायुभूतिश्च नंदनः ॥१००॥
बभूवतुरिमौ भूमौ वेदवेदार्थकोविदौ। छादितान्यद्विजच्छायौ यथा शुक्रबृहस्पती ॥१०१॥
वेदार्थभावनाजातजातिवादातिगर्वितौ। वाचाटौ चाटुभिः पित्रोर्लालितौ भोगतत्परौ ॥१०२॥
द्विरष्टवर्षेषु स्त्रीषु स्वर्गबुद्धिं प्रकृत्य तौ। जातावत्यंतविद्विष्टौ परलोककथां प्रति ॥१०३॥
अन्यदाऽऽगत्य संघेन महता नंदिवर्द्धनः। तत्रोद्याने गुरुस्तस्थौ श्रुतसागरपारगः ॥१०४॥
तद्वंदनार्थमद्वंद्वं चातुर्वर्ण्यमहाजनं। निर्गच्छंतं समालोक्य कारणं तावपृच्छतां ॥१०५॥
निवेदितं ततस्ताभ्यां द्विजेनैकेन साधुना। महच्छ्रमणसंघस्य वंदनार्थमिति स्फुटं ॥१०६॥

अस्मत्परः परः कोऽपि वंदनीयोऽस्ति भूतले। पश्यामस्तस्य महात्म्यमिति तौ मानिनौ गतौ।।१०७।।
प्राप्तावपश्यतां विप्राववधिज्ञानचक्षुषं। जनसागरमध्यस्थं साध्विंद्रं धर्मवादिनं ।।१०८।।
महिषाभ्यामिव क्षोभो माभूदाभ्यामिहाधुना। सद्धर्मश्रवणस्येति सुश्रूषुहितबुद्धिना ।।१०९।।
साधुनाऽवधिनेत्रेण दूरात्सात्यकिना तकौ। इत आगम्यतां विप्रावित्याहूतौ पुरःस्थितौ ।।११०।।
ततो लोकस्तकौ दृष्ट्वा सावष्टंभौ यतेः पुरः। आययुश्च पयःपूरैः प्रावृषीव महानदः ।।१११।।
अतः प्राह यतिः प्राप्तौ कुतः पंडितमानिनौ। प्राहतुस्तौ न किं ज्ञातौ शालिग्रामादिहागतौ।।११२।।
सात्यकिः प्राह सत्यं भोः शालिग्रामादुपागतौ। किंत्वनाद्यंतसंसारे संसरंतौ कुतो गतेः ।।११३।।
अन्यस्यापि च दुर्बोधमेतदित्युदिते यतिः। नैवमित्यगदीद् विप्रौ! श्रूयतां कथयाम्यहं ।।११४।।
ग्रामस्यास्यैव सीमांते शृगालौ कर्मनिर्मितौ। युवां परस्परप्रीतौ जातौ जन्मन्यनंतरे ।।११५।।
आसीत्प्रवरको नाम्ना ग्रामेऽत्रैव कृषीवलः। विप्रः प्रकृष्य स क्षेत्रं महावर्षानिलार्दितः ।।११६।।
मुक्त्वोपकरणं क्षेत्रे वटवृक्षतलेऽखिलं। कंपमानशरीरोऽगात् क्षुद्रोगातिवशीकृतः ।।११७।।
सप्ताहोरात्रवर्षेण प्राणिसंहारकारिणा। आर्द्रोपकरणं ताभ्यां तिर्यग्भ्यां भक्षितं क्षुधा ।।११८।।
जातोदरमहाशूलौ प्रसह्यासह्यवेदनां। अकामनिर्जरायोगादर्जितेनोर्जितायुषा ।।११९।।

कालं कृत्वा युवां जातौ जातिगौरवगर्वितौ । अग्निभूतिर्मरुद्भूतिः सोमदेवस्य देहजौ ॥१२०॥
पापपाकेन दौर्गत्यं सौगत्यं पुण्यपाकनः । जीवानां जायते तत्र जातिगर्वेण किं वृथा ॥१२१॥
प्राप्तः पामरको दृष्ट्वा क्रोष्टारौ नष्टजीवितौ । दती कृत्वा कृती गेहे तिष्ठतोऽद्यापि तद्दती॥१२२॥
सोऽपि मृत्वा सुतस्यैव सुतो भूत्वातिमानवान् । जातिस्मरः स्मरच्छायो मृषा मूक इव स्थितः॥१२३॥
स एष बंधुमध्यस्थो मामतीव विलोकते । इत्युक्त्वाऽऽहूय तं मूकं सात्यकिः सत्यवाग् जगौ॥१२४॥
स त्वं पामरको विप्रः प्राप्तस्तोकस्य तोकतां । शोकं च मूकभावं च मुंच मुंच वचोऽमृतं॥१२५॥
जायतेऽत्र नटस्येव संसारे स्वामिभृत्ययोः । पितृपुत्रकयोर्मातृभार्ययोश्च विपर्ययः ॥१२६॥
घटीयंत्रघटीजाले जटिले कुटिले भवे । उच्चाराधर्यमायांति जंतवः सततभ्रमाः ॥१२७॥
इति विज्ञाय निस्सारं घोरं संसारसागरं । कुरु पुत्र ! दयामूलं व्रताख्यं सारसंग्रहं ॥१२८॥
इति साक्षात्कृते तेन प्रत्यये यतिना द्विजः । पपात पादयोस्तस्य प्रदक्षिणपुरःसरं ॥१२९॥
आनंदाश्रपरीताक्षः पुनरुत्थाय विस्मयी । जगाद गद्गदालापः कृतांजलिपुटालिकः ॥१३०॥
अहो सर्वज्ञकल्पस्त्वं वस्तुनस्तत्त्वमीश्वरः । अत्रत्यं पश्यसि स्पृष्टं जगत्त्रितयगोचरं ॥१३१॥
उन्मीलितं मनोनेत्रमज्ञानपटलाविलं । त्वया नाथ ! ममेहाद्य ज्ञानांजनशलाकया ॥१३२॥

अनादौ भवकांतारे महामोहांधकारिते । भ्रमतो मे मुने ! जातो बंधुस्त्वं मार्गदर्शनः ॥१३३॥
प्रसीद भगवन् ! दीक्षां देहि दैगंबरीमिति । प्रासाद्य गुरुमासाद्य जग्राहानुमतां सतां ॥१३४॥
चरितं तस्य विप्रस्य श्रुत्वा दृष्ट्वा च तादृशं । श्रामण्यं केचिदापन्नाः केचित् श्रावकतां परां १३५
तावग्निवायुभूती तु विलक्षौ लोकगर्हितौ । स्वनिकेतं पुनर्यातौ पितृभ्यामपि निंदितौ ॥१३६॥
कायोत्सर्गस्थितं रात्रौ मुनिमेकांतवर्त्तिनौ । जिघांसौ खड्गहस्तौ तौ यक्षेण स्तंभितौ स्थितौ ॥१३७॥
प्रभाते च जनो दृष्ट्वा तौ यतेः पार्श्वयोः स्थितौ । निनिंद निंदिताचारौ तावेतौ पातकाविति ॥१३८॥
तावचिंतयतां साधोः प्रभावोऽयमहो महान् । आवामयत्नतो येन स्तंभितौ स्तंभतां गतौ ॥१३९॥
कथंचिद् यदि मोक्षः स्यादस्माकं कृच्छ्रतोऽमुतः । जिनधर्मं प्रपत्स्यामो दृष्टसामर्थ्यमित्यपि ॥१४०॥
तावत्तद्व्यसनं श्रुत्वा पितरौ शीघ्रमागतौ । पादलग्नौ मुनिं तं तौ प्रसादयितुमुद्यतौ ॥१४१॥
करुणावानसौ योगी योगं संहृत्य सुस्थितः । क्षेत्रपालकृतं ज्ञात्वा तमाह विनयस्थितं ॥१४२॥
क्षम्यतां यक्ष ! दोषोऽयमनयोरनयोद्भवः । कर्मप्रेरितयोः प्रायः कुरु कारुण्यमंगिनोः ॥१४३॥
इत्थासाद्य मुनेराज्ञां राज्ञामिव नियोगतः । यथाऽऽज्ञापयसीत्युक्त्वा विससर्ज स तौ तदा ॥१४४॥

१ तूर्णं इत्यपि ।

मुनिमासाद्य तौ धर्मं श्रुत्वा द्विविधमप्यतः । अणुव्रतानि संगृह्य श्रावकत्वमुपागतौ ॥१४५॥
अनुपाल्य चिरं धर्मं सम्यग्दर्शनभावितौ । कालेन कालधर्मेण जातौ सौधर्मवासिनौ ॥१४६॥
अश्रद्धाय मतं जैनं पितरौ तु मृतौ तयोः । यातौ कुयोनिपांथौ तौ यतो मिथ्यात्वमोहितौ ॥१४७॥
देवौ देवसुखं भुक्त्वा च्युत्वाऽयोध्यानिवासिनः । जातौ समुद्रदत्तस्य धारिण्यां श्रेष्ठिनः सुतौ ॥१४८॥
पूर्णभद्रस्तयोर्ज्येष्ठो मणिभद्रोऽनुजोऽभवत् । अविराधितसम्यक्त्वौ तौ च शासनवत्सलौ ॥१४९॥
गुरोर्महेंद्रसेनाच्च धर्मं श्रुत्वा पिताऽनयोः । तत्पुरेश्वरराजश्च भव्याश्चान्ये प्रवव्रजुः ॥१५०॥
अन्यदा मुनिपूजार्थं रथेन प्रस्थितौ पुरः । चांडालं सारमेयीं च तौ दृष्ट्वा स्नेहमागतौ ॥१५१॥
वंदित्वा तद्गुरुं भक्त्या पृच्छतःस्म सविस्मयौ । शुनीचांडालयोः स्नेहः स्वामिन्नौ किमभूदिति ।१५२।
गुरुराहावधिज्ञानज्ञातलोकत्रयस्थितिः । विप्रजन्मनि यौ तौ वां पितरौ ताविमौ यतः ॥१५३॥
निशम्येति गुरुं नत्वा गत्वा तौ धर्ममूचतुः । भवांतरकथाप्रायमुपशांतौ ततस्तकौ ॥१५४॥
निर्वेदी दीनतां त्यक्त्वा त्यक्त्वाहारचतुर्विधं । मासेन श्वपचो मृत्वा भूत्वा नंदीश्वरोऽमरः ॥१५५॥
सारमेयीं पुरेऽत्रैव राजपुत्रित्वमागतां । अबोधयदसावेत्य स्वयंवरगतां सतीं ॥१५६॥
ज्ञातसंसारनिःसारा सम्यक्त्वपरिभाविता । सितैकवसना कन्या प्राव्रजन्नवयौवना ॥१५७॥

अनुष्ठाय चिरं श्रेष्ठं श्रावकव्रतमुत्तमं। संलिख्य भ्रातरौ जातौ सौधर्मे सुरसत्तमौ ॥१५८॥
च्युत्वा पुनरयोध्यायां हेमनाभस्य भूपतेः। धरावत्यां सुतौ भूतौ मधुकैटभनामकौ ॥१५९॥
अभिषच्य मधुं राज्ये यौवराज्ये च कैटमं। हेमनाभो महाभागो व्रतं जैनेंद्रमग्रहीत् ॥१६०॥
मधुकैटभवीरौ तावेकवीरौ धरातले। भूतावद्भुततेजस्को सूर्याचंद्रमसाविव ॥१६१॥
अक्षुद्रः क्षुद्रसामंतैरंधकार इवैतयोः। गिरिदुर्गमुपाश्रित्य भीमकः प्रत्यवस्थितः ॥१६२॥
तद्वशीकरणार्थं तौ चेलतुर्मधुकैटभौ। प्राप्तौ वटपुरं यत्र वीरसेनोऽवतिष्ठते ॥१६३॥
अभ्युद्गतेन तेनासौ प्रीतेन मधुरादरात्। सांतःपुरेण वीरेण स्वामिभक्त्यातिमानितः ॥१६४॥
चंद्राभा चंद्रिकेवाऽस्य मानिनी रूपमानिनी। अहरन्मधुराजस्य मनो मधुरभाषिणी ॥१६५॥
शास्त्रशास्त्रकठोराऽपि चंद्राभादर्शनान्मधोः। आर्द्रभावमगाद् बुद्धिश्चंद्रकांतशिला यथा ॥१६६॥
राज्यं यदनया युक्तं रूपसौभाग्ययुक्तया। सुखाय तदहं मन्ये वियुक्तं तु विषोपमं ॥१६७॥
चंद्राभयोपगूढस्य महोदयमहीभृतः। संपूर्णस्येव चंद्रस्य कलंकोऽप्यतिशोभते ॥१६८॥
चंद्राभासंगसंजातविकासस्य सुगंधितां। कुमुदाकरराजस्य पंकगंधो न बाधते ॥[1]६९॥

१ रिपु इत्यपि।

इति संचिंत्य रागांधः स तस्या हरणे मनः। न्यधत्त मधुरुर्वीशो मतिमानपि मान्यपि ॥१७०॥
ततो भीमकमुद्वृत्तं वशीकृत्य कृती मधुः। अयोध्यापुरमागत्य चंद्राभाहृतमानसः ॥१७१॥
सांतःपुरान् स्वसामंतान् स्वपुरं स्वपुरस्थितान्। सत्वरं सत्त्वसंपन्नः समाहूय यथायथं ॥१७२॥
सर्वान् संपूज्य संपूज्य विचित्रांबरभूषणैः। विससर्ज निजावासान् प्रसादाह्लादिताननान् ॥१७३॥
अतिसन्मान्य सस्त्रीकं तथा वटपुरेश्वरं। अजीगमदतिप्रीतं प्रीतिपूर्वं निजास्पदं ॥१७४॥
चंद्रभायास्तु यद् योग्यमद्याप्याभरणं वरं। न सज्जमिति तावत्सा तेन रुद्ध्वा निजीकृता ॥१७५॥
प्रभुत्वमखिलस्त्रीणां महादेवीपदेन सः। दत्त्वा कामान् यथाकामं न्यषेवत तया मधुः ॥१७६॥
तस्याः कौमारभर्त्ता तु वियोगानलदीपितः। उन्मत्ततां परां प्राप्तः पर्यटन् क्षितिमाकुलः ॥१७७॥
चंद्राभालापवार्त्तार्त्तः पुररथ्यासु पयटन्। धूसरो वीक्षितो जातु प्रासादस्थितया तया ॥१७८॥
यातकारुण्ययाऽवाचि मधुराजस्ततोऽन्यया। नाथ! पूर्वपतिं पश्य भ्रमंतं मे प्रलापिनं ॥१७९॥
तस्मिन्नवसरे चंडैस्तैः कश्चित्पारदारिकः। गृहीत्वा दर्शितस्तस्मै नृपाय न्यायवेदिने ॥१८०॥
किमिह देवदंडोऽस्य तेनोक्तं सापराधवान्। अत्यंतपापभागेष तस्मादस्य विधीयते ॥१८१॥
हस्तपादशिरश्छेदं देहदंडं यथास्पदं। देव्या चोक्तं तदा देव! अयं दोषो न किं तव ॥१८२॥

तद्वचसा स म्लानो हि हिमानीहतपद्मवत् । चिंतयेदनया तथ्यं ममोक्तं हितमिच्छया ॥१८३॥
परस्त्रीहरणं सत्यं दुर्गतेर्दुःखकारणं । ज्ञात्वा विरागिणं कांतं ऊचे सापि विरागिणी ॥ १८४ ॥
किं भोगैरीदृशैः कृत्यं परस्त्रीविषयैः प्रभो । किंपाकसदृशैः स्वामिन् ! दुःखदैः प्रीणकैरपि ॥१८५॥
भोगास्ते स्वपरयोर्ये नोपतापस्य हेतवः । सम्मताः साधुलोकस्य नेतरे विषयात्मकाः ॥१८६॥
इति प्रबोध्यमानोऽयं मधुश्चंद्राभया शनैः । मुमोच सुदृढीभूतं मोहकादंबरीमदं ॥ १८७ ॥
जगाद च स तां देवीं प्रसन्नमतिरादरात् । साधु ! साधु ! त्वया साध्वि ! प्रतिपादितमत्र मे ॥१८८॥
न युक्तमीदृशं कर्म पुंसामाचरितुं सतां । परपीडाकरं बाढं परत्रेह च पापकृत् ॥ १८९ ॥
मादृशोऽपि यदीदृक्षं कर्म लोकविगर्हितं । करोति तत्र किं वाच्यमव्युत्पन्नः पृथग्जनः ॥१९०॥
स्वकलत्रेऽपि यत्राऽयं रागोऽत्यर्थं निषेवतः । कर्मबंधस्य हेतुः स्यात् किं पुनः परयोषिति॥१९१॥
ज्ञानांकुशनिरुद्धोऽपि मनोमत्तमहाद्विपः । उत्पथेन नवत्युग्रः किमत्र कुरुते बुधः ॥ १९२ ॥
निरुद्ध्य निशितैर्दंडैरनंकुशमनोगजं । प्रवर्त्तयंति ये मार्गे केचिदेवात्र ते भटाः ॥ १९३ ॥
दंडैर्मनोगजो मत्तो रतिवासितया हृतः । यावन्न युज्यते तावत् कुतस्तस्य मदक्षितिः ॥ १९४ ॥
प्रयत्नेन मनोहस्ती यावन्नात्र वशीकृतः । तावद्रसोढकस्यापि भयायैव न शांतये ॥ १९५ ॥

सुवशस्तु मनोहस्ती तपोमयरणक्षितौ । पापसेनां निगृह्णाति साध्वाधोरणनोदितः ॥ १९६ ॥
शब्दरूपरसस्पर्शगंधसस्याभिलाषिणः । हृषीकमृगयूथस्य मनोमारुतहारिणः ॥ १९७ ॥
निरूप्य प्रसभं धैर्यं दृढवागुरया चितं । चिरसंचितपापस्य करोमि तपसा क्षयं ॥ १९८ ॥
इत्याभाष्य मनोवेगं निगृह्य विदधे मधुः । धियं बोधपयोधौ तां तापस्ये तापशांतये ॥१९९॥
आगत्य च तदाऽयोध्यां नाम्ना विमलवाहनः । मुनिर्मुनिसहस्रेण सहस्राम्रवनेऽवसत् ॥२००॥
मधुः सकैटभः श्रुत्वा तमयात्सवधूजनः । प्रपूज्य विधिना धर्मं शुश्राव च विशेषतः ॥ २०१ ॥
भोगसंसारशरीरपुरवैराग्यसंगतः । प्रवव्राज सह भ्रात्रा क्षत्रियैर्बहुभिर्मधुः ॥ २०२ ॥
विशुद्धान्वयसंभूताः शतशोऽथ सहस्रशः । प्राव्रजन् व्रतशीलाढ्याश्चंद्राभाद्या नृपास्त्रियः ॥२०३॥
माधवोऽपि निजं राज्यं ररक्ष कुलवर्धनः । वर्धमानः स्वशरीरेण पौरुषेण जयेन च ॥ २०४ ॥
चक्रतुस्तौ तपो घोरं राजानौ मधुकैटभौ । व्रतगुप्तिसमित्याढ्यौ निर्ग्रंथौ ग्रंथवर्जितौ ॥ २०५ ॥
एक एव तयोरासीदंगोपांगपरिग्रहः । न बाह्याभ्यंतरासंगादंगोपांगपरिग्रहः ॥ २०६ ॥
षष्ठाष्टमादिषण्मासपर्यंतो पोषितावृषी । निःशेषैरागमोक्तैस्तौ चक्रतुः कर्मनिर्जरां ॥ २०७ ॥

१ स्ववश इत्यपि ।

उत्तुंगगिरिशृंगेषु तयोरातापनस्थयोः। स्वेदस्य विदवः पेतुर्विलीनस्येव कर्मणः॥ २०८॥
वर्षासु जीवरक्षार्थं वृक्षमूलस्थयोर्वपुः। युधीव शरधाराभिर्न भिन्नं धृतिकंटकं॥ २०९॥
यामिनीषु मनीषिभ्यां हैमनीषु हिमानिलाः। सेहिरे प्रतिमास्थाभ्यां देहच्छायाञ्जनीप्लुषः।२१०।
अनुप्रेक्षाभिरुद्धाभिर्धर्मचारित्रशुद्धिभिः। चक्रतुः संवरं धीरौ परीषहजयेन च॥ २११॥
स्वाध्यायध्यानयोगस्थौ वैय्यावृत्त्यक्रियोद्यतौ। रत्नत्रयविशुद्धया तौ दृष्टौ दृष्टांततां गतौ।.२१२॥
बहुवर्षसहस्राणि संचितोरुतपोधनौ। मधुकैटभयोगीशौ शल्यदोषविवर्जितौ॥ २१३॥
अंते सम्मेदमारुह्य प्रायोपगमनेन तौ। मासक्षपणयोगेन समाराध्योज्झितांगकौ॥ २१४॥
आरणाच्युतकल्पे ताविंद्रं सामानिकौ प्रभू। देवीदेवसहस्राणां यातौ प्रत्येकमीश्वरौ॥ २१५॥
द्वाविंशतिपयोराशिप्रमाणपरमायुषौ। बुभुजाते सुखं सम्यक् सम्यग्दर्शनभावितौ॥ २१६॥
अवतीर्य मधुर्जातो रुक्मिणीकुक्षिभूमणिः। कृष्णस्य भारते पुत्रो नाम्ना प्रद्युम्न इत्यसौ॥२१७॥
कैटभोऽपि दिवश्च्युत्वा भ्रातास्यैव भविष्यति। जांबवत्यां महादेव्यां शंबः कृष्णनिभद्युतिः २१८
जन्मांतरमहाप्रीत्या परस्परहितोद्यतौ। धीरौ चरमदेहौ तौ शंबप्रद्युम्नसुंदरौ॥ २१९॥
कांताविरहसंतापादार्तध्यानपरायणः। भ्रांत्वा संसारकांतारं चिरं वटपुरप्रभुः॥२२०॥

मनुष्यभावमापन्नः स भूत्वाऽज्ञानतापसः। धूमकेतुरिवोद्दीप्तो धूमकेतुरभूत्सुरः॥ २२१॥
प्राक्स्त्रीवैरानुबंधेन सप्रबोधमुपेयुषा। शिशुं व्ययोजयन्मात्रा धिग्वैरं पापवर्धनं ॥ २२२॥
प्रद्युम्नो रक्षितोऽपायात्स्वपुण्यैः पूर्वसंचितैः। पुण्यानामेव सामर्थ्यमपायपरिरक्षणे ॥२२३॥
सीमंधरजिनेंद्रेण तदानीमिति भाषितं। श्रुत्वा पद्मरथश्चक्री प्रणनाम प्रमोदवान् ॥ २२४॥
नारदोऽपि जिनं नत्वा प्रमोदेन वशीकृतः। समुत्पत्य मरुन्मार्गे मेघकूटं समाययौ॥ २२५॥
कालसंवरमानंद्य पुत्रलाभोत्सवेन सः। देवीं कनकमालां च स्तुत्वा पुत्रवतीं मुहुः॥२२६॥
रुक्मिण्यास्तनुजं दृष्ट्वा कुमारशतसेवितं। गूढवृत्तप्रमोदेन रोमांचमभजत्परं॥ २२७॥
प्रणामेनार्चितस्तेषां दत्वाशिषमतिद्रुतं। वियदुत्पत्य संप्राप्तो द्वारिकां नारदो मुनिः॥२२८॥
यथागतं यथादृष्टं यथाश्रुतमशेषतः। स प्रद्युम्नकथां कृत्वा यादवेभ्यो मुदं ददौ॥ २२९॥
देवीं च रुक्मिणीं दृष्ट्वा विकासिमुखपंकजः। सीमंधरजिनेंद्रोक्तं प्रतिपाद्य पुनर्जगौ ॥ २३०॥
दृष्टो रुक्मिणि ते पुत्रो मया क्रीडन् कुमारकः। खचरेशगृहे देवकुमार इव रूपवान् ॥ २३१॥
लब्धषोडशलाभोयं कृतप्रज्ञप्तिसंग्रहः। अमोघं षोडशे वर्षे समेष्यति सुतस्तव॥ २३२॥

तस्यागमनवेलायामुद्याने तव रुक्मिणि । शिखी कूजिष्यतेऽस्युबैरकाले प्रियवचनः ॥२३३॥
शुष्का तद्गतवेलायामुद्यानमणिवापिका । सुतागमनवेलायां पूर्यते सांबुजांबुना ॥ २३४ ॥
तव शोकापनोदाय शोकापनुदसूचकः । अशोकः पादपोऽकाले मुंचत्यंकुरपल्लवान् ॥ २३५ ॥
मूकीभूय स्थितास्तावद्यावत्प्रद्युम्नदूरता । प्रत्यासन्ने पुनर्मूका मूकभावं विमुंचति ॥ २३६ ॥
सुतागमनवेलैते निर्मितैर्लक्ष्यतां स्फुटैः । सीमंधरविभोर्वाक्यं मान्यथामंस्त मानिता ॥ २३७ ॥
आकर्ण्य नारदीयं तद्रुक्मिणी वचनं हितं । श्रद्धाय प्रणतावोचदिति सा प्रस्नुतस्तनी ॥२३८॥
बंधुकार्यमिदं साधु वात्सल्योद्यतचेतसा । कृतं त्वयाद्य मे सद्यो भगवन्परदुष्करं ॥२३९॥
पुत्रशोकाग्निदग्धाहं निरालंबा त्वया मुने । दत्वा साधारिता धीर! नाथ! हस्तावलंबनं ॥२४०॥
प्रोक्तं सीमंधरेशेन सर्वज्ञेनेह यद्यथा । तत्तथास्ति ममावश्यं जीवंत्याः पुत्रदर्शनं ॥ २४१ ॥
जीवामि जिनवाक्येन कठिनीभूतमानसा । व्रज त्वमधुना स्वेच्छं पुनर्दर्शनमस्तु ते ॥ २४२ ॥
सप्रणाममिति प्रोक्तो दत्ताशीर्नारदो ययौ । मुक्तशोका हरेरिच्छां पूरयंतीव सा स्थिता ॥२४३॥

१ 'सुतागमन' इति ख पुस्तके ।

मनुजदेवनरामरमर्त्यजं विबुधजं च शिवाभ्युदयावहं ।
मदनशंबपुराचरितं जनश्चरतु भक्तिमना जिनशासने ॥ २४४ ॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ शंबप्रद्युम्नवर्णनो नाम त्रिचत्वारिंशः सर्गः ।

चतुश्चत्वारिंशः सर्गः ।

भामायास्तनुजः श्रीमान् भानुभामंडलद्युतिः । भानुर्नाम्ना महिम्नासौ ववृधे बालभानुवत् ॥१॥
भानुना वर्धमानेन भानुभानुनिभौजसा । सूनुना सत्यभामाया मानशैलः प्रवर्धितः ॥२॥
अन्यदा नारदोऽवादि कृष्णेन भगवन् ! कुतः । आगतोऽस्यधुनास्यं ते कथयत्यधिकां मुदं ॥३॥
सोऽवोचद्दक्षिणश्रेण्यामस्ति जंबूपुरे खगः । जांबवः शिवचंद्रास्य चंद्रास्या वल्लभा तयोः ॥४॥
विश्वकृतयशाः पुत्रो विश्वक्सेन इतिश्रुतिः । कन्या जांबवती नाम्ना श्रीरिव स्वयमागता ॥५॥
जाह्नवीमवतीर्णा तु सखीभिः स्नातुमुद्यतां । चंद्रलेखामिवोदारां कांततारांभिरावृतां ॥६॥
गंगाद्वारगतामंगतुंगवृत्तपयोधरां । हर वीरपराशक्यां जांबवस्येत्र वाहिनीं ॥७॥

१ 'गंगाद्वारवर्ती' इति ख पुस्तके ।

इति नारदवाक्येन सस्नेहेन हरिस्तदा । प्रोद्दीपितः समुत्तस्थौ धृतेनेव हुताशनः ॥८॥
अनावृष्टिबलोपेतस्तं प्रदेशमितोऽचिरात् । प्रारब्धमज्जनक्रीडामपश्यत्कन्यकां हरिः ॥९॥
सहसा कन्ययादर्शि हरिरिंदीवरद्युतिः । ततोऽनंगजेन तौ विद्धौ शरैः पंचभिरेकदा ॥१०॥
दोर्भ्यामालिंग्य तां गाढैः सुखामीलितलोचनां । आमीलितेक्षणो जह्रे ह्रेपितश्रीरतिह्रियं ॥११॥
सखीनामभवत्तुंगस्तत्र चाक्रंदनः स्वनः । समीपशिविरव्यापी कन्याहरणकारणः ॥१२॥
श्रुत्वा कन्यापिता क्रुद्धः खड्गोद्यतकरः खगेट् । समुत्पत्य लघु प्राप्तः कनत्खेटकहस्तकः ॥१३॥
अनावृष्टिस्ततस्तस्य खेटको खड्पाणिकं । रणातिथ्यं स खे कृत्वा बबंध खचराधिपं ॥१४॥
आनीय नीतिविद्वीरो विष्णवे तमदर्शयत् । सूनुं जामातरि न्यस्य स ययौ तपसे वनं ॥१५॥
जांबवत्या विवाहेन परमानंदमाश्रितः । विश्वक्सेनयुतो विष्णुर्द्वारिकामगमन्निजां ॥१६॥
प्रासादस्योपकंठे च रुक्मिण्या मुदितात्मनः । प्रासादं प्रददौ दिव्यं जांबवत्यै जनार्दनः ॥१७॥
सन्मान्य भ्रातरं तस्या विसृज्य निजमास्पदं । अरीरदिमां भोगी भोगैर्भूतलदुर्लभैः ॥१८॥
परस्परगृहाजस्रगत्यागमनवर्धिता । रुक्मिणी जांबवत्योः प्राग्जाता प्रीतिरखंडिता ॥१९॥
श्लक्ष्णधीः श्लक्ष्णरोमाख्यो राजाभूत्सिंहलेश्वरः । तद्वशीकृतये सौरिर्जातु दूतमजीगमत् ॥२०॥

गत्वा गत्याशु दूतस्तं प्रतिकूलमवेदयत् । लक्ष्मणां लक्षणोपेतां तत्कन्यां चापिशार्ङ्गिणः ॥२१॥
सत्वरं स ततो गत्वा हलिना सह सम्मर्दी । समुद्रं स्नातुमायातामद्राक्षीदायतेक्षणां ॥२२॥
द्रुमसेनं महावीर्यं हत्वा सेनापतिं युधि । हृत्वा चेतः स्वरूपेण रूपिणीमहरत्पुनः ॥२३॥
उपयम्य समानीय लक्ष्मणां लक्ष्मणप्रभुः । जांबवत्या गृहाभ्यर्णगृहे स रमतिस्म तां ॥२४॥
तस्या भ्राता महासेनः समागत्य नतो हरिं । सन्मान्य मानिना मुक्तः सिंहलद्वीपमभ्यगात् ॥२५॥
राष्ट्रवर्धन इत्यासीत्सुराष्ट्राधिपतिर्नृपः । अजाखुरी पुरी चास्य विनया वनितोत्तमा ॥२६॥
तस्यां नमुचिनाम्नाभूत्तनयो नयविक्रमी । तनया च सुसीमाख्या सुसीमा वसुधा यथा ॥२७॥
युवराजः स नमुचिः क्षितिविश्रुतपौरुषः । राज्ञोवमन्यते मान्यानभिमानमहागिरिः ॥२८॥
नमुचिश्च सुसीमा च समुद्रं स्नातुमागतौ । हितेन हरये तेन नारदेन निवेदितौ ॥ २९ ॥
प्रभासतीर्थतीरस्थसैन्यं तं सीरिणा हरिः । गत्वा निहत्य हृत्वा तां कन्यां द्वारवतीमगात् ॥३०॥
लक्ष्मणाभवनाभ्यर्णे सौवर्णे भुवनोत्तमं । दत्वा सौधं यथारंस्त सीमंतिन्या सुसीमया ॥३१॥
राष्ट्रवर्धनराजोऽपि सुतायै सुपरिच्छदं । प्रजिघाय रथेभादिप्राभृतं प्रभवे यथा ॥३२॥
सिंधुदेशाधिपो मेरुरिक्ष्वाकुकुलवर्धनः । पुरे वीतभये चासीच्चंद्रवत्यस्य भामिनी ॥३३॥

गौरी नामाभवत्तस्यां गौरी वर्णेन कन्यका । गौरीव रूपिणी विद्या गौरीतिरहितेव सा ॥३४॥
दूतप्रेषणपूर्वं स मेरुः प्रेषयतिस्म तां । नैमित्तिकवचः स्मर्ता हरये हरिणेक्षणा ॥३५॥
परिणीय हरिर्गौरीं मनोहरणसारिणीं । सुसीमस्सदनाभ्यर्णं प्रादात्प्रासादमुच्चकैः ॥३६॥
अरिष्टपुरनाथस्य सीरिणो मातुलस्य तु । राज्ञो हिरण्यनाभस्य श्रीकांतायां सुयोषिति ॥३७॥
पद्मावतीं समुत्पन्नां कन्यां पद्मामिव स्वयं । स्वयंवरगतां श्रुत्वा संप्राप्तौ रामकेशवौ ॥३८॥
सगौरवमिमौ दृष्टावनावृष्टिपुरस्सरौ । प्रीत्या हिरण्यनाभेन स्वजनस्नेहवर्धनौ ॥ ३९ ॥
पित्रा हिरण्यनाभस्य सत्रा प्राव्रजदग्रजः । पुरैव रेवतो नाम्ना महिम्ना यो वनश्रितः ॥४०॥
चतस्रस्तत्सुताः कन्या रेवती बंधुमत्यपि । सीता राजीवनेत्रा च ता दत्ताः सीरिणे पुरा ॥४१॥
स्वयंवरे प्रवृत्तेऽत्र हृत्वा पद्मावतीं हठात् । रणशौंडान्ममर्दाशु शौरिराहवदक्षिणः ॥४२॥
परिणीय सभार्यौ तौ भ्रातरौ भ्रातृभिर्युतौ । द्वारिकामरमायातावरंसातां सुरोपमौ ॥४३॥
गौरी गृहसमीपे च पद्मावत्यै गृहं हरिः । प्रदाय प्रमदोपेतः प्रसादपरमोऽभवत् ॥४४॥
नगर्यां पुष्कलावत्यां गांधारविषयेऽभवत् । भूभृर्दिंद्रगिरिस्तस्य मेरुमत्यभिधा प्रिया ॥४५॥
सुतो हिमगिरिस्तस्यां जातो हिमगिरिस्थिरः । गांधारी दुहिता चार्वी गंधर्वादिकलाधिका ॥४६॥

भ्रात्रा हयपुरींद्राय सुमुखाय ततो हरिः । दीयमानां विदित्वैनां नारदादरमागतात् ॥४७॥
गत्वा हिमगिरिं हत्वा प्रतिकूलं रणाजिरे । तां हृत्वानीय सौम्यास्यामुपयम्य ससम्मदः ॥४८॥
पद्मावत्या गृहोपांते गांधार्यै भवनं वरं । वितीर्य धैर्यसंपन्नामेनां भोगैरमानयत् ॥४९॥
महादेवीभिरिष्टाभिरष्टाभिरवरोधने । प्रसाधिताभिराशाभिरिव ताभिरुपासितः ॥५०॥
विंदन् भोगफलं भूरि गोविंदः पुण्यवृक्षजं । संददज्जनतानंदं ननंद पुरुपौरुषः ॥५१॥
कृतरणं प्रविभूय पुरःस्थितं रिपुगणं तृणवत्क्षणमात्रतः ।
वरवधूवररत्नमयत्नतः श्रयति भव्यजनो जिनधर्मकृत् ॥५२॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ जांबवत्यादिमहादेवीलाभवर्णनो नाम चतुश्चत्वारिंशः सर्गः ।

पंचचत्वारिंशः सर्गः ।

अथ प्राप्ता महासत्त्वास्तदा द्वारवतीं पुरीं । भागिनेया दशार्हाणां प्रसिद्धाः पंच पांडवाः ॥१॥
युधिष्ठिरोऽर्जुनो ज्येष्ठो भीमसेनो महाबलः । नकुलः सहदेवश्च पंचैते पांडुनंदनाः ॥२॥
मागधोऽत्रांतरेऽप्राक्षीत्प्रांजलिर्गणनायकं । अन्वये भगवन् ! कस्य पांडुः पांडवनंदनाः ॥३॥

गण्याह कुरुराजानामन्ववाये महोदये । शांतिकुंथ्वरनामानो यत्र तीर्थकरास्त्रयः ॥४॥
आदितः कुरुवंश्यानां चतुर्वर्गोपसेविनां । कतिचिन्मागधा ख्यामि शृणु नामानि भूभृतां ॥५॥
कुरुजांगलदेशस्य कुरुभूमिसमस्य हि । अभूतां भूषणौ भूपौ यौ हास्तिनपुरे परे ॥६॥
श्रेयान् सोमप्रभश्चेति कुरुवंशविशेषकौ । नाभेयसमकालौ तौ दानधर्मस्य नायकौ ॥७॥
तत्र सोमप्रभस्याभूत्कुमारो जननायकः । मेघस्वरस्स एवात्र भरतेन कृताभिधः ॥८॥
तस्मात्कुरुरभूत्तस्मात्कुरुचंद्रस्तु नंदनः । ततः शुभंकरो राजा जातो धृतिकरस्ततः ॥९॥
राज्ञां कोटिषु कालेन समतीतासु भूरिषु । जिनांतरेषु चानेकसागरोपमकोटिषु ॥१०॥
धृतिदेवो धृतिकरो गंगदेवादयस्तथा । धृतिमित्रधृतिक्षेत्रसुव्रतव्रातमंदराः ॥११॥
श्रीचंद्रसुप्रतिष्ठाद्या व्यतीता शतशो नृपाः । धृतपद्मो धृतेंद्रश्च धृतवीर्यः प्रतिष्ठितः ॥१२॥
इत्यादिषु व्यतीतेषु धृतिदृष्टिर्धृतिद्युतिः । धृतिप्रीतिकराद्याश्च व्यतीता कुरुवंशजाः ॥१३॥
ततो भ्रमरघोषाख्यो हरिघोषो हरिध्वजः । सूर्यघोषः सुतेजाश्च पृथुश्च पृथिवीपतिः ॥१४॥
इभवाहननामाद्याः समतीतास्ततो नृपाः । विजयाख्यो महाराजो जयराजस्ततोऽभवत् ॥१५॥
ततः सनत्कुमारोभूच्चतुर्थश्चक्रवर्तिनां । रूपपाशसमाकृष्टसुरबोधितदीक्षितः ॥१६॥

सुकुमारः सुतस्तस्य तस्माद्वरकुमारकः। विश्वो वैश्वानरश्चाभूद्विश्वकेतुर्बृहध्वजः ॥१७॥
विश्वसेनस्ततो जातो यस्यैरा प्राणवल्लभा। तत्सुतः पंचमश्चक्री शांतिः षोडशतीर्थकृत् ॥१८॥
नारायणो नरहरिः प्रशांतिः शांतिवर्धनः। शांतिचंद्रः शशांकांकः कुरुश्च कुरुवंशजाः ॥१९॥
एवमाद्येष्वतीतेषु सूर्योऽभूद्यस्य भामिनी। श्रीमती तीर्थकृत्कुंथुस्तयोश्चक्रधरोऽपि सः ॥२०॥
अतिक्रांतेषु भूपेषु ततोऽपि बहुषु क्रमात्। राजा सुदर्शनो जातो यस्य मित्रा प्रियांगना ॥२१॥
तयोरर इति ख्यातः सप्तमश्चक्रवर्तिनां। कृती तीर्थकराणां च यतोष्टादशसंख्यकः ॥२२॥
ततः सुचारुश्चारुश्च चारुरूपोथ वीर्यवान्। चारुपद्मस्तथान्येषु समतीतेषु राजसु ॥२३॥
पद्ममालः सुभौमश्च जातः पद्मरथो नृपः। ततश्चक्री महापद्मो विष्णुपद्मो तु तत्सुतौ ॥२४॥
सुपद्मः पद्मदेवश्च कुलकीर्तिस्ततः परः। कीर्तिः सुकीर्तिकीर्ती तौ वसुकीर्तिश्च वीर्यवान् ॥२५॥
वासुकिर्वासवाभिख्यो वसुः सुवसुरेव च। कुरुवंशश्रियो नाथः श्रीवसुश्च वसुंधरः ॥२६॥
जज्ञे वसुरथस्तस्मादिंद्रवीर्यश्च वीर्यवान्। चित्रो विचित्रो वीर्योथ विचित्रोऽपि महाबलः ॥२७॥
ततो विचित्रवीर्योऽभूत्ततश्चित्ररथो नृपः। महारथो धृतरथो वृषानंतो वृषध्वजः ॥२८॥
श्रीमतो व्रतधर्मा च धृतो धारण एव च। महासरः प्रतिसरः शरः पारशरो नृपः ॥२९॥

शरद्वीपश्च राजासौ द्वीपो द्वीपायतो नृपः । सुशांतिः शांतिभद्रश्च शांतिषेणश्च भूपतिः ॥३०॥
भर्त्ता योजनगंधाया राजपुत्र्यास्तु शांतनुः । तनयः शंतनोर्भूभृद्धृतव्यास इति स्मृतिः ॥३१॥
धृतधर्मा ततस्तस्य तनयोऽपि धृतोदयः । धृततेजा धृतयशा धृतमानो धृतो नृपः ॥३२॥
ततोऽपि धृतराजोभूत्तस्य तिस्रः प्रियांगनाः। अंबिकांबालिकांबाख्या वेद्याभिजनसंभवाः ॥३३॥
धृतराष्ट्रश्च पांडुश्च विदुरश्च विदांवरः । यथाक्रममभी तासां तिसृणां तनयास्त्रयः ॥३४॥
भीष्मोऽपि शांतनोरेव संताने रुक्मिणः पिता । यस्य गंगाभिधा माता राजपुत्री पवित्रधीः ॥३५॥
धृतराष्ट्रस्य तनया दुर्योधनपुरस्सराः । नयपौरुषसंपन्नाः परस्परहितेरिताः ॥३६॥
पांडोः कुंत्यां समुत्पन्नः कर्णः कन्याप्रसंगतः । युधिष्ठिरोर्जुनो भीम ऊढायामभवंस्त्रयः ॥३७॥
नकुलः सहदेवश्च कुलस्य तिलकौ सुतौ । मद्र्यामद्रिस्थिरौ जातौ पंच ते पांडुनंदनाः ॥३८॥
पांडौ स्वर्गं गते देव्यां मद्र्यां च जिनधर्मतः । पांडवा धार्तराष्ट्राश्च राज्येऽभूवन्विरोधिनः ॥३९॥
विभज्य कौरवं राज्यं भुंजतां समभागतः । पंचानामेकतस्तेषामितरेषां तथैकतः ॥४०॥
भीष्मश्च विदुरो द्रोणो मध्यस्थाः शकुनिः पुनः । मंत्री दुर्योधनस्येष्टः शशरोमादयस्तथा ॥४१॥
अजय्यं सह कर्णेन वर्ये दुर्योधनस्य तु । जरासंधेन नैभृत्यं निभृतस्याभवत्तरां ॥४२॥

भार्गवाचार्यकं द्रोणो धनुर्वेदविशारदः। कौंतेयधार्तराष्ट्राणां चक्रे मध्यस्थभावतः ॥४३॥
भार्गवाचार्यवंशोऽपि श्रृणु श्रेणिक वर्ण्यते। द्रोणाचार्यस्य विख्याता शिष्याचार्यपरंपरा ॥४४॥
आत्रेयः प्रथमस्तत्र तच्छिष्यः कौंडिनिः सुतः। तस्याभूदमरावर्तः सितस्तस्यापि नंदनः ॥४५॥
वामदेवः सुतस्तस्य तस्यापि च कपिष्ठकः। जगत्स्थामा सरवरस्तस्य शिष्यः शरासनः ॥४६॥
तस्माद्रावण इत्यासीत्तस्य विद्रावणः सुतः। विद्रावणसुतो द्रोणः सर्वभार्गववंदितः ॥४७॥
अश्विन्यामभवत्तस्मादश्वत्थामा धनुर्धरः। रणे यस्य प्रतिस्पर्धी पार्थ एव धनुर्धरः ॥४८॥
पार्थप्रतापविज्ञानमात्सर्योपहता अथ दुर्योधनादयः कर्तुं संधिदूषणमुद्यताः ॥४९॥
पंच कौरवराज्यार्थमेकतः शतमेकतः। भुंजंति किमितोन्यत्स्यादन्याय्यमिति ते जगुः ॥५०॥
समुद्रा इव चत्वारस्ततः परुषवायुभिः। अपि प्रसन्नगंभीराः क्षुभिताः पांडुनंदनाः ॥५१॥
छादयामि द्विषच्छैलं शरधाराभिरुच्छ्रितं। इत्युत्थितोऽर्जुनोऽभोदः शमितोऽग्रजवायुना ॥५२॥
दृष्टया दहामि दायादशतमित्युदितं ब्रुवन्। मंत्रेणाशीसमज्ज्यायान् स्फुरद्भीमभुजंगमं ॥५३॥
अहिताय कुलांताय नकुलोऽपि कृतोद्यमः। ज्येष्ठेन सनयं रुद्धो भुजपंजरयंत्रितः ॥५४॥
भस्मयामि लघु द्वेषिवनखंडमिति ज्वलन्। अशामि ज्येष्ठमेघेन सहदेवदवानलः ॥५५॥

वसतां शांतचित्तानां दिनैः कतिपयैरपि । प्रसुप्तानां गृहं तेषां दीपितं धृतराष्ट्रजैः ॥५६॥
विबुध्य सहसा मात्रा सत्रा ते पंचपांडवाः । सुरंगया विनिःसृत्य गताः काप्यपभीरवः ॥५७॥
ततोऽपरागो लोकस्य जातो दुर्योधनं प्रति । क वा पापानुरागाढ्ये नापरागः सतो भवेत् ॥५८॥
प्रलीनानेव तान्मत्वा पांडवान्गोत्रजास्ततः । निवृत्ता इव ते तस्थुः कृतकालोचितक्रियः ॥५९॥
नदीं गंगां समुत्तीर्य कौंतेयास्तु महाधियः । कृतवेषपरावर्तास्ते पूर्वां दिशमासृताः ॥६०॥
कुंतीगतिवशेनैते गच्छंतः सुखमिच्छया । कौशिकाख्यां पुरीं प्राप्ता वर्णो यत्र नरेश्वरः ॥६१॥
तस्य प्रभावती भार्या सुता कुसुमकोमला । जनानुरागतस्तास्तान् श्रुत्वा दृष्टवती तदा ॥६२॥
युधिष्ठिरकुमारेंदुदर्शनेन सुदर्शना । कन्या कुमुद्वती धन्या विकासमगमत्परं ॥ ६३ ॥
अचिंतयदसौ तस्य भाविनी प्रियभामिनी । इह जन्मनि मे भूयादयमेव परो वरः ॥६४॥
ज्ञात्वाभिप्रायमस्या स संजातप्रेमबंधनः । आशाबंधं प्रदर्श्यागात्संज्ञयैव करग्रहे ॥६५॥
प्रतीक्ष्यमाणया तस्य तया भूयः समागमं । नीयते स्म विनोदैः स्वैः कालः कन्याजनोचितैः ॥६६॥
ततस्ते ललिताकारा स्वभावेन सहोदराः । द्विजवेषभृतो जग्मुर्जनचित्तापहारिणः ॥६७॥
आसनं शयनं तेषां भोजनं च मनोहरं । सुखेनैव सुपुण्यानामचिंतितमभूत्तदा ॥६८॥

पुनस्तापसवेषेण प्राप्ता श्लेष्मांतकं वनं। ते तापसाश्रमे रम्ये त्रिसप्तपुरिहार्चिताः ॥६९॥
वसुंधरपुरेशस्य विंध्यसेनस्य देहजा। वसंतसुंदरीनाम्ना नर्मदाजास्ति तत्र च ॥७०॥
युधिष्ठिराय सा दत्ता पुरैव गुरुभिर्वरा। दग्धवार्तामुपश्रुत्य निंदितस्वपुराकृता ॥७१॥
जन्मांतरेऽपि कांक्षंती तस्य कांतस्य दर्शनं। तपश्चरितुमारब्धा तत्र सा तापसाश्रमे ॥७२॥
उदाररूपलावण्या दुकूलपटसाटिका। जटिला वटशाखेव स्निग्धच्छाया व्यराजत ॥७३॥
आकर्णायतनेत्राभ्यां स्वधरेण मुखेंदुना। जघनस्तनभारेण मनोहरति तापसी ॥७४॥
पूज्या तापसलोकस्य सकलस्य तपोवनं। अकरोत्पावनं तन्वी चंद्रलेखेव निर्मला ॥७५॥
कौंतेयानां कृतातिथ्या तापसोचितवृत्तिभिः। जहार हारिवाक्यासौ क्षुत्पिपासापथश्रमं ।७६॥
कुंती प्रपच्छ तां प्रीत्या बाले! कमलकोमले। नवे वयसि वैराग्यं कुतो जातमिति व्रते ॥७७॥
इति सानुनयं प्रष्टा राजपुत्री जगौ गिरा। मनो मधुरया तेषां हरंती हरिणेक्षणा ॥७८॥
साधु पृष्टं त्वया पूज्ये! श्रूयतामत्र कारणं। सज्जनो हि मनोदुःखं निवेदितमुदस्यति ॥७९॥
कौरवाय पुरैवाहं कौंतेयायाग्रजाय हि। स्वभावोदारचेष्टाय गुरुभिर्विनिवेदिता ॥८०॥
समातृभ्रातृकस्यास्य मद्पुण्यप्रभावतः। श्रुता वार्ता जनेभ्यो या न स्मर्तुमपि शक्यते ॥८१॥

दाहदुःखमृतं कांतं युक्तं तेनैव वर्त्मना। अनुमर्तुं न तापस्ये शक्तिहीनतया स्थिता ॥८२॥
निशम्येति वचः सौम्या सा जगौ भाविनीं स्नुषां। कृतं भद्रं त्वया भद्रे कुर्वत्या प्राणरक्षणं ॥८३॥
अन्यथा चिंतयत्येषा मित्रे मित्रजनो जने। अन्यथा विधिरप्यस्मादर्थ्यते दीर्घदर्शिता ॥८४॥
कल्याणहेतवः प्राणाः कल्याणि! मम वाक्यतः। तपस्यंत्यापि धार्यंतां जीवंती भद्रमाप्स्यसि ॥८५॥
तदेवान्ववदत्पांडोः प्रथमस्तनयो यतः। धर्मे चाकथयद्युक्तमणुशीलगुणव्रतैः ॥८६॥
परस्परं समालापे मनःप्रीतिकरेऽनयोः। वर्तमाने तदा कन्या मनसा मन्यतेति सा ॥८७॥
राजलक्षणयुक्तः स किं स्यादेष युधिष्ठिरः। समातृकोनुशास्तीह मामतीव कृपान्वितः ॥८८॥
सर्वथा मम पुण्येन गण्येन तपसापि च। सत्यसंधः प्रियो जीव्यादन्याहतिरिहोद्यमी ॥८९॥
यियासवस्तु युक्तानां पुनर्दर्शनमस्त्विति। सम्मानिता प्रियालापैरयुरस्थाश्च साशया ॥९०॥
समुद्रविजयः श्रुत्वा स्वसृस्वस्रीयमारणं। मारणाय कुरूणां स प्राप्तः कुपितमानसः ॥९१॥
जरासंधस्ततः प्राप्य स्वयमेव महादरः। यदूनां कौरवाणां च संधिमापाद्य यातवान् ॥९२॥
इतोऽपि तापसाकारं त्यक्त्वेति द्विजवेषिणः। प्रयांतो भ्रातरः कुंत्या प्रादुरीहापुरं परं ॥९३॥
भीमसेनो महाभीमं भृंगाभं भृंगराक्षसं। मनुजाशनमुद्धास्य तत्रास त्रासमंगिनां ॥९४॥

वीतभीभ्यः प्रजाभ्यस्ते प्राप्तपूजा समातृकाः । व्रजंतः स्वेच्छया प्रापुस्त्रिश्रृंगाख्यं महापुरे ॥९५॥
प्रचंडवाहनस्तत्र प्रचंडश्चंडकर्मणां । आसीन्नृपतिरस्येष्टा वनिता विमलप्रभा ॥९६॥
रूपातिशयसंपूर्णाः पूर्णचंद्रसमाननाः । कलापारमिताः सर्वास्तयोर्दुहितरो दश ॥९७॥
आद्या गुणप्रभा तासु सुप्रभा ह्रीश्रियौ रतिः । पद्मा चेंदीवरा विश्वा चार्या चाशोकया सह ॥९८॥
युधिष्ठिराय ताः सर्वाः पूर्वमेव निवेदिताः । लब्ध्वा तस्यान्यथा वार्त्तामणुव्रतधराः स्थिताः ॥९९॥
इभ्योऽपि प्रियमित्राख्यस्तत्र पुर्यां सपर्यया । अन्ववर्तत कौंतेया पुरुषांतरविद्धनी ॥१००॥
सोमिनी मामिनी तस्य कन्या नयनसुंदरी । सौंदर्येण स्वरूपेण नयनानंददायिनी ॥१०१॥
युधिष्ठिराय वीराय प्रागेव प्रतिपादिता । राजपुत्र्यो यथा पूर्वास्तथा सा तद्व्रता स्थिताः ॥१०२॥
राजा सभार्य इभ्यश्च महापुरुषवेदिनौ । कुंतीपुत्राय ताः कन्या ज्यायसे दातुमिच्छतः ॥१०३॥
तास्तु निश्चितचित्तत्वादन्यलोकगतोऽपि हि । स एव पतिरस्माकमिति नेच्छंति तं द्विजं ॥१०४॥
ततोऽपि नगराद्याता नगराजस्थितात्मकाः । प्राप्ताश्चंपापुरीं तेऽमी कर्णो यत्र महानृपः ॥१०५॥
तत्र भीमो महानागं पुरमध्ये महोत्कटं । प्रक्रीड्य निर्मदी चक्रे वर्णसंक्षोभकृत्कृती ॥१०६॥
ततोऽपि वैदिशं जाता पुरं सुरपुरोपमं । राजा वृषध्वजो यत्र युवराजो दृढायुधः ॥१०७॥

दिशावलीप्रिया राज्ञो दिशानंदा तु नंदना । दिशासु विदिताकारा दिशामिव विशुद्धता ॥१०८॥
भीमो राजगृहे राज्ञा गंभीरस्वरदर्शनः । अदृश्यत दशा कांता भिक्षार्थी किल रूपवान् ॥१०९॥
ज्ञात्वा महानरं तं च कन्यामादाय तां नृपः । सांतःपुरः पुरःस्थित्वा जगाद मधुरं वचः ॥११०॥
तवानुरूपकन्येयं दीयते प्रतिपद्यतां । भिक्षां प्रसारय श्रीमान् पाणिं पाणिगृहं प्रति ॥१११॥
अपूर्वेयमहो भिक्षा नेदृशीं प्रति सांप्रतं । स्वातंत्र्यमिति संभाष्य गत्वा तेभ्यो न्यवेदयत् ॥११२॥
सार्धं मासमिह स्थित्वा पुरे जग्मुरमी ततः । तरीत्य नर्मदां नर्मप्रवणां विंध्यमाविशत् ॥११३॥
संध्याकारेंतरद्वीपे संध्याकारे पुरे नृपः । हिडंबवंशसंभूतः सिंहघोषोवतिष्ठते ॥११४॥
देवी सुदर्शना तस्य सुता हृदयसुंदरी । मेघवेगः त्रिकूटेंद्रो याचित्वा तां न लब्धवान् ॥११५॥
यो हनिष्यति तं विंध्ये गदाविद्याप्रसाधकं । भर्त्ता हृदयसुंदर्या इति नैमित्तिकागमः ॥११६॥
द्रुमकोटरमध्यास्य साधयंतं खगं गदां । तयैव गदया सोंऽगं भीमोऽपाटयदेकदा ॥११७॥
ततो हिडंबसुंदर्या भीमसेनस्य संगमः । हिडिंबेन च संबंधः संबभूव महोत्सवः ॥११८॥
विहृत्य विविधान्देशान्दाक्षिणात्यान्महोदयाः । ते हास्तिनपुरं गंतुं प्रवृत्ताः पांडुनंदनाः ॥११९॥
प्राप्ता मार्गवशाद्विश्वे माकंदीं नगरीं दिवः । प्रतिच्छंदस्थितिं दिव्यां दधाना देवविभ्रमाः ॥१२०॥

द्रुपदोऽस्यास्तदा भूपस्तस्य भोगवती प्रिया। धृष्टद्युम्नादयः पुत्रा प्रत्येकं दृष्टशक्तयः ॥१२१॥
रूपलावण्यसौभाग्यकलालंकृतविग्रहा। द्रौपदी तनया तस्य द्रुपदस्योपमोज्झिता ॥१२२॥
तस्या कृते कृता सर्वे मनोवेगैर्नृपात्मजाः। सग्रहा इव याचंते नानोपायनपाणयः ॥१२३॥
दाक्षिण्यभंगभीतेन द्रुपदेन ततो नृपाः। विश्वे चंद्रकवेधार्थमाहूताः कन्यकार्थिनः ॥१२४॥
द्रौपदीग्रहवश्यानां काश्यप्यामिह भूभृतां। कर्णदुर्योधनादीनां माकंद्यां निवहोऽभवत् ॥१२५॥
सुरेंद्रवर्धनः खेंद्रः स्वसुतावरमार्गणैः। धनुर्गांडीवमादेशाद्दिव्यं तत्र तदाऽकरोत् ॥१२६॥
चंडगांडीवकोदंडमंडलीकरणक्षमः। राधावेधसमर्थो यो द्रौपद्याः स भवेत्पतिः ॥१२७॥
इतीमां घोषणां श्रुत्वा द्रोणकर्णादयो नृपाः। समेत्य मंडलीभूय कोदंडमभितः स्थिताः ॥१२८॥
देवताधिष्ठितायास्तैश्चापयष्टेः प्रदर्शनं। आसीत्सत्या इवाशक्यस्पर्शनाकर्षणे कुतः ॥१२९॥
भाविना स्वामिना पश्चादर्जुनेन सदर्जुना। दृष्टा स्पृष्टा तदाकृष्टा स सतीव वशं स्थिता ॥१३०॥
आरोप्याकृष्य पार्थेन धनुर्ज्यास्फालिता क्षितिः। भ्रांतं वधिरितं कर्णैः कर्णादीनां पटुध्वनौ ॥१३१॥
वितर्कः कर्कशं दृष्ट्वा तं तेषामित्यभूदयं। सहजैः सहजैश्वर्यो मृत्वोत्पन्नः किमर्जुनः ॥१३२॥
धन्विनः स्थानमन्यस्य सामान्यस्येदृशं कुतः। अहो दृष्टिरहो मुष्टिरहो सौष्ठवमित्यपि ॥१३३॥

भ्रमच्चक्रसमारूढो वाणं संधृत्य दक्षिणः । लक्ष्यं चंद्रकवेधाख्यं विव्याध नृपसन्निधौ ॥१३४॥
द्रौपदी च द्रुतं मालां कंधरेऽभ्येत्य वंधुरे । अकरोत्करपद्माभ्यामर्जुनस्य वरेच्छया ॥१३५॥
विप्रकीर्णा तदा माला सहसा सहवर्तिनां । पंचानामपि गात्रेषु चपलेन नभस्वता ॥१३६॥
ततश्चपललोकस्य तत्त्वमूढस्य कस्यचित् । वाचोदितोरुरित्युच्चैर्वृताः पंचानयेत्यपि ॥१३७॥
सद्वंधस्य सुवृक्षस्य तुंगस्य फलितस्य सा । पुष्पितेव लताभासीदर्जुनस्यांगमाश्रिता ॥१३८॥
ततः कुंत्याः समीपं सा धीरगा जीवबंधना । अग्रतः पश्यतां राज्ञां नीता नीतिविदां विदा ॥१३९॥
सन्नद्य ते नृपाः केचिदनुयाता युयुत्सवः । निषिद्धा अपि यत्नेन द्रुपदेन नयैषिणा ॥१४०॥
अर्जुनेन च भीमेन धृष्टद्युम्नेन च त्रिभिः । धन्विभिर्दूरतो रुद्धा नाभितः पदमप्यदुः ॥१४१॥
धृष्टद्युम्नरथस्थेन स्वनामांकः किरीटिना । द्रौणस्यांके शरः क्षिप्तः सर्वसंबंधवाचकः ॥१४२॥
द्रोणाश्वत्थामवीराभ्यां भीष्मेण विदुरेण च । वाचितः सर्वसंबंधः प्रमदं प्रपदौ परं ॥१४३॥
द्रुपदस्य सगोत्रस्य द्रौणादीनां च सौख्यतां । शंखवादित्रनिर्घोषाज्जाता पांडवसंगमे ॥१४४॥
जातवांधवसंबंधे परमानंददायिनि । संवृत्या नंदिताः पंच तेऽमी दुर्योधनादिभिः ॥१४५॥
द्रौपदी दीपिकेवासौ स्नेहसंभारपूरिता । पाणिग्रहणयोगेन दिदीपेऽर्जुनधारिता ॥१४६॥

विवाहमंगलं दृष्ट्वा द्रौपद्यर्जुनयोर्नृपाः। आयाताः पांडवैर्युक्ता स्थानं दुर्योधनोऽप्यगात् ॥१४७॥
अर्धराज्यविभागेन ते हास्तिनपुरे पुनः। तस्थुर्दुर्योधनाद्याश्च पांडवाश्च यथायथं ॥१४८॥
आनाय्यानाय्यवृत्तोसौ ज्येष्ठकन्याः पुरातनीः। विवाह्य सुखिताश्चक्रे भीमसेनो निजोचिताः॥१४९॥
स्नुषाबुद्धिरभूत्तस्यां ज्येष्ठयोरर्जुनस्त्रियां। द्रौपद्यां यमलस्यापि मातरीवानुवर्तनं ॥१५०॥
तस्याः श्वसुरबुद्धिस्तु पांडाविव तयोरभूत्। अर्जुनप्रेमसंरुद्धमौचित्यं देवरद्वये ॥१५१॥
अत्यंतशुद्धवृत्तेषु योऽभ्याख्यानपरायणाः। तेषां तत्प्रभवं पापं को निवारयितुं क्षमः ॥१५२॥
सद्भूतस्यापि दोषस्य परकीयस्य भाषणं। पापहेतुरमोघः स्यादसद्भूतस्य किं पुनः ॥१५३॥
प्राकृतानामपि प्रीत्या समानधनता धने। न स्त्रीचरित्रलोकेषु प्रसिद्धानां किमुच्यते ॥१५४॥
महापुरुषकोटीस्थकूटदोषाविभाषिणां। असतां कथमायाति न जिह्वा शतखंडतां ॥१५५॥
वक्ता श्रोता च पापस्य यस्मात्र फलमश्नुते। तदमोघममुत्रास्य वृद्ध्यर्थमिति बुद्ध्यतां ॥१५६॥
वक्तुः श्रोतुश्च सद्बुध्या यथा पुण्यमयी श्रुतिः। श्रेयसे विपरीताय तथा पापमयी श्रुतिः ॥१५७॥

त्यजत वाचमसत्यमलोद्धतां भजत सत्यवचो निरवद्यतां।
निजयशो विशदाशगुणोद्यतां विजयिनीं त्विह विश्वविदोद्यतां ॥ १५८ ॥

सुभृतमाचरणं शरणं भवेदसुभृतां विपदीह पराभवे ।
सुचरितस्य फलं नयपौरुषं परिभवत्यहितस्य हितां रुषं ॥ १५९ ॥
शिखिशिखावलिघर्मघनागमः परनिराकरणैकजिनागमः ।
विविधलाभनिधिः ध्रियतां जनैर्व्रतविधिः श्रुतवर्तिकृतांजनैः ॥ १६० ॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ
कुरुवंशोत्पत्तिपांडवधार्तराष्ट्राणां च पार्थद्रौपदीलाभवर्णनो नाम पंचचत्वारिंशः सर्गः ।

षट्चत्वारिंशः सर्गः ।

अथ मानितबंधूनां पांडवानां गजाह्वये । नगरे नगधीराणां काले गच्छति भोगिनां ॥१॥
प्रत्यहं परमा भूत्या वर्धमानानमूनमी । पंचापि शतमालोक्य पूर्ववज्वलिता स्थितेः ॥२॥
तं शकुन्युपदेशेन सद्यो द्यूते विजित्य सः । पंचज्येष्ठं शतज्येष्ठः सानुजं सानुजोऽगदीत् ॥३॥
गंतव्यं यत्र ते नाम श्रूयते न युधिष्ठिर । स्थातव्यं सत्यसंधेन त्वया प्रच्छन्नवैरिणा ॥४॥
इत्युक्तं प्रतिपाद्यासौ शमितभ्रातृमंडलः । निरैत्परिच्छदं त्यक्त्वा द्वादशाब्दधृतावधिः ॥५॥

अनुजातार्जुनं प्रेम्णा प्रमदेन च पूरिता । द्रौपदींदुमिव ज्योत्स्ना कृतकृष्णानिजास्थितिः ॥६॥
ततस्ते धैर्यसंपन्नाः सुवीर्या नरकुंजराः । क्रमेण सहिताः प्राप्ता रम्यां कालांजलाटवीं ॥७॥
प्रकीर्णकासुरीसूनुः सुतारस्तत्र खेचरः । असुरोद्गीतनगरादागत्य रमते तदा ॥८॥
कांतया कुसुमावल्या रममाणं वनांतरे । किरातवेषिणं कांतं युक्तं शावरविद्यया ॥९॥
किरातवेषभृत्पत्न्या सह क्रीडन् यदृच्छया । ददर्श खेचरं चापी चापिनं स धनंजयः ॥१०॥
अकस्माच्च तयोर्जाते दर्शने सहसानयोः । बभूव विषमं युद्धं दिव्येषुच्छन्नदिङ्मुखं ॥११॥
भुजयुद्धे ततो लग्न भुजेन दृढमुष्टिना । जघानोरसि तं पार्थः खचरं बलिनं बली ॥१२॥
पतिभिक्षां ययाचेऽसावर्जुनं कुसुमावली । मुक्तः स तं प्रणम्यागाद्रौप्याद्रेर्दक्षिणां क्षितिं ॥१३॥
गताः क्रमेण ते धीराः पुरं मेघदलाभिधं । सिंहो नरेश्वरो यत्र कांता कनकमेखला ॥१४॥
तनया कनकावर्ता तयोरत्यंतसुंदरी । मेघेभ्यालकयोश्चारुलक्ष्मीकांता शरीरजा ॥१५॥
ते चादेशवशात्कन्ये भीमो भीमं सवेषभृत् । भिक्षार्थमागतो लेभे पुण्यस्य किमु दुष्करं ॥१६॥
विश्रम्य तत्र ते सौम्या दिनानि कतिचित्सुखं । याताः क्रमेण पुन्नागा विषयं कौशलाभिधं ॥१७॥
स्थित्वा तत्रापि सौख्येन मासान्कतिपयानपि । प्राप्ता रामगिरिं प्राग यो रामलक्ष्मणसेवितः॥१८॥

चैत्यालया जिनेंद्राणां यत्र चंद्रार्कभासुराः। कारिता रामदेवेन संभाति शतशो गिरौ ॥१९॥
नानादेशागतैर्भव्यैर्वंद्यंते या दिने दिने। वंदितास्ता जिनेंद्राणां प्रतिमाः पांडुनंदनैः ॥२०॥
चित्रं चिक्रीड तत्राद्रौ द्रौपद्या सहितोर्जुनः। लतागृहेषु रम्येषु सीतयेव रघूत्तमः ॥२१॥
अविज्ञातसुखच्छेदा स्वेच्छया विहृतिं श्रिताः। निन्युरेकादशाब्दानि धन्यास्ते मान्यचेष्टिताः॥२२॥
अतः परं पुनः प्राप्ता विराटपुटभेदनं। विराटो यत्र राजासौ भार्या यस्य सुदर्शना ॥२३॥
अव्यक्ताः पांडवास्तत्र द्रौपदी च विचक्षणा। विराटनगरे तस्थुर्विराटस्यातिपूजिताः ॥२४॥
यथायथं विनोदेन तत्र संवसतां सतां। प्रयाति सुखिनां काले प्रमादरहितात्मनां ॥२५॥
चूलिका नगरी राजा चूलिकस्तस्य कामिनी। विकचा विकचाब्जास्या शतपुत्रपवित्रिता ॥२६॥
कीचकः प्रथमस्तेषां प्रथमश्चंडकर्मणां। रूपयौवनविज्ञानं शौर्यद्रव्यमदाविलः ॥२७॥
विराटनगरं जातु स्वसारं ससुदर्शनां। आगतो द्रष्टुमत्रैतां दृष्टवान् द्रौपदीं सतीं ॥२८॥
गंधयुक्तिविशेषेण सुगंधीकृतदिङ्मुखां। रूपलावण्यसौभाग्यगुणपूरितविग्रहां ॥२९॥
तस्यां दर्शनमात्रेण मानिनोऽपि मनो गतं। दैन्यमन्यत्र यातस्य तस्य तन्मयतां गतं ॥३०॥
अनेकोपाययोगैस्तामुपलोभयतामुना। स्वतोऽपि परतोप्यस्या नालाभि हृदये स्थितिः ॥३१॥

प्रत्याख्यातस्य धृष्टस्य तृणीभूतस्य तस्य सा । निवेद्यं भीमसेनाय शैलंध्री तं न्यवेदयत् ॥३२॥
ततः कुपितचित्तोऽसौ शैलंध्रीवेषभृद्बली । प्रदोषे कृतसंकेतमेकांते मदनातुरं ॥३३॥
वारिबंधमिवायातं स्पर्शांधं गंधवारणं । कंठे जग्राह बाहुभ्यां स्पर्शामीलितलोचनां ॥३४॥
भूमौ निपात्य पादाभ्यामुरस्याक्रम्य कामिनं । पिपेष मुष्टिनिर्घातैर्निर्घातैरिव भूधरं ॥३५॥
तथा तस्य तदा श्रद्धां प्रपूर्य परयोषिति । अमुचद् व्रज पापेति दयमानो महामनाः ॥३६॥
महावैराग्यसंपन्नस्ततो विषयहेतुकं । प्राव्रजत्कीचकः श्रित्वा मुनींद्ररतिवर्धनं ॥३७॥
अनुप्रेक्षाभिरात्मानं भावयन् भावशुद्धितः । रत्नत्रयमसौ शुद्धं श्रुतवान् कर्तुमुद्यतः ॥३८॥
कीचकं शतसंख्यास्ते भ्रातरो भ्रांतचेतसः । अदृष्ट्वा कुपिता दृष्टाश्रितकाग्निमचिन्वत ॥३९॥
तत्र विक्षिप्सवः पापाः शैलंध्रीं बलशालिनः । क्षिप्तास्ते तत्र भीमेन भस्मसाद्भावमागताः ॥४०॥
एकेनैवाहवं नीतास्ते भीमेन मदोद्धताः । बहवोऽपि हि हिंस्यंते सिंहेनैकेन दंतिनः ॥४१॥
अथासौ कीचकः साधुरेकांतोद्यानमध्यगः । पर्यंकासनयोगस्थो यक्षेणैक्षि कदाचन ॥४२॥
तस्य चित्तपरीक्षार्थं द्रौपदीवेषमाश्रितः । निशीथेऽदर्शयद्रूपमात्मनो मदनालसं ॥४३॥
साधुना बधिरेणैव रम्यालापश्रुतौ स्थितं । रूपं दृष्टिविलासाभ्यामंधेनैव मनोहरं ॥४४॥

गुप्तेंद्रियकलापस्य मनःशुद्धिमुपेयुषः । साधोस्तस्य समुत्पन्नमवधिज्ञानलोचनं ॥४५॥
उपसंहृतयोगं तं प्रणम्यासौ सुरस्ततः । मुनिमक्षमयन्नाथ क्षमस्वेति पुनः पुनः ॥४६॥
पुनः प्रणम्य पप्रच्छ द्रौपदीमोहकारणं । कारणेन विना न स्यात्तादृग्मोहसमुद्भवः ॥४७॥
कतिचित्पूर्वजन्मानि द्रौपद्याः स्वस्य चेत्यसौ । कीचकाख्योवदद्योगी यक्षाय प्रणतात्मने ॥४८॥
तरंगिणीसरित्तीरे वेगवत्याश्च संगमे । म्लेच्छोहमभवद्रौद्रः क्षुद्रः क्षुद्रासुमद्रिपुः ॥४९॥
साधुदर्शनतः शांतः प्रापमार्यमनुष्यतां । धनदेवः पिता चात्र माता मे सुकुमारिका ॥५०॥
कुमारदेवसंज्ञोहं मात्रा च मम सुव्रतः । मारितः साधुराहारं दत्वा विषविमिश्रितं ॥५१॥
प्रविश्य नरकं पापा दुःखं साधुवधोद्भवं । अनुभूय पुनस्तिर्यग्नारकेष्वटतिस्म सा ॥५२॥
अव्रतोहमपि भ्रांत्वा संसारं तीव्रवेदनं । मातरिश्वतया वृत्तो नुन्नोहोमातरिश्वभिः ॥५३॥
सितेन तापसेनांते जनितो मधुसंज्ञकः । तापस्यां मृगशृंगिण्यां प्रवृद्धस्तापसाश्रमे ॥५४॥
मुनेर्विनयदत्तस्य दानमाहात्म्यदर्शनात् । प्रव्रज्य स्वर्गमारुह्य जातोहं कीचकश्च्युतः ॥५५॥
चिरं पर्यट्य संसारसुदुःखं सुकुमारिका । मानुषी दुर्भगी भूता भूताभूतासुखावहा ॥५६॥
सा चानुमतिका नाम्ना सनिदानतपोयुता । जातेयं द्रौपदी तेन मोहोऽस्यां मे महानभूत् ॥५७॥

माता स्वसा च तनुजा प्रियकामिनीत्वं मातृस्वसृत्वदुहितृत्वमुपैति पत्नी।
संसारचक्रपरिवर्तिनि जीवलोके ही संकरव्यतिकरौ नियतौ भवेतां॥ ५८॥
वैचित्र्यमेतदवगम्य भवस्य भव्या वैराग्यमेत्य सुखतो महतोप्यमुष्य।
संसारकारणनिवृत्तधियः सुवृत्ता मोक्षार्थमेव महता तपसा यतंतां॥ ५९॥
इत्यादि तस्य वचनं मुनिकीचकस्य श्रुत्वा सुरः सुरवधूभिरमा तदानीं।
सम्यक्त्वरत्नवरभूषणभूषितात्मा नत्वा गुरुं धृतियुतोंतरधाद्वनांते॥ ६०॥
संपूज्यमानचरणो नृसुरासुरौघैः कृत्वा तपो द्विविधमंतरमूढधीर्यः।
लोके प्रकाश्य जिनमार्गमरर्गलं सं-प्राप्तं परं पदमनत्ययमात्मशुद्ध्या॥ ६१॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कीचकनिर्वाणगमनो नाम षट्चत्वारिंशः सर्गः।

सप्तचत्वारिंशः सर्गः।

कीचकानुजवृत्तांते गोग्रहे तदनंतरे। वृत्ते भीमार्जुनोग्राग्निभस्मितारिवनांतरे॥१॥
अभिन्ननिजमर्यादाः भिन्नदुःशासनांतराः। पांडवाः पांडुभवने संहृता सुघना इव॥२॥

संपूर्णावधयो गत्वा धर्मराजस्य ते युधि। सह दुर्योधनेनास्थुः सम्मता मुनयो यथा ॥३॥
ततः पूरितसर्वाशाः सर्वार्थामृतवर्षिणः। तेप्यनुष्पदमत्युच्चैः प्रावृषेण्या इवांबुदाः ॥४॥
तत्प्रासाग्रापि चुक्षोभ गांधारीय-शतं पुनः। नेयस्य जलवर्ग्यस्य सुप्रसादः क्रियच्चिरं ॥५॥
कृते दायादवर्गेण पूर्ववत्संधिदूषणे। प्रशमय्य तनून्भ्रातॄन् प्रागिवासौ युधिष्ठिरः ॥६॥
अनिच्छन् स्वच्छधीर्धीरः कृपावान् कौरवाहितं। मात्रा भ्रात्रादिभिर्भूयः श्रितवान् दक्षिणां दिशं॥७॥
स विंध्यवनमध्यास्य तपस्यंतं निजाश्रमे। दृष्ट्वा विदुरमानम्य शशंस सानुजैः सह ॥८॥
कृतार्थं पूज्य ते जन्म संपरित्यज्य संपदः। स्थितोऽभियो जिनेंद्रोक्ते मोक्षमार्गे महातपाः॥९॥
विशुद्धं दर्शनं यत्र तत्त्वश्रद्धानलक्षणं। ज्ञानं सर्वार्थविद्योति चारित्रमनवद्यकं ॥१०॥
व्रतगुप्तिसमित्यक्षकषायजयसंयमाः। यत्र मार्गे स्थितास्तत्र सिध्यंति त्वादृशोऽचिरात् ॥११॥
इति मार्गस्तुतिं कृत्वा तं च स्तुत्वा कृताननतिः। द्वारिकां ज्ञातिभिर्ज्ञातः संविवेश सहानुजैः॥१२॥
उत्सवः परमो जातः स्वसृस्वस्रीयसंगमे। समुद्रविजयादीनां दशानां चिरदर्शिनां ॥१३॥
नेमीशहरिरामादिदशार्हसुतसुंदराः। अंतःपुराणि सर्वाणि प्रजाश्च तुतुषुस्तदा ॥१४॥
यथाक्रममशेषाणां दर्शने दर्शनोत्सवे। जाते परस्परं तेषां स्वजनानां सुखावहे ॥१५॥

यदुपांडववर्गौ तौ मेनाते मिलितौ मुदा । अपकारमपि त्यक्त्वा ह्युपकारं परैः कृतं ॥१६॥
ततः प्रासादवर्येषु पंच पंचसु विष्णुना । निरूपितेषु ते तस्थुः सर्वभोगप्रदायिषु ॥१७॥
ज्येष्ठो लक्ष्मीमतीं लेभे भीमः शेषवतीं ततः । सुभद्रामर्जुनः कन्यां कनिष्ठौ विजयां रतिं ॥१८॥
दशार्हतनयास्तास्ते परिणीय यथाक्रमं । रेमिरेऽमूमिरिष्टाभिः पांडवास्त्रिदशोपमाः ॥१९॥
कथेयं कुरुवीरस्य कथिता ते समासतः । प्रद्युम्नस्याधुना वच्मि श्रृणु श्रेणिक चेष्टितं ॥२०॥
विजयार्धगिरौ रम्ये प्रद्युम्नोऽसौ कलागुणैः । विधुवद्बंधुमुद्वार्धिं सहावर्धत वर्धयन् ॥२१॥
विद्याधरोचिता विद्या स विद्याधरपुत्रकः । वियद्यानादिका बाल्ये जग्राहाशु महोद्यमः ॥२२॥
बाल्यादारभ्य लावण्यरूपसौभाग्यपौरुषैः । सोऽरिमित्रनरस्त्रीणामस्त्रीभूतैर्मनोऽहरत् ॥२३॥
यौवनं स परिप्राप्तः प्राप्तसर्वास्त्रकौशलः । हृदयेषु युवा यूनां प्रहरन्नपि वल्लभः ॥२४॥
मन्मथो मदनः कामः कामदेवो मनोभवः । इत्यन्वर्थाभिधानः स नानंगो नंगनामकः ॥२५॥
युद्धे सिंहरथं जित्वा जितपंचशतात्मजं । कालसंवरभूपाय सकामोऽदर्शयत्कृती ॥२६॥
तादृशं तनयं दृष्ट्वा संतुष्टः कालसंवरः । मेने श्रेणीद्वयं द्रुतं वशीकृतमिवात्मनां ॥२७॥
महाराज्यपदोदारफलपुष्पं नृपोऽस्य सः । यौवराजमहापट्टं बबंध च विधानतः ॥२८॥

शतानि तनयाः पंच कालसंवरभूभृतः । चिंतयंति ततोपायं मदनस्य समंततः ॥२९॥
आशने शयने वस्त्रे तांबूलेऽशनपानके । नालं छलयितु ते तं छलान्वेषणतत्पराः ॥३०॥
अन्यदा तु विनीतोसौ नीतो नीत्यानुकूलकैः । कुमारस्तैः कुमारौघैः सिद्धायतनगोपुरं ॥३१॥
नोदितस्तैः समारूढो गोपुराग्रं सवेगवान् । विद्याकोशं तिरीटं च लेभे तद्वासिनोऽमरात् ॥३२॥
प्रविष्टश्च पुनर्वेगान्महाकालगुहामसौ । खड्गं सखेटकं लेभे छत्रचामरसंयुतं ॥३३॥
लेभे नागगुहायां च पादपीठं सुराद्वरं । नागशय्यासनं वीणां विद्यां प्रासादकारिणीं ॥३४॥
मकरध्वजमुत्तुंगं वाप्यां युद्धे जितात्सुरात् । अग्निकुंडेऽग्निसंशोध्यं वस्त्रयुग्ममवाप्य सः ॥३५॥
मेषाकृतिगिरौ लेभे कर्णकुंडलयोर्द्वयं । मौलिं चामृतमालां च पांडुके मर्कटामरात् ॥३६॥
विद्या करिवनं प्राप कवित्थवनदेवतः । वल्मीके क्षुरिकां चापि कवचं मुद्रिकादिकं ॥३७॥
शरावपर्वते लेभे कटिसूत्रमुरच्छदं । कामः कटककेयूरकंठिकाभरणं शुभं ॥३८॥
शूकरासुरतः शंखं दिव्यं प्राप शरासनं । हारं सुरेंद्रजालं च मनोवेगाद्विकीलितात् ॥३९॥
मनोवेगरिपोर्लेभे वसंतखचराचतः । कन्यां नरेंद्रजालं च तयोः सख्यस्य कारकः ॥४०॥
चापं च कौसुमं प्रापदर्जुनो भवनाधिपात् । उन्मादमोहसंतापमदशोककरान् शरान् ॥४१॥

अन्यां नागगुहां यातश्चंदनागुरुमालिकाः। पौष्पं छत्रं च शयनं लेभे तत्र तु पार्थिवात् ॥४२॥
स दुर्जयवने लेभे जयंतगिरिवर्तिनि। खेटवायुसरस्वत्यो रतिं कामः शरीरजां ॥४३॥
षोडशेष्वपि चैतेषु लाभस्थानेषु मन्मथं। लब्धानेकमहालाभं दृष्ट्वा विस्मितमानसाः ॥४४॥
ज्ञात्वा पुण्यस्य माहात्म्यं कुमाराः संवरादयः। संशित्वा मदनेनामा निजं नगरमाययुः ॥४५॥
लब्धं दिव्यं रथं शुभ्रैर्वृषैर्व्यूढमधिष्ठितः। चापी पंचशरी छत्री ध्वजी दिव्यविभूषणी ॥४६॥
मनो हरन्नरस्त्रीणां मदनो मदनेषुभिः। मेघकूटं प्रविष्टोऽसौ कुमारशतवेष्टितः ॥४७॥
सप्रणामस्ततो दृष्ट्वा प्रद्युम्नः कृष्णसंवरं। धिष्ण्यं कनकमालायाः प्रस्थितः स रथे स्थितः ॥४८॥
तथा च स्थितनेपथ्यं नेत्रपथ्यं न दूरतः। दृष्ट्वा कनकमाला तं भावं कमपि संश्रिता ॥ ४९ ॥
रथादुत्तीर्य विनतं संशित्वा घ्राय मस्तके। आसयित्वांतिके तं सा स्पर्शयन् मृदुपणिना ॥५०॥
गाढमोहोदयात्तस्यास्ततः परवशात्मनः। कर्षतो हृदयक्षोणीं प्रवृत्ता दुर्मनोरथाः ॥ ५१ ॥
स्वांगैरस्यागसंगं या लभेत शयने सकृत्। कामिनी भुवने सैका शेषास्त्वाकृतिमात्रकं ॥५२॥
रूपलावण्यसौभाग्यवैदग्ध्यं गुणगोचरं। कामा श्लेषस्य सौलभ्ये दौर्लभ्ये स्यात्तृणं तु मे ॥ ५३ ॥
इतिप्रवृत्तसंकल्पामसंभावितत्तन्मनाः। तां प्रणम्य सलब्धाशीः प्रद्युम्नः स्वगृहं गतः ॥ ५४ ॥

इतिप्रबलदुःखेयं खेचरी निखिलाः क्रियाः। विसस्मार स्मराश्लेषसुखलाभः मनोरथा ॥ ५५॥
अस्वस्थामपरेद्युस्तां प्रद्युम्नो द्रष्टुमागतः। अद्राक्षीद्विशिनीपत्रपर्यस्ततनुमाकुलां ॥ ५६ ॥
पृच्छतिस्म स तां कामः शरीरास्वास्थ्यकारणं। इंगितैरांगितैः सोऽपि वाचिक्यैश्च व्यबोधयत्॥५७॥
वैपरीत्यं ततो ज्ञात्वा निंदित्वा कर्मचेष्टितं। स मात्रपत्यसंबंधप्रत्यायनपरोऽभवत् ॥ ५८ ॥
सापि तस्मै यथावृत्तमादिमध्यावसानतः। अटवीलाभसंवृद्धिविद्यालाभानवेदयत् ॥ ५९ ॥
स्वसंबंधं ततः श्रुत्वा संदिग्धार्थमतिर्गतः। दृष्ट्वा सागरचंद्राख्यं मुनिं चैत्यगृहे मुदा॥ ६०॥
नत्वा पृष्ट्वा ततो ज्ञात्वा सर्वान्पूर्वभवान्निजान्। तथा कनकमालायाश्चंद्राभायाः पुरे भवे ॥६१॥
सम्यग्दर्शनसंशुद्धो ज्ञातप्रज्ञप्तिलाभकः। गत्वा शीलधनोऽप्राक्षीन्मदनो मदनातुरं ॥ ६२ ॥
दृष्ट्वा हृष्टा जगौ तं सा शृणु काम भणामि ते। गौरीं प्रज्ञप्तिविद्यां च त्वं गृहाण यदीच्छसि ॥६३॥
ततः प्रसाद इच्छामि दीयतामितिवादिने। ददौ विधियुते विद्ये विद्याधरदुरासदे ॥ ६४ ॥
प्रसारितकरो विद्ये गृहीत्वा प्रमदी स तां। प्राणविद्याप्रदानान्मे गुरुस्त्वमिति सद्वचाः॥६५॥
त्रिःपरीत्य प्रणम्याग्रे स्थितः सुकरशेखरः। अपत्योचितमादेशं याचित्वा स्वोचितं ययौ॥६६॥
छद्मिताहमिति ज्ञात्वा सातिकोपवशात्ततः। कक्षवक्षःकचोद्देशान् नखक्षतभृतोऽकरोत् ॥६७॥

साऽदर्शयच्च पत्येऽङ्गं नाथ प्रद्युम्नचेष्टितं। पश्येत्यपत्यसंभारं प्रत्योतिस्म स चापि तत् ॥ ६८ ॥
आहूय रहसि क्रुद्धः पुत्रपंचशतानि सः। आदिदेशान्यदुर्बोधं प्रद्युम्नो मार्यतामिति ॥ ६९ ॥
लब्धादेशास्ततस्तुष्टास्ते तमादाय सादराः। अन्येद्युरगमन्पापा वापीं कालांबुनायिकां ॥७०॥
निपत्य युगपत्सर्वे तस्योपरि जिघित्सवः। प्राचूचुदन् जलक्रीडां वाप्यां कुर्म इति द्विषः ॥७१॥
कर्णो कथितमेतस्य ततः प्रज्ञप्तिविद्यया। यथातथ्यमिति क्रोधादंतर्हिततनुः क्षणात् ॥ ७२ ॥
पपात मायया वाप्यां निर्घाता इव निर्घृणाः। तेऽपि सर्वे समं पेतुरस्योपरि जिघांसवः ॥७३॥
ऊर्ध्वपादानधोवक्त्रानेकशेषानमूनसौ। स्तंभयित्वानुजं कृत्वा पंचचूडमजीगमत् ॥ ७४ ॥
पुत्रोदंतं ततः श्रुत्वा द्विगुणक्रोधदीपितः। सन्नह्य सर्वसैन्येन संप्राप्तः कालसंवरः ॥ ७५ ॥
विद्याविकृतसैन्येन प्रद्युम्नेन ततश्चिरं। युध्वाभग्नोऽति भग्नेच्छः स गत्वा कृष्णसंवरः ॥ ७६ ॥
ऊचे कनकमालां तां देहि प्रज्ञप्तिमित्यरं। स्तन्येन सह बाल्येऽस्मै मया दत्तेति सावदत् ॥७७॥
ज्ञातमायादुरीहोसौ पुनरागत्य मानवान्। युध्यमानोऽमुना बद्धो निहितो हि शिलातले ॥७८॥
तदानीमेव संप्राप्तो नारदोऽतिविशारदः। प्रद्युम्नेन कृताभ्यर्च्यः संबंधमखिलं जगौ ॥ ७९ ॥
कालसंवरमुन्मुच्य क्षमयित्वा ततोऽवदत्। पूर्वकर्मवशेच्छाया मातुर्मे क्षम्यतामिति ॥ ८० ॥

निरपायानुपायज्ञो मुक्त्वा पंचशतान्यपि। भ्रातृस्नेहपरः कामः क्षमयित्वा पुनः पुनः ॥८१॥
आपृष्टेन सतुष्टेन कालसंबरभूभृता। विसृष्टो रुक्मिणीकृष्णदर्शनोत्सुकमानसः॥ ८२ ॥
प्रणम्य पितरं स्नेहान्नारदेन सहांबरं। अथारूढो विमानेन द्वारिकागमनं प्रति ॥ ८३ ॥
संकथाभिर्विचित्राभिर्नभस्यागच्छतोस्तयोः। अतिक्रांतेभपुरयोः सैन्यं दृष्टिपथेऽभवत् ॥८४॥
कस्येदमटवीमध्ये पूज्य सैन्यमधो महत्। पश्चिमाशामुखं याति क किमर्थमतिद्रुतं ॥ ८५ ॥
संपृष्टः कामदेवेन नारदोप्यगदीदिति। श्रृणु कामकथालेशं कथयामि तवाधुना ॥ ८६ ॥
अस्ति दुर्योधनो राजा कुरुवंशविभूषणः। दुर्योधनो द्विषां युद्धे स हास्तिनपुरे वरे ॥ ८७ ॥
अग्रजाय मया देया रुक्मिणी सत्यभामयोः। दुहितेति प्रतिज्ञातं पूर्वप्रीतेन तेन च ॥८८॥
अग्रजस्त्वं ततो जातो विष्णवे विनिवेदितः। भानुश्च सत्यभामायास्तदनंतरमांतरैः ॥८९॥
अकस्माद्गच्छता क्वापि हृतस्त्वं धूमकेतुना। विषण्णा रुक्मिणी जाता सत्यभामा तु तोषिणी ॥९०॥
अविज्ञातभवद्वार्तो दुर्योधनयशोधनः। कन्यकामुदधिं नाम्ना भानवे प्रहिणोदसौ ॥९१॥
भाविनीव ततः सेयं महासाधनरक्षिता। द्वारिकां प्रस्थिता कन्या भानवे किल भाविनी ॥९२॥
श्रुत्वा नारदमाकाशे स्थापयित्वा क्षणं ततः। सोवतीर्य पुरस्तस्थौ शावरं वेषमाश्रितः ॥९३॥

केशवेन वितीर्णे मे शुल्कं दत्वा तु गम्यतां । इत्युक्ते कैश्चिदित्युक्तं प्रार्थ्यतां प्रार्थितं तव ॥९४॥
यदत्र निखिले सैन्ये सारभूतमितीरिते । ईरितं सारभूतात्र कन्यकेति समन्युभिः ॥९५॥
यद्येवं दीयतां मह्यं सैवेत्युक्ते जगुः परे । विष्णुना जनितो न त्वं स प्राह जनितस्त्विति ॥९६॥
असंबद्धप्रलापस्य धृष्टतां पश्यतेति ते । धनुःकोटिभिरुत्सार्य प्रवृत्ता गंतुमुद्यताः ॥९७॥
ततः शाबरसेनाभिर्विद्यया विकृतात्मभिः । दुर्योधनबलं जित्वा कन्यामादाय खं श्रितः ॥९८॥
दिव्यरूपं तमालोक्य कन्या त्यक्तभया ततः । हृष्टा नारदवाक्येन बुद्धतत्त्वा समाश्वसीत् ॥९९॥
विमानं कामगं कामः समारुह्य समं तया । नारदेन च संप्राप्तो द्वारिकां द्वारहारिणीं ॥१००॥
अपश्यत्स विदूरेण सागरेण गरीयसा । प्राकारेण च तां गुप्तां गोपुराट्टालसंकुलां ॥१०१॥
बाह्यबाह्यालिकां भानुरश्वव्यायामहेतुना । निर्गतोऽदर्शि कामेन गगनस्थविमानिना ॥१०२॥
तुरगस्त्वरया दिव्यस्थविराकारधारिणा । नीतो भानुकुमारार्थमारुढस्तं स हारिणं ॥१०३॥
बाह्यमानेन तेनासौ कुमारः कामरूपिणा । खलीकृत्य चिरं नीतः स्थविरांतं निजेच्छया ॥१०४॥
अवतीर्णस्ततो भानुरहो कौशलमित्यलं । हसितः साट्टहासेन करास्फालनकारिणा ॥१०५॥
जरबारोप्यमाणस्तु भानुलोकेन तं चिरं । खलीकृत्य व्यलीकेन व्यालाश्वस्थः स्वयं ययौ ॥१०६॥

मायामर्कटमायाश्वैर्भामोपवनभंगकृत् । अशोषयन्महावापीं मायया मदनस्तदा ॥१०७॥
मक्षिकादंशमशकैः सकरस्पंदनं नृपं । निवर्त्य द्वारि चिक्रीड खरमेषरथी चिरं ॥१०८॥
व्यामोह्य पौरलोकं च विविधक्रीडया चिरं । वसुदेवेन संक्रीड्य मेषयुद्धेन संमदी ॥१०९॥
भोजने भ्रासने विप्रः सत्यायाः सोग्रजन्मनः । खलीकृत्याशनैर्लेभ्रैश्छर्दिकाहारकोऽगमत् ॥११०॥
विकृत्य क्षौल्लकं वेषं मातृमोदकभक्षिणा । नामादेशकरस्तेन नापितश्च तिरस्कृतः ॥१११॥
संकर्षणस्य हत्वेच्छां पादाकर्षणकारिणः । आरराम चिरं स्वेच्छं लोकविस्मयकृत्कृती ॥११२॥
प्रद्युम्नागमचिह्नानि पूर्वोक्तानि तदा परे । प्रस्नुतस्तनकुंभाया मातुरध्यक्षतां ययुः ॥११३॥
सातोऽचिंतयदत्यंतविस्मिता मे सुतोन्वयं । कृतरूपपरावृत्तिरागतः षोडशाब्दके ॥११४॥
तं प्रद्युम्नकुमारोपि तत्क्षणं प्रकृतिस्थितः । सुतस्तेहमितीरित्वा मातरं प्रणनाम सः ॥११५॥
सानंदसाकुलाक्षी तं रुक्मिणी तनयं नतं । परिष्वज्य जहौ दुःखमश्रुभिः सहसा चितं ॥११६॥
दर्शनामृतसिक्ताया पुलकव्यपदेशतः । प्रत्यंगरोमकूपेभ्यः सुतस्नेह इवोद्ययौ ॥११७॥
तयोः कुशलसंप्रश्ने संवृत्ते मातृपुत्रयोः । माता पुत्रमवोचत्तं चित्तनिर्वृत्तिदायिनं ॥११८॥
धन्या कनकमालासौ पुत्र ! पुत्रफलं यया । बालक्रीडावलोकाख्यमनुभूतं शिशोस्तव ॥११९॥

इत्युक्ते प्रणिपत्यासौ जगाद नयनोत्सवः । बालभावमहं मातर्दर्शयामीह दृश्यतां ॥१२०॥
ततः स तत्क्षणं जातस्तदहर्जातदारकः । आस्वादितकरांगुष्ठः प्रोत्फुल्लनयनोत्पलः ॥१२१॥
ततस्तनंधयो जातो गृहीतस्तनचूचुकः । तयोत्तानशयो मातुः करपल्लवसौख्यदः ॥१२२॥
संसर्पन्नुरसा जातस्तथोत्तिष्ठत्पतत्पुनः । मातुः करांगुलौ लग्नो मणिकुट्टिमसर्पिणः ॥१२३॥
पांशुक्रीडां विधायांबाकंठलग्नो व्यधात्सुखं । कलालापस्मिताह्लादिवदनो वदनेक्षणः ॥१२४॥
मनोहरशिशुक्रीडापूरितांबामनोरथः । स्वभावस्थितदेहस्थो नत्वा विज्ञाप्य तां सुतः ॥१२५॥
क्षिप्रमुत्क्षिप्य बाहुभ्यां नियति प्रकटस्थितः । जगाद श्रूयतां सर्वैरिह यादवपार्थिवैः ॥१२६॥
युष्माकं पश्यतामेव लक्ष्मीरिव हरेः प्रिया । ह्रियते रुक्मिणी देवी यादवाः परिरक्ष्यतां ॥१२७॥
इत्युक्त्वा शंखमापूर्य नारदोदधिकन्ययोः । विमाने स्थापयित्वा तां युद्धार्थं वियति स्थितः ॥१२८॥
विनिर्ययुस्ततः पुर्या योद्धुं सन्नह्य यादवाः । चतुरंगबलोपेताः पंचायुधविचक्षणाः ॥१२९॥
विद्याबलेन निश्शेषं कामो यादवसाधनं । मोहयित्वांबरस्थेन युयुधे हरिणा चिरं ॥१३०॥
अस्त्रकौशलवैफल्ये कृते कृष्णस्य सूनुना । प्रौढदृष्टी महादोर्भ्यां योद्धुं वीरौ समुच्छ्रितौ ॥१३१॥
विमुक्तनारदेनोभौ वियत्यागत्य वेगिना । वारितौ तौ पितापुत्रसंबंधविनिवेदिना ॥१३२॥

ततः प्रणतमाश्लिष्य प्रद्युम्नं प्रमदं हरिः। आनंदाश्रुपरीताक्षः समयोजयदाशिषा ॥१३३॥
मायया शायितं सैन्यं समुत्थाप्य सविद्यया। तुष्टो बांधवलोकेन मदनः प्राविशत्पुरीं ॥१३४॥
रुक्मिणीजांबवत्यौ ते जातपुत्रसमागमे। तदाचीकरतां तोषादुत्सवं वत्सवत्सले ॥१३५॥
मान्यो मान्याभिरन्यस्त्रीश्रीकरीभिरसौ ततः। मनोभूर्वरकन्याभिः कल्याणमभजत्परं ॥१३६॥
कनत्कनकमालया कनकमालया सेवया विवाहसमयाप्तया समभिदृष्टकल्याणकः।
विवाह्य विधिना वधूरुदधिपूर्विका मन्मथो जिनेंद्रवरशासनोर्जितसुखोदयः सोन्वभूत्।१३७।

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कुरुवंशप्रद्युम्नमातृपितृसमागमवर्णनो नाम सप्तचत्वारिंशः सर्गः।

अष्टचत्वारिंशः सर्गः

अथ शंबस्य संभूतिं सुभानोश्च यथाक्रमं। कथयामि यथावृत्तं शृणु श्रेणिक हारिणीं ॥ १ ॥
देवः कैटभपूर्वोसौ पूर्वमुक्तोऽच्युतोद्भवः। हरये हारिणं हारं ददौ भामासुतार्थिने ॥ २ ॥
प्रदोषसमये हारं तं प्रद्युम्नप्रयोगतः। सत्यारूपधरां भुक्त्वा लेभे जांबवती हरेः ॥ ३ ॥
कैटभश्च तदा च्युत्वा पुण्यादप्रच्युतोदयः। श्रितो जांबवतीगर्भं सागता च निजं गृहं ॥४॥

हरिं सत्यापि संप्राप्ता संप्राप्तमदनोदया । रमिता च दधे गर्भे सा स्वर्गच्युतमर्भकं ॥ ५ ॥
वर्धतेस्म ततो हर्षो गर्भयोर्वर्धमानयोः । पितृमातृस्वबंधूनां सिंधूनामिव चंद्रयोः ॥ ६ ॥
पूर्णेषु नवमासेषु शंबं जांबवती सुतं । सुषुवे सत्यभामापि सुभानुं भानुभास्वरं ॥ ७ ॥
हृष्टा प्रद्युम्नशंबाभ्यां रुक्मिणी जांबवत्यपि । भामा भानुसुभानुभ्यां श्रिताभ्यामुदयश्रियं ॥ ८ ॥
हरेरन्यास्वपि स्त्रीषु जाताः पुत्रा यथायथं । यदूनां हृदयानंदाः सत्यसत्वयशोऽधिकाः ॥ ९ ॥
शंबः क्रीडासु सर्वासु कुमारशतसेवितः । जित्वा सुभानुमाक्रम्य विक्रमी रमतेतरां ॥ १० ॥
रुक्मिणी रौक्मिणेयाय वैदर्भी रुक्मिणः सुतां । ययाचे न ददौ कन्यां सोऽपि पूर्वविरोधतः॥११॥
गत्वा मातंगवेषेण शंबप्रद्युम्नसंवरौ । बलादाहरतां कन्यां रुक्मिणं परिभूय तौ ॥ १२ ॥
परिणीय ततः कामः कन्यामन्यामिव श्रियं । अरीरमदरं भोगैर्द्वारिकायां मनोरमैः ॥ १३ ॥
दक्षो जित्वा सुभानुं तं द्यूते प्रेक्षणकेक्षणे । शंबो ददाति सर्वस्य लोकस्य सकलं धनं ॥ १४ ॥
क्रीडया स पुनार्जिग्ये पक्षिणोर्बहुजल्पिनोः । गंधयुक्तिप्रयोगेण पुनः सदसि शार्ङ्गिणः ॥ १५ ॥
अग्निशोध्येन दिव्येन सवस्त्रयुगलेन तं । दिव्यालंकारयोगेन जिगाय सदसि प्रभोः ॥ १६ ॥
बलदर्शनतो जित्वा तमसौ हृष्टविष्णुतः । मासं लब्ध्वा पुना राज्यं चक्रे दुर्ललिताः क्रियाः॥१७॥

ताडितः पुनरुद्वृत्तः पित्रा प्रणयकोपिना। युग्येन कन्यकारूपः सत्योत्संगमतोऽविशत् ॥ १८॥
सत्या सुतार्थमानीतां विवाह्य वरकन्यकाः। आविश्चकार रूपं स्वं शंबो लोकस्य पश्यतः ॥१९॥
एकस्यामेव रात्रौ तु कन्यकानां शतेन सः। कल्याणस्नातकं स्नात्वा मातृसौख्यकरोऽभवत् ॥२०॥
सत्यभामादिदेवीनां कुमाराः शतशस्तदा। विवाह्य बहुशः कन्याश्चिक्रीडुः शक्रकीर्तयः ॥२१॥
क्रीडापूर्वं गतो गेहमन्यदा मान्यमात्मनः। पितामहमिति प्राह शंबः प्रणतिपूर्वकं ॥२२॥
युष्माभिः सर्वकालेन क्लेशेन खचरांगनाः। पर्यटद्भिः क्षितौ लब्धाः पूज्य पूज्या मनोरमाः ॥२३॥
अक्लेशेनैकरात्रेण मया तु गृहवर्तिना। परिणीताः शतं कन्याः पश्यतांतरमावयोः ॥२४॥
वसुदेवस्ततः प्राह वत्स त्वमिषुवत्पुनः। क्षिप्तोऽपि गृहमध्येऽपि दूरमंतरमावयोः ॥२५॥
मया खेटपुरांभोधिमकरेण समं निजं। द्वारिकाकूपमंडूकः पंडितंमन्य मन्यसे ॥ २६ ॥
अनुभूतं श्रुतं दृष्टं यन्मयातिमनोहरं। विद्याधरपुरेष्वेतदन्येषामतिदुर्लभं ॥२७॥
इत्युक्ते प्रणतेनोक्तः शंबेनानकदुंदुभिः। शुश्रूषामार्य वृत्तं ते भण्यतामिति सादरं ॥२८॥
स प्राहानंदभेर्या त्वं वत्स बोधय यादवान्। कथयामि समाप्तानां सहैव चरितं निजं ॥२९॥
तथा कृते समस्तेभ्यो यादवेभ्यः सविस्तरं। कलत्रादिसमेतेभ्यो वृत्तं तेनाकथि स्वकं ॥ ३० ॥

लोकालोकविभागोक्ति हरिवंशानुकीर्तनं। स्वक्रीडां सौर्यलोकोक्तिनिर्गमं च ततो निजं ॥३१॥
इत्यादि चरितं दिव्यं दिव्यमानुषसंभवं। प्रद्युम्नशंवसंभूतिभूतिपर्यवसानकं ॥ ३२ ॥
वसुदेवस्य सर्वोऽपि सर्वविद्याधरीमयः। अंतःपुरजनो हृष्टः श्रुतस्मरणसंगतः ॥ ३३ ॥
श्रुत्वा सभाजनाश्चापि वृद्धस्त्रीयुवबालकाः। यादवोंऽतःपुराण्येषां कुरवो द्वारिकाजनाः ॥३४॥
विस्मयं परमं प्राप्ताः शशंसुः संशयोज्झिताः। वसुदेवं शिवाद्याश्च देव्यः पीतकथारसाः ॥३५॥
यथायथं नृपा जग्मुरावासान्वासितांवराः। अंतःपुराणि सर्वेषां रक्षितानि सुरक्षकैः ॥ ३६ ॥
कथा पुनर्नवीभूता प्रतिवेश्म दिने दिने। जाता जनस्य साश्चर्या वसुदेवमयी कथा ॥ ३७ ॥
नत्वा पृष्टवते भूपः श्रेणिकाय गणी जगौ। कुमारान् कतिचित्पुर्यामिति वीरवचः क्रमात् ॥३८॥
उग्रसेनस्य तनया धरो गुणधरोऽपि च। युक्तिको दुर्धरश्चापि सागरश्चंद्रसंज्ञकः ॥ ३९ ॥
उग्रसेनपितृव्यस्य शांतनस्य सुतास्त्वमी। महासेनशिविस्वस्थविषादानंतमित्रकाः ॥ ४० ॥
महासेनस्य तनयः सुषेण इति नामतः। हृदिको विषमित्रस्य शिवेः सत्यक इत्यसौ ॥ ४१ ॥
हृदिकात्कृतिधर्मासौ दृढधर्मा च देहजः। सत्यकाद्वज्रधर्मोऽभूदसंगस्तु तदंगजः ॥ ४२ ॥
समुद्रविजयोद्भूता महासत्यदृढाधिकाः। नेमयोऽरिष्टनेमीशः सुनेमिर्जयसेनकः ॥ ४३ ॥

महीजयः सुफल्गुश्च तेजःसेनो मयस्तथा । मेघाख्यः शिवनंदश्च चित्रको गौतमादयः ॥४४॥
अक्षोभ्यस्योद्भवः सुनुर्वचः क्षुभितवारिधीः । अंभोधिजलधी चान्यौ वामदेवदृढव्रतौ ॥ ४५ ॥
तनयाः पंच विख्याता जाता स्तिमितसागरात् । ऊर्मिमान् वसुमान्वीरः पातालीस्थिर इत्यमी॥४६॥
विद्युत्प्रभो नरपतिर्माल्यवान् गंधमादनः । इत्यमी सत्यसत्वाढ्यास्त्रयो हिमवतः सुताः ॥ ४७ ॥
विजयस्यापि षट् पुत्रा निष्कंपोऽकंपनो बलः । युगांतः केशरी धीमानलंबुष इति श्रुताः ॥४८॥
महेंद्रो मलयः सह्यो गिरिः शैलो नगोऽचलः । इत्येतेन्वर्थनामानः सप्ताचलशरीरजाः ॥४९॥
धरणस्यात्मजाः पंच वासुकिः स धनंजयः । कर्कोटकः शतमुखो विश्वरूपश्च नामतः ॥५०॥
दुष्पूरो दुर्मुखाभिख्यो दुर्दर्शो दुर्धरोऽपि च । सूनवः पूरणस्यामी चत्वारश्चतुरक्रियाः ॥५१॥
पुत्राः षडभिचंद्रस्य चंद्रनिर्मलकीर्तयः । चंद्रः शशांकचंद्राभौ शशी सोमोऽमृतप्रभः ॥५२॥
तनया वसुदेवस्य बहुसंख्या महाबलाः । नामतः कतिचिद्वच्मि श्रृणु श्रेणिक तानहं ॥५३॥
पुत्रौ विजयसेनाया अक्रूरक्रूरनामकौ । ज्वलनानिलवेगाख्यौ श्यामाख्यायाः शरीरजौ॥ ५४ ॥
पुत्राः गंधर्वसेनायास्त्रयो लोका इव त्रयः । वायुवेगोऽमितगतिर्महेंद्रगिरिरित्यसौ ॥५५॥
अमात्यदुहितुर्जाताः पद्मावत्याः सुतास्त्रयः । दारुर्वृद्धार्थनामा च दारुक इत्युदीरिताः ॥ ५६ ॥

द्वौ नीलयशसः पुत्रौ धीरौ सिंहमतंगजौ। नारदो मरुदेवोऽपि सोमश्रीतनयौ वरौ ॥ ५७ ॥
मित्राश्रयः सुमित्राख्यः कपिलः कपिलात्मजः। पद्मश्च पद्मकाख्यश्च पद्मावत्याः शरीरजौ ॥५८॥
अश्वसेनोऽश्वसेनाया पौंड्राया पौंड्र एव तु। रत्नगर्भः सुगर्भश्च रत्नवत्याः सुतौ मतौ ॥ ५९ ॥
सोमदत्तसुतायास्तु चंद्रकांतशशिप्रभौ। वेगवान्वायुवेगश्च वेगवत्यास्तनूभवौ ॥६०॥
दृष्टिमुष्टिरनावृष्टिर्हिममुष्टिश्च ते त्रयः। पुत्रा मदनवेगाया मदनप्रतिमागताः ॥६१॥
बंधुषेणस्तथा सिंहसेनो बंधुमतीसुतौ। प्रियंगुसुंदरीसूनुः शीलायुध इति श्रुतिः ॥६२॥
द्वौ सुतौ तु प्रभावत्यागंधारः पिंगलस्तथा। जरत्कुमारवाह्लीकौ जरायास्तनयौ स्मृतौ ॥६३॥
अवंत्याः सुमुखश्चैव दुर्मुखश्च महारथः। रोहिण्या बलदेवश्च सारणश्च विदूरथः ॥६४॥
तनूजौ बालचंद्राया वज्रदंष्ट्रमितप्रभौ। देवकीतनुजो विष्णुरितीमे वसुदेवजाः ॥६५॥
उन्मुंडो निषधश्चासौ प्रकृतिद्युतिरप्यतः। चारुदत्तो ध्रुवः पीठः स शक्रंदमनोऽपि च ॥६६॥
श्रीध्वजो नंदनश्चैव धीमान् दशरथस्तथा। देवनंदश्च विख्यातो विद्रुमः शंतनुः परः ॥६७॥
पृथुः शतधनुश्चैव नरदेवौ महाधनुः। रोमशैत्यादयः पुत्रा बहवो बलिनस्तथा ॥६८॥
भानुः सुभानुभीमौ च महाभानुसुभानुकौ। वृहद्रथश्चाग्निशिखो विष्णुसंजय एव च ॥६९॥

अकंपनो महासेनो धीरो गंभीरनामकः। उदधिर्गौतमश्चापि वसुधर्मा प्रसेनजित् ॥७०॥
सूर्यश्च चंद्रवर्मा च चारुकृष्णश्च विश्रुतः। सुचारुर्देवदत्तश्च भरतः शंखसंज्ञकः ॥७१॥
प्रद्युम्नशंबनामाद्या केशवस्य शरीरजाः। शस्त्रास्त्रशास्त्रनिष्णाता सर्वे युद्धविशारदाः ॥७२॥
तेषां पुत्राश्च पौत्राश्च यादवानां यशस्विनां। पैतृष्वस्रीया स्वस्रीयाः कुमारास्ते सहस्रशः ॥७३॥
तिस्रः कोट्योऽर्धकोटी च कुमाराणां महौजसां। मनोभवस्वरूपाणां रमंते रमणप्रियाः।

नित्यं द्वारवती पुरी परिगता वीरैः कुमारैरिमैः
निर्गच्छद्भिरितस्ततो रथगजारूढैर्विशद्भिस्तथा
नानावेषधरैः प्रचंड चरितैः पौरप्रजाह्लादिभि-
र्बभ्राजे भवनामरैरिव पुरी पाताललोकस्थिता ॥७५॥
प्रायः स्वर्गच्युतानां जिनपथचरितोदारपुण्योदयानां
कीर्त्यानां कीर्त्यमानं चरितमिदमिहश्रीकुमारोत्तमानां
संश्रृण्वंत्येकमत्या मतिविभवयुताः श्रद्दधाना जना ये
कौमारं यौवनं च व्यपगमितरुजस्ते वयो निर्विशंति ॥७६॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ यदुकुलकुमारोद्देशवर्णनो नाम अष्टचत्वारिंशः सर्गः।

एकोनपंचाशः सर्गः ।

अथ मधुसूदनावरजया वरया जगतामवितथकन्यया शशिविशुद्धयशोधरया
प्रथितसुदुर्धरप्रथमयौवनभूरिभरः प्रकटमभारि हारिगुणभूषणभूषितया ॥१॥
नखमणिमंडलेंदुरतिनिर्मलपल्लवयोरकृत करकृता हसितभास्वदलक्तकयोः
मृदुपदपद्मयोः प्रमदभागसमन्वितयोर्जगति यदीययोरुपमयापगतं त्रपया ॥२॥
दृढगुणगूढगुल्फनिजजानुमनोहरयोः प्रतिपदमानुपूर्व्यपरिवृत्तविलोमशयोः
निरुपमजंघयोर्जघनभूरिभरक्षमयोः सविरसमल्पयोर्न हि यदीयकयोरुपमा ॥३॥
मृदुपरिवृत्तपांडुरगुणं विगलद्गहलस्थिरकरकांतिदीप्तिरसपूरितमूरुयुगं ।
करिकरयष्टिवृत्तकदलीमृदिमानमतिप्रथितमतीत्य सत्यगुणचारि यदीयमभात् ॥४॥
बहुरसपूर्णवर्णकुलशैलभवप्रमदा प्रमदविधायि पुण्यसरितः कलहंसगतेः ।
गुरुजघनस्थलीपुलिनभूमिरभूमिरसौ कुसुमरथस्य शुंभितनितंबतटेव बभौ ॥५॥
तनुमृदुरोमराजिलतयातिविनीतरुचा जननयनाभिरामनिजनाभिगभीरतया ।
तनुमध्यबंधनवलित्रयविचित्रतया ललितवधूजनेष्वतिविराजितमत्रपया ॥६॥

उरसि नितांतनीलनिजचूचुकयोरसकौ कठिनसुवृत्तपीवरपयोधरयोर्भरतः ।
अमृतरसक्षयक्षरणभीहरिनीलमणि स्थिरतरमुद्रिकोत्कनककुंभवदेव बभौ ॥७॥
भुजलतयोः शिरीषमृदुपीनवरांसकयोः वरकमलप्रभापटलपाटलपल्लवयोः।
कुरुवकताम्रकम्रनखपुष्पकयोर्वपुषस्तनुकृतमुद्रकोशकरशाखकयोर्विबभौ ॥८॥
अकठिनकंबुकंठचिबुकाधरबिंबफलप्रसहितपांडुगंडकुटिलभ्रुललाटतटी ।
द्विगुणितकोमलोत्पलसुनालसुकर्णभृता चिरमनयात्यभासि धवलासितदीर्घदृशा ॥९॥
प्रमितशिरस्यतिभ्रमरकांतिकनत्कुटिलप्रकटकटीतटीपतितकेशकलापमसौ ।
शशिवदना प्रकाशमवहद्विहसद्दशना प्रशिथलकामपाशमिव लोकवशीकरणं ॥१०॥
करपदमुद्रिकाकटकनूपुरपूर्वकसत्प्रथितचतुर्दशाभरणभूषणभूततनुः ।
प्रविलसदंगरागमृदुवस्त्रमहास्रगियं स्थगयति कन्यकोचितसुखा वपुगा युवती ॥११॥
पितृसुतपूर्वकस्य यदुसर्वकुलस्य जनै-रुचितसपर्यया विहितगौरवभूमिरसौ ।
सकलकलाकलगुणकलापमहावसतिः सकलसरस्वती स्वयमिव स्वजनोपविधौ ॥१२॥
इति समये प्रयाति तु कदाचिदसौ प्रणतैरुपहासिता प्रयाद्भिरवशाद्बलराजसुतैः ।

विचिपिटनासिकं रहसि दर्पणके स्वमुखं स्फुटमवलोकय तद्भवविरागमगात्त्रपिता ॥१३॥
पुरि विभूतार्जिकागणमहत्तरिकापदया व्रतधरपादमूलमितया सह सुव्रतया ।
सुरगुरुरपृच्छयत प्रणतया निजपूर्वकृतं स्फुरदवधीक्षणः क्षणमसाविति तां न्यगदीत् ॥१४॥
तव दुहितः सुराष्ट्रविषये विषयेंद्रियजैर्विगतभये सुखैरतिविमूर्छितमूढधिया ।
पुरुवतयाभिरूपपदमुद्वहतांगभृता निभृतमनंकुशं निभृतमात्ममनोनयनं ॥१५॥
अतिविषमं तपो घटयतो मृतशायिकया शकटमृषेरुपर्युपरि हितं तदा त्वकया ।
विमृदितनाशिकापुटतटस्य मुनेः स्खलनं मनसि न जातमीषदपि धीरतया धृतया ॥१६॥
अजनितजीवघातगुणतो नरके पतनं तव हि मनाग्न जातमृषिगात्रवधादिह तु ।
अजनि विनाशिकस्य वदनस्य महाविकृतिः फलति फलं स्वकर्मजगतां हि यथाविहितं ।१७।
सकृदपि जीवघातकृदघादसकृत्परतः परवशघातदुःखमभियास्यति जंतुरिह ।
अवयवघातकृत् सकृदपि स्वकृतैरसकृदवयवघातमेष्यति सदेति जिनस्य वचः ॥१८॥
वचनमनस्तनुभिरभि यः पुरुषः परुषा पुरुषवधादिषु प्रभुतया प्रयतंत इह ।
दुरितमहाप्रभुः परभवेषु जनेषु पुनः प्रभवति दुःखदानचरश्चतुरेष्वपि हि ॥१९॥

अत इह जंतुभिः परवधादिनिवृत्तिपरैः स्वपरहितैः सदापि भवितव्यमपि प्रभुभिः ।
न हि भवपद्धतौ भवभृतामिह संसरतां सुकृतभुजां सतां प्रतिभवति सदा प्रभुता ॥२०॥
इति वचनं गुरोरभिनिशम्य कृतावनतिः प्रगतवती तया सह महत्तरिकार्यकया ।
व्रतमदधाद्विमोच्य हि सकाखिलबंधुजनं सितवसनावृतस्तनभरोद्धृतकालकुचा ॥२१॥
व्यपहृतभूषणस्रगियमात्मकरांगुलिभिर्निकचितकेशभारनिखिलोत्खननं तु तदा ।
प्रविदधती बभौ कुसुमकोमलबाहुलता स्फुटमिव धीकुटीकुटिलशल्यमिवोद्धरणं ॥२२॥
जघनभरः कुचावुदरमाचरणं च वपुः सुमृदुदुकूलकैकवसनेन कृतावरणं ।
स्वविदधती सती चिरमराजत सा च तदा वृतसिकतास्थलाच्छपयसा शरदीव नदी ॥२३॥
स्वजनकृताभिनिष्क्रमणपूजनिकां जनिकां पुरुतपसं निशाम्य नवसंयतिकां हितकां ।
अजनि महाजनस्य सकलस्य तदेतिमतिः सधृतिः सरस्वती किमु तपस्यति किं नु रतिः ।२४।
व्रतगुणसंयमोपवसनादितपोभिरसौ प्रतिदिनभावनाभिरपि भावितभावयुता ।
वसति तपस्यया वसतिरागमगीतगिरां पुरुगुणसंयता गणनिवासगता सततं ॥२५॥
बहुषु तु वर्षवासरगणेषु गतेषु ततो जिनजननाभिनिष्क्रमणनिर्वृतिभूमिषु सा ।

कृतविहृतिः कदाचन गता पृथुसार्थवशान्निजसहधर्मिणीभिरुरुविंध्यमहागहनं ॥२६॥
निशि निशितासिनिर्मलनिशातमनास्त्वसकौ प्रतिपथया स्थिता प्रविशया प्रतिमा प्रतिमा ।
वरशवरसेनया स्फुटमदर्शि निशानिभया बहुघनसार्थपातविधेयद्रुतमागतया ॥२७॥
इह वनदेवतास्थितवतीयमिति प्रणतैः शबरशतैरितिस्ववरदानमयाच्यत सा ।
भगवति वः प्रसादनिरुपद्रविणो द्रविणं यदभिलभेमहि प्रथमकिंकरका वयकं ॥२८॥
इति तु वनेचरैः कृतमनोरथकैः पृथुकैः प्रबलतयासुसार्थमभितः पुनरापतितैः ।
विनिहितसार्थसार्थकतयांतमितैः प्रतिमा–स्थितियुतसंयतास्थितिभुवीदमदर्शि तु तैः ॥२९॥
प्रशमसमाधिभागनशनस्थितिमामरणादुपगतपुंडरीकादुरुपल्लवचंडतया ।
स्वयमुपपद्य सा दिवमगात्प्रतिमाप्रमृतिर्मधुमथनस्वसा स्खलति न स्थितितः सुजनः॥३०॥
नखमुखदंष्ट्रिकाविकटकोटिविपाटितया यदपि कलेवरखंडमुपार्जितधर्मतया ।
मृतिमितया विमुक्तमविमुक्तसमाधितया तदपि करांगुलित्रिकशेषमशेषमभूत् ॥३१॥
रुधिरविलुप्तगुप्तपथभूतलमाकुलिताः सकलमितस्ततस्तदभिवीक्ष्य तदा शबराः ।

१ रात्रिप्रभातुल्यया—कृष्णया ।

धृतिरिह वध्यते वरदेवतया रुधिरे इति विनिधाय दैवतमदस्त्रिकरांगुलिभिः ॥३२॥
वनमहिषं निपात्य विषमं विषमाः परितः परुषकिरातका रुधिरमांसवलिप्रकरं ।
विचकरुरुद्रमग्नशकमक्षिकमक्षिविषं प्रविततविस्रगंधदुरभीकृतदिग्वलयं ॥३३॥
सुगतगतामम्ं परमकारुणिकां तपसा जगति जनस्ततः प्रभृति निरागसमत्र जडः ।
वनचरदर्शितेन नु यथा नरकाभिमुखः पिशितवशो निहंति हि पशून्महिषप्रभृतीन् ॥३४॥
न हि महिषास्त्रपानवधिका न हि शूलकरा न हि सुरदुर्गतावपि परस्परघातकता ।
रचयति भित्तिमात्रमुपलभ्य कविः कवितां मदसतीं यथा च लिखति स्फुटचित्रकरः॥३५॥
सदपि दुरीहितं रहसिजं हि परस्य परैः सदसि निगद्यमानमघमावहतीह सतां ।
मतमिदमस्य तु प्रकटनं जगतामसतो न नरकपातहेतुरिति कस्य सतो वचनं ॥३६॥
अवितथमित्यमी वितथमेव शठा कवयः स्वपरमहारयो विदधते विकथाकथनं ।
परवधकापथेषु भुवि तेषु तथेति जनः सुररवमूढधीः पतति गड्डरिकाकटवत् ॥३७॥
क परदयापरः परमधर्मपथो भुवने विधिवदनुष्ठितस्तनुभृतां सुखदः प्रकटः ।

१ निष्पापम् । २ ससदमतीं इति क पुस्तके ।

क्व च परघातजो नरकहेतुरधर्मकलिः कुकविविकल्पितः खलकलौ खलु धर्मतया ॥३८॥
प्रकटितलोकपालचरिताः खलु लोकमयाननुभृदनुग्रहं विदधतः परिरक्षणतः ।
समहिषमेषघातमधिदैवतमत्र नृपाः विदधति यत्र तत्र कुजनेषु तु कैव कथा ॥३९॥
कथमपि कार्यसिद्धिमुपलभ्य हि दैववशात्प्रतिनिधिदेवताकृतमिति प्रतिपद्य नरः ।
निजवपुरायुधैः सुविनिकृत्य ददद्रुधिरं परतनुकर्तने भवति वा स कथं सघृणः ॥४०॥
विपुलसपर्यया प्रणतलोकसुतोषितया विगतविपर्ययत्वगुणया जगतीश्वरः ।
यदि हि वितीर्यते वरदया वरदेवतया न भवति कश्चिदप्यभिमतेन जनो विकलः ॥४१॥
प्रतिनिधिराश्रयश्च सधनस्य परस्य कृतिः प्रतिदिनदीपतैलबलिपुष्पविधिः परतः ।
अथ च वरं परस्य नियतं प्रददाति वृतं जडजनदेवता जगति हास्यमिदं परमं ॥४२॥
प्रतिकृतिरर्चिता भुवि कृतार्थजिनाधिपतेरधिगतभक्तिभिर्द्रविणभावविधार्थतया ।
फलति फलं परत्र परिणाय विशेषवशादभिमतकल्पवृक्षलतिकेव जनाभिमतं ॥४३॥
अपथनिपातघातनघनानुमतैरशुभैस्त्रिभिरशुभास्रवो भवति दुर्गतिहेतुरलं ।
पथि यतिभाषिते स्वकृतकारकतानुमतैर्भवति शुभास्रवः सुगतिहेतुरपीह शुभैः ॥४४॥

मनसि शुभे निजे वचसि वा वपुषि प्रगुणो किमिति न पुण्यमेव जगदेकगतं कुरुते ।
घटयति पापमेव विगुणैः सुकृतैः करणैर्गुरुतरमत्र कारणमहो गुरुकर्मकृतं ॥४५॥
तिमिरभरं त्रिमूढिमयमत्रदृढं जगतः स्थगयदलं पवित्रनेत्रमनौषधकं ।
तदिह जनो दिदृक्षुरपि तत्त्वमतत्त्वमपि प्रतिपदमाकुलः किमु निरूपयितुं क्षमते ॥४६॥
अतिनिचिताग्निवायुजलभूमिलतातरुभिः क्षितिरपचेतनैश्च गृहकल्पितदैवतकैः ।
रविविधुतारकाग्रहगणैर्जननेत्रपथैर्गगनमतोस्तु मूढिरिह कस्य जनस्य न वा ॥४७॥
सदसदनेकमेकमथ नित्यमनित्यमपि स्वकपररूपभेदमपि शेषमशेषपरं ।
गुणगुणिकार्यकारणभिदाद्यखिलात्मतया जगदिदमित्यमी नियमिनो दृढमूढतया ॥४८॥
यदि च परस्परव्युदसनव्यसनाः स्युर्मृषा स्फुटमितरेतरेक्षणतया न मृषा हि तथा ।
निगमनसंग्रहव्यवहृतिप्रमुखाश्च नयाः सकलनयप्रमाणपरिनिश्चितवस्तुनि याः ॥४९॥
पुरुषपुरस्सरोभिरुचिरन्यनिवृत्तिरुचेर्मुनिपतिशासना शासनाभिरतस्य जनस्य हि सा ।
सुगतिमयत्नतो विशति सिद्धिसुखान्वयिनं शुभमखिलार्थगोचरमुदारचरित्रमपि ॥५०॥

व्रतगुणशीलराशिरतिघोरतपो विविधं विमलमिदं यतो भवति दर्शनशुद्धियुतं ।
भवपारमपारमनंतं यियासु च चेन्मनः भजतु जनस्ततो जिनगुणग्रहणाभिरतः ॥५१॥
इति "अरिष्टनेमि"पुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ दुर्गोत्पत्तिवर्णनो नाम एकोनपंचाशः सर्गः ।

पंचाशत्तमः सर्गः ।

इतः केनचिद्वणिजा अनर्घ्यैर्मणिराशिभिः । जरासिंधो नृपो दृष्टः स्वक्रयाणकहेतुना ॥१॥
दृष्ट्वा कस्मात्समानीताः प्रोवाच मगधेश्वरः । नारायणः क्षमां शास्ति द्वारावत्याः प्रभो बली॥२॥
यादवेंद्रशिवादेव्योर्नेमिस्तीर्थंकरोऽभवत् । मासान् पंचदश तत्र रत्नवृष्टिः कृता सुरैः ॥३॥
यादवानां च माहात्म्यं श्रुत्वा राजगृहाधिपः । वणिजः तार्किकेभ्यश्च जातः कोपारुणेक्षणः ॥४॥
यदुवृद्धिमिति श्रुत्वा श्रुतवृद्धिविलोचनं । प्रणम्य गणिनं भूपः श्रेणिकोऽपृच्छदित्यसौ ॥५॥
मणिराशिष्विवांभोधौ महागुणमरीचिषु । प्रख्यातेष्वखिले लोके यादवेष्वतिभूरिषु ॥६॥
अनेकाहवनिर्व्यूढदृढवीर्ये हरौ श्रुते । किमचेष्टत राजासौ भगवान्मगधाधिपः ॥७॥

१ "जननजरामृतिक्षयकरीं सुखदां भुवि तां" इति ख पुस्तके पाठान्तरम् ।

ततो गणभृदाचख्यावनयोर्नरमुख्ययोः । वृत्तं श्रेणिकभूपाय शुश्रूषावहितात्मने ॥८॥
बुद्धवार्तो जरासंधः संधिं प्रति पराङ्मुखः । प्रमुख्यैर्मंत्रिभिः सत्रा मंत्रमारभ्यतेस्म सः ॥९॥
उपेक्षिताः कुतो हेतो मंत्रिणो भरतारयः । वार्धौ प्रवृद्धसंतानास्तरंगा इव भंगुराः ॥१०॥
मंत्रिणो हि प्रभोश्चक्षुर्निर्मलं चारचक्षुषः । ते कथं स्वामिनं स्वं च वंचयंति पुरः स्थिताः ॥११॥
यदि नाम महैश्वर्यप्रमत्तेन महाद्विषः । नालक्ष्यंत प्रतन्वाना युष्माभिस्तु कथं तु ते ॥१२॥
नोच्छिद्येरन्महोद्योगैर्जातमात्रा यदि द्विषः । दुःखयंति दुरंतास्ते व्याधयः कुपिता इव ॥१३॥
कंसं जामातरं हत्वा भ्रातरं चापराजितं । प्रविष्टाः शरणं दुष्टा यादवा यादसां प्रति ॥१४॥
यद्यप्यनवगाह्याब्धिगंभीरोदरमाश्रिताः । उपायानायनिःकृष्टा वध्यास्ते मे झषा यथा ॥१५॥
द्वारिकावधि तिष्ठंतः संतिष्ठंते कुतोऽभयाः । तावदेव हि ते यावन्न मे कोपानलो ज्वलेत् ॥१६॥
इयंतं कालमज्ञाता ज्ञातिभिः सह सुस्थिताः । ज्ञातानामधुना तेषां सुस्थितिर्मद्द्विषां कुतः ॥१७॥
सामश्चोपप्रदानस्य न ते स्थानं कृतागसः । ततो युष्माभिरेकांतात्स्थाप्यतां भेददंडयोः ॥१८॥
दंडोपायप्रधानं तं स्वामिनं मंत्रिणस्तथा । प्रशाम्य प्रणताः प्रोचुः प्रसादपदवीस्थिताः ॥१९॥
आकर्ण्यतां यथा नाथ विंदंतोऽपि वयं द्विषां। द्वारिकायां महावृद्धिः कालयापनया स्थिता ॥२०॥

यादवान्वयसंभूताः स्वर्भुवामपि दुर्जयाः श्रीनेमिर्वासुदेवश्च बलदेवश्च ते त्रयः ॥२१॥
स्वर्गावतारकाले यः पूजितो वसुवृष्टिभिः । सुरेंद्रैरभिषिक्तश्च जिनो जन्मनि मंदिरे ॥२२॥
स कथं युधि जीयेत भवतामररक्षितः । युक्तेनापि समस्तेन राजकेन भुवस्तले ॥२३॥
बलकेशवयोश्चापि सामर्थ्यं भवता न किं । तच्छ्रुतं बहुयुद्धेषु शिशुपालवधादिषु ॥२४॥
यत्पक्षाः पांडवाश्चंडाः प्रतापार्जितकीर्तयः । विद्याधराश्च बहवो वैवाहिकपथस्थिताः ॥२५॥
कोट्यो यत्र कुमाराणां प्रसिद्धा रणशालिनां । स्वामिन्नर्धचतुर्थास्ते जीयंते यादवाः कथं ॥२६॥
अंतस्थानप्यपां पत्युस्तान् कदाचिदपेक्षया । मद्भीता इति मामंस्था नयमार्गविदो यदून् ॥२७॥
दैवकालबलोपेता देवताकृतरक्षणाः । सुमन्त्र्याग्रोपमा देव ! तावत्तिष्ठंतु यादवाः ॥२८॥
आस्महे वयमप्यत्र कालयापनया प्रभो ! । स्वाङ्गस्वपरकालानां याप्यावस्था हि शस्यते ॥२९॥
अनयावस्थयाऽऽसीने त्वयि तेषां प्रकोपिनां । द्विषां प्रतिविधानाय प्रतिपद्यस्व पौरुषं ॥३०॥
इत्यादिमंत्रिभिः पथ्यं तथ्यं विज्ञापितं प्रभुः । नाग्रहीत्क्षयकाले हि ग्राही ग्राहं न मुंचति ॥३१॥
सचिवानपकर्ण्याशु प्रकोपाय नृपो द्विषां । दूतं सोजितसेनाख्यं प्रहिणोद्द्वारिकां पुरीं ॥३२॥
स प्राच्यानां प्रतीच्यानामपाच्यानां च भूभृतां । उदीच्यानामगस्थानां मध्यदेशाधिवासिनां ॥३३॥

चतुरंगबलेशानां शासनानतिलंघिनां। दूतानजीगमत्क्षिप्रमायांत्विति पराक्रमी ॥३४॥
दूतदर्शनमात्रेण कर्णदुर्योधनादयः। ते संप्राप्ता जरासंधं सत्यसंधाहितैषिणः ॥३५॥
नृपैस्तैरनुयातोसौ तनयाद्यैर्महाबलैः। निमित्तैर्वार्यमाणोऽपि प्रतस्थेऽरिजिगीषया ॥३६॥
स दूतोऽजितसेनोऽपि स्वामिकार्यहितः पुरीं। सुद्वारां द्वारिकां प्राप सुकृतीव दिवं कृती ॥३७॥
प्रविश्य नगरीं रम्यामनेकाद्भुतसंकुलां। दृश्यमानो जनैः पौरैराससाद नृपालयं ॥३८॥
अशेषयादवाकीर्णां भोजपांडवसंयुतां। सभां स प्राविशद्विष्णोः प्रतीहारनिवेदितः ॥३९॥
कृतप्रणतिरध्यास्य दापितासनमग्रतः। वक्तुं प्रारभत स्वामिबललाभावलेपतः ॥४०॥
आकर्ण्यतां समाधाय मनः सकलयादवैः। यथा शास्ति महाराजो मागधः परमेश्वरः ॥४१॥
यूयमेव स्फुटं ब्रूत किमनिष्टं कृतं मया। युष्माकं येन साशंका प्रविष्टाः सागरोदरं ॥४२॥
सापराधतया यूयं यद्यप्युद्भूतभीतयः। दुर्गं श्रितास्तथाप्यस्मत्तोऽभयं नमतैत्य मां ॥४३॥
अथ दुर्गबलाद्यूयं तिष्ठतानतिवर्जिताः। एषोऽहं सागरं पीत्वा बलैः कुर्वे कदर्थनां ॥४४॥
अज्ञातावस्थितीनां च कालदेशबलं बलं। अधुना ज्ञातवार्तानां कालदेशबलं कुतः ॥४५॥
वचोहरवचः श्रुत्वा कुपिता निखिला नृपाः। कृष्णादयो जगुस्तत्र भृकुटीकुटिलाननाः ॥४६॥

आयात्यासन्नकालोऽसौ समस्तबलसंयुतः । रणातिथ्यं ददामोऽस्मै संग्रामोत्कंठिता वयं ॥४७॥
इत्युक्त्वा सविसृष्टस्तै रूक्षवाग् वज्रताडितः । गत्वा स्वस्वामिने पूर्वी निवेद्य कृतितां गतः ॥४८॥
विमलामलशार्दूला समुद्रविजयं ततः । मंत्रिणो मंत्रनिपुणा संमंत्र्येति व्यजिज्ञपन् ॥४९॥
शांतये सामदंडस्य स्यात्स्वपक्षविपक्षयोः । मागधेन समं साम तस्माद्राजन् प्रयुंज्महे ॥५०॥
ज्ञातिवर्गः समस्तोयं कुमारनिकरादिकः । अपायबहुले युद्धे संशयः कुशलं प्रति ॥५१॥
संति योधा यथास्माकममोघशरवर्षिणः । साधनो मागधस्यापि तथैव भुवि विश्रुतः ॥५२॥
तदेकस्यापि हि ज्ञातेरपायो रणमूर्धनि । यथा शत्रोस्तथास्माकमतिदुःखकरो भवेत् ॥५३॥
अतो विश्वजनीनार्थं साम तावत्प्रशस्यते । तदर्थं प्रेष्यतां दूतो माधवांतिकमस्मयात् ॥५४॥
मागधः साम्यमानोऽपि साम्ना यदि न साम्यति । तदा तदुचितं कुर्मः को दोषः सामयोजने ॥५५॥
इति मंत्रिभिरामंत्र्य राजा विज्ञापितस्तदा । को दोष इति संमंत्र्य लोहजंघमजीगमत् ॥५६॥
स दक्षः शौर्यसंपन्नः कुमारो नीतिलोचनः । जगाम निजसैन्येन जरासंधेन संधये ॥५७॥
पूर्वमालवमासाद्य कृतसैन्यनिवेशनः । प्राप्तौ कांतारभिक्षार्थं कांतारे सार्थयोगिनौ ॥५८॥
मासोपवासिनौ दृष्ट्वा तिलकानंदनंदकौ । प्रतिगृह्यान्नपानाद्यैः पंचाश्चर्याणि लब्धवान् ॥५९॥

तीर्थं देवावताराख्यं ततः प्रभृति भूतले । भूतं भूतसहस्राणां पापोपशमकारणं ॥६०॥
दूतो गत्वा जरासंधं संधानं प्रत्यसन्मुखं । प्रत्यबोधयदेकांते प्रतिबोधनपंडितः ॥६१॥
लोहजंघवचोत्यंतप्रसन्नः प्रतिपन्नवान् । स संधानं जरासंधः षण्मासावधिकं ततः ॥६२॥
दूतः पूजां नृपात्प्राप्य स प्राप्य द्वारिकां ततः । समुद्रविजयाद्यर्थं निवेद्य स्थितवान् कृती ॥६३॥
साम्यनैव ततो वर्षे सामग्रीप्रत्यपेक्षया । पूर्णे पूर्णमहासंधौ महासामंतसन्नतिः ॥६४॥
जरासंधोऽत्र संप्राप्तः सैन्यसागररुद्धदिक् । कुरुक्षेत्रं महाक्षत्रप्रधानप्रधनोचितं ॥६५॥
पूर्वमभ्येत्य तत्रैव केशवोऽपरसागरः । तस्थावापूर्यमाणः सन् वाहिनीनिवहैर्निजैः ॥६६॥
तत्रापाच्या नृपाः केचिदुदीच्याश्चापरांतिकाः । संबंधिनः सुता विष्णुं सकलैः स्वबलैर्युताः॥६७॥
दशार्हा सांत्वना भोजाः पांडवाश्चापि बांधवाः । अन्ये च नृपशार्दूलाः प्रसिद्धा हरये हिताः॥६८॥
अक्षौहिणीपतिस्तत्र समुद्रविजयो नृपः । उग्रसेनोग्रणीः पुंसा तथैवाक्षौहिणीप्रभुः ॥६९॥
मेरुरक्षौहिणीस्वामी श्रीमानिक्ष्वाकुवंशजः । अक्षौहिण्यर्धनाथस्तु राष्ट्रवर्धनभूपतिः ॥७०॥
तथार्धाक्षौहिणीनाथः सिंहलानामधीश्वरः राजा पद्मरथश्चापि तत्समानबलो बली ॥७१॥
दायादः शकुनेर्वीरः चारुदत्तः पराक्रमी । अक्षौहिणीचतुर्थांशपतिः कृष्णहितेरितः ॥७२॥

बर्बरा यमना भीरा कांबोजा द्रविडा नृपाः। अन्ये च ऽह्वः सूराः शौरिपक्षमुपाश्रिताः ॥७३॥
अक्षौहिण्यो वरगुणा जरासंधमुपागताः। चक्ररत्नप्रभावेन वशीभावितभारतं ॥७४॥
अक्षौहिणीप्रमाणं तु सप्रमाणमुदीरितं। वाजिवारणपत्तीनां रथानां गणनायुतं ॥७५॥
नवहस्तिसहस्रा णि नऽलक्षा रथा मताः। नव कोट्यस्तुरंगास्तु शतकोट्यो नरा नेव ॥७६॥
यदुष्वतिरथो नेमिस्तथैव बलकेशवौ। अतिक्रम्य स्थितान् सर्वान् भारतेऽतिरथांस्तु ते ॥७७॥
समुद्रविजयो राजा वसुदेवो युधिष्ठिरः। भीमकर्णार्जुनो रुक्मी रौक्मणेयश्च सत्यकः ॥७८॥
धृष्टद्युम्नोप्यनावृष्टिः शल्यो भूरिश्रवा नृपः। राजा हिरण्यनाभश्च सहदेवश्च सारणः ॥७९॥
शस्त्रशास्त्रार्थनिपुणाः परांमुखदयापराः। महावीर्या महाधैर्या राजानोऽमी महारथाः ॥८०॥
अक्षोभ्यपूर्वकाश्चाष्टौ शंबो भं.जो विदूरथः। द्रुपदः सिंहराजोऽपि शल्यो वज्रः सुयोधनः ॥८१॥
पौंड्रः पद्मरथश्चापि कपिलो भगदत्तकः। क्षेमधूर्त इमे सर्वे समाः समरथा रणे ॥८२॥
महानेमिधराक्रूरनिषधोल्मुकदुर्मुखाः। कृतवर्मा वराटाख्यश्चारुकृष्णश्च यादवाः ॥८३॥
शकुनिर्यवनो भानुर्दुश्शासनशिखंडिनौ। वाल्हीकसोमदत्तश्च देवशर्मा बकस्तथा ॥८४॥

१ नवशतकोट्यः।

वेणुदारी च विक्रांतो राजानोऽर्धरथा इमे। विचित्रयोधिनो धीराः संग्रामेष्वपराङ्मुखाः ॥८५॥
अतः परं नृपाः सर्वे कुलमानयशोधनाः। रथिनः प्रथिताश्चामी यथायोग्यं बलद्वये ॥८६॥
अर्णवोपमयोस्तत्र तदाभ्यर्णनिवेशयोः। सेनयोस्तूर्णमागत्य कर्णस्याभ्यर्णमाकुला: ॥८७॥
कुंती निष्णातसंबंधतनयानुमता मता। कानीनस्नेहसंभारपरायत्तशरीरिका ॥८८॥
कंठलग्ना रुदंती तं प्रतिबोधयति स्म सा। मातापुत्रस्वसंबंधमादिमध्यावसानतः ॥८९॥
ततः कंबलवृत्तांतः कुरुवंशावतारवित्। कुंती पांडुसुतत्वं तु निश्चिकायात्मनस्तदा ॥९०॥
सांतःपुरेण कर्णेन निर्णीतनिजबंधुना। पूजिताग्रात्मजं कुंती जगाद जनितादरा ॥९१॥
उत्तिष्ठ पुत्र गच्छामो यत्र ते भ्रातरोऽखिलाः। तिष्ठंत्युत्कंठिताश्चान्ये वैकुंठप्रमुखा निजाः॥९२॥
कुरूणामीश्वरः पुत्र त्वमेव भुवि सांप्रतं। कृष्णस्य रामभद्रस्य संप्रति प्राणवत् प्रियः ॥९३॥
त्वं राजावरजाग्रस्ते छत्रधारी युधिष्ठिरः। भीमश्चामरधारी तु मंत्रिमुख्यो धनंजयः ॥९४॥
नकुलः सहदेवेन प्रतीहारः सहस्फुटं। अहं तु जननी नीत्या नित्यं तव हितोद्यता ॥९५।
इति मातृवचः श्रुत्वा भ्रातृस्नेहवशोऽपि सः। जरासंधोपकारैस्तैः स्वामिकार्यधरोऽवदत् ॥९६॥
पितरौ भ्रातरौ लोके बांधवाश्च सुदुर्लभाः। यद्यस्त्येवं तथाप्यत्र प्रस्तावे समुपस्थिते ॥९७॥

स्वामिकार्ये परित्यज्य बंधुकार्यमसांप्रतं । अप्रशस्यं च हास्यं च संमुखे सांप्रतं रणे ॥९८॥
एतावदत्र कार्यं तु युद्धे भ्रातृवशादृते । योद्धव्यमन्ययोर्धहि स्वामिकार्यकृता मया ॥९९॥
निवृत्ते युधि जीवामो यदि दैववशाद्वयं । भविता निश्चयोऽस्माकमेव भ्रातृसमागमः ॥१००॥
प्रयाहि भ्रातृबंधूनामेतदेव निवेद्यतां । इत्युक्त्वा पूजिता गत्वा कुंती सर्वं तथाकरोत् ॥१०१॥
जरासंधबले तत्र समभूभागवर्तिनि । चक्रव्यूहो द्विषां नित्यं रचितः कुशलैर्नृपैः ॥१०२॥
चक्रस्यारसहस्रे हि राजैकैकः समास्थितः । तस्य राजसहस्रस्य करिणां तु शतं शतं ॥१०३॥
एकैकस्य नरेंद्रस्य द्विसहस्ररथाः स्थिताः । वाजिपंचसहस्राणि भटानां तानि षोडश ॥१०४॥
अतश्चतुर्थभागेन संयुताः सपदि स्थिताः । नरेंद्राः षट् सहस्राणि निविष्टास्तत्र नेमिषु ॥१०५॥
मध्यत्वं च समासाद्य सुस्थितो मागधः स्वयं । राजपंचसहस्रैः स श्रीमान् कर्णपुरस्सरैः॥१०६॥
तस्यैव मध्यभागे तु सैन्यं गांधारसैंधवं । दुर्योधनसमेतं तु धार्तराष्ट्रशतं स्थितं ॥१०७॥
मध्ये च मध्यदेशास्तु स्थितास्तत्र नरेश्वराः । पूर्वभागे स्थितास्तस्य शेषा नृपगणास्तथा ॥१०८॥
कुलमानधरा धीरा नरेशा बलशालिनः । पंचाशत्सकलव्यूहा नेमिसंधिष्ववस्थिताः ॥१०९॥
अंतरांतरसंस्थास्तु गुल्मैर्गुल्मैर्नरोत्तमैः । व्यूहस्य बाह्यतश्चापि नानाव्यूहैर्नृपाः स्थिताः ॥११०॥

चक्रव्यूहस्तदा दक्षैरचितोऽसौ व्यराजत। स्वसाधनमनस्तोषी परसाधनभीतिकृत् ॥१११॥
चक्रव्यूहं विदित्वा तं वसुदेवो विनिर्मितं। चकार गरुडव्यूहं तद्भेदाय विशारदः ॥११२॥
अर्धकोटीकुमाराणां मुख्ये तस्य महात्मनां। स्थापिता रणशूराणां नानाशस्त्रास्त्रधारिणां ॥११३॥
बली हलधरस्तत्र शार्ङ्गपाणिश्च मूर्धनि। स्थितावतिरथौ वीरौ स्थैर्याभिजितभूधरौ ॥११४॥
अक्रूरः कुमुदो वीरः सारणो विजयो जयः। पद्मो जरत्कुमारोऽपि सुमुखोऽपि च दुर्मुखः ॥११५॥
सूनुर्मदनवेगाया दृढमुष्टिर्महारथः। विदूरथोप्यनावृष्टिर्वसुदेवस्य तेऽङ्गजाः ॥११६॥
रथलक्षान्वितो रामकृष्णयोः पृष्ठरक्षिणः। रथकोट्या समेतस्तु पृष्ठभोजः प्रतिष्ठितः ॥११७॥
पृष्ठरक्षा नृपास्तस्य भोजस्य नृपतेस्ततः। धारणः सागरश्चान्ये रणशौंडा व्यवस्थिताः ॥११८॥
दक्षिणं पक्षमाश्रित्य सुतैः साकं महारथैः। समुद्रविजयोऽतिष्ठद्बलेन महता वृतः ॥११९॥
तत्पक्षरक्षणे दक्षाः कुमारा रिपुमारणाः। सत्यनेमिर्महानेमिर्दृढनेमिः सुनेमिना ॥२०॥
नमिर्महारथश्चापि जयसेनमहीजयौ। तेजःसेनो जयसेनो नयो मेघो महाद्युतिः ॥१२१॥
दशार्हाश्चापि विख्याताः शतशोऽन्ये च भूभृतः। रथकोटी चतुर्भागसहिताः समवस्थिताः ॥१२२॥
वामपक्षमुपाश्रित्य रामस्य तनयाः स्थिताः। पांडवाश्च महात्मनः पंडिता युद्धकर्मणि ॥१२३॥

उल्मुको निषधश्चापि प्रकृतिद्युतिरप्यतः । सत्यकः शत्रुदमनः श्रीध्वजो ध्रुव इत्यपि ॥१२४॥
राजा दशरथाश्चापि देवानंदोथ शंतनुः । आनंदश्च महानंदश्चंद्रानंदो महाबलः ॥१२५॥
पृथुः शतधनश्चापि विपृथुश्च यशोधनः । दृढबंधानुवीर्यश्च सर्वशस्त्रभृतांवरः ॥१२६॥
अनेकरथलक्षास्ते शस्त्रास्त्रेषु कृतश्रमाः । धार्तराष्ट्रा वधं युद्धे समाधाय व्यवस्थिताः ॥१२७॥
पृष्ठे चंद्रयशा भूपः सिंहलो वर्वरोऽपि च । कंबोजाः केरलाश्चापि कुशला द्रमिलास्तथा ॥१२८॥
रथषष्टिसहस्रैस्तु शांतनः समवस्थितः । पक्षिणो रक्षिणो ह्येते स्थिता विक्रमशालिनः ॥१२९॥
अशितश्चापि भानुश्च तोमरः समरप्रियः । संजयो कल्पितश्चापि भानुर्विष्णुर्बृहध्वजः ॥१३०॥
शत्रुंजयो महासेनो गंभीरो गौतमोऽपि च । वसुधर्मादयश्चापि कृतवर्मा प्रसेनजित् ॥१३१॥
दृढवर्मा च विक्रांतश्चंद्रवर्मा च पार्थिवः । एते गणसहायस्तु कुलं रक्षंति शार्ङ्गिणः ॥१३२॥
एषोऽसौ गरुडव्यूहो वसुदेवेन निर्मितः । महारथकृतोत्साहश्चक्रव्यूहं बिभित्सति ॥१३३॥

चक्रव्यूहे दुर्विगाहे कृतेऽपि व्यूहे व्यूहे पक्षिराजेऽपि दक्षैः ।
युद्धे जेता नायकः कश्चिदेको धर्मात्प्रायादर्जिताज्जैनमार्गे ॥१३४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनेसनाचार्यकृतौ चक्रगरुडव्यूहवर्णनो नाम पंचाशत्तमः सर्गः ।

एकपंचाशत्तमः सर्गः।

अत्रांतरे सहप्राप्ताः समुद्रविजयं नृपाः। विद्याधरसमस्तास्ते वसुदेवहितैषिणः ॥१॥
श्वसुरोऽशनिवेगोसौ हरिग्रीवो वराहकः। सिंहदंष्ट्रः खगेंद्रश्च विद्युद्वेगो महोद्यमः ॥२॥
तथा मानसवेगश्च विद्युद्दंष्ट्रः खगाधिपः। राजा पिंगलगांधारो नारसिंहो नरेश्वरः ॥३॥
इत्याद्याश्चार्यमातंगा वासुदेवार्थसिद्धये। वसुदेवं पुरस्कृत्य समुद्रविजयं श्रिताः ॥४॥
तान्सन्मान्य यथायोग्यं समुद्रविजयादयः। सिद्धार्था वयमद्येति प्रहृष्टमनसो जगुः ॥५॥
वसुदेवरिपूणां ते खगानां क्षोभमूचिरे। जरासंधार्थसिद्ध्यर्थं तेषामागमनं तथा ॥६॥
तच्छ्रुत्वा यादवाः सर्वे सन्मंत्र्यानकदुंदुभिं। प्रद्युम्नशंबसंयुक्तं सपुत्रं तैरमामुचन् ॥७॥
जिनकेशवरामादीन् परिश्वज्य स वेगवान्। पुत्रनप्तृखगैः साकं खचराचलमाययौ ॥८॥
सिंहविद्यारथं दिव्यं दिव्यास्त्रपरिपूरितं। धनदेवसमानीतमारुरोह हलायुधः ॥९॥
गारुडं रथमारूढस्तथागरुडकेतनः। नानाप्रहरणैर्दिव्यैः परिपूर्णं जयावहः ॥१०॥
मातल्यधिष्ठितं सास्त्रं सुत्रामप्रहितं रथं। नेमीश्वरः समारूढो यदूनामर्थसिद्धये ॥११॥
सेनानां नायकं शूरमनावृष्टिं कपिध्वजं। अभ्यषिंचन्नृपाः सर्वे समुद्रविजयादयः ॥१२॥

राजा हिरण्यनाभस्तु मागधेन महाबलः। सेनापतिपदे शीघ्रमभिषिक्तस्तदा मुदा ॥१३॥
युद्धे भेर्यस्तथा शंखा नेदुर्धीरं बलद्वये। चतुरंगबलं योद्धुमाससाद परस्परं ॥१४॥
अन्योन्याह्वानपूर्वं ते योद्धुं लग्ना यथायथं। राजानं क्रोधसंभारभ्रूभंगविषमाननाः ॥१५॥
गजा गजैः समालग्नास्तुरंगास्तुरगैः सह। रथा रथैः समं योद्धुं पत्तयः पत्तिभिः सह ॥१६॥
ज्यारवैरथनिर्घोषैर्गजानां गर्जितेन च। भटानां सिंहनादैश्च दलंतीव दिशो दश ॥१७॥
ततः परबलं दृष्ट्वा प्रबलं स्वबलाशनं। नेमिपार्थबलाधीशा वृषहस्तिकपिध्वजाः ॥१८॥
तार्क्ष्यकेतुमनोभिज्ञाः स्वयं योद्धुं समुद्यताः। ऊरीकृत्य सुसन्नाहाश्चक्रव्यूहस्य भेदनं ॥१९॥
दध्मौ नेमीश्वरः शंखं शार्क्ं शत्रुभयावहं। देवदत्तं पृथापुत्रः सेनानीश्च बलाहकः ॥२०॥
शंखानां निनदं श्रुत्वा ततो व्याप्तदिगंतरं। स्वसैन्येऽभून्महोत्साहः परसैन्ये महाभयं ॥२१॥
मध्यं बिभेद सेनानीर्नेमिर्दक्षिणतः क्षणात्। अपरोत्तरदिग्भागं चक्रव्यूहस्य पांडवः ॥२२॥
सेनानी परसेनान्या नेमिनाथोऽपि रुक्मिणा। पार्थो दुर्योधनेनासौ स धैर्येण पुरस्कृतः ॥२३॥
महायुद्धमभूत्तस्य ततस्तेषां यथायथं। संबंधबलयुक्तानां पंचायुधविवर्षिणां ॥२४॥
नारदोऽप्सरसां संघैर्दूरेण नभसि स्थितः। मुंचन् पुष्पाणि तुष्टात्मा ननर्त कलहप्रियः ॥२५॥

निपात्य शरवर्षेण रुक्मिणं चिरयोधनं । रिपुराजसहस्राणि नेमिश्चिक्षेप संयुगे ॥२६॥
समुद्रविजयाद्याश्च भ्रातरस्तत्सुतास्तथा । यथायथं रणे प्राप्ता निन्युर्मृत्युमुखं रिपून् ॥२७॥
रामकृष्णसुतैः संख्ये निःसंख्यशरवर्षिभिः । यथेष्ट क्रीडितं मेघैः पर्वतेष्विव वैरिषु ॥२८॥
पांडवानां सपुत्राणां धृतराष्ट्रसुतैः सह । कदनं यद्बभूवात्र तत्कः कथयितुं क्षमः ॥२९॥
युधिष्ठिरोऽत्र शल्येन भीमो दुश्शासनेन तु । सहदेवः शकुनिना ह्युलूको नकुलेन हि ॥३०॥
दुर्योधनार्जुनौ योद्धुं लग्नौ युद्धं ततस्तयोः । बभूव भूतवित्रासी शरसंधानदक्षयोः ॥३१॥
निहिताः पांडवैः केचिद् धृतराष्ट्रशरीरजाः । रणे दुर्योधनाद्यास्तु केचिज्जीवन्मृताः कृताः ॥३२॥
आकर्णाकृष्टचापौघैः कर्णोऽभिमुखमागतान् । योधान् बिभेद संग्रामे कृष्णपक्षाननेकशः ॥३३॥
द्वंद्वयुद्धे तदा जाते बहुभूतक्षयावहे । सेनापत्योरभूद्रौद्रं कदनं विविधायुधैः ॥३४॥
हिरण्यनामवीरेण स सप्तभिः शरैः शतैः । नवत्या सप्तविंशत्या विद्धोऽनावृष्टिराहवे ॥३५॥
प्रजघान शतेनासौ सहस्रेण च पत्रिणां । अनावृष्टिर्हिरण्याभं कुशलः प्रतिकर्मणि ॥३६॥
यादवस्य ध्वजं तुंगं चिच्छेद रुधिरात्मजः । सोऽपि चास्य बिभेदाशु चापं छत्रं च सारथिं ॥३७॥
धनुरन्यदुपादाय शरवर्षं ववर्ष सः । परिघं तु यदुःक्षिप्त्वा रथं शत्रोरपातयत् ॥३८॥

खड्गखेटकहस्तं तं आपतंतमरिर्यदुः । खड्गखेटकहस्तोऽगाद्रथादुत्तीर्य सन्मुखः ॥३९॥
प्रहारवंचनादानलाघवातिशयात्मनोः । असियुद्धमभूद्घोरं सेनापत्योस्ततस्तयोः ॥४०॥
वार्ष्णेयखड्गघातेन प्रदत्तेन भुजे रिपुः । छिन्नबाहुद्वयोरुष्कः पपात वसुधातले ॥४१॥
हते सेनापतौ तत्र चतुरंगबलं द्रुतं । विद्रुतं शरणं प्राप्तं जरासंधमहारणे ॥४२॥
तुष्टोनावृष्टिरप्याशु रथमारुह्य सैनिकैः । स्तूयमानो गतोभ्याशं रामकेशवयोस्ततः ॥४३॥
बलकेशववीराभ्यां वृषहस्तिकपिध्वजाः । चक्रव्यूहस्य भेत्तारः परिश्वक्ता महौजसः ॥४४॥
विषादविषदूषितं मगधराजसैन्यं ततो निवेशमगमं निजे लघुदिवाकरेऽस्तंगते ।
नितांतपृथुहर्षपूर्णमतिघूर्णमानार्णव—प्रमाणमरिभंगतो यदुबलं जिनश्रीयुतं ॥४५॥
इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ हिरण्यनाभवर्णनो नाम एकपंचाशः सर्गः ।

द्वापंचाशः सर्गः ।

अन्येद्युर्द्युमणिद्योतद्योतिते भुवनोदरे । सन्नद्धौ निर्गतौ योद्धुं बलैर्मागधमाधवौ ॥१॥
विधाय पूर्ववद्व्यूहौ बलद्वयमधिष्ठितं । नानाराजन्यविन्यासमन्योन्यं हंतुमुद्यतौ ॥२॥

रथस्थो मागधो युद्धे हंसकं निजमंत्रिणं । अंतिकस्थमिति प्राह यादवानभिवीक्ष्य सः ॥३॥
प्रत्येकं नामचिह्नाद्यैर्यदूनां चक्ष्व हंसक । किमन्यैरत्र निहतैरित्युक्ते संजगाविति ॥४॥
फेनपुंजप्रतीकाशैर्हयैः कांचनदामभिः । रथोर्करथवद्दृश्यः कृष्णस्य गरुडध्वजः ॥५॥
शुकवर्णसमैरश्वैर्युक्तोऽयं स्वर्णशृंखलैः । अरिष्टनेमिवीरस्य वृषकेतुर्महारथः ॥६॥
कृष्णदक्षिणपार्श्वेत्वरिष्टवर्णैस्तुरंगमैः । रथस्तालध्वजो राजन् बलदेवस्य राजते ॥७॥
कृष्णवर्णैर्हयैर्युक्तो भ्राजतेऽयं महारथः । अनीकाधिपतेरत्र कपिकेतूपलक्षितः ॥८॥
नीलकेसरबालाग्रैर्हयैर्हेमपरिष्कृतैः । रथो युधिष्ठिरस्यायं पांडवस्य विराजते ॥९॥
शशांकविशदैरश्वैर्यातरिश्वजवैर्वृतः । गजध्वजयुतो भाति सव्यसाचिरथो महान् ॥१०॥
नीलोत्पलनिभैरेष युक्तो युयुभिरीक्ष्यते । रथो वृकोदरस्यापि मणिकांचनभूषणः ॥११॥
शोणवर्णैर्हयैर्भाति समुद्रविजयस्य हि । मध्ये यादवसैन्यानां महासिंहध्वजो रथः ॥१२॥
अक्रूरस्य कुमारस्य रथोसौ कदलीध्वजः । सबलैर्वाजिभिर्भाति रुक्मविद्रुमभास्वरः ॥१३॥
हयैस्तित्तिरकल्माषैः सत्यकस्य महारथः । महानेमिकुमारस्य कौमुदैर्वाजिभी रथः ॥१४॥
चामीकरवृहद्दंडपताकाध्वजभूषितः । शुकदंडनिभैरश्वैर्भोजस्यैष महारथः ॥१५॥

अश्वैः कनकपृष्ठैर्यो युक्तैर्भाति महारथः । असौ जरत्कुमारस्य मृगकेतोर्विराजते ॥१६॥
शुक्लः सोमसुतस्यैष सिंहलस्य विराजते । कांबोजैर्वाजिभिर्युक्ता रथोऽश्वरथभास्वरः ॥१७॥
अश्वैरारक्तसबलैर्मरुराजस्य राजते । रथः कांचनचित्रांगैः शंशुमाराकृतिध्वजः ॥१८॥
रथः पद्मरथस्यैष पद्माभैस्तुरगैर्युतः । शोभते रणशूरस्य बलानामग्रतः स्थितः ॥१९॥
पारावतीनिभैः पत्रैः सारणस्य त्रिहायनैः । तपनीयच्छदैर्भाति रथोऽसौ पुष्करध्वजः ॥२०॥
शशलोहितसंकाशैर्वाजिभिः पंचहायनैः । रथो नग्नजितः सूनोर्मेरुदत्तस्य काशते ॥२१॥
वाजिभिः पंचवर्णैर्यो रथो भाति वृहध्वजः । विदूरथकुमारस्य जवनः कलशध्वजः ॥२२॥
सर्ववर्णनिभैरश्वैर्यादवानां तरस्विनां । न शक्यंते रथान् प्रोक्तुं शतशोथ सहस्रशः ॥२३॥
अस्माकं नृपवीराणां रथान्वेत्सि यथायथं । कुमाराणां च सर्वेषां नानाचिह्नान्महारथान् ॥२४॥
क्षत्रियैर्बहुभिर्युक्तो नानादेशसमागतैः । शोभते भवतो व्यूहो रिपुसेनाभयंकरः ॥२५॥
तदाकर्ण्य निजं प्राह सारथिं मगधेश्वरः । यादवान् प्रति शीघ्रं त्वं रथं नोदय सारथे ! ॥२६॥
नोदितेथ रथे तेन लग्नश्छादयितुं नृपेट् । यादवानभितः सर्वान् शरासारैर्निरंतरैः ॥२७॥
जरासंधसुतास्तत्र यादवैः सह कोपिनः । यथायथं रथादिस्था रणक्रीडां प्रचक्रिरे ॥२८॥

स कालयवनः काल इव स्वयमुपागतः । गजं मलयनामानमारूढो युयुधेऽधिकं ॥२९॥
सहदेव इति ख्यातो द्रुमसेनोद्रुमस्तथा । जलचित्रादिकौ केतू धनुर्धरमहीधरौ ॥३०॥
स भानुः कांचनरथो दुर्धरो गंधमादनः । सिंहांकश्चित्रमाली च महीपालवृहद्ध्वजौ ॥३१॥
सुवीरादित्यनागाख्यौ सत्यसत्वसुदर्शनौ । धनपालशतानीकौ महाशुक्रमहावसू ॥३२॥
वीराख्यो गंगदत्तश्च प्रवरः पार्थिवाभिधः । चित्रांगदो वसुगिरिः श्रीमान् सिंहकटिस्फुटः ॥३३॥
मेघनादमहानादौ सिंहनादवसुध्वजौ । वज्रनाभमहाबाहू जितशत्रुपुरंदरौ ॥३४॥
अजिताजितशत्रू च देवानंदशतद्रुतौ । मंदरो हिमवान्नाम्ना तौ विष्णुकेतुमालिनौ ॥३५॥
कर्कोटकहृषीकेशौ देवदत्तधनंजयौ । सगरस्स्वर्णबाहू च मघवानच्युतोऽपि च ॥३६॥
दुर्जयो दुर्मुखश्चापि तथा वासुकिकंबलौ । त्रिशिरा धारणाभिख्यो माल्यवान् संभवाभिधः ॥३७॥
महापद्मो महानागो महासेनो महाजयः । वासवो वरुणाभिख्यः शतानीकोऽपि भास्करः ॥३८॥
गरुत्मान् वेणुदारी च वासुवेगशशिप्रभौ । वरुणादित्यधर्माणौ विष्णुस्वामी सहस्रदिक् ॥३९॥
केतुमाली महामाली चंद्रदेवो बृहद्बलिः । सहस्ररश्मिरर्चिष्मान् जध्नो मागधसूनवः ॥४०॥
तपन्मनुजमातंगतुरंगरथसंकटे । स कालयवनो युद्धे निरुद्धो वसुदेवजैः ॥४१॥

तेषां तस्य च संग्रामो यशःसंग्रहकारिणां। अन्योन्याक्षेपि वाक्यानां प्रवृत्तो वार्तसंकथं ॥४२॥
छन्ना तेन कुमाराणां शिरोभीरुधिरारुणैः। चक्रनाराचनिर्भिन्नैः पंकजैरिव भूरभात् ॥४३॥
सारणेन कुमारेण स कालयवनो रुषा। नीतः खड्गप्रहारेण कालस्य सदनं चिरात् ॥४४॥
कृष्णेनाभिमुखीभूता मागधस्य सुताः परे। शूरा मृत्युमुखं नीतास्तेऽर्धचंद्रैः शिरश्छिदा ॥४५॥
ततः स्वयं जरासंधः कृष्णस्याभिमुखं रुषा। दधाव धनुरास्फाल्य रथस्थो रथवर्तिनः ॥४६॥
अन्योन्याक्षेपिणोर्युद्धं तयोरुद्धतवीर्ययोः। अस्त्रैः स्वाभाविकैर्दिव्यैरभूदत्यंतभीषणः ॥४७॥
अस्त्रं नागसहस्राणां सृष्टप्रज्वलनप्रभं। माधवस्य वधायासौ क्षिप्रं चिक्षेप मागधः ॥४८॥
अमूढमानसः शौरिर्नागनाशाय गारुडं। अस्त्रं चिक्षेप तेनाशु ग्रस्तं नागास्त्रमग्रतः ॥४९॥
अस्त्रं संवर्तकं रौद्रं विससर्ज स मागधः। तन्महाश्वसनास्त्रेण माधवोऽपि निराकरोत् ॥५०॥
वायव्यं व्यमुचच्छत्रमस्त्रविन्मगधेश्वरः। अंतरिक्षेण वास्त्रेण व्याक्षिपत्तदधोक्षजः ॥५१॥
अग्निसात्करणे सक्तमस्त्रमाग्नेयमुज्ज्वलं। मागधक्षिप्तमाक्षिप्तं वारुणास्त्रेण शौरिणा ॥५२॥
अस्त्रं वैरोचनं मुक्तं मागधेंद्रेण रोषिणा। उपेंद्रेणापि तद्दूरान्माहेंद्रास्त्रेण दारितं ॥५३॥

१ 'उपेंद्रेण च दारितं' इति ख पुस्तके।

राक्षसास्त्रं रिपुक्षिप्तं क्षिप्रं नारायणो रणे। क्षिप्त्वा नारायणास्त्रेण शौरिर्णां धृतिमाहरत् ॥५४॥
तामसास्त्रं परिक्षिप्तं भास्करास्त्रेण सोऽभिनत्। अश्वग्रीवास्त्रमत्युग्रं चिक्षेपारुणदारुणः ॥५५॥
दिव्यान्यन्यानि चास्त्राणि क्षिप्तानि प्रतिशत्रुणा। प्रतिक्षिप्य निरायामो वासुदेवोऽधितिष्ठते ॥५६॥
तथा व्यर्थप्रयासोसौ क्षितिक्षिप्तशरासनः। रक्षं यक्षसहस्रेण चक्ररत्नमचिंतयत् ॥५७॥
चिंतानंतरमेवात्र सहस्रकिरणप्रभं। चक्रं दिक्चक्रविद्योति मागधस्य करे स्थितं ॥५८॥
नानास्त्रव्यर्थताक्रुद्धश्चक्रं प्रणम्य मागधः। मागधं प्रतिचिक्षेप क्षिप्रं भ्रूभंगभीषणः ॥५९॥
नभस्यागच्छतस्तस्य विच्छायीकृतभास्वतः। यथास्वं चिक्षिपुः सर्वे चक्राण्यन्येऽपि भूभृतः ॥६०॥
शार्ङ्गी शक्तिगदाद्यानि हलं समुसलं हली। गदां वृकोदरः पार्थो नानास्त्राण्यस्त्रपार्थिवः ॥६१॥
सेनानी परिघं शक्तिं युधिष्ठिरनृपस्तथा। तस्य तु प्रतिघातार्थमुद्दीर्णाशीसमं ययौ ॥६२॥
समुद्रविजयाक्षोभ्यप्रभृतिभ्रातरो भृशं। अप्रमत्ता महास्त्राणि प्रतिचक्रं प्रचिक्षिपुः ॥६३॥
नेमीशस्त्ववधिज्ञातभाविकार्यगतिस्थितिः। चक्रस्याभिमुखश्चक्रे विष्णुनैव सहस्थितिं ॥६४॥
वार्यमाणं तु तच्चक्रमस्त्रचक्रेण भूभृतां। विस्फुरद्विस्फुलिंगौघं शनैरागत्य मित्रवत् ॥६५॥
सह प्रदक्षिणीकृत्य भगवन्नेमिना हरिं। तत्करे दक्षिणे तस्थौ शंखचक्रांकुशांकिते ॥६६॥

व्योम्नि दुंदुभयो नेदुरपतन्पुष्पवृष्टयः । नवमो वासुदेवोऽयमिति देवा जगुस्तदा ॥६७॥
सुगंधिवायुभिः सार्धमनुकूलैरलं तदा । हृदयैर्यदुवीराणां समुच्छ्वसितमायुधं ॥६८॥
चक्रहस्तहरिं दृष्ट्वा संयुगे मगधाधिपः । दध्यौ चक्रपरावृत्तिरन्यथेयमभूदिति ॥६९॥
चक्रविक्रमसंभारसमाक्रांतदिगंतरः । त्रिखंडाधिपतिश्चंडो जातः खंडितपौरुषः ॥७०॥
चतुरंगबलं कालः पुत्रा मित्राणि पौरुषं । कार्यकृत्तावदेवात्र यावद्दैवबलं परं ॥७१॥
दैवे तु विकले कालपौरुषादिर्निरर्थकः । इति यत्कथ्यते विद्भिस्तत्तथ्यमिति नान्यथा ॥७२॥
गर्भेश्वरोहमन्येषामलंघ्यो महतामपि । प्रारब्धो जेतुमल्पेन गर्भादिक्लेदिना कथं ॥७३॥
मज्जेतापि यदीदृक्षो दृष्टोऽत्र विधिना ततः । किमर्थं क्रेशितो बाल्ये गोकुले धिग्विधीहितं ॥७४॥
लोकांधीकरणे दक्षां धीरधैर्यविलोपिनीं । वंधकीमिव धिग्लक्ष्मीं परसंक्रमकांक्षिणीं ॥७५॥
ध्यायन्नित्यादि निश्चित्य मृत्युकालमुपस्थितं । प्रकृत्यैव जरासंधः कृष्णमित्याह निर्भयः ॥७६॥
क्षिप चक्रं किमर्थं त्वं गोप ! कालमुपेक्षसे । कालस्योत्क्षेपको मुग्ध ! दीर्घसूत्री विनश्यति ॥७७॥
इत्युक्तस्तं प्रति प्राह प्रकृत्या प्रश्रयी हरिः । चक्रवर्त्यहमुद्भूतः शासने मम तिष्ठ भोः ॥७८॥

१ वेश्या ।

अपकारे प्रवृत्तस्त्वमस्माकं यद्यपि स्फुटं । तथापि मृष्यतेस्माभिर्नतिमात्रप्रसादिभिः ॥७९॥
तथोदितः स तं प्राह प्रसभं गर्भनिर्भरः । चक्रं नालातचक्रं मे किमनेन स्मयं गतः ॥८०॥
अथवा दृष्टकल्याणः स्वल्पेनाल्पः स्मयीभवेत् । न महान् दृष्टकल्याणः सस्मयो महतामपि ॥८१॥
सह दशार्हचक्रेण चक्रेणानेन च त्वकं । नृपचक्रेण त्वामाशु समुद्रे प्रक्षिपामि भोः ॥८२॥
इत्युक्ते कुपितश्चक्री चक्रं प्रभ्राम्य सोऽमुचत् । प्रभृतस्तेन गत्वारं वक्षोभित्तिरभिद्यत ॥८३॥
आगतं च पुनः पाणिं चक्रपाणेः क्षणेन तत् । प्रयुक्तस्य कृतार्थस्य कालक्षेपो हि निष्फलः ॥८४॥
पांचजन्यं हरिः शंखं दध्मौ यदुमनोहरं । नेमिपार्थबलाग्रण्यो गण्या दध्युर्निजाबुजं ॥८५॥
वादित्रध्वनयो धीरा क्षुभिताब्धिस्वनोपमाः । प्रभूता प्रादुरभवंस्तथैवाभयघोषणाः ॥८६॥
स्वसैन्यं परसैन्यं च संन्यस्तस्वभयं ततः । अनुक्तमप्यभूदेत्य वासुदेवस्य शासने ॥८७॥
नृपो दुर्योधनो द्रोणस्तथा दुश्शासनादयः । निर्विण्णा विदुरस्यांते जैनीं दीक्षां प्रपेदिरे ॥८८॥
कर्णः सुदर्शनोद्याने दीक्षां दमवरांतिके । जग्राह रणदीक्षांते निर्वाणफलदायिनीं ॥८९॥
तत्सुवर्णाक्षरं यत्र कर्णकुंडलमत्यजत् । कर्णः कर्णसुवर्णाख्यं स्थानं तत्कीर्तितं जनैः ॥९०॥
मतो मातलिरापृच्छ्य सेवयं स्वामिनोऽतिकं । यादवाः शिविरस्थानं निजं जग्मुः सपार्थिवाः ॥९१॥

निरीक्ष्य मधुसूदनेन युधि भारते मागधं हतं दिनकृदंशुधावकृत मज्जनं सज्जनः ।
शुचा प्रकटरोदनादिव दधन्मुखं दिग्मुखैर्जपाकुसुमपाटलं त्विव जलांजलेर्दित्सया ॥९२॥
व्रजंति खलु जंतवः कृतशुभोदये संपदां प्रचंडपुरुषांतराक्रमणकारिणीं तत्क्षये ।
भजेद्विपदमप्यतो जिनमते जना निर्मलं कुरुध्वमपुनर्भवप्रभवहेतुभूतं तपः ॥९३॥
इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ जरासंधवधवर्णनो नाम द्वापंचाशः सर्गः ।

त्रिपंचाशः सर्गः ।

अथाभ्युदयपमभ्येते हरिदश्वे हरावेव । परालंघ्यमहत्तेजः प्रसाधितहरिन्मुखे ॥१॥
कृतेषु व्रजभंगेषु प्रवीराणामितोमुतः । संस्कारेषु तथान्येषु जरासंधादिभूभृतां ॥२॥
आस्थाने ते यथास्थानं समुद्रविजयादयः । राजानो हरिणासीना वसुदेवागमोन्मुखाः ॥३॥
किमर्थं क्षेमवार्ता नो नाद्याप्यानकदुंदुभेः । सपुत्रनप्तृकस्याद्रिं गतस्येति हि खेचरं ॥४॥
इत्यन्योन्याश्रितालापास्ते नृपा यावदासते । धेनुवत्ससमस्वांता बालवृद्धपुरःसराः ॥५॥
तावदुद्योतिताशास्ता विद्याधर्यः खविद्युतः । वेगवत्या सहागत्य नागवध्वा कृताशिषः ॥६॥

जग्मुरद्य कृतार्था वो गुरुदत्ताशिषोऽखिलाः । सुतेन मागधो ध्वस्तो यश्च पित्रा नमश्चराः ॥७॥
सपुत्रनप्तृकः क्षेमी क्षेमिणां प्रणयी स वः । यथाज्येष्ठं नमत्यंघ्रीन् सुतानाश्लिषयत्यपि ॥८॥
इति श्रुत्वा प्रमोदेन ते प्रकृष्टतनूरुहाः । पप्रच्छुः खेचरास्तेन विजिता कथमित्यमूः ॥९॥
ऊचे धनव्रती देवी वसुदेवहितोद्यताः । श्रूयतां वसुदेवस्य रणे सामर्थ्यमित्यसौ ॥१०॥
गत्वा स विजयार्धाद्रिं श्वसुरस्यालपूर्वकैः । एकीभूय खगैः खेटानरुणद्रणदक्षिणः ॥११॥
समग्रबलयुक्तास्ते ततस्तेन पुरस्कृताः । रणे मागधसाहाय्यं विरहय्य युधि स्थिताः ॥१२॥
बलद्वयस्य संपाते जाते तत्र ततोन्वभूत् । प्रजानां प्रलयाशंका भयव्याकुलचेतसां ॥१३॥
द्वंद्वयुद्धे प्रवृत्तेऽतो नृवाजिरथ हस्तिनां । अन्योन्यं न्यायतोऽन्योन्यमवधीत्सैन्ययोर्द्वयं ॥१४॥
आनकेन सपुत्रेण प्रद्युम्नेनाभिमानिना । तथा शंबेन पक्षेण खेचराणां जनेन च ॥१५॥
हेतिज्वालावहैरेभिः शत्रुभूभृत्कदंबकं । भस्मीकुर्वद्भिरुद्भूतैर्लोलैर्दावानलायितं ॥१६॥
अत्रांतरे सुरैस्तुष्टैस्तस्मिन्नुत्कृष्टसंगरे । नवमो वासुदेवोभूद्वसुदेवस्य नंदनः ॥१७॥
निहतश्च जरासंधस्तच्चक्रेणैव संयुगे । प्रतिशत्रुगुणद्वेषी वासुदेवेन चक्रिणा ॥१८॥
इत्युक्त्वा वसुदेवस्य रथस्योपरि पातिता । नानारत्नमयीवृष्टिः कौमुदीव दिवः सुरैः ॥१९॥

गिरस्ता मरुतां श्रुत्वा ततस्ते रिपुखेचराः। त्रस्ताः शरणमायाता वसुदेवमितोमुतः ॥२०॥
वसुदेवस्य पुत्राणां शंबप्रद्युम्नवीरयोः। वसुदेवमुपाश्रित्य कन्या विद्याधरा ददुः ॥२१॥
वयं तु वसुदेवोक्त्या युष्मदंतिकमागताः। क्षेमोदंतं तथैवास्य निवेदयितुमागताः ॥२२॥
नानाविद्याधराधीशा नानाप्राभृतपाणयः। आनकेन सहायांति ते नारायणभक्तितः ॥२३॥
यावद्धनवती तेषामितीष्टं कथयत्यसौ। तावद्विमानसंघातैः खेटानामावृतं नभः ॥२४॥
अवतीर्य विमानेभ्यो वसुदेवानुयायिनः। वासुदेवं बलोपेतं प्रणेमुः प्राभृतान्विताः ॥२५॥
अभ्युत्थाय ततो भक्त्या पितरं रामकेशवौ। प्रणेमतुरनेनापि तावाश्लिष्याभिनंदितौ ॥२६॥
ज्येष्ठानपूजयत्सर्वान्प्रणम्यानकदुंदुभिः। प्रद्युम्नाद्या यथायोग्यं प्रणेमुर्गुरुबांधवान् ॥२७॥
यथाक्रमं नभोयानाः केशवेन बलेन च। प्रतिसन्मानिताः सर्वे सफलं जन्म मेनिरे ॥२८॥
समस्तबलसंयुक्तौ प्रतीचीं बलकेशवौ। प्रयातौ प्रमदापूर्णौ पूर्णसर्वमनोरथौ ॥२९॥
आनंदे ननदुर्यत्र यादवा मागधे हते। आनंदपुरमित्यासीत्तत्र जैनालयाकुलं ॥३०॥
ततश्चक्रमहं कृत्वा सर्वरत्नान्वितो हरिः। दक्षिणं भारतं जिग्ये सदेवासुरमानुषं ॥३१॥
वर्षैरष्टाभिरिष्टार्थैर्सेव्यमानो नु वासरं। जितजेयो ययौ कृष्णः स कोटिकशिलां प्रति ॥३२॥

यतस्तस्यामुदारायामनेका ऋषिकोटयः। सिद्धास्ततः प्रसिद्धात्र लोके कोटिशिला शिला ॥३३॥
शिलायां तत्र कृत्वादौ पवित्रायां बलिक्रियां। दोर्भ्यामुत्क्षिपतिस्मासौ तां विष्णुश्चतुरंगुलं॥३४॥
सा शिला योजनोच्छ्राया समायोजनविस्तृता। अर्धभारतवर्षस्थदेवतापरिरक्षिता ॥३५॥
उद्बाहुनोर्द्धमुत्क्षिप्ता त्रिपृष्ठेन शिला पुरा। मूर्द्धदघ्नं द्विपृष्ठेन कंठदघ्नं स्वयंभुवा ॥३६॥
वक्षोद्वयमुत्क्षिप्ता च पुरुषोत्तमचक्रिणा। क्षिप्ता पुरुषसिंहेन हृदयावधिहारिणी ॥३७॥
पुंडरीकः कटीमात्रमूरुदघ्नं हि दत्तकः। जानुमात्रं च सौमित्रिः कृष्णोऽधाच्चतुरंगुलं ॥३८॥
प्रधानपुरुषादीनां सर्वेषां हि युगे युगे। भिद्यते कालभेदेन शक्तिः शक्तिमतामपि ॥३९॥
शिलाबलेन विज्ञातो महाकायबलो बलैः। सानुयातो ययौ चक्री द्वारिकां प्रतिबांधवैः ॥४०॥
प्रविष्टश्च विशिष्टानामाशीभिरभिनंदितः। द्वारिकां द्वारकांतां स कृतशोभां दिवं यथा ॥४१॥
यथायोग्यं सभोग्यास्ते भूनभोयानभूभृतः। प्रासादेषु स्थिताः सुस्था द्वारिकायां यथाविधि॥४२॥
अभिषिक्तौ ततः सर्वैर्भूपैर्भूचरखेचरैः। भरतार्धविभुत्वे तौ प्रसिद्धौ रामकेशवौ ॥४३॥
संस्थाप्य सहदेवं स चक्री राजगृहे नृपं। मागधानां चतर्भागं ददौ तस्मै गतस्मयः ॥४४॥
उग्रसेनसुतायादाद्धराय मथुरां पुरीं। स महानेमये शौर्यनगरं प्रददौ नृपः ॥४५॥

श्रीहस्तिनपुरं प्रीत्या पांडवेभ्यः प्रियं हरिः । कोशलां रुक्मनाभाय रुधिरात्मजसूनवे ॥४६॥
भूचरान् खेचरान्भूपानौचित्येन समागतान् । स्थानेषु स्थापनां चक्रे चक्रपाणिर्यथायथं ॥४७॥
विसृष्टाश्च यथास्थानं यातास्ते पांडवादयः । आरेमुर्द्वारिकायां तु यादवास्त्रिदशा यथा ॥४८॥

चक्रं सुदर्शनमदृष्टसुखं रिपूणां शार्ङ्गं धनुर्ध्वननधूतविपक्षपक्षं ।
सौनंदकोऽपि च गदापि च कौमुदी सा मोघेतरा रिपुषु शक्तिरमोघमूला ॥४९॥
शंखश्च शंखखचितस्य सपांचजन्यः श्रीकौस्तुभो मणिरसाधनणुप्रतापः ।
रत्नानि सप्त महितानि हरेर्हितानि व्याभांति दिव्यमयमूर्तियुतानि तानि ॥५०॥
दिव्यायुधं हलमभादपराजिताख्यं दिव्या गदा मुसलशक्त्यवतंसमालाः ।
रत्नानि पंच महितानि हलायुधस्य हेलाविधूतरिपुमंडलविभ्रमस्य ॥५१॥
राज्ञां स षोडशसहस्रगुणैर्गुणज्ञैर्गण्यैर्गुणी प्रणतमूर्धभिरर्धचक्री ।
भक्तैस्तदर्धगुणनैर्गणबद्धदेवैराज्ञाकरैः सुखमसेवत सेव्यमानः ॥५२॥
शार्ङ्गी स षोडशसहस्रवरांगनानां देवांगनाललितविभ्रमहारिणीनां ।
संघैः क्रमेण रतिभूपनिषेवितांगो रेमे तदर्धगणनैस्तु हली सुदारैः ॥५३॥

हिमशिशिरवसंतग्रीष्मवर्षासरत्सु प्रिययुवतिसहाया यादवा द्वारिकायां ।
जिनमतकृतधर्मा योग्यदेशेषु योगैरविरतरतिरागा रेमिरे सार्वभौमाः ॥५४॥

इति "अरिष्टनेमि" पुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ कृष्णविजयवर्णनो नाम त्रिपञ्चाशः सर्गः ।

चतुःपंचाशः सर्गः ।

श्रेणिकेन पुनःपृष्टश्चेष्टितं पांडवोद्भवं । संदेहध्वांतघातार्को गौतमः स जगौ गणी ॥१॥
स्थितेषु हास्तिनपुरे पांडवेषु यथाक्रमं । निजस्वामिपरिप्राप्त्या तुतुषुः कुरवोऽधिकं ॥२॥
सौराज्ये पांडुपुत्राणां वर्तमाने सुखावहे । सर्वे वर्णाश्रमा राष्ट्रे धार्तराष्ट्रान्विसस्मरुः ॥३॥
अखंडितगतिः प्राप्तः कदाचित्पांडवास्पदं । नारदश्चंडचित्तोसौ प्रकृत्या कलहप्रियः ॥४॥
आदरेण स तैर्दृष्टः प्रविशन्निस्सरन्नपि । व्यग्रयालंकृतौ तन्व्या द्रौपद्या तु न लक्षितः ॥५॥
ततो जज्वाल कोपेन तैलासंगादिवानलः । सज्जनावसरज्ञो न प्राणी सन्मानदुःखितः ॥६॥
स तद्दुःखविधानाय कृतेच्छः कृतनिश्चयः । धातकीखंडपूर्वार्धभारतं प्रति खे ययौ ॥७॥
अंगेष्वमरकंकायां पुरि शंकाविवर्जितः । स्त्रीलोलं पद्मनामाख्यं साभिख्यं दृष्टवान्नृपं ॥८॥

तेनांतःपुरमात्मीयमात्मीयस्यास्य दर्शितं । पृष्टश्च दृष्टमीदृक्षं स्त्रीरूपं क्वचिदित्यसौ ॥९॥
पर्यस्तं मन्यमानोयं पायसेऽभिमतं घृतं । द्रौपदीरूपलावण्यं लोकातीतमवर्णयत् ॥१०॥
तं द्रौपदीमयं ग्राह्यं ग्राहयित्वा स नारदः । द्वीपक्षेत्रपुरावासकथनः क्वापि यातवान् ॥११॥
आराधयदसौ तीव्रतपसा द्रौपदीप्सया । सुरं संगमकाभिख्यं पातालांतर्वासिनं ॥१२॥
आराधितेन देवेन पद्मनाभपुरीं निशि । सा सुप्तैव समानीता पार्थस्य वनिता प्रिया ॥१३॥
निवेदिता सुरेणासौ भवनोद्यानवर्तिनी । अद्राक्षीद् द्रौपदीं गत्वा साक्षादिव सुरांगनां ॥१४॥
प्रबुद्धा सर्वतोभद्रे शयने सा पुनः पुनः । स्वपितीयेव विनिद्रापि स्वप्नोयमिति शंकिनी ॥१५॥
विनिमीलितनेत्राया ज्ञात्वाकूलमसौ नृपः । शनैः समीपमाश्रित्य वदतिस्म प्रियंवदः ॥१६॥
आयताक्षि निरीक्षस्व नैष स्वप्नो घटस्तनि । द्वीपोयं धातकीखंडः पद्मनाभस्त्वहं नृपः ॥१७॥
नारदेन समाख्यातं तव रूपं मनोहरं । मयाराधितदेवेन त्वं मदर्थमिहाहृता ॥१८॥
श्रुत्वा चकितचित्ता सा किमेतदितिवादिनी । अचिंतयदहो दुःखं दुरंतं मे समागतं ॥१९॥
पार्थदर्शनपर्यंतमाहारत्यागमात्मनि । कृत्वा पार्थविमोच्यं च वेणीबंधं दधार सा ॥२०॥
द्रौपदीशीलनिर्भेदवज्रप्राकारमध्यगा । पद्मनाभमुवाचेत्थं वाच्यवानं मनोभुवा ॥२१॥

भ्रातरौ रामकृष्णौ मे भर्ता पार्थो धनुर्धरः। भर्तुर्ज्येष्ठौ महावीरावनुजौ च यमोपमौ ॥२२॥
जलस्थलपथैस्तेषामनिवारितगोचराः। विचरंति भुवं सर्वां मनोरथरया रथाः ॥२३॥
क्षेमं यदि नृपैस्तेभ्यो वांछसि त्वं सबांधवः। तद्विसर्जय मां शीघ्रमाशीविषवधूपमां ॥२४॥
इत्युक्तोऽन्यनिवृत्तेच्छः स्वग्राहं नैष मुंचति। यदा तदा दृढा प्राह प्रत्युत्पन्नमतिः सती ॥२५॥
मासस्याभ्यंतरे भूप यदीह स्वजना मम। नागच्छंति तदा त्वं मे कुरुष्व यदभीप्सितं ॥२६॥
तथास्त्विति निगद्यैतां पद्मनामोऽनवर्तयत्। सांतःपुरःप्रियशतैर्विलोभनपरः स्थितः ॥२७॥
विस्रब्धा भयमुज्झित्वा स्थित्वा साश्रुविलोचना। विनिद्रारा निराहारा पत्युः पंथानमीक्षते॥२८॥
अदृश्यायामकस्मात्तु तस्यां पांडवपंचकं। किंकर्तव्यतया मूढमभूदत्यंतमाकुलं ॥२९॥
निरुपायास्ततो गत्वा चक्रिणे ते न्यवेदयत्। दुःखी स यादवः सोत्र क्षेत्रेश्वश्रावयत्तदा ॥३०॥
क्षेत्रांतरहृतां मत्वा केनचित्क्षुद्रवृत्तिना। तत्प्रवृत्तिपरिप्राप्तौ यादवास्ते सतत्पराः ॥३१॥
आस्थानस्थितमागत्य कदाचिन्नारदो हरिं। पूजितो यदुलोकस्य जगादेति प्रियोदितः ॥३२॥
ईक्षिता धातकीखंडे कृष्णा कृष्णकृशांगिका। पुर्याममरकंकायां पद्मनामस्य सद्मनि ॥३३॥
अनारतगलद्बाष्पधाराविलविलोचना। सा तस्यांतःपुरस्त्रीभिः सादराभिरुपास्यते ॥३४॥

शीलमात्रमहाश्वासा दीर्घनिश्वासमोचिनी। सत्सु बंधुषु युष्मासु कथमास्ते रिपोर्ग्रहे ॥३५॥
लब्ध्वेति द्रौपदीवार्तां हरिप्रभृतयस्तदा। शशंसुर्नारदं हृष्टाः सापकारोपकारिणां ॥३६॥
द्रौपदीहरणं कृत्वा क्व प्रयाति स दुष्टधीः। प्रेषयामि दुराचारं मृत्यवे मृत्युकांक्षिणां ॥३७॥
इति द्विष्टो द्विषे कृष्णः कृष्णामानेतुमुद्यमी। दक्षिणो दक्षिणांभोधेस्तटं ससकटो गतः ॥३८॥
लवणाब्धिपतिं देवं सुस्थित नियमस्थितं। आराध्य पांडवैः सार्धं धातकीखंडवीप्सया ॥३९॥
देवेन नीयमानः सन् रथैःषड्भिः सपांडवः। द्रागुल्लंघ्याब्धिमापत्तद्धातकीखंडभारतं ॥४०॥
पुर्यास्तेऽमरकंकाया बहिरुद्यानवर्तिनः। कृष्णाद्याः पद्मनाभाय तन्नियुक्तैर्निवेदिताः ॥४१॥
चतुरंगबलं तस्य पुर्या निर्यातमुद्धतं। भ्रातृभिर्पंचभिर्युद्धे भग्नं नगरमाविशत् ॥४२॥
नृपः स नगरद्वारं पिधाय सनयः स्थितः। अलंघ्ये पांडुपुत्राणां ततश्चक्री स्वयं रुषा ॥४३॥
बिभेद पादनिर्घातैर्निर्घातैरिव नागरं। बहिरंतर्भुवं विश्वां भ्रश्यत्प्राकारगोपुरां ॥४४॥
पतत्प्रासादशालौघैर्भ्राम्यद्मत्तेभवाजिनि। विप्रलापमहारावे पुरे जाते जनाकुले ॥४५॥
स पौरांतःपुरो राजा निरुपायो भयाकुलः। प्रविष्टः शरणं द्रोही द्रौपदीं द्रुतमानतः ॥४६॥
क्षम्यतां क्षम्यतां सौम्ये! देवि! देवतया समे। दाप्यतामभयं मेऽद्य सवान्यस्य प्रतिव्रते ॥४७॥

तं सा कृपावती प्राह द्रौपदी शरणागतं । गच्छ भृकुंशवेशेण शरणं चक्रवर्तिनः ॥४८॥
कृतदोषेष्वपि प्रायः प्रणतेषु नरोत्तमाः । सकृपा स्युर्विशेषेण भीरुवेषेषु भीरुषु ॥४९॥
सस्त्रीकः स्त्रीकृताकारः श्रुत्वा पार्थांगनाग्रणीः । प्रविष्टः शरणं गत्वा विष्टरश्रवसं नृपः ॥५०॥
दत्वाऽस्यावभयं तस्य शरणागतभीहरः । विससर्ज निजं स्थानं स्थाननामादिभेदिनं ॥५१॥
कृष्णा कृष्णपदं नत्वा क्षेमदानपुरस्सरं । प्रायुंक्त विनयं योग्यं पंचस्वपि यथाक्रमं ॥५२॥
आश्लिष्य दयितां पार्थो विरहव्यथितां ततः । स्वयं प्रस्वेदिहस्ताभ्यां तद्वेणीमुदमोचयत् ॥५३॥
स्नात्वा भुक्त्वा कृतातिथ्या मनसा पांडवैः सह । निवेद्य निजदुःखं सा मुमोचास्रः समं ततः॥५४॥
रथमारोप्य तां वार्धौ दध्मौ शंखं निजं हरिः । आपुपूरे दिशां चक्रं चक्रिशंखस्य निस्वनः॥५५॥
कपिलो वासुदेवोऽपि तदा चंपावहिःस्थितं । जिनं नंतुं गतोऽपृच्छत्–श्रुत्वा तं कंपितक्षितिं॥५६॥
केनायं पूरितः शंखो नाथ ! मत्समशक्तिना । न चाद्य मादृशोऽस्तीह भारते मदधिष्ठिते ॥५७॥
जिनेन कथिते तत्वे प्रश्नतोत्तरवादिना । दिदृक्षुस्तं यियासुः स भाषितो धर्मचक्रिणा ॥५८॥
नान्योन्यदर्शनं जातु चक्रिणां धर्मचक्रिणां । हलिनां वासुदेवानां त्रैलोक्यप्रतिचक्रिणां ॥५९॥
भवतः चिह्नमात्रेण तव तस्य च दर्शनं । शंखास्फोटनिनादैश्च रथध्वजनिरीक्षणैः ॥६०॥

आयातस्य ततस्तस्य कपिलस्यानु यादवं । साफल्यमभवद्दूराज्जिनोक्तिविधिनांबुधौ ॥६१॥
आगत्य कपिलश्चंपामसांप्रतविधायिनं । कोपादमरकंकेशं केशवः सोत्यतर्जयत् ॥६२॥
पूर्वेणैव क्रमेणामी लघूत्तीर्णा महार्णवं । वेलातटे विशश्राम केशवः पांडवा गताः ॥६३॥
नौभिर्गंगां समुत्तीर्य तस्थुस्ते दक्षिणे तटे । व्यपनीता च भीमेन क्रीडाशैलेन नौस्तटी ॥६४॥
आगतोनुपदं विष्णुः कृष्णया सहितस्तदा । अप्राक्षीत्कथमुत्तीर्णा गंगां यूयमितीमिकां ॥६५॥
वृकोदरोऽवदद्दोर्भिरिति जिज्ञासुरीहितं । स सत्यमिति मत्वा तदुत्तरीतुमिति त्वरी ॥६६॥
रथमुद्धृत्य हस्तेन साश्वसारथिमच्युतः । जानुदघ्नामिवोत्तीर्णस्तां जंघाभ्यां भुजेन च ॥६७॥
ततो विस्मितसुष्टास्ते त्वरयाभ्येत्य सन्नताः । शक्तिभिक्ष्यास्तुतिव्यग्रा समाश्लिष्यन्नधोक्षजं॥६८॥

स्वयंकृतं नर्म ततो वृकोदरः स्वयं च विश्रुतया जगाद सः ।
तदैष कृष्णोऽतिविरक्ततामगाददेशकालं न हि नर्म शोभते ॥६९॥
अमानुषं कर्म जगत्यनेकशः कृतं मया दृष्टवतामपि स्वयं ।
मदीयसामर्थ्यपरीक्षणक्षमं किमत्र गंगोत्तरणे कुपांडवाः ॥७०॥

निगद्य तानेवमसौ जनार्दनः सहैव तैरेत्य तु हास्तिनं पुरं ।
सुभद्रया लब्धसुतार्यसूनवे वितीर्य राज्यं विससर्ज तान्क्रुधा ॥७१॥
समस्तसामंतकृतानुयानकः कृताभियानो यदुभिः कृतार्थकः ।
प्रविश्य कृष्णो नगरीं गरीयसीं निजां निजस्त्रीनिवहाद्यमानयत् ॥७२॥
सुतास्तु पांडोर्हरिचंद्रशासनादकांड एवाशनिपातनिष्ठुरात् ।
प्रगत्य दाक्षिण्यभृता सुदक्षिणां जनेन कार्ष्णां मथुरां न्यवेशयन् ॥७३॥
समुद्रवेलासु मनोहरासु ते लवंगकृष्णागुरुगंधवायुषु ।
सुचंदनामोदितदिक्षु दक्षिणा विजह्रुरुच्चैर्मलयाद्रिसानुषु ॥७४॥
क्व वार्धिजंबूद्रुममंडिता क्षितिः । क्व धातकीखंडधरा दुरासदा ॥
गतागतादर्थगतिस्तथापि तु । प्रसिद्ध्यति प्राक्तनजैनधर्मतः ॥ ७५ ॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ द्रौपदीहरणाहरणदक्षिणमथुरानिवेशवर्णनो नाम चतुःपंचाशः सर्गः ।

पंचपंचाशः सर्गः ।

अथ स नेमिकुमार युवान्यदा धनदसंभृतवस्त्रविभूषणैः ।
स्रगनुलेपनकैरतिराजितो नृपसुतैः प्रथितैः परिवारितः ॥१॥
समविशत्समदेभगतिर्नृपैरभिगतैः प्रणतैश्चलितासनैः ।
कुसुमचित्रसभां बलकेशवप्रभृतियादवकोटिभिराचितां ॥२॥
हरिकृताभिगतिर्हरिविष्टरं स तदलंकुरुते हरिणा सह ।
श्रियमुवाह परां तदलं तदा धृतहरिद्वयहारि यथासमं ॥३॥
सदसि सभ्यकथामृतपायिभिः प्रकटशौर्यशरीरविभूतिभिः ।
सह हरिर्नृवरैः समुपासितः क्षणमरंस्त रुचा स्थगिताखिलः ॥४॥
बलवतां गणनास्वथ केचन प्रतिशशंसुरतीव किरीटिनं ।
युधि युधिष्ठिरमुग्रवृकोदरं युगलमुद्धतमप्यपरे परान् ॥५॥
हलधरं बलवंतमलं तथा हरिमथोद्धृतदुर्धरभूधरं ।

स्वबलदर्शनतत्परराजकं चलयितुं स्वपदात्तु शशायिकं ॥ ६ ॥
हरिसभागतराजकभारतीरिति निशम्य सलीलदृशा हली ।
जिनमुदीक्ष्य जगौ जिननेमिना भगवता न समोऽस्ति जगत्त्रये ॥७॥
करतलेनमहीतलमुद्धरेज्जलनिधीनपि दिक्षु लघु क्षिपेत् ।
प्रचलयेद्गिरिराजमवज्ञया ननु जिनः कतमः परमोऽमुतः ॥८॥
इति निशम्य वचोऽथ निशाम्य तं स्मितमुखो हरिरीशमुवाच सः ।
किमिति युष्मदुदारवपुर्बलं भुजरणे भगवन् न परीक्ष्यते ॥९॥
सह समाभिनयोर्द्धमुखो जिनः किमिहमल्लयुधेति तमब्रवीत् ।
भुजबलं भवतोग्रज बुध्यते चलय मे चरणं सहसासनात् ॥१०॥
परिकरं परिवध्य तदोक्तितो भुजबलेन जिनस्य जिगीषया ।
चलयितुं न शशाक पदांगुलिप्रमुखमस्य नखेंदुहरिं हरिः ॥११॥
श्रमजवारिलवांचितविग्रहः प्रबलनिश्वसितोच्छ्वसितासनः ।
बलमहो तव देव जनातिगं स्फुटमितिस्मयमुक्तमुवाच सः ॥१२॥

बलरिपुश्च तदा चलितासनः स्वयमुपेत्य सुरैः सहसा सह।
कृतजिनार्चनकः कृतसंस्तवः कृतनतिः प्रययौ पदमात्मनः ॥१३॥
निजमगारमगाज्जिनचंद्रमाः परिवृतः क्षितिपैः ज्ञपितस्मयः।
हरिरपि स्फुटमात्मनि शंकितः क्रिशितधीर्हि जिनेश्वपि शंकते ॥१४॥
उपचरन्ननुवासरमादरात्प्रियशतैर्जिनचंद्रमसं हरिः।
प्रणयदर्शनपूर्वकमर्थयन् स्वयमनर्घगुणं जिनमुन्नतं ॥१५॥
अथ पुनर्विजयार्धनगोत्तरे पुरवरेऽभिधया श्रुतशोणिते।
जगति बाण इति प्रथितः खगः स खलु तिष्ठति गर्वितमानसः ॥१६॥
स्वयमुषा दुहितास्य खगेशिनो गुणकलावरणाविदितावनौ।
मदनसूनुमुदारगुणैः श्रुतं तमनुरुद्धमधत्त चिरं हृदि ॥१७॥
सुमृदुनापि तदा मृदुनि स्वयं विनिहितेन कृतं तनुपातनं।
मनसि संवसता कुटिलभ्रुवः कुटिलवृत्तिरनेन निजीकृता ॥१८॥
अनुदितेन परस्य महाधिना कृशतरां परिपृच्छ्य हितां हितां।

निशि निनाय सखी खचरीवरं खचरलोकमनंगशरीरजं ॥ १९ ॥
प्रतिविबुध्य युवा सहसा ह्युषाम्रुषसि रत्नमयूखचिते गृहे ।
मृदुतले शयने शयितः स्वयं स खलु पश्यति तत्र तु कन्यकां ॥ २० ॥
ऊरुनितंबघनस्तनभारिणीं सुतनुमध्यबलित्रयहारिणीं ।
सुपरिदृश्य सतां सुविहारिणीं चिरमचिंतदनंगजधारिणीं ॥ २१ ॥
हरति केथमिह प्रवरा मनो हरिवधूरुतनागवधूरियं ।
न हि मनुष्यवधूमहमीदृशीं क्वचिदपीह कदाचन दृष्टवान् ॥ २२ ॥
पदमपीदमपूर्वमिवेक्ष्यते नयनहारिसुरेंद्रपदोपमं ।
किमिह सत्यमसत्यमिदं तु किं भ्रमति हि स्वपतां भुवनं मनः ॥ २३ ॥
इति वितर्कमतर्कितदर्शनं सुपरिबोध्यतया तमयोजयत् ।
रहसि कन्यकया कृतकंकणं विदितचित्रपदादिकलेखिका ॥ २४ ॥
अविरहं सुरतामृतपायिनोरमृतपायिवधूवरयोरिव ।
वरवधूवरयोः समये तयोर्विदितवृत्तमिदं विदितं हरेः ॥ २५ ॥

हरिरतो बलशंबमनोभवप्रभृतिभिर्यदुभिः सह संगतैः ।
मदनजानयनं प्रतियातवान् खगकवाणपुरं स विहायसा ॥ २६ ॥
नरतुरंगरथद्विपसंकुले युधि विजित्य स तत्र खगाधिपं ।
तमनिरुद्धमुषासहितं हि तं निजनिवासपुरं हरिरानयत् ॥ २७ ॥
विरहदुःखमपोह्य ततोऽखिलः समनिरुद्धसमागमसंभवं ।
अनुदिनं स्वजनो जनतासखः सुखमरंस्त समस्तसुखाश्रयः ॥ २८ ॥
निजवधूजनललितनेमिना हरिरमा नृपपौरपयोधिना ।
कुसुमितो पवनं स मधौ ययौ विदितरेवतकं रमणेच्छया ॥ २९ ॥
पृथुभिरश्वयुतैर्ययुरीश्वरा रुचिरभूषणनेमिबलाच्युताः ।
धृतसितातपवारणहारिणो वृषभतालवृहद्गरुडध्वजाः ॥ ३० ॥
दशदशार्हकुमारगणावृतः करितुरंगरथैर्मदयन् जनं ।
कुसुमवाणधनुर्मकरध्वजैः पथि रथेन ययौ मकरध्वजः ॥ ३१ ॥

१ 'सुखाश्रययादवः' इति क पुस्तके ।

पुरजनोऽथ यथार्हसुवाहनैर्विविधवस्त्रविभूषणभूषितः ।
हरिपुरस्सरराजवधूजनः पथि जगाम तथा शिविकादिभिः ॥ ३२ ॥
उपचितो जनताभिरसौ गिरिः श्रियमुवाह सहोपवनैस्ततः ।
सुरगिरेः सुरसंगवधूजनैरुपचितस्य चितस्य वनांतरैः ॥ ३३ ॥
समयनीतयथोचितवाहना वनविहारमतो जनताखिला ।
सपदि कर्तुमसावुपचक्रमे गिरिनितंबवनेषु यथायथं ॥ ३४ ॥
सुरभिपुष्परजःसुरभौ श्रमव्यपगमव्यसने श्वसने दिशः ।
वहति शीतलदक्षिणमारुते स्मररतिश्रम एव नृणामभूत् ॥ ३५ ॥
रसितचूतलतारसकोकिला कलरवाः कलकंठतया गिरौ ।
जनमनांस्यपहर्तुमतिक्षमाः परिचुकूजुरिह स्मरदीपिताः ॥ ३६ ॥
मधुलिहां मधुपानजुषां कुलैः कुरुवका बकुलाः सुभगा कृताः ।
द्विपदषट्पदभेदवतां रवैः श्रयति वाश्रयमाश्रयिणो गुणान् ॥ ३७ ॥
करिकटेषु युगच्छदगंधिषु स्थितिमपास्य मदभ्रमराश्रिताः ।

स सहकारसुरद्रुममंजरीरभिनवासु रतिर्महती भवेत् ॥ ३८ ॥
कुसुमभारभृतः प्रणता भृशं प्रणयभंगभियेव नता द्रुमाः।
युवतिहस्तयुता कुसुमोच्चये तनुसुखं तरुणा इव भेजिरे ॥ ३९ ॥
अनतिनम्रतया निजशाखया कथमपि प्रमदाकरलब्धया।
तरुगणः कुसुमग्रहणे भजद्दृढकचग्रहसौख्यमिव प्रभुः ॥ ४० ॥
नवपरिश्रमसौख्यमितस्ततः समनुभूय चिरं वनितासखः।
युवजनः कुसुमोत्करकल्पितेऽभजत तल्पतले सुरतामृतं ॥ ४१ ॥
प्रतिवनं प्रतिगुल्मलतागृहं प्रतितरु प्रतिवापि विहारतः।
विषयसौख्यमसेवत सौख्यवानखिलयादवपौरजनो मधौ ॥ ४२ ॥
द्विगुणिताष्टसहस्रवधूगणैर्बहुगुणीकृतभोगनभोगतः।
सुमधुमाधवमासममानयत्सुभगताधरमाधवचंद्रमाः ॥ ४३ ॥
पतिनिदेशजुषो हरियोषितो मुषितमानवमानसवृत्तयः।
सह विजह्रुरधीश्वरनेमिना तरुलतारमणीयवनेषु ताः ॥ ४४ ॥

वनलताः कुसुमस्तवकोच्चये मधुमदालसमानसलोचनाः।
मुखसुगंधितया मुखरालिभिर्वलयिताऽधृत काचन देवरं ॥ ४५ ॥
उरसि चुंबति तं कठिनस्तनी स्पृशति काचन जिघ्रति तं परा।
मृदुकरेण करे परिगृह्य तं शशिमुखं कुरुतेऽभिमुखं परा ॥ ४६ ॥
विटपकैरपि सालतमालजैर्व्यजनकैरिव काश्चिदवीजयन्।
विदधुरस्य परास्त्ववतंसकश्रियमशोकतरोर्नवपल्लवैः ॥ ४७ ॥
विरचितां कुसुमैर्विविधैः स्रजं निजपरिश्वजनस्पृहया परा।
शिरसि मालयतिस्म गले परा कुरुवकान्यपरा शिरसेऽकिरत् ॥ ४८ ॥
इति वसंतमनंतमसौ युवा हरिवधूभिरमा प्रतिमानयत्।
स ऋतुना तदनंतरभाविना विभुरसेव्यत सेवकवृत्तिना ॥ ४९ ॥
प्रतिदिनं वसति स्म हरिस्तदा खरनिदाघमृतुं प्रतिमानयत्।
स्वधृतिकारिणि रेवतिके गिरौ शिशिरशीकरनिर्झरहारिणि ॥ ५० ॥
हरिवधूनिवहैरुपरोधितः प्रकृतिरागपरागपराङ्मुखः।

शिशिरवारिणि तत्र जलास्पदे जलविहारमसेवत तीर्थकृत् ॥ ५१ ॥
तरणदूरनिमज्जनकक्रियाः सलिलयंत्रकराश्च परस्परं ।
स्वमुखवारिसुसेकवधूजनाः प्रतिविचिक्षिपुरंबु मुखांबुजे ॥ ५२ ॥
विभुमपि प्रति ता व्यकिरन्नपः करतलांजलिभिर्जलयंत्रकैः ।
प्रलघु तेन सता किरतापगाः जलधिनेव मुहुर्विमुखीकृताः ॥ ५३ ॥
अजनि मज्जनकं जनरंजनं न खलु केवलमेवमनीदृशं ।
अपि तु चित्रसमालमनैर्भ्रमत्परिमलैरपि तज्जलरंजनं ॥ ५४ ॥
उदतरत्प्रभुणा तरुणीघटा गतिनिदाघजघर्मघनश्रमा ।
मृदितपुष्करिणी करिणी चिरादिव महाकरिणा करिणी घटा ॥ ५५ ॥
च्युतववंसविशेषकमाकुलं तरलदृष्टि विधूसरिताधरं ।
शिथिलमेखलमिष्टकचग्रहं रत इवाप पुरंध्रिकुलं श्रियं ॥ ५६ ॥
परिजनाहृतवस्त्रविभूषणैस्तदनुभूषिततोषितयोषितः ।

१ यदुनृपस्य मुदा वरयोषितः। इति ख पुस्तके ।

विभुवपुर्वसनैः सममार्जयन् सुपरिधाय परं परिधानकं ॥ ५७ ॥
सपदि मुक्तजलांबरपीलने स्फुटकटाक्षगुणेन विलासिता ।
मधुरिपुस्थिरगौरवभूमिकामतुलजांववतीं समनोदयत् ॥ ५८ ॥
कृतककोपविकारकटाक्षिणी सललितभ्रु विलोक्य तु चक्षुषा ।
विभुमुवाच वचःपथपंडिता ज्वरितजांबवती स्फुटिताधरा ॥ ५९ ॥
भुजगकोटिमणिद्युतिमंडलद्विगुणितांमतिरीटमणिप्रभः ।
समधिरुह्य स कौस्तुभभासुरः स्वहरिवाहमहाशयनं हरिः ॥ ६० ॥
घननिनादततांबरमंबुजं जगति पूरयते च निजांबुमाः । (?)
कठिनशार्ङ्गधनुः सगुणं करोत्यखिलभूपविभुः सुमगांगनः ॥ ६१ ॥
पतिरसौ मम कोऽपि कदाचन प्रति न शास्ति हि वेदृशशासनं ।
तदिह कश्चिदयं किल शास्ति मामपि भवान् सजलांबरपीलने ॥ ६२ ॥
इति निशम्य तु काश्चन तद्वचः प्रतिजगुर्जगतीपतियोषितः ।
किमिति नाथमविक्षिपसि त्रिभूप्रभुमनंतगुणं विगतत्रपे ॥ ६३ ॥

कियदिदं जगतीपतिपौरुषं जगति दुष्करमित्यभिधाय सः।
सरभसं पुरमेत्य नृपालयं द्रुतगतिः प्रविवेश हसन्मुखः॥ ६४॥
चलभुजंगमभोगविभूषणं तदधिरुह्य महाशयनं हरेः।
तदकरोद्विगुणं सगुणं धनुस्तमपि शंखमपूरयदीश्वरं॥ ६५॥
मुखरशंखरवेण दिशां मुखान्यखिलमंबरमंबुनिधिश्च भूः।
निखिलमेतदतीव विपूरितस्फुटदिवस्फुटमाविरभूत्तदा॥ ६६॥
पटुमदा करिणः क्षुभिता निजानभिनवमंजुरितस्तत आश्रयान्।
त्रुटितबंधतुरंगमकोटयः पुरि सहेषितकान्तुरितो भ्रमन्॥ ६७॥
भवनकूटतटान्यपतन् हरिः स्वकमकर्षदसिं क्षुभिता सभा।
पुरजनः प्रलयागमशंकया भयमगात्परमाकुलितस्तदा॥ ६८॥
हरिरवेत्य निजांबुजनिस्वनं त्वरितमेत्य कुमारमवज्ञया।
स्फुरदहीशमहाशयने स्थितं परिनिरीक्ष्य नृपैः सुविसिस्मिये॥ ६९॥
परुषजांबवतीवचसो रुषा स्फुटमवेत्य कुमारकृतं हरिः।

परितुतोष सबंधुरधीशितुर्विकृतिरप्यतितोषकरी तदा ॥ ७० ॥
कृतपरिश्वजनः स्वजनैः स तं समभिपूज्य युवानमगाद्गृहं ।
स्वयुवतिं प्रति दीपितमन्मथं समवबुध्य हरिर्मुमुदेधिकं ॥ ७१ ॥
सविधि याचितभोजसुताकरग्रहणहेतुविबोधितबांधवः ।
नरपतीन् सकलान् सकलत्रकानकृत सन्निहितान् कृतगौरवः ॥ ७२ ॥
विहिततत्समयोचितमज्जनौ परमरूपधरौ धृतमंडनौ ।
पुरि यथास्वमगारमधिष्ठितौ जनमनो हरतां सुवधूवरौ ॥ ७३ ॥
ऋतुरियाय स घर्ममयस्ततो भुवि घनागमकालभयादिव ।
नभसि दीनमदर्शि घनावली मरुपथे पथिकैस्तृषितैरपि ॥ ७४ ॥
प्रथमगर्जितशीतपयःकणा जलमुचां शिखिचातकसौख्यदाः ।
भुवि बभूवुरशेषवियोगिनां द्विगुणतापजुषामतिदुःसहा ॥ ७५ ॥
दवदिवाकरदग्धवनावली—प्रथमनिर्गतवाष्पसुसौरभे ।
अभवतामिव सौहृददर्शने नभसि वर्षति मेघकदंबके ॥ ७६ ॥

चलत्तडित्सबलाकवलाहके सुरपचापवरे शरवर्षिणि ।
क्षितिरभात्सुरगोपशतैश्चिता पतितपांथमनोभिरिवाभितः ॥ ७७ ॥
कुटजनीपकदंबकदंबकैः कुसुमितैः ककुभैः ककुभोऽखिलाः ।
नवशिलींध्रदलैश्च मनोहराः स वनरंध्रगिरिक्षितयो बभुः ॥ ७८ ॥
घनघनाघनगर्जिततर्जिता मुखरबाहुलतावलयारवैः ।
युवतयः प्रियकंठदृढग्रहैर्बिदधुरुग्रभयग्रहनिग्रहं ॥ ७९ ॥
गिरिशिलातपयोगविमोचितास्त्रिविधयोगधरा मुनयो वने ।
शिशिरमारुतवर्षसहक्षमास्तरुलताभिमुखास्त्वभवतस्थिरे ॥ ८० ॥
पृथुरथं चतुरश्वयुतं तदा ध्वजपताकिनमर्करथप्रभं ।
समधिरुह्य सनेमियुवान्वितो नृपसुतैश्चलितो वनभूमिकां ॥ ८१ ॥
मुदितभोजसुतानगरांगना–तृषितनेत्रनिपीतवपुर्जलः ।
विपुलराजपथेन स तैरगात्सकृपयेव मनोहरदर्शनः ॥ ८२ ॥
जलनिधिर्मुखरः स्वतरंगकैर्ललितनर्तनदोर्भिरिवाकुलैः ।

अतितरां विबभौ विभुसन्निधौ विधृतनर्तकनर्तनवत्तदा ॥ ८३ ॥
उपवनं समुपेत्य वनश्रियं सपदि यूनि विलोकयतीश्वरे ।
विततशाखवनद्रुमजातयो विचकुरुः कुसुमांजलिमानताः ॥ ८४ ॥
स खलु पश्यति तत्र तदा वने विविधजातिभृतस्तृणभक्षिणः ।
भयविकंपितमानसगात्रकान् पुरुषरुद्धमृगानतिविह्वलान् ॥ ८५ ॥
लघु निरुध्य रथं सहसारथिं निजनिनादजितांबुदनिस्वनः ।
अपि विदन्नवदन्मृगजातयः किमिह रोधमिमाः प्रतिलंभिताः ॥ ८६ ॥
अकथयत्प्रणतः स कृतांजलिः क्षितिभुजामिह मांसभुजां विभो ।
तव विवाहविधौ मृगरोधनं विविधमांसनिमित्तमनुष्ठितं ॥ ८७ ॥
इति निशम्य निशाम्य मृगव्रजान्प्रकृतिभूतदयास्थितमानसः ।
नृपसुतानभिवीक्ष्य विभुर्जगावभिनिबोधविजृंभणसावधिः ॥ ८८ ॥
गृहमरण्यमरण्यतृणोदकान्यशनपानमतीव निरागसः ।
मृगकुलस्य तथापि वधो नृभिर्जगति पश्यत निर्घृणतां नृणां ॥ ८९ ॥

रणमुखेषु रणार्जितकीर्तयः करितुरंगरथेष्वपि निर्भयान् ।
अभिमुखानभिहंतुमधिष्ठितानभिमुखा प्रहरंति न हीतरान् ॥ ९० ॥
शरभसिंहवनद्विपयूथपान् प्रकुपितान्परिहृत्य विदूरतः ।
मृगशशान् पृथुकान् प्रहरत्यमून् कथमिवात्र पुमान्न विलज्जते ॥ ९१ ॥
चरणकंटकवेधभयाद्धटा विदधते परिधानमुपानहां ।
मृदुमृगान् मृगयासु पुनः स्वयं निशितशस्त्रशतैः प्रहरंति हि ॥ ९२ ॥
विषयसौख्यफलप्रसवोदयः प्रथम एष मृगौघवधोऽधमः ।
अनुभवे पुनरस्य रसप्रदे षडसुकायनिपीडनमभ्यधि ॥ ९३ ॥
विपुलराज्यपदस्थितिमिच्छता सकलसत्त्ववधोऽभिमुखीकृतः ।
दुरितबंधुफलस्तु वधो ध्रुवं कटुफला स्थितिरस्य वरा यतः ॥ ९४ ॥
प्रकृतिदेशरसानुभवस्थितिः प्रचितबंधचतुष्कवशीकृतः ।
भजति दुर्गतिषु क्रमतो भ्रमन् विविधदुःखमयं भवभृद्गणः ॥ ९५ ॥
प्रतिभवं भयदुःखखनीयुतैर्विषमजैः कुसुखैरतिभावितः ।

नरभवेप्यसुमानतिमोहितो न यतते भवदुःखनिवृत्तये ॥ ९६ ॥
भवसुखानि वहिर्विषयोद्भवान्यतिमहांत्यपि संततितान्यपि ।
भवभृतो न भवंति हि तुष्टये जलनिधेरिव सिंधुशतान्यपि ॥ ९७ ॥
खचरदेवनृपामरजन्मजं नृपजयंतविमानभवोद्भवं ।
न हि सुसंभवसागरजीवितः समनुभूतमभून्मम तृप्तये ॥ ९८ ॥
कतिपयाहभवं वत किं पुनः सुलभमप्यतिमानुषमप्यलं ।
भवति तृप्तिकरं मम सांप्रतं सुखमसारमसारतयायुषः ॥ ९९ ॥
अत इदं क्षयि तापकरं सुखं विषयजं प्रविहाय महोद्यमः ।
क्षयविमुक्तमतापजमात्मजं शिवसुखं महता तपसार्जये ॥ १०० ॥
इति तदा मनसा वचसा समं सुपरिचिंतयति ध्रुवमीश्वरे ।
शशिनिभाः खलु पंचमकल्पजास्तुषितवह्न्यरुणार्कपुरस्सराः ॥ १०१ ॥
लघु समेत्य नता नतमौलयः कृतकरांजलयस्त्रिदशा जगुः ।
समय एष विभो भरतेऽधुना त्वमिह वर्तय तीर्थमिति प्रभुं ॥ १०२ ॥

प्रतिविबुद्धपथः स्वयमेव स प्रतिविबोधकदेवगिरोऽस्य ताः।
अनुवदंत्यति ताः पुनरुक्ततां फलति चावसरे पुनरुक्तता ॥ १०३ ॥
लघु विमुच्य मृगान्मृगबांधवो नृपसुतैः प्रविवेश पुरं प्रभुः।
सपदि तत्र नृपासनभूषणं ननृतुरेत्य पुरेव सुरेश्वराः ॥ १०४ ॥
तमुपवेश्य ततःस्नपनासने समुपनीतपयःपयसा सुरैः।
समभिषिच्य विभूष्य सुरोचितस्रगनुलेपनवस्त्रविभूषणैः ॥ १०५ ॥
सुहरिविष्टरवर्तिनमीश्वरं हरियुगान्वितभूपसुरासुराः।
बभुरतीव तदा परितः स्थिताः प्रथममेरुमिवोरुकुलाचलाः ॥ १०६ ॥
जिगमिषुं तपसे जिनमादृता हरिपुरःसरमोजयदुत्तमाः।
अनुनयैर्न निरोद्धुमलं तदा प्रबलसिंहमिवोद्धृतपंजरं ॥ १०७ ॥
पितृपुरःसरबंधुजनं जिनः सुपरिबोध्य जगत्स्थितिकोविद।
धनदशिल्पिकृतां शिविकां पदैरगमदुत्तरकुर्वभिधातकं ॥ १०८ ॥
ध्वजसितातपवारणमंडितां सुमणिभित्तिमुपाहितभक्तिकां।

विविधरूपधरामधिरूढवान् विधिरिवोदयभूधरभित्तिकां ॥ १०९ ॥
क्षितिभृतः क्षितितः शिविकां शिवामुदहरन्प्रथमाः प्रथमं ततः ।
सुरपथे सुरनाथपुरोगमाः सुरवरा सुखमूहुरमूं मुदा ॥ ११० ॥
अभवदूर्द्ध्वमुदारमुदारवः सुरगणैर्विहितो विहितो श्रियां (?)।
श्रुतिमथोमुखरो मुखरोधितो व्यधिमुवो जगतो जगतोऽरुणत् ॥ १११ ॥
ननृतुरप्सरसः सहसा रसैः सशिखमप्सरसः सहसा रसैः ।
यमभिसामरसं घनतां गतं तमिव शांतरसं घनतां गतं ॥ ११२ ॥
गिरिमितः सहितामरसेनया जिनवरः सहितामरसेनया ।
समरुचिर्गिरिराड्रुचमूर्जयंत इति योऽस्ति हि पापचमूर्जयन् ॥ ११३ ॥
रविनिशाकरयोरुभयांतयोर्विचरतोस्तिमिरोरुभयांतयोः ।
दिवि न यत्र महात्मनिदर्शनं किमिह तुंगतयास्य निदर्शनं ॥ ११४ ॥
मुखरनिर्झरपातपतत्रिभिर्मुखरसप्रदचूतलताफलैः ।
कुसुमनिर्झरपादपजातिभिः कुसुमनोरहितोऽतिविराजते ॥ ११५ ॥

मणिसुवर्णसुवर्णधराधरे विविधधातुरसौषधराधरे ।
शिखररंजितकिंनरदेवके वनभुवा हृतधीनरदेवके ॥ ११६ ॥
उपवने वृजिने शिविकामतः स्वमतमाप्य जिने शिविकामतः ।
द्रवति यद्रहितो हरिणां हरिः स निदधे सहितो हरिणा हरिः ॥ ११७ ॥
इह जहौ वसुधाशिविकासनं पुरुतपोभि सुधाशिविकासनं ।
नमिसमः स शिलातलमायया–वपगमार्थमिलातलमायया ॥ ११८ ॥
स्रजमितोथ सवस्त्रमलंकृतीरपगमय्य सवस्त्रमलंकृती ।
प्रविलसत्कमलासनधीरतः प्रियवधूकमलासनधीरतः ॥ ११९ ॥
मृदुकरांगुलिभीरुचिरासितान् घनकचानतिभीरुचिरासितान् ।
व्युदहरद्दृढपंचपरिग्रहैः स रहितः सरूपं च परिग्रहैः ॥ १२० ॥
नृपसहस्रममा नमिना तपः श्रितमिवैनममा नमिना तपः ।
तपति नातपवारणवारितः प्रपतदातपवारणवारितः ॥ १२१ ॥
निकचितो कचसंपदमात्मना प्रकुटिलांगतकोपदमात्मना ।

व्यपनयन्निव शल्यपरंपरां नृपगणः श्रियमैत्स्वपरंपरां ॥ १२२ ॥
मणिगणांशुलसत्पटलीकृतान् जिनकचा कुलिशी पटलीकृतान् ।
अकृत दुग्धमये स महोदधौ वपुरलं समये समहोदधौ ॥ १२३ ॥
समवतारमिनोंगिकृपावनं स्वकृतवस्त्रमयस्य सुपावनं ।
सपदि यत्र तदत्र यथाश्रुतं जगति तीर्थमभूच्च यथाश्रुतं ॥ १२४ ॥
मतिषु बोधचतुष्कविराजितस्त्रिदशकोटिमहाकविराजितः ।
विधुरिवोपगतग्रहतारकः प्रभुरभादपरिग्रहतारकः ॥ १२५ ॥
नभसि शुक्लतुरीयतया तिथौ क्रमभृतीशिनि षष्ठतया तिथौ ।
विहितनिष्क्रमणे नृसुराऽसुराः सुविदधुर्महमेषु सुरासुराः ॥ १२६ ॥
मदनभंगकृतप्रभवे भवे भवभृतां शरणाय हिते हिते ।
हतरुषे वितृषे मुनये नये स्थितवते नम इत्यसुरासुराः ॥ १२७ ॥
स्तवनपूर्वममी च समंततः प्रणतिमेत्य नृपाश्च समं ततः ।
स्वहृदयस्थतपस्थितनेमयः स्वपदमीयुररिस्थिरनेमयः ॥ १२८ ॥

पुरि वितीर्य नु तत्र जिनायताः सुपरमाश्रमथावृजिनायताः ।
प्रवरदत्त इतो महिमा हिताः सुरगणैः सुमहामहिमाहिता ॥ १२९ ॥
पथि तपस्यति तत्र कृते हिते नृपसुतामनसि त्रपिते हिते ।
न्यभृत तापमपारवियोगिनी कुमुदिनीव दिवारवियोगिनी ॥ १३० ॥
प्रबलशोकवशा प्रविलापिनी शिथिलभूषणकेशकलापिनी ।
परिजनेन वृता प्ररुरोद सा करुणशब्दततात्पुरुरोदसा ॥ १३१ ॥
विधिमुपालभते वरहारिणं वरवधूर्वरमप्यतिहारिणं ।
जघनपीनपयोधरहारिणी नयनवारिकणाविलहारिणी ॥ १३२ ॥
शमितशोकभरा वचनैर्हितैर्गुरुजनस्य तपोवचनैर्हितैः ।
मतिमधत्त तपस्यनपायिनि प्रशमसौख्यतपस्यनपायिनि ॥ १३३ ॥
राजीमत्याश्चारुराजीवलक्ष्मी राजीमत्याः पाणिपादस्य कान्त्या ।
तापस्यांतं ज्ञातयो वेत्य वृत्तं तापस्यांतं मानसस्यापुरंते ॥ १३४ ॥
स्त्रीणामाद्यं पारतंत्र्यं विदुःखं दौर्लभ्यंमूर्भर्तुरंगं विदुःखं ।

सापत्न्यं वा पुष्पवत्त्वं च वाध्यं वैधव्ये वा सूतिरोगेऽपि वाध्यं ॥ १३५ ॥
दौर्भाग्ये वा भाग्यहीने स्वनाथे स्त्रीगर्भत्वे मत्रिपत्ये स्वनाथे
गर्भश्रावे गर्भभारे वियोगे जीवद्भर्त्रा मर्मरोगाभियोगे ॥ १३६ ॥
स्यान्मिथ्यात्वं स्त्रीत्वहेतुः स्वतंत्रं वस्त्रस्येयातानतिर्यक् स्वतंत्रं
स्त्रीदुःखानामंतकृद्भव्यसत्वैर्जैनी दृष्टिः सेव्यतां सेव्यसत्वैः ॥ १३७ ॥

इति "अरिष्टनेमिपुराणसंग्रहे" हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्निष्क्रमणकल्याण-
वर्णनो नाम पंचपचाशः सर्गः ।

षट्पंचाशः सर्गः ।

अथ नेमिमुनींद्रोऽपि रत्नत्रयतपःश्रिया । व्रतगुप्तिसमित्युच्चै रेजे सोढपरीषहः ॥ १ ॥
अप्रशस्तमपोह्यासावार्तं रौद्रयं च शुक्लधीः । ध्यानं धर्म्यं च शुक्लं च प्रशस्तं ध्यातुमुद्यतः॥२॥
ध्यानमेकाग्रचिंताया घनसंहननस्य हि । निरोधोंतर्मुहूर्तं स्याच्चिंता स्यादास्थिरं मनः ॥३॥
तत्रार्तिरर्दनं वाधा ह्यार्तं तत्रभवं पुनः । सुकृष्णनीलकापोतलेश्याबलसमुद्भवं ॥४॥

लक्षणं द्विविधं तस्य बाह्यमाक्रंदनादिकं । परश्रीविस्मयं प्राप्तं विषयासंजनादिकं ॥५॥
तदात्मनः स्वयं वेद्यं परेषामानुमानिकं । अभ्यंतरं चतुर्भेदं स्वलक्षणसमन्वितं ॥६॥
विषयस्यामनोज्ञस्य यदनुत्पत्तिचिंतनं । उत्पन्नस्य वियोगाय संकल्पाध्यवसायकं ॥७॥
मनोज्ञविप्रयोगस्य यत्रानुत्पत्तिचिंतनं । उत्पन्नस्यांतचिंता च चातुर्विध्यमितीरितं ॥८॥
तत्रामनोज्ञस्य दुःखस्य साधनं चेतनादिकं । मर्त्यादि विषशस्त्रादि बाह्यमेतदुदारितं ॥९॥
आध्यात्मिकं तु वातादिप्रकोपजमनेकधा । कुक्ष्याक्षिदंतशूलादिशारीरमतिदुस्सहं ॥१०॥
शोकारतिभयोद्वेगविषादविषदूषितं । जुगुप्सादौर्मनस्यादि मानसं दुःखसाधनं ॥११॥
सर्वस्यास्यामनोज्ञस्य माभूदुत्पत्तिरित्यलं । चिंताप्रबंध आद्यं स्यादार्तध्यानमलाविलं ॥१२॥
उत्पन्नस्यास्य चाभावः कथं मे स्यादितीदृशं । संकल्पाध्यवसानं तु द्वितीयं तत्प्रकीर्तितं ॥१३॥
पशुपुत्रकलत्रादिमनोज्ञं सुखसाधनं । बाह्यं स्याद्धनधान्यादि सचेतनमचेतनं ॥१४॥
आध्यात्मिकं च पित्तादि साम्यादारोग्यसांगिकं। मानसं सौमनस्यादि रत्यशोकाभयादिकं॥१५॥
विप्रयोगश्च मे माभूदैहिकामुत्रकस्य तु । मनोज्ञस्येति संकल्पस्तृतीयं चार्तमुच्यते ॥१६॥
मनोज्ञविप्रयोगस्य पूर्वोत्पन्नस्य यत्पुनः । अभावेऽध्यवसानं तु तुर्यमार्तमनोज्ञजं ॥१७॥

अधिष्ठानं प्रमादोस्य तिर्यग्गतिफलस्य हि । परोक्षं मिश्रको भावः षड्गुणस्थानभूमिकं ॥१८॥
रुद्रः क्रूराशयः प्राणी रौद्रं तत्रभवं ततः । हिंसासंरक्षणस्तेयमृषानंदैश्चतुर्विधं ॥१९॥
आनंदोभिरुचिर्येषां हिंसादिषु यथायथं । हिंसानंदादयस्तेतो निरुच्यंते समासतः ॥२०॥
लक्षणं द्विविधं तत्र पारुष्याक्रोशनादिकं । स्वसंवेद्यं परैर्मेयं बाह्यमाध्यात्मिकं पुनः ॥२१॥
स्यात्संरंभसमारंभारंभलक्षणमात्मना । हिंसायां रंजनं तीव्रं हिंसानंदं तु नंदितं ॥२२॥
श्रद्धये परलोकस्य सविकल्पितयुक्तिभिः । विप्रलंभनसंकल्पो मृषानंदं सुनंदितं ॥२३॥
प्रतीक्षया प्रमादस्य परस्वहरणं प्रति । प्रसह्य हरणं ध्यानं स्तेयानंदमुदीरितं ॥२४॥
स्वपरिग्रहभेदे तु चेतनाचेतनात्मनि । संरक्षणाभिधानं तु स्वस्वामित्वाभिचिंतनं ॥२५॥
सुकृष्णनीलकापोतबलाधानं प्रमादगं । अधःपंचगुणस्थानं रौद्रध्यानचतुष्टयं ॥२६॥
अंतर्मुहूर्तकालं तु दुर्धरत्वादतः परं । क्षयोपशमभावस्तु परोक्षज्ञानभावतः ॥२७॥
भावलेश्याकषायस्वातंत्र्यादौदयिकोऽपि वा । उत्तरं फलमेतस्य नारकी गतिरुच्यते ॥२८॥
परिहृत्यार्तरौद्रे द्वे पापध्याने मुमुक्षवः । धर्म्यशुक्लधियः संतु शुद्धभिक्षादिभिक्षवः ॥२९॥
एकांते प्रासुके क्षेत्रे क्षुद्रोपद्रववर्जिते । दिव्यं संहननं द्रव्यं कालोत्युष्णादिवर्जितः ॥३०॥

भावशुद्धिरपि श्रेष्ठा यदा भवति योगिनः। आरभेत तदा ध्यानं सर्वद्वंद्वसहः स हि ॥३१॥
गंभीरः स्तंभमूर्तिः सन्पर्यंकासनबंधनः। नात्युन्मीलनिमीलश्च दन्तदंताग्रदंतकः ॥३२॥
निवृत्तकरणग्रामव्यापारः श्रुतपारगः। मंदं मंदं प्रवृत्तांतःप्राणापानादिसंचरः ॥३३॥
नाभेरूर्द्ध्वं मनोवृत्तिं मूर्ध्नि वा हृदि वालके। मुमुक्षुः प्रणिधायाक्षं ध्यायेद्ध्यानद्वयं हितं ॥३४॥
बाह्याध्यात्मिकभावानां याथात्म्यं धर्म उच्यते। तद्धर्मादनपेतं यद्धर्म्यं तद्ध्यानमुच्यते ॥३५॥
लक्षणं द्विविधं तस्य बाह्याध्यात्मिकभेदतः। सूत्रार्थमार्गणं शीलं गुणमालानुरागिता ॥३६॥
भंजाजृंभाक्षितोद्गारप्राणापानादिमंदता। निभृतागव्रतात्मत्वं तत्र बाह्यं प्रकीर्तितं ॥३७॥
दशधाध्यात्मिकं धर्म्यमपायविचयादिकं। अपायो रहोविचयो मीमांसास्तीति तत्तथा ॥३८॥
संसारहेतवः प्रायस्त्रियोगानां प्रवृत्तयः। अपायो वर्जनं तासां स मे स्यात्कथमित्यलं ॥३९॥
चिंताप्रबंधसंबंधः शुभलेश्यानुरंजितः। अपायविचयाख्यं तत्प्रथमं धर्म्यमीप्सितं ॥४०॥
उपायविचयं तासां पुण्यानामात्मसात्क्रिया। उपायः स कथं मे स्यादिति संकल्पसंततिः ॥४१॥
अनादिनिधना जीवा द्रव्यार्थादन्यथान्यथा। असंख्येयप्रदेशास्ते स्वोपयोगत्वलक्षणाः ॥४२॥
अचेतनोपकरणाः स्वकृतोचितभोगिनः। इत्यादिचेतनाध्यानं यज्जीवविचयं हि तत् ॥४३॥

द्रव्याणामपि जीवानां धर्माधर्मादिसंज्ञिनां । स्वभावचिंतनं धर्म्यमजीवविचयं मतं ॥४४॥
यच्चतुर्विधबंधस्य कर्मणोऽष्टविधस्य तु । विपाकचिंतनं धर्म्यं विपाकविचयं विदुः ॥४५॥
शरीरमशुचिर्भोगा किंपाकफलपाकिनः । विरागबुद्धिरित्यादि विरागविचयं स्मृतं ॥४६॥
प्रेत्यभावो भवोमीषां चतुर्गतिषु देहिनां । दुःखात्मेत्यादिचिंता तु भावादिविचयं पुनः ॥४७॥
सुप्रतिष्ठितमाकाशमाकाशे वलयत्रयं । संस्थानध्यानमित्यादि संस्थानविचयं स्थितं ॥४८॥
अतींद्रियेषु भावेषु बंधमोक्षादिषु स्फुटं । जिनाज्ञा निश्चयध्यानमाज्ञाविचयमीरितं ॥४९॥
तर्कानुसारिणः पुंसः स्याद्वादप्रक्रियाश्रयात् । सन्मार्गाश्रयणध्यानं यद्धेतुविचयं तु तत् ॥५०॥
अप्रमत्तगुणस्थानभूमिकं ह्यप्रमादजं । पीतपद्मलसल्लेश्याबलाधानमिहाखिलं ॥५१॥
कालभावविकल्पस्थं धर्म्यध्यानं दशांतरं । स्वर्गापवर्गफलदं ध्यातव्यं ध्यानतत्परैः ॥५२॥
शुक्लं शुचित्वसंबंधाच्छौचं दोषाद्यपोढता । शुक्लं परमशुक्लं च प्रत्येकं ते द्विधा मते ॥५३॥
सवीचारविवीचारपृथक्त्वैक्यवितर्कके । सूक्ष्मोच्छिन्नक्रियापूर्वप्रतिपातिनिवर्तके ॥५४॥
लक्षणं द्विविधं बाह्यं जंभास्तंभाद्यपोहनं । प्राणापानप्रचारस्याप्युत्पन्नाप्रवृत्यतः ॥५५॥

१ व्यक्तमुच्छिन्नाप्रवृष्यतः इति ख पुस्तके ।

परेषामनुमेयं स्यात्स्वसंवेद्यं यदात्मनः। आध्यात्मिकं तयोरेव लक्षणं प्रतिपद्यते ॥५६॥
पृथग्भावः पृथक्त्वं हि नानात्वमभिधीयते। वितर्को द्वादशांगं तु श्रुतज्ञानमनाविलं ॥५७॥
अर्थव्यंजनयोगानां वीचारः संक्रमः क्रमात्। ध्येयोऽर्थो व्यंजनं शब्दो योगो वागादिलक्षणः॥५८॥
पृथक्त्वेन वितर्कस्य वीचारार्थादिषु क्रमात्। यस्मिन्नास्ति तथोक्तं तत्प्रथमं शुक्लमिष्यते ॥५९॥
तद्यथा पूर्वविद्ध्यायन्नविक्षिप्तमना मुनिः। द्रव्याणुं चापि भावाणुमेकमालंब्य संवृतः ॥६०॥
अतीक्ष्णेनापि शस्त्रेण शनैश्छिदन्निव द्रुमं। मोहस्योपशमं कुर्वन् क्षयं वा बहुनिर्जरः ॥६१॥
द्रव्याद्द्रव्यांतरं याति पर्यायं चान्यपर्ययात्। व्यंजनाद् व्यंजनं योगाद्योगांतरमुपैति यत् ॥६२॥
शुक्लं तत्प्रथमं शुक्लतरलेश्याबलाश्रयं। श्रेणीद्वयगुणस्थानं क्षयोपशमभावकं ॥६३॥
सर्वपूर्वधरस्येदमंतर्मौहूर्तिकस्थिति। श्रेणीद्वयवशाद्द्वेधं स्वर्गमोक्षफलप्रदं ॥६४॥
एकत्वेन वितर्कोऽस्ति यस्मिन्वीचारवर्जिते। तदेकत्ववितर्कावीचारं शुक्लं तदुत्तरं ॥६५॥
एकमेवाणुपर्यायं विषमीकृत्य वर्तते। मोहादिघातघातीदं पूर्विणः स कृती ततः ॥६६॥
ज्ञानदर्शनसम्यक्त्ववीर्यचारित्रपूर्वकैः। भासते क्षायिकैर्भावैस्तीर्थकृद्वान्यकेवली ॥६७॥
सोऽर्चनीयोऽभिगम्यश्च त्रिभुवां परमेश्वरः। देशोनां विरहत्येकां पूर्वकोटीं प्रकर्षतः ॥६८॥

अंतर्मुहूर्तशेषायुः स यदा भवतीश्वरः। तत्तुल्यस्थितिवेद्यादित्रितयश्च तदा पुनः ॥६९॥
समस्तं वाङ्मनोयोगं काययोगं च बादरं। प्रहाप्यालंब्य सूक्ष्मं तु काययोगं स्वभावतः ॥७०॥
तृतीयं शुक्लसामान्यात्प्रथमं तु विशेषतः। सूक्ष्मक्रियाप्रतीपाति ध्यानमास्कंतुमर्हति ॥७१॥
सोंतर्मुहूर्तशेषायुरधिकान्यत्रिकस्थितः। यदा भवति योगीशस्तदा स्वाभाव्यतः स्वयं ॥७२॥
स्वोपयोगविशेषस्य विशिष्टकरणस्य हि। सामायिकसहायस्य महासंवरसंगते ॥७३॥
शक्तस्य शातने शेणकर्मणां परिपाचने। दंडं चापि कपाटं च प्रतरं लोकपूरणं ॥७४॥
चतुर्भिःसमयैःकृत्वा स्वप्रदेशविसर्पणात्। तावद्भिरेव संहृत्य कृतकर्मसमस्थितिः ॥७५॥
पूर्वकायप्रमाणः सन् भूत्वा निष्ठापयन्निदं। प्रथमं शुक्लमध्यास्ते द्वितीयं परमं पुनः ॥७६॥
स्वप्रदेशपरिस्पंदयोगप्राणादिकर्मणां। समुच्छिन्नतयोक्तं तत्समुच्छिन्नक्रियाख्यया ॥७७॥
सर्वबंधास्रवाणां हि निरोधस्तत्र यत्नतः। अयोगस्य यथाख्यातचारित्रं मोक्षसाधनं ॥७८॥
सोयोगकेवली ह्यात्मा प्रध्वस्ताखिलकर्मकः। जात्यहेमवदुद्भूतचेतनाशक्तिभास्वरः ॥७९॥
सिद्धयन्निहैव संसिद्धस्वोर्द्धव्रज्यास्वभावतः। पूर्वप्रयोगासंगत्वबंधच्छेदगतिभ्रमैः ॥८०॥
अग्नेः शिखावदाविद्धचक्रालांबुवदुत्पतन्। एरंडबीजवच्चोर्द्धं लोकं समयतो व्रजेत् ॥८१॥

धर्मास्तिकायाभावाच्च लोकांतमतिगच्छति । धाम्नि संतिष्ठते नाग्रे सोनंतसुखसंततिः ॥८२॥
चतुर्वर्गे हि देहिभ्यो मोक्षोतिशयतो हितः । स चोक्तादेव सद्ध्यातात्स्वकर्मक्षयलक्षणः॥८३॥
कर्मप्रकृतभावो हि मोक्षोनंतसुखावहः । सयत्नायत्नसाध्यत्वाद्द्विधा भवति देहिनः ॥८४॥
चरमोत्तमदेहस्य प्रागसत्वादयत्नतः गत्यंतरायुषामेषामभावो भवतीवरः ॥८५॥
उच्यते तु गुणस्थानात्सम्यग्दृष्टेरसंयतान् । समारभ्याप्रमतांते क्वचिदेकत्र मानुषः ॥८६॥
मोहस्य प्रकृतिः सप्त क्षपयित्वा विशुद्धधीः सम्यग्दर्शनमर्कोभं क्षायिकं प्रतिपद्यते ॥८७॥
आरोढा क्षपकश्रेणीमप्रमत्तः प्रकृत्य सः । अथाप्रवृत्तकरणमपूर्वकरणत्वकृत्[1] ॥८८॥
अपूर्वकरणो भूत्वा स पापप्रकृतिस्थितिं । तनूकृत्यानुभागं चानिवृत्तिकरणाश्रितः ॥८९॥
अनिवृत्तिगुणस्थाने क्षपकव्यपदेशभाक् । शुक्लध्यानानलाक्रांतकर्मप्रकृतिकक्षकः ॥९०॥
सन्निद्रानिद्राप्रचला–प्रचलास्त्यानगृद्धिभिः । दुर्गती सानुपूर्वीके पूर्वो जातिचतुष्टयीं ॥९१॥
सस्थावरातपोद्योतसूक्ष्मसाधारणाभिधाः । सहैव क्षपयत्येताः षोडश प्रकृतीः कृती ॥९२॥
अत्रैवांतः परं स्थानं कषायाष्टकमस्यति । ततो नपुंसकं वेदं स्त्रीवेदं च ततः परं ॥९३॥

१ श्वाभ्रतिर्यचदेवायुस्त्रयं क्षपयते सुधीः अयमधिकः पाठः क पुस्तके ।

पुंवेदे नोकषायाणां षट्कं प्रक्षिप्य वै सह । निरस्याक्षिप्य पुंवेदं क्रोधसंजलनानले ॥९४॥
मानसंज्वलने तं च मायासंज्वलने त्वमुं । लोभसंज्वलने त्वेनं निक्षिप्य दहति क्रमात् ॥९५॥
लोभसंज्वलनं सूक्ष्मं कृत्वा सूक्ष्मकषायगः । लोभसंज्वलनस्यांतमंते कृत्वा विमोहकं ॥९६
भूत्वा क्षीणकषायस्योपांतिमे समयेऽस्यति । निद्रां च प्रचलामंत्ये ज्ञानावृत्यंतराययोः ॥९७॥
प्रत्येकं प्रकृतीः पंच चतस्रो दर्शनावृतेः । दग्ध्वैकत्ववितर्काग्निः सयोगः केवली भवेत् ॥९८॥
सद्वेद्यं चाप्यसद्वेद्यं नामदेवगतिश्रुतिः । औदारिकशरीरादिनाम्ना पंचतयं तथा ॥९९॥
संघातपंचकं चापि पुनर्बंधकपंचकं । वैक्रियोद्वारिकाहारकायांगोपांगकत्रिकं ॥१००॥
संस्थाननामषट्कं च षट्संहनननाम च । वर्णपंचकनामापि रसपंचकनाम च ॥१०१॥
अष्टधा स्पर्शनामापि गंधनाम पुनर्द्विधा । तत्प्रयोग्यानुपूर्वी च नामदेवगतेः पुनः ॥१०२॥
नामागुरुलघूच्छ्वासपरघातोपघातकं । प्रशस्ताशस्तभेदस्थं विहायोगति नाम च ॥१०३॥
प्रत्येककायापर्याप्तस्थिरास्थिरशुभाशुभं । तथा दुर्भगनामापि पुनः सुस्वरदुस्वरं ॥१०४॥
अनादेययशःकीर्तिनाम निर्माणनाम च । प्रकृतीर्द्वासप्ततिर्नीचैर्गोत्रेण च सुपिंडिताः ॥१०५॥
सयोगकेवली स्थानमतीत्य पदमास्थितः । अयोगकेवली हंति स्वोपांत्यसमयेहतः ॥१०६॥

वेद्यमकं मनुष्यायुर्मनुष्यगतिरेव च । तत्प्रायोग्यानुपूर्वी च जातिः पंचेंद्रियाभिधा ॥१०७॥
त्रसबादरपर्याप्तसुभगादेयसंज्ञिका । उच्चैर्गोत्रं यशःकीर्तिस्तत्तीर्थंकरनाम च ॥१०८॥
एतास्त्रयोदशख्याताः प्रकृतीः प्रकृतिस्थिरः । अयोगकेवली हंति चरमे समये ततः ॥१०९॥
सद्वृत्त्वोच्चारणवृत्तीः पंच स्थित्वा स्वकालतः । सिद्धिः सादिरनंता स्यादनंतगुणसन्निधिः ॥११०॥
धर्म्यध्यानप्रकारं स ध्यायन्नेमिर्यथोचितं । षट्पंचाशदहोरात्रकालं सुतपसानयत् ॥१११॥
पूर्वाह्ने स्वयुजस्यातः शुक्लप्रतिपदि प्रभुः । शुक्लध्यानाग्निना दग्ध्वा चतुर्घातिमहावनं ॥११२॥
अनंतकेवलज्ञानदर्शनादिचतुष्टयं । त्रैलोक्येंद्रासनाकंपि संप्रापत्परदुर्लभं ॥११३॥

घंटारावोरुसिंहस्फुटपटहरवोदारशंखस्वनैस्तां
जैनीं कैवल्यलब्धिं सकलसुरगणा द्राग्विदित्वा यथास्वं
इंद्राः सिंहासनोच्चैर्मुकुटविचलनैः स्वान् प्रयुंज्यावधीन् स्वैः
प्राप्तानीकैः सहायुः क्षुभितसलिलधिव्रातवद्भिस्त्रिलोक्याः ॥११४॥

आपूर्यावार्यवेगैर्गगनजलनिधिं वाहनानां समूहैः
सप्तानीकैरनीकैस्त्रिदशपतिगणस्तं परीत्य प्रपेदे

प्रोच्चैर्मूर्धावलेपं गिरिपतिमधिपस्नानकल्याणमात्रं
भूयः कल्याणकंठे गुणभरणगुणादूर्जयंतं जयंतं ॥११५॥
मंदारादिद्रुमाणां सुरभितककुभां पुष्पवृष्ट्या सुराणां
दिव्यस्त्रीगीतमूर्छन् मुखरितभुवनैर्दुंदुभीनां निनादैः
मेत्रा लोकस्य शोकं फलकुसुमभृताशोकशाखाभृता च
श्वेतच्छत्रत्रयेण त्रिभुवनविभुताचिह्नभूतोरुभूम्ना ॥११६॥
हंसालीपातलीलैर्धवलितखचलैश्चामराणां सहस्रैः
भाभिर्भामंडलेन प्रतिहतविकसद्भानुभामंडलेन
नानारत्नौघरोचिर्जनितसुरधनुर्हेमसिंहासनेन
भाषाभेदस्फुरंत्या स्फुरणविरहितस्वाधरोद्भाषया च ॥११७॥
अष्टाभिः प्रातिहार्यैरतिशमितपरैः स्वैर्विशेषैरशेषैः
कर्मापायस्वभावत्रिदिवपतिभवैस्तैश्चतुस्त्रिंशता च

त्रैलोक्योद्धारणाय प्रकृतधृतधृतिर्नेमिनाथो जगत्यां
द्वाविंशो हारिवंशो गुणगणवृहतासीर्थकृत्प्रादुरासीत् ॥११८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्नेमिनाथकेवलज्ञानवर्णनो नाम षट्पंचाशः सर्गः।

सप्तपंचाशः सर्गः।

समवादि समापादि शरणं शरणं क्षणात्। त्रिजगत्प्राणिनां देवैः पाकशासनशासनात् ॥१॥
सर्वो द्वारवतीलोको यदुभोजकुलांबुधिः। आरुरोह गिरिं भूत्या रामकेशवपूर्वकः ॥२॥
अवलोक्य जिनेंद्रस्य शरणं समवादिकं। बहिरंतःपरं प्रापद्विस्मयं जनसागरः ॥३॥
यादृशी समवस्थानभूमिस्तीर्थकृतामिह। तादृशी श्रोतृलोकस्य समासेन निगद्यते ॥४॥
भूमेः स्वभावभूताया दिव्यारत्निप्रमोच्छ्रितिः। भूमिस्तावत्समुच्छ्राया कल्पभूमिरुपर्यतः ॥५॥
स्वर्गश्रियं श्रिया जेत्री चतुरस्रा सुखप्रदा। सैकांतद्वादशाद्यात्मयोजना कालदेशतः ॥६॥
उच्चैर्गंधकुटीदेशकर्णिका पद्ममूर्तिवत्। भाति भूमिरसौ बाह्यभूश्रीपत्रपरंपरा ॥७॥
इंद्रनीलमयी भूमिर्बाह्यादर्शतलोपमा। भूयसामपि भूयस्त्वं विशतां विदधाति या ॥८॥

दूरादिंद्रादयो यस्यामानयंति नमस्यया । मा नाह्लास्त्रिजगन्नाथं साभूर्मानांगणाभिधा ॥९॥
महादिक्षु चतस्रोऽस्या गव्यूतिद्वयविस्तृताः । वीथ्यस्तत्मध्यगानीयुर्मानपीठान्पुरःप्रभाः ॥१०॥
स्वोत्सेधत्रिगुणात्मीयविस्तराण्युक्तिविस्तरैः । सौवर्णरत्नमूर्तीनि मान्यंते नृसुरासुरैः ॥११॥
नृसुरा मानवस्तंभानास्थायार्चंति यत्र भूः । सा त्वास्थानांगणाभिख्या ज्वलल्लौहितरत्नभा ॥१२॥
मध्ये वापि चतस्रोऽत्र त्रिभंगा हैमपीठिकाः । भांत्युरोद्वयसोच्छ्राया वृत्ता क्रोशार्धविस्तृता ॥१३॥
चापोनपीठिका व्यासा योजनान्यधिकोच्छ्रयाः । शुंभिता मानवस्तंभाश्चत्वारः पीठिकास्वधि १४
द्विषड्योजनदृश्यास्ते पालिकस्यांबुजस्थिता । वज्रस्फटिकवैडूर्यमूलमध्याग्रविग्रहा ॥१५॥
द्विसहस्रत्रयो नानारत्नरश्मिविमिश्रिताः । चतुर्दिक्षूर्ध्वसिद्धार्चाः रत्नभूतोरुपालिका ॥१६॥
पालिकामुखपद्मस्थतपनीयस्फुरद्घटाः । घटस्यावद्धफलका श्रीभामामिषवाश्रियः ॥१७॥
श्रीचूलारत्नभाचक्रभास्य विंशतियोजनाः । साभिमानमनोदेवमानवस्तंभना बभुः ॥१८॥
ततः सरांसि चत्वारः शुभदंभोजभांज्यलं । हंससारसचक्राह्वारावरम्यककुप्स्वलं ॥१९॥
अतो वज्रमयो वप्रो वक्ष्यो दघ्नो घनद्युतिः । द्विगुणीभूतविस्तारः परीयाय समंततः ॥२०॥
परीत्य परिखातोऽस्थाज्जलप्रभमणिक्षितिः । जानुदघ्नांबुगंभीरा कृष्णसाटीव भूस्त्रियः ॥२१॥

हेमांभोजरजःपुंजा पिंजरीभावितांभसि। स्वच्छायां दिङ्मुखान्यस्यां सांगरागाणि चात्यभान्२२
वल्लीवनमतोप्यंतःपरीत्य स्थितमित्यभात् । कुसुमामादिता सांतं शंकुतालिकुलाकुलं ॥२३॥
प्राकारोंतः परीयाय कनत्कनकभास्वरः । विजयादिमहद्रौप्यचतुर्गोपुरमंडितः ॥२४॥
तत्र दौवारिका भौमा कटकादिविभूषणाः । प्रभावोन्सारितायोग्या मुद्गरोद्धतपाणयः ॥२५॥
मणितोरणपार्श्वेषु गोपुराणां स्फुरत्त्विषां । छत्रचामरभृंगारपूर्वाष्टशतकान्यभान् ॥२६॥
तद्गोपुरपुरो भांति प्रेक्षाशालास्त्रिभूमिकाः । द्विर्द्विर्वीथ्यंतयोर्नृत्यद्द्वात्रिंशत्सुरकन्यकाः ॥२७॥
भात्यशोकवनं प्राच्यां सप्तपर्णवनं त्वपाक् । प्रतीच्यां चंपकवनमुदीच्यामाम्रसद्वनं ॥२८॥
ससिद्धप्रतिमाशोकः सप्तपर्णश्च चंपकं । तथैवाम्रतरुस्तेषां वनानामधिपाः क्रमात् ॥२९॥
त्रिकोणाः मंडलाकाराश्चतुरस्राश्च वापिकाः । वनेषु रत्नतद्योताः शुद्धस्फटिकभूमयः ॥३०॥
विश्वाः सतोरणाः लक्ष्यास्तीर्थ्यास्तूच्चैर्वरांडकैः । मंडितागाहमानेष्वगाधाद्व्द्विक्रोशविस्तृताः ३१॥
नंदा नंदोत्तरानंदानंदवत्यभिनंदिनी । नंदघोषेत्यमूर्वाप्यः षडशोकवनास्थिताः ॥३२॥
विजयाभिजया जैत्री वैजयंत्यपराजिताः । जयोत्तरेति षड्वाप्यः सप्तपर्णवनाश्रिताः ॥३३॥
कुमुदा नलिनी पद्मा पुष्करा विकचोत्पला । कमलेत्यपि षड्वाप्यश्चंपकाख्यवने मताः ॥३४॥

प्रभासा भास्वती भासा सुप्रभा भानुमालिनी । स्वयंप्रभेति षड्वाप्यः सहकारवनोदिताः ॥३५॥
उदयो विजयः प्रीतिः ख्यातिश्चेति क्रमोदितैः। फलैः पूर्वादयो वाप्यः पूज्यंते तत्फलार्थिभिः॥३६॥
तद्वापीपुष्पसंदोहं यथोक्तं प्राप्य भाक्तिकाः । आस्तूपं क्रमशोऽभ्यर्च्य विशंति क्रमकोविदा ॥३७।
अंतरेणोदयं प्रीतिं चामितास्त्रिभुवोध्वसु । भांति नाटकशालास्ता हाटकोज्ज्वलमूर्तयः ॥३८॥
अध्यर्धक्रोशविस्तारा द्वात्रिंशद्भक्तिभाजिताः । तद्भुवोरत्ननिर्माणाः स्वच्छस्फटिकभित्तयः ॥३९॥
तासु भक्त्या प्रनृत्यंति द्वात्रिंशज्ज्योतिषां स्त्रियः । हावभावविलासाद्या रसपुष्टिसपुष्टयः ॥४०॥
सचतुर्गोपुरातोऽपि पर्येति वनवेदिका । दिव्या वज्रमयी वीथी पार्श्वयोर्ध्वजपंक्तयः ॥४१॥
त्रिदंडविस्तृताश्चित्राः पीठिका प्रतिभक्तिगाः। योजनार्धोच्छ्रितास्तासु वंशारत्नात्मपूर्वकाः ॥४२॥
तदग्रपालिकानद्धफलकाधिष्ठिता ध्वजाः । महांतो दश चित्राः सत्किंकिणीचित्रपट्टकाः ॥४३॥
शिखि हंसगरुत्मत्स्रक्सिंहेभमकरांबुजैः । वृषरूपेण चक्रेण समधिष्ठितमूर्तयः ॥४४॥
तेषामष्टशतं जातिद्वात्रिंशच्च चतुःशती । ध्वजसंख्या भवेदेषां सामान्येन समासतः ॥४५॥
सद्वात्रिंशत्सहस्राः स्युर्लक्षाः पंचाशदष्ट च । साधिका ध्वजसंख्येयं सैकदिका द्विसंगुणा ॥४६॥
षट्पंचाशत्सहस्राणि लक्षा षट्षष्टिरष्टसु । ध्वजकोट्यश्चतस्रः स्युश्चतुर्दिक्ष्वपि साधिका ॥४७॥

प्रीतिकल्याणमध्ये स्युरभितः पंचभूमिकाः । नृत्तशालाः प्रनृत्यंति यत्र भावनयोषितः ॥४८॥
प्राकारोंतः परीयाय द्वितीयो हेमनिर्मितः । पंचभूमिकरत्नश्रीचतुर्गोपुरभूषितः ॥४९॥
हटद्वाटकपीठस्था कंबुकंठगुणोज्वलाः । शातकुंभमया कुंभाः सांभोजास्या सहांभसः ॥५०॥
शोभंते तद्द्विपार्श्वेषु द्वौ द्वौ मंगलदर्शनाः । वेत्रदंडधरा द्वास्थास्तद्द्वाःसु भवनाधिपाः ॥५१॥
पुरस्ताद्गोपुराणां च द्वे द्वे नाटकवेश्मनी । पुरस्तात्तु ततो हेमौ द्वौ द्वौ धूपघटौ स्फुटौ ॥५२॥
चतुर्दिक् सिद्धरूपाढ्यं द्विर्द्विः सिद्धार्थपादपं । कल्पवृक्षवनं तत्र वीथ्यंतेषु यथायथं ॥५३॥
सचतुर्गोपुरांतोंतर्वेदिका वनपाठतः । तोरणांतरिताः सर्वाः स्तूपा नव नवाध्वसु ॥५४॥
पद्मरागमहास्तूपपर्यंतेषु सभागृहाः । हेमरत्नमयाश्चित्रमुनिदेवगणोचिताः ॥५५॥
नभःस्फटिकनिर्माणस्ततः सालस्तृतीयकः । चतुश्चित्रा महारत्नसप्तभूमिकगोपुरः ॥५६॥
विजयो विश्रुतं कीर्तिर्विमलोदयविश्वधुक् । वासवीर्यं वरं चेति पूर्वाख्या ख्यापिताष्टधा ॥५७॥
वैजयंतं शिवं ज्येष्ठं वरिष्ठानघधारणं । याम्यमप्रतिघं चेति दक्षिणाख्याष्टधा मताः ॥५८॥
जयंतामितसारं च सुधामाक्षोभ्यसुप्रभं । वरुणं वरदं चेति पश्चिमाख्याष्टधा स्मृताः ॥५९॥
अपराजितमर्थाख्यमतुलार्थममोघकं । उदयं चाक्षयं चोदकौवेर पूर्णकामकं ॥६०॥

सुरत्नासनमध्यस्था दृष्टॄणां भवदर्शिनः । तद्द्वारोभयपार्श्वेषु भांति मंगलदर्पणाः ॥६१॥
यैः प्रध्वस्तमहाध्वांतप्रभावलयभास्वरैः । भास्वतो भासमुद्भूय भासंतो गोपुराण्यलं ॥६२॥
विजयादिपुरद्वाःसु द्वास्था तिष्ठंति कल्पजाः । यथायथं ज्वलद्भूषा जयकल्याणकारिणः ॥६३॥
शालात्रयोप्यमी स्वैकद्वित्रिक्रोशोच्छ्र्योन्मिताः । मूलमध्योपरिन्यामैस्तदर्धार्धेसु सम्मिताः॥६४॥
स्वरत्नित्रयहीनोक्तप्रमाणजगतीतलाः । हस्तो द्विद्वाक्षविस्तीर्णाक्षांतरौः कपिशीर्षकाः ॥६५॥
ततोप्यंतर्वणं नानातरुवल्लीगृहाकुलं । मंचप्रेंखागिरिप्रेक्षागृहकोटिपराजितं ॥ ६६ ॥
वेदिकाबद्धवीथीषु कल्याणादिजयाजिरं । कदल्यः कदलीकल्पा प्रकाशंतेऽतरस्थिताः ॥६७॥
अंतर्नाटकशाला स्यात्ततः कल्याणसप्रभाः । लोकपालविलासिन्यो यत्र नृत्यंति संततं ॥६८॥
तदंतरे भवत्यन्यत्पीठं पीठगुणास्पदं । प्रोद्गुरत्नजालास्ततिमिरावलिमंडलं ॥६९॥
सिद्धार्थपादपाः संति सिद्धरूपविराजितैः । विटपैर्व्याप्य दिक्प्रांतमिच्छयेव स्थितास्ततः ॥७०॥
स्तूपा द्वादशभूभूषा भूषयंत्यथ मंदिरं । हिरण्मया महामेरुं चत्वारो मेरवो यथा ॥७१॥
चतुर्दिग्गोपुरद्वारवेदिकालंकृता शुभा । चतस्रो दिक्ष्वथ ज्ञेयाश्चतसृष्वपि वापिकाः ॥७२॥

१ व्यासार्धकपिशीर्षका इति क पुस्तके ।

नंदाभद्राजयापूर्णेत्यभिख्याभिः क्रमोदिताः । यज्जलाभ्युक्षिता पूर्वां जातिं जानंति जंतवः ॥७३॥
ताः पवित्रजलापूर्णसर्वपापरुजाहराः । परापरभवा सप्त दृश्यंते यासु पश्यतां ॥७४॥
अथ गव्यूतमुद्विद्धं योजनाधिकविस्तृतं । कटीमात्रवरंडस्थकदलीध्वजसंकुलं ॥७५॥
निरंतरविशश्चिर्यज्जनद्वारोच्चतोरणं । त्रिलोकविजयाधानमहो भाति जयाजिरं ॥७६॥
मुक्तावालुकविस्तीर्णप्रवाणसिकतांतरं । सुरत्नकुसुमैश्चित्रं हेमांभोजैस्तदर्चितैः ॥७७॥
तपनीयरसालिप्तैस्तपनैरिव भूगतैः । तत्र तत्र यथा दैश्यं मंडयंते पृथुमंडलैः ॥७८॥
प्रासादैर्मंडपैश्चान्यैः सुखावासैः सुशोभते । देवासुरनरापूर्णैस्तत्र तत्र विचित्रितं ॥७९॥
क्वचिदालेख्य हृद्यानि वेश्मानि क्वचिदंतरे । पुराणाद्भुतभूतीनि चित्राख्यानान्वितानि च ॥८०॥
क्वचित्पुण्यफलप्राप्त्या पापपाकेन च क्वचित् । धर्माधर्मगतिं साक्षाद्दर्शयंतीव पश्यतः ॥८१॥
दानशीलतपःपूजाप्रारंभास्तत्फलानि च । तद्वियोगविपत्तीश्च तानि श्रद्धापयंत्यमून् ॥८२॥
स्फुरत्पुलकसंसक्तमुक्तादामोन्मिषन्मणिः । पताकाघंटिकागावो रमणीयानिलेरितः ॥८३॥
उदंशुरत्नमालेव स्फुरंती वीचिरर्णवे । वीक्ष्यते व्योमनींद्राद्यैः कौतुकाद्येन वीक्षिता ॥८४॥
राजतींद्रध्वजः सोयं तन्मध्ये हेमपीठिका । अलंकुर्वन् यथामूर्तो देहो देवजयश्रियः ॥८५॥

ततःस्तंभसहस्रस्थो मंडपोऽस्ति महोदयः। नाम्ना मूर्तिमती यत्र वर्तते श्रुतदेवता ॥८६॥
तां कृत्वा दक्षिणे भागे धीरैर्बहुश्रुतैर्वृतः। श्रुतं व्याकुरुते यत्र श्रायसं श्रुतकेवली ॥८७॥
तदर्धमानाश्चत्वारस्तत्परीवारमंडपाः। आक्षेपण्यादयो येषु कथ्यंते कथकैः कथा ॥८८॥
तत्प्रकीर्णकवासेषु चित्रेष्वाचक्षते स्फुटं। ऋषयः स्वेष्टमर्थिभ्यः केवलादिमहर्द्धयः ॥८९॥
तपनीयमयं पीठं ततश्चित्रलताचितं। यत्तद्बल्युपहारेण यथाकालं समर्च्यते ॥९०॥
पीठार्हा श्रीपदद्वारं सरत्नकुसुमोत्करं। मंडलैः पूर्यते मध्ये मार्गश्चंदार्कसप्रभैः ॥९१॥
अभितः स्वाख्यया द्वौ तं मंडपौ स्तः प्रभासकौ। अत्यध्वं राजतो यत्र निधीशौ कामदायिनौ ॥९२॥
प्रेक्षाशाले विशाले स्तः प्रमदाख्ये ततोंबरे। यत्र कल्पनिवासिन्यो नृत्यंत्यप्सरसः सदा ॥९३॥
विजयाजिरकोणेषु विलसत्केतुमालिनः। चत्वारो योजनोद्विद्धा लोकस्तूपा भवंत्यमी ॥९४॥
अधोवेत्रासनाकारा झल्लरीसममध्यगाः। उर्ध्वे मृदंगसंस्थाना स्वांततालामनालिकाः ॥९५॥
स्वच्छस्फटिकरूपास्ते सुव्यंक्तांतर्निवेशकाः। दृश्यते लोकविन्यासो यत्रादर्शतले यथा। ९६॥
मध्यलोकस्वरूपांतर्व्यक्तनिर्माणमूर्त्तयः। मध्यलोका इति ख्याता संति स्तूपास्ततः परे ॥९७॥
मंदरस्तूपनामानो मंदराकारभास्वराः। चतुःकांडचतुर्दिक्षु चैत्या भांति ततोपरे ॥ ९८ ॥

ततोऽतःकल्पवासाख्या कल्पवासिनिवेशिनः । स्तूपास्ते कल्पवासर्द्धिं साक्षात्कुर्वंति पश्यतां॥९९॥
ग्रैवेयकपरास्तेन्ये नाम्ना स्तूपास्तथाविधाः । ततो ग्रैवेयकाभिख्यां दर्शयंतीव मानवान् ॥१००॥
नवानुदशनामानस्ततस्तूपा विराजते । नवानुदिश अध्यक्षं पश्यंते यत्र प्राणिनः ॥१०१॥
विजयादिचतुर्दिका विमानोद्भासिनस्ततः । मर्वार्थदायिनः संति स्तूपाः सर्वार्थसिद्धिदाः ॥१०२॥
सिद्धस्तूपाः प्रकाशंते ततोन्ये स्फटिकामलाः । यत्रैव दर्पणच्छाया दृश्यते सिद्धरूपभाक् ॥१०३॥
भव्यकूटाख्यया स्तूपा भास्वत्कूटास्ततोऽपरे । यानभव्या न पश्यंति प्रभावांधीकृतेक्षणाः ॥१०४॥
प्रमोहा नाम संत्यन्ये स्तूपा यत्र प्रमोहिताः । विस्मरंति यथाग्राहं चिराभ्यस्तं च देहिनः॥१०५॥
प्रबोधाख्या भवंत्यन्ये स्तूपा यत्र प्रबोधिता । तत्त्वमासाद्य संसारान्मुच्यते साधवो ध्रुवं ॥१०६॥
एवमन्योन्यसंसक्तवेदिकातोरणोज्वलाः । दश स्तूपा समुत्तुंगाः राजंत्याः परिधेः क्रमात् ॥१०७॥
ततोस्ति क्रोशविस्तारं परिधिर्धनुरुच्छ्रितिः । यत्र मंडलभूवार्ये परियंति नरामराः ॥१०८॥
बाह्याः सप्तदश न्यस्ता गव्यूतैर्वृतमेकतः । कर्णिकाथ तदंतस्था ज्ञेया सार्धत्रियोजना ॥१०९॥
परिवेष इवार्कं यः परिधेः परिवेष्ट्यते । चित्ररत्नमयीतस्थं भासुरं परिमंडलं ॥११०॥

१ 'सर्वार्थसिद्धयः' इति ख पुस्तके ।

निर्मितसानंतरं भर्तुर्व्रजस्योत्पद्यते पुरं । दिव्यं तत्र प्रभावो हि मनसा ज्ञापिनां महत् ॥१११॥
त्रिलोकसारं श्रीकांतं श्रीप्रभं शिवमंदिरं । त्रिलोकीलोककांतिश्रीश्रीपुरं त्रिदशप्रियं ॥११२॥
लोकालोकप्रकाशा द्यौरुदयोभ्युदयावहं । क्षेमं क्षेमपुरं पुण्यं पुण्याहं पुण्यकास्पदं ॥११३॥
भुवः स्वर्भूस्तपः सत्यं लोकालोकोत्तमं रुचिः । रुचावहमुदारर्धि दानधर्मपुरं परं ॥११४॥
श्रेयः श्रेयस्करस्तीर्थं तीर्थावहमुदग्रहं । विशालचित्रकूटं धीश्रीधरं च त्रिविष्टपं ॥११५॥
मंगलोत्तमकल्याणशरणादिपुराणि पूः । जयापराजितादित्यजयंत्यचलसंपुरं ॥११६॥
विजयंतं जयंताभं विमलं विमलप्रभं । कामभूर्गगनाभोगं कल्याणं कलिनाशनं ॥११७॥
पवित्रं पंचकल्याणं पद्मावर्तः प्रभोदयः । परार्घ्यमंडिता वासौ महेंद्रं महिमालयं ॥११८॥
स्वायंभुवं सुधाधात्री शुद्धावासः सुखावती । विरजा वीतशोकार्थविमला विनयावनिः ॥११९॥
भूतधात्री पुराकल्पः पुराणं पुण्यसंचयः । ऋषीवती यमवती रत्नवत्याजरामरा ॥१२०॥
प्रतिष्ठा ब्रह्मनिष्ठोर्वी केतुमालिन्यनिंदितं । मनोरमं तमः पारमत्नीरत्नसंचयं ॥१२१॥
अयोध्यामृतधानीति समं ब्रह्मपुराख्यया । जाताद्ययमुदात्तार्थं तत्कल्पज्ञैरुदीर्यते ॥१२२॥
अथ त्रैलोक्यसारैकसंदोहमयमद्भुतं । भाति भर्तृप्रभावोत्थं तत्पदं बहुविस्मयं ॥१२३॥

कृतावधानस्तत्सिद्धिं भूयः स्रष्टापि चिंतयन् । ध्रुवं मोमुह्यतेन्यस्य तथा चेत्तत्र का कथा ॥१२४॥
दशषोडशभिस्तस्य सुवर्णमणिजातिभिः । यथास्थानं स्वयं चित्रं निर्माणमभिराजते ॥१२५॥
तलं तिस्रो जगत्यश्च तत्र क्रोशार्धविस्तृताः । उपर्युपरि तत्र स्यात्परिहाणिश्च तावती ॥१२६॥
तासां वज्रमयी सिद्धिश्चित्ररत्नोज्वला भुवां । यत्प्रभाशक्रचापानि तनोति परितः पराः ॥१२७॥
उरोदघ्ना वरंडास्ते भूषयंति ज्वलत्प्रभाः । जगतीर्यत्र राजंते कदल्यो धनुरंतराः ॥१२८॥
त्रिंशदक्षमितैः कूटैर्द्विगुणायतकोष्ठकैः । द्विगुणैर्भूयते तासु दशदंडांतरास्थितैः ॥१२९॥
द्वौ द्वौ दौवारिकावासावभितस्तस्तदंतिके । यत्र वैश्रमणस्यार्था प्रतिद्वारं प्रकाशते ॥१३०॥
कूटानां सप्तसप्तत्यासु द्वासप्तत्यधिका क्रमात् । चत्वारिंशदष्टयुक्ता कोष्ठकानां च सागणिः ॥१३१॥
द्वाविंशतिशतान्याहुर्विंशानि जगतीत्रये । कूटसंख्या समासेन कोष्ठकानां च तावती ॥१३२॥
एकाष्टलोकभीभंगनवैकद्विचतुर्भिर्यैः । षडस्तिस्वैकभंगौः स्युर्जगतीकेतवः क्रमात् ॥१३३॥
वियत्स्यौनिमीभंगश्रेणयैः पूर्वकोटगाः । भूषणमंडलगव्योमस्वोत्क्रमौ मध्यकूटगाः ॥१३४॥
स्वार्ष्टांष्टचतुरस्त्यक्षीण्यंतकूटगता ध्वजाः । कोष्टगास्तत्र तत्रामी भाव्यंते ते द्विसंगुणाः ॥१३५॥

१-३२३८१ । २-१४२१९ । ३-३१०५३ । ४-२३२४७० । ५-७६११० । ६-२५४८८० ।

लक्षा षड्विंशतिर्ज्ञेयाः सहस्राणां च विंशतिः । षट्पंचाशद्विशत्यामा तत्सर्वकदलीगणैः ॥१३६॥
तत्र संस्वेदद्देशेषु मंडपा रत्नमंडिता । द्व्येकगव्यूतविस्तारसमुत्सेधाश्चकासति ॥१३७॥
तदर्धव्यासनिर्माणशिखरांतरवासिनः । संति सन्मंगलोद्भासिमूर्तयोर्चा जिनेश्वराः ॥१३८॥
तत्रस्थाऽपि तद्देशाद्विनिष्क्रम्य नभस्यमी । यथोपदिष्टा दृश्यंते संमुखीभूय पश्यतां ॥१३९॥
पीठानि त्रीणि भास्वंति चतुर्दिक्षु भवंति तु । चत्वारि च सहस्राणि धर्मचक्राणि पूर्वके ॥१४०॥
द्वितीये तु महापीठे शिखिहंसध्वजेतरे । अष्टौ तिष्ठंति दिग्भागा भासयंतो महाध्वजाः ॥१४१॥
अग्रे श्रीमंडपोद्भासी प्रासादो बहुमंगलः । गंधकुट्यभिधानः स्यात्तत्र सिंहासनं विभोः ॥१४२॥
तत्रासीनं जिनाधीशं नृसुरासुरकोटयः । तुष्टुवुस्तुष्टचित्तास्ता मकुटन्यस्तपाणयः ॥१४३॥
विजयस्व महादेव ! विजयस्व महेश्वर । विजयस्व महाबाहो ! विजयस्व महेक्षण ॥१४४॥
इत्यादिश्रुतिकोटीनामंते प्रव्रज्य तत्क्षणात् । गणिनामग्रणीर्जातो वरदत्तो गणाधिपः ॥१४५॥
षट्सहस्रनृपस्त्रीभिः सह राजीमती तदा । प्रव्रज्याग्रेसरी जाता सार्यिकाणां गणस्य तु ॥१४६॥
यतिवर्गादयः सर्वे गणा द्वादश ते ततः । प्रणिपत्य यथास्थानं तं प्रभुं समुपासते ॥१४७॥
परिवर्यध्वनस्तस्मिन्पदेषु द्वादशस्वमी । पूर्वदक्षिणभागादिष्वासतेग्रप्रदक्षिणं ॥१४८॥

तत्र प्रत्यक्षधर्माणो धर्मेशांशा इवामलाः। भासते वरदस्याग्रे वरदत्तादियोगिनः ॥१४९॥
भर्तुर्या भूतयो बाह्यास्तदंतर्भूतितः प्रति। राजंते कल्पवासिन्यो व्यक्तं तन्मूर्तयो यथा ॥१५०॥
ह्रीदयाक्षांतिशांत्यादिगुणालंकृतसंपदः। समेत्योपविशंत्यार्याः सद्धर्मतनया यथा ॥१५१॥
द्योतिर्मंडलवासिन्यो भर्तृज्योतिष्टमप्रभाः। अभिनंद्य तदुद्भूतविभाभासश्चकासति ॥१५२॥
वनश्रियो यथा मूर्ता वानव्यंतरयोषितः। वन्यपुष्पलता नम्रा नमंति वरदक्रमं ॥१५३॥
भवनालयवासिन्यो भगवत्पतिभक्तयः। स्वर्भूर्भुवो यथा लक्ष्म्याःसमयांतं समासते ॥१५४॥
भावनाः पापबंधस्य छेत्तारं निःकषासते। विभ्यतः स्वभवाद्धास्वत्फणारत्नविभारुणाः ॥१५५॥
व्यंतराः सुंदराकारा मंदरेस्येव कल्पकाः। भवंति भर्तुराकल्पाः सुमनोमालभारिणः ॥१५६॥
परमेश्वरभामग्नस्वप्रभाभास्करादयः। ज्योतिर्गणाः प्रभावृद्धिं प्रार्थयंते तमानताः ॥१५७॥
सौंदर्येण सुखात्मानो भागा भर्तुरिवोद्यताः। स्वर्भुवः प्रतिभासंते सहस्राक्षपुरस्सराः ॥१५८॥
दानपूजादिधर्मांशा देहवंतो यथामलाः। वरदं वरिवस्यंति नृपाश्चक्रधरादयः ॥१५९॥
अविद्या वैरमायादिदोषापायाप्ततद्गुणाः। हरीभाद्या विर्मात्यन्ये तिर्यंचस्तादृशो यथा ॥१६०॥
एवं द्वादशवर्गीयैर्द्वादशांगगुणोपमैः। परीत्योक्तक्रमादीशो गणैरेभिरुपासितः ॥१६१॥

पारमेष्ट्यमनन्यस्थं ख्यापयन्नासनश्रिया। चामरैरमरोद्धूतैः क्रमस्थैः समहेशितां ॥१६२॥
त्रिलोकाधीशितां छत्रत्रयेणेंदुत्रयत्विषा। भामंडलेन भाधिक्यं भवांतरतमश्छिदा ॥१६३॥
सर्वर्तुकुसुमेनान्यसर्वशोकापहारितां। अशोकेनाभिपूज्यंते सुमनोवृष्टिपूजया ॥१६४॥
सार्वत्वमभयाधानघोषणेन जयश्रियां। नंदीमंगलघोषेण साधुचित्ताभिनंदिनं ॥१६५॥
आत्माधीनाः प्रतीहाराः प्रतिहार्यगुणोद्भवैः। भूषितोष्टमहोदग्रप्रातिहार्यैर्महेश्वरः ॥१६६॥
लोकानां भूतये भूतिमात्मीयां सकलां दधत्। सर्वलोकातिवर्तिन्या भासास्थानमधिष्ठितं ॥१६७॥
अयमास्ते समग्रात्मा सार्थकामाः ससंभ्रमाः। एतैत नमतैशानमित्याह्वानं सघोषणं ॥१६८॥
वर्तयंति सुरास्तस्मिन्मंडले तदनुद्रुतं। समंताचत्समायांति भूतिभिर्नृसुरासुराः ॥१६९॥
तद्दृष्टिगोचरे मंक्षु वाहनेभ्योवतीर्यते। मानांगणमथास्थाय पूर्वं सांजलिमौलिभिः ॥१७०॥
तत्र वाह्ये परित्यज्य वाहनादिपरिच्छदं। विशिष्टकाकुदैर्युक्ता मानपीठं परीत्य ते ॥१७१॥
प्रादक्षिण्येन वंदित्वा मानस्तंभमनादितः। उत्तमाः प्रविशत्यंतरुत्तमाहितभक्तयः ॥१७२॥
पापशीला विकुर्माणाः शूद्राः पाखंडपांडवाः। विकलांगेंद्रियोद्भ्रांता परियंति बहिस्ततः ॥१७३॥
छत्रचामरभृंगाराद्यवहाय जयाजिरे। आप्तैरनुगताः कृत्वा विशंत्यंजलिमीश्वराः ॥१७४॥

प्रविश्य विधिवद्भक्त्या प्रणम्य मणिमौलयः । चक्रपीठं समारुह्य परियंति त्रिरीश्वरं ॥१७५॥
पूजयंतो यथाकामं स्वशक्तिविभवार्चनैः । सुरासुरनरेंद्राद्याः नामादेशं नमंति च ॥१७६॥
ततोवतीर्य सोपानैः स्वैः स्वैः स्वांजलिमौलयः। रोमांचव्यक्तहर्षास्ते यथास्थानं समासते ॥१७७॥
अभ्यर्क विकसद्भाति कमलाकरमंडलं । यथा तथा जिनाभ्यर्के तद्गुणांबुजमंडलं ॥१७८॥
सा सेना सर्वतः सर्वा प्रविशंती तदास्पदं । नाल पूरयितुं पूर्णा नदीव वरुणास्पदं ॥१७९॥
निर्यदायद्विशत्पश्यत्परीयत्प्रीणदानमत् । स्तुवद्दीशं सतां वृंदं सततं तत्र वर्तते ॥१८०॥
न मोहो न भयद्वेषौ नोत्कंठारतिमत्सराः । अस्यां भद्रप्रभावेन जंभाजूंभा न संसदि ॥१८१॥
निद्रातंद्रापरिक्लेशक्षुत्पिपासासुखानि न । नास्त्यभ्यर्चाशिवं सर्वमहरेव च सर्वदा ॥१८२॥

समवसरणभूमौ बाह्यभूत्येकभूमौ स्थितवति मुनिनाथेऽत्रांतरंगादिपूतौ ।
पिबति तृषितनेत्रैर्द्वादशानां गणानां समितिरमृतरूपं जैनरूपांबुराशिं ॥१८३॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ समवसरणवर्णनो नाम सप्तपंचाशः सर्गः ।

अष्टपंचाशः सर्गः ।

एवं नित्योत्सवानंतकल्याणैकास्पदे पदे । लोके धर्मं प्रशुश्रूषौ कृतांजलिपुटे स्थिते ॥१॥
वदतां वरमानम्य वरदत्तो गणाग्रणीः । हितं पप्रच्छ भव्यानां समस्तानां जिनेश्वरं ॥२॥
तत्प्रश्नानंतरं धातुश्चतुर्मुखविनिर्गते । चतुर्मुखफला सार्था चतुर्वर्णाश्रमाश्रयाः ॥३॥
चतुरस्रानुयोगानां चतुर्णामेकमातृका । चतुर्विधकथावृत्तिश्चतुर्गतिनिवारिणी ॥४॥
एकद्वित्रिचतुःपंचषट्सप्ताष्टनवास्पदाः । अपर्यायापि सच्चेवानंतपर्यायभाविनी ॥५॥
अहितं शातयंती सा रोचयंती हितं सदा । स्थापयंती च तत्पात्रे धारयंती यथायथं ॥६॥
वारयंत्यशुभादाशु पूरयंती शुभं परं । श्लथयंत्यर्जितं कर्म ग्लपयंती प्रभावतः ॥७॥
समंततः शिवस्थानाद्योजनाधिकमंडले । अत्रैवात्रैव वृत्तेति तत्र तत्रास्ति तादृशं ॥८॥
मधुरस्निग्धगंभीरदिव्योदात्तस्फुटाक्षरं । वर्ततेनन्यवृत्तीका तत्र साध्वी सरस्वती ॥९॥
भावाभावद्वयाद्वैते भावबद्धा जगत्स्थितिः । अहेतुर्दृश्यते तस्यामनाद्या पारिणामिकी ॥१०॥
अस्त्यात्मा परलोकोऽस्ति धर्माधर्मौ स्त एव च। तयोःकर्तास्ति भोक्तास्ति चास्ति नास्तीति यत्पदं
स्वयं कर्म करोत्यात्मा स्वयं तत्फलमश्नुते । स्वयं भ्राम्यति संसारे स्वयं तस्माद्विमुच्यते ॥१२॥

अविद्यारागसंक्लिष्टो बंभ्रमीति भवार्णवे । विद्यावैराग्यशुद्धः सन् सिद्धयत्यविकलस्थितिः ॥१३॥
इत्याध्यात्मविशेषस्य दीपिका दीपिकेव सा । रूपादेः शमयत्याशु तमिश्रं तत्र संततं ॥१४॥
अनानात्मापि तद्वृत्तं नानापात्रगुणाश्रयं । सभायां दृश्यते नाना दिव्यमंबु यथावनौ ॥१५॥
सावधानसभांतस्थं ध्वांतं सावरणं ध्वनिः । जिनोत्यर्कोभिनद्दिव्यो विश्वात्मेत्यादिभास्वनः ॥१६॥
भवपद्धतिपांथस्य भव्यताशुद्धियोगिनः । देहिनः पुरुषार्थोत्र प्रेक्षितो मोक्षलक्षणः ॥१७॥
उपायस्तस्य मोक्षस्य ध्यानाध्यानैकहेतुनः । प्राक्सम्यग्दर्शनज्ञानचारित्रत्रितयात्मकः ॥१८॥
सम्यग्दर्शनमत्रेष्टं तत्त्वश्रद्धानमुज्वलं । व्यपोढसंशयाद्यंतनिःशेषमलसंकरं ॥१९॥
तच्च दर्शनमोहांघक्षयोपशममिश्रजं । क्षायिकत्वं त्रिधा द्वेधा निसर्गाधिगमत्वतः ॥२०॥
जीवाजीवाश्रवाः बंधसंवरौ निर्जरा तथा । मोक्षश्च सप्ततत्त्वानि श्रद्धेयानि स्वलक्षणैः ॥२१॥
जीवस्य लक्षणं लक्ष्यमुपयोगोऽष्टधा स च । मतिश्रुतावधिज्ञानतद्विपर्ययपूर्वकः ॥२२॥
इच्छा द्वेषः प्रयत्नश्च सुखं दुःखं चिदात्मकं । आत्मनो लिंगमेतेन लिंग्यते चेतनो यतः ॥२३॥
न पृथिव्यादिभूतानां जीवः संस्थानमात्रकः । तदवस्थास्य कामस्य चैतन्यव्यभिचारिणः ॥२४॥
पिष्टकिण्वोदकाद्येषु मद्यांगेषु पृथग्भवेत् । शक्तेः लेशो मदं कर्ता कायांगेषु तु नास्तिग्रः ॥२५॥

चैतन्योत्पत्त्यभिव्यक्ती चतुर्भूतेभ्य इच्छतां । तैलस्य सिकतादिभ्यो व्यक्त्युत्पत्ती न किं मते ॥२६॥
अनादिनिधनो जंतुरेति गत्यंतरादिह । याति गत्यंतरं भ्रांतो निजकर्मवशो भवेत् ॥२७॥
एतावानेव पुरुषो यावान्प्रत्यक्षगोचरः । इत्यादिरपसंवादः स्वपराहितवादिनां ॥२८॥
न संविन्मात्रमात्मा स्यात्संविचौ क्षणिकात्मनि । अनुसंधानधीलोपे व्यवहारविलोपतः ॥२९॥
सत्यभूतः स्वयं जीवो ज्ञाता दृष्टास्ति कारकः । भोक्ता मोक्ता व्ययोत्पादध्रौव्यवान् गुणवान् सदा ३०
असंख्यातप्रदेशात्मा ससंहारविसर्पणः । स्वशरीरप्रमाणस्तु मुक्तवर्णादिविंशतिः ॥३१॥
श्यामाककणमात्रो न न चाकाशाणुमात्रकः । नांगुष्ठपर्वमात्रो वा न पंचाशतयोजनः ॥३२॥
देहे देहे सवृत्तित्वे प्रदेशैः सकलैः सह । न स्वार्थं प्रतिपद्येत स्पर्शनं चक्षुरादिवत् ॥३३॥
परिमाणमहत्त्वेऽपि योजनेषु बहुष्वपि । स्पर्शनं न समं तस्या चक्षुषेवार्थदर्शनः ॥३४॥
तथा सति विरोधः स्याद्दृष्टेष्टाभ्यां पुमानयं । देहमात्रोऽधिगंतव्यः सर्वस्यानुभवाच्चथा ॥३५॥
स गतींद्रियषट्काययोगवेदकषायतः । ज्ञानसंयमसम्यक्त्वलेश्यादर्शनसंज्ञिभिः ॥३६॥
भव्यत्वाहारपर्यंतमार्गणाभिः स मृग्यते । चतुर्दशभिराख्यातगुणस्थानैश्च चेतनः ॥३७॥
प्रमाणनयनिक्षेपसत्संख्यादिकमादिभिः । संसारी प्रतिपत्तव्यो मुक्तोऽपि निजसद्गुणैः ॥३८॥

नयोऽनेकात्मनि द्रव्ये नियतैकात्मसंग्रहः । द्रव्यार्थिको यथार्थोऽन्यः पर्यायार्थिक एव च ॥३९॥
ज्ञेयौ मूलनयावेतावन्योन्यापेक्षिणौ मतौ । सम्यग्दृष्टास्तयोर्भेदाः संगता नैगमादयः ॥४०॥
नैगमः संग्रहश्चात्र व्यवहारर्जुसूत्रकौ । शब्दः समभिरूढाख्य एवंभूतश्च ते नयाः ॥४१॥
त्रयो द्रव्यार्थिकस्याद्या भेदाः सामान्यगोचराः । स्युः पर्यायार्थिकस्यान्ये विशेषविषया नयाः ४२
अर्थसंकल्पमात्रस्य ग्राहको नैगमो नयः । उदाहरणमस्येष्टं प्रस्थौदनपुरस्सरं ॥४३॥
आक्रांतभेदपर्यायमेकध्यमुपनीय यत् । समस्तग्रहणं तत्स्यात्सद्द्रव्यमिति संग्रहः ॥४४॥
संग्रहाक्षिप्तसत्तादेरवहारो विशेषतः । व्यवहारो यतः सत्तां नमत्यंतविशेषतां ॥४५॥
वक्रं भूतं भविष्यंतं त्यक्तर्जुसूत्रपाठवत् । वर्तमानार्थपर्यायं सूत्रयन्नृजुसूत्रकः ॥४६॥
लिंगसाधनसंख्यानकालोपग्रहसंकरं । यथार्थशब्दनाच्छब्दो न वृष्टिध्वनितंत्रकः ॥४७॥
शब्दभेदेऽर्थभेदार्थी व्यक्तपर्यायशब्दकः । नयः समभिरूढोर्थो नानासमभिरोहणात् ॥४८॥
यदेंदति तदेवेंद्रो नान्यदेति क्रियाक्षणे । वाचकं मन्यते त्वेवंभूतो यथार्थवाक् ॥४९॥
द्रव्यस्यानंतशक्तित्वात्प्रतिशक्तिभिदा श्रिताः । उत्तरोत्तरसूक्ष्मार्थगोचराः सप्त सन्नयाः ॥५०॥
अर्थशब्दप्रधानत्वाच्छब्दांता पंचधा नयाः । संग्रहादितया षोढा प्रत्येकं स्युः शतानि ते ॥५१॥

यावंतोऽपि वचोमार्गास्तावंतो यन्नयास्ततः । इयंत इति संख्यानं नयानां नास्ति तत्त्वतः ॥५२॥
धर्माधर्मौ तथाकाशं पुद्गलः काल एव च । पंचाप्यजीवतत्त्वानि सम्यग्दर्शनगोचराः ॥५३॥
गतिस्थित्योर्निमित्तं तौ धर्माधर्मौ यथाक्रमं । नभोवगाहहेतुस्तु जीवाजीवद्वयोस्सदा ॥५४॥
पूरणं गलनं कुर्वन् पुद्गलोनेकधर्मकः । सोऽणुसंघाततः स्कंधः स्कंधभेदादणुः पुनः ॥५५॥
वर्तनालक्षणो लक्ष्यः समयादिरनेकधा । कालः कलनधर्मेण सपरत्वापरत्वकः ॥५६॥
कायवाङ्मनसां कर्म योगः स पुनरास्रवः । शुभः पुण्यस्य गण्यस्य पापस्याशुभलक्षणः ॥५७॥
सकषायाकषायौ द्वौ स्वामिनावास्रवस्य सः । मिथ्यादृष्ट्यादिकाद्यस्य सांपरायिककर्मणः ॥५८॥
उपशांतकषायादेरकषायस्य योगिनः । आस्रवः स्वामिनोऽत्यस्य स्यादीर्यापथकर्मणः ॥५९॥
इंद्रियाणि कषायाश्च हिंसादीन्यव्रतान्यपि । सांपरायिककर्मद्वाः स्यात्क्रियापंचविंशतिः ॥६०॥
चैत्यप्रवचनार्हत्सद्गुरुपूजादिलक्षणा । सा सम्यक्त्वक्रिया ख्याता सम्यक्त्वपरिवर्धिनी ॥६१॥
प्रवृत्तिरकृतादन्यदेवतास्तवनादिका । सा मिथ्यात्वक्रिया ज्ञेया मिथ्यात्वपरिवर्धिनी ॥६२॥
कायाद्यादिसरन्येषां गमनादि प्रवर्तनं । सा प्रयोगक्रिया वेद्या प्रायोऽसंयमवर्धिनी ॥६३॥
आभिमुख्यं प्रति प्रायः संयतस्याप्यसंयमे । समादानक्रिया प्रोक्ता प्रमादपरिवर्धिनी ॥६४॥

ईर्यापथनिमित्ताया सा प्रोक्तेर्यापथक्रिया। एताः पंचक्रियाहेतुरास्रवे सांपरायिके ॥६५॥
क्रोधावेशवशात्प्रादुर्भूता प्रादोषिकी क्रिया। योऽभ्युद्यमः प्रदुष्टस्य सतस्सा कायिकी क्रिया ॥६६॥
क्रियाधिकारिणीत्युक्ता हिंसोपकरणग्रहात्। दुःखोत्पत्तिः स्वतंत्रत्वात्क्रियान्या पारितापिकी॥६७॥
इंद्रियायुर्बलप्राणवियोगकरणात्क्रिया। प्राणातिपातिकी नाम्ना पंचैवाघ्यास्मिकाः क्रियाः ॥६८॥
रागार्द्रीकृतचित्तत्वात्प्रशक्तस्य प्रमादिनः। रम्यरूपावलोकान्याभिप्रायो दर्शनक्रिया ॥६९॥
सचेतनानुबंधो यः स्प्रष्टव्योऽतिप्रमादिनः। सा दर्शनक्रिया ज्ञेया कर्मोपादानकारणं ॥७०॥
उत्पादनादपूर्वस्य पापाधिकरणस्य तु। पापास्रवकरी प्रायः प्रोक्ता प्रत्यायिकी क्रिया ॥७१॥
स्त्रीपुंसपशुसंपातिदेशेंतर्मलमोक्षणं। क्रिया माधुजनायोग्या सा समंतानुपातिनी ॥७२॥
अप्रमृष्टाप्रदृष्टायां निक्षेपोऽगादिनः क्षितौ। अनाभोगक्रिया सा तु पंचैता अपि दुष्क्रियाः॥७३॥
परेणैव तु निर्वर्त्या या स्वयं क्रियते क्रिया। सा स्वहस्तक्रिया बोध्या पूर्वोक्तास्रववर्धिनी॥७४॥
पापादानादिवृत्तीनामभ्यनुज्ञानमात्मना। स निसर्गक्रिया नाम्ना निसर्गेणास्रवावहा ॥७५॥
पराचरितसावद्यक्रियादेस्तु प्रकाशनं। विदारणक्रिया सान्या श्रीविदारणकारिणी ॥७६॥
यथोक्तादानसक्तस्य कर्तुमावश्यकादिषु। प्ररूपणान्यथा मोहादाज्ञाव्यापादिकी क्रिया ॥७७॥

सा व्यालस्याद्धि शास्त्रोक्तविधिकर्तव्यतां प्रति। अनादरस्त्वनाकांक्षा-क्रिया पंचक्रिया इमाः॥७८॥
आरंभे क्रियमाणेन्यैः स्वयं हर्षप्रमादिनः । सा प्रारंभक्रियात्यंतं तात्पर्यं वांछितादिषु ॥७९॥
सा पारिग्राहिणी ज्ञेया परिग्रहपरा क्रिया । मायाक्रियापि च ज्ञानदर्शनादिषु वंचना ॥८०॥
या मिथ्यादर्शनारंभदृढीकरणतत्परा । प्रोत्साहनादिनान्यस्य सा मिथ्यादर्शनक्रिया ॥८१॥
कर्मोदयवशात्पापादनिवृत्तिरपि क्रिया । अप्रत्याख्यानसंज्ञा सा पंचामूरास्रवक्रियाः ॥८२॥
मंदमध्यातितीव्रत्वात्परिणामस्य देहिनां । मंदो मध्योतितीव्रः स्यादास्रवो हेतुभेदतः ॥८३॥
जीवाधिकरणश्चाप्य जीवाधिकरणोऽपि सः । आस्रवो भिद्यते द्वेधा जीवाधिकरणास्रवाः ॥८४॥
तैः संरंभसमारंभैःसारंभैःस्त्रिकृतादिभिः । त्रियोगैश्च कषायैश्च षड्त्रिंशत्पृथगास्रवाः ॥८५॥
निर्वर्तना च निक्षेपो जीवाधिकरणास्रवाः । सयोगश्च निसर्गश्च द्विचतुर्द्वित्रिभेदिनः ॥८६॥
निर्वर्तनाधिकरणं मूलोत्तरगुणा द्विधा । शरीरवाङ्मनःप्राणापानादीनां च तौ गुणौ ॥८७॥
सहसादुःप्रमृष्टानाभोगसांप्रत्यवेदितौ । भेदैश्चतुर्विधैःतन्निक्षेपाधिकरणं पुनः ॥८८॥
भक्तपानोपकरणसंयोगद्वितयात्मना । तद्द्वैविध्यं हि संयोगकारणस्य च कीर्तितं ॥८९॥
यन्निसर्गाधिकरणं तत्त्रैविध्यं प्रपद्यते । वाङ्मनःकायपूर्वैस्तु निसर्गैस्तत्प्रवर्तनैः ॥९०॥

कर्मास्रवाणां भेदोऽयं सामान्येन निरूपितः। भेदः कर्मविशेषणामास्रवस्य विशिष्यते ॥९१॥
प्रदोषनिह्नवादाने विघ्नासादनदूषणाः। ज्ञानस्य दर्शनज्ञानावृत्त्योरास्रवहेतुतः ॥९२॥
दुःखशोकवधाक्रंदतापाः सपरिवेदनाः। असद्वेद्यास्रवद्वाराः स्वपरोभयवर्तिनः ॥९३॥
दया सकलभूतेषु व्रतिष्वत्यनुरागता। सरागसंयमो दानं क्षांतिः शौचं यथोदितं ॥९४॥
अर्हत्पूजादितात्पर्यं बालवृद्धतपस्विषु। वैय्यावृत्यादयो वेद्या सद्वेद्यास्रवहेतवः ॥९५॥
केवलिश्रुतसंघेषु धर्मदेवेष्ववर्णवाक्। हेतुर्दर्शनमोहस्याप्यास्रवस्य निरूपितः ॥९६॥
उदयात्तु कषायाणां परिणामोऽपि तीव्रकः। हेतुश्चारित्रमोहस्य नानाभेदास्रवस्य तु ॥९७॥
तत्र स्वान्यकषायाणामुत्पादेन समुद्धता। कषायवेदनीयस्य हेतुः सद्वृत्तभूषणं ॥९८॥
प्रहासशीलतादि स्याद्धर्मो प्रहसनादिभिः। सहास्यवेदनीयस्य महास्रवनिबंधनं ॥९९॥
विचित्रक्रीडनाशक्तिर्व्रतशीलाद्यरोचनं। रत्याख्यवेदनीयस्य हेतुः स्यादास्रवो महान् ॥१००॥
परारतिविधानं च रतेरपि विनाशनं। अरतेर्वेदनीयस्य हेतुर्दुश्शीलसेवनं ॥१०१॥
स्वशोकोत्पादनं चान्य शोकवृद्ध्यभिनिंदनं। कुशोकवेदनीयस्य नित्यमास्रवकारणं ॥१०२॥
भयोत्पादनमन्येषां स्वभयस्य च भावनं। भयाख्यवेदनीयस्य संततो हेतुरास्रवे ॥१०३॥

कुशलाचरणाचारजुगुप्सापरिवादिता । जुगुप्सा वेदनीयस्य हेतुरास्रवगोचरः ॥१०४॥
अतिसंधानपरता परस्यालीकवादिता । प्रवृद्धरागतादिस्त्रीवेदनीयस्य कारणं ॥१०५॥
सानुत्सेकतनुक्रोधस्वदारपरितोषिताः । हेतुः पुंवेदनीयस्य कर्मणः संसृतौ मतः ॥१०६॥
प्राचुर्यं च कषायाणां गुह्यांगव्यपरोपणं । परस्त्रीशक्तिरंतस्य वेदनीयस्य हेतवः ॥१०७॥
नारकस्यायुषो योगो बह्वारंभपरिग्रहैः । तैर्यग्योनस्य माया तु हेतुरास्रवणस्य सः ॥१०८॥
मानुषस्यायुषो हेतुरल्पारंभपरिग्रहैः । संतुष्टत्वा व्रतत्वादि मार्दवं च स्वभावतः ॥१०९॥
सम्यक्त्वं च व्रतित्वं च बालतापस्ययोगिता । अकामनिर्जरा चास्य दैवस्यास्रवहेतवः ॥११०॥
स्वयोगवक्रता चान्यविसंवादनयोगिता । हेतुर्नाम्नोऽशुभस्यैव शुभस्यातिसुयोगता ॥१११॥
तथा नामविशेषस्य तीर्थकृत्त्वस्य हेतवः । सद्दर्शनविशुद्ध्याद्याः षोडशातिविनिर्मलाः ॥११२॥
सद्गुणाच्छादनं निंदा परेषां स्वस्य शंमनं । असद्गुणसमाख्यानं नीचैर्गोत्रास्रवावहाः ॥११३॥
सनीचैर्वृत्त्यनुत्सेकौ हेतुरुक्तविपर्ययः । उच्चैर्गोत्रेंतरायस्य दानविघ्नादिकर्तृता ॥११४॥
शुभः पुण्यस्य सामान्यादास्रवः प्रतिपादितः । तद्विशेषप्रतीत्यर्थमिदं तु प्रतिपद्यते ॥११५॥
हिंसानृतवचश्चौर्याब्रह्मचर्यपरिग्रहात् । विरतिर्देशतोणु स्यात्सर्वतस्तु महद्व्रतं ॥११६॥

महाणुव्रतयुक्तानां स्थिरीकरणहेतवः । व्रतानामिह पंचानां प्रत्येकं पंच भावनाः ॥११७॥
स्ववाग्गुप्तिमनोगुप्ती स्वकाले वीक्ष्य भोजनं । द्वे चेर्यादाननिक्षेपसमिती प्राग्व्रतस्य ताः ॥११८॥
स्वक्रोधलोभभीरुत्वहास्यहानोद्यभाषणाः । द्वितीयस्य व्रतस्यैता भाषिताः पंच भावनाः ॥११९॥
शून्यान्यमोचितागारवासान्यानुपरोधिताः । भैक्ष्यशुद्ध्यविसंवादौ तृतीयस्य व्रतस्य ताः ॥१२०॥
स्त्रीरागकथाश्रुत्या रम्यांगेक्षांगसंस्कृतैः । रसपूर्वरतस्मृत्योस्त्यागस्तुर्यव्रतस्य ताः ॥१२१॥
इष्टानिष्टेंद्रियार्थेषु रागद्वेषविमुक्तयः । यथास्वं पंच विज्ञेयाः पंचमव्रतभावनाः ॥१२२॥
हिंसादिष्विह चामुष्मिन्नपायावद्यदर्शनं । व्रतस्थैर्यार्थमेवात्र भावनीयं मनीषिभिः ॥१२३॥
दुःखमेवेति चाभेदादसद्वेद्यादिहेतवः । नित्यं हिंसादयो दोषा भावनीयाः सनीतिभिः ॥१२४॥
मैत्रीप्रमोदकारुण्यमाध्यस्थ्यं च यथाक्रमं । सत्वे गुणाधिके क्लिष्टे ह्यविनेये च भाष्यते ॥१२५॥
स्वसंवेगादिरागार्थं नित्यं संसारभीरुभिः । जगत्कायस्वभावौ च भावनीयौ मनस्विभिः ॥१२६॥
इंद्रियाद्या दश प्राणाः प्राणिभ्योत्र प्रमादिना । यथासंभवमेषां हि हिंसा तु व्यपरोपणं ॥१२७॥
प्राणिनो दुःखहेतुत्वादधर्माय वियोजनं । प्राणानां तु प्रमत्तस्य, समितस्य न बंधकृत् ॥१२८॥
स्वयमेवात्मनात्मानं हिनस्त्यात्मा प्रमादवान् । पूर्वं प्राण्यंगहरणात्पश्चात्स्याद्वा न वा वधः ॥१२९॥

सदर्थमसदर्थं च प्राणिपीडाकरं वचः। असत्यमनृतं प्रोक्तमृतं प्राणिहितं वचः ॥१३०॥
अदत्तस्य स्वयं ग्राहो वस्तुनश्चौर्यमीर्यते। संक्लेशपरिणामेन प्रवृत्तिर्यत्र तत्र तत् ॥१३१॥
अहिंसादिगुणा यस्मिन् बृंहंति ब्रह्मतत्त्वतः। अब्रह्मान्यस्तु रत्यर्थं स्त्रीपुंसमिथुनेहितं ॥१३२॥
भगवामणिमुक्तादौ चेतनाचेतने धने। बाह्या बाह्ये च रागादौ हेये मूर्च्छापरिग्रहः ॥१३३॥
तेभ्यो विरतिरूपाण्यर्हिंसादीनि व्रतानि हि। महत्वाणुत्वयुक्तानि यस्य संति व्रती तु सः ॥१३४॥
सत्यपि व्रतसंबंधे निःशल्यस्तु व्रती यतः। मायानिदानमिथ्यात्वं शल्यं शल्यमिव त्रिधा॥१३५॥
सागारश्चानगारश्च द्वाविह व्रतिनौ मतौ। सागारोऽणुव्रतोऽत्र स्यादनगारो महाव्रतः ॥१३६॥
सागारो रागभावस्थो वनस्थोऽपि कथंचन। निवृत्तरागभावो यः सोऽनगारो गृहोषितः॥१३७॥
त्रसस्थावरकायेषु त्रसकायोऽपरोपणात्—विरतिः प्रथमं प्रोक्तमहिंसाख्यमणुव्रतं ॥१३८॥
यद्रागद्वेषमोहादेः परपीडाकरादिह। अनृताद्विरतिर्यत्र तद्द्वितीयमणुव्रतं ॥१३९॥
परद्रव्यस्य नष्टादेर्महतोल्पस्य चापि यत्। अदत्तत्वस्य नादानं तत्तृतीयमणुव्रतं ॥१४०॥
दारेषु परकीयेषु परित्यक्तरतिस्तु यः। स्वदारेष्वेव संतोषस्तच्चतुर्थमणुव्रतं ॥१४१॥

स्वर्णदासगृहक्षेत्रप्रभृतेः परिमाणतः । वृद्धेच्छापरिमाणाख्यं पंचमं तदणुव्रतं ॥१४२॥
गुणव्रतान्यपि त्रीणि पंचाणुव्रतधारिणः । शिष्या (क्षा) व्रतानि चत्वारि भवंति गृहिणः सतः१४३
यः प्रसिद्धैरभिज्ञानैः कृतावध्यनतिक्रमः । दिग्विदिक्षु गुणेष्वाद्यं वेद्यं दिग्विरतिर्व्रतं ॥१४४॥
ग्रामादीनां प्रदेशस्य परिमाणकृतावधिः । बहिर्गतनिवृत्तिर्या तद्देशविरतिर्व्रतं ॥१४५॥
पापोपदेशोऽपध्यानं प्रमादाचरितं तथा । हिंसाप्रदानमशुभश्रुतिश्चापीति पंचधा ॥१४६॥
पापोपदेशहेतुर्योऽनर्थदंडोपकारकः । अनर्थदंडविरतिर्व्रतं तद्विरतिः स्मृतं ॥१४७॥
पापोपदेश आदिष्टो वचनं पापसंयुतं । यद्वणिग्वधकारंभपूर्वसावद्यकर्मसु ॥१४८॥
अपध्यानं जयः स्वस्य यः परस्य पराजयः । वधबंधार्थहरणं कथं स्यादिति चिंतनं ॥१४९॥
वृक्षादिच्छेदनं भूमिकुट्टनं जलसेचनं । इत्याद्यनर्थकं कर्म प्रमादाचरितं तथा ॥१५०॥
विषकंटकशस्त्राग्निरज्जुदंडकशादिनः । दानं हिंसाप्रदानं हि हिंसोपकरणस्य वै ॥१५१॥
हिंसारागादिसंवर्धिदुःकथाश्रुतिशिक्षया । पापबंधनिबंधो यः सः स्यात्पापाशुभश्रुतिः ॥१५२॥
माध्यस्थ्यैकत्वगमनं देवतास्मरणस्थितिः । सुखदुःखारिमित्रादौ बोध्यं सामायिकं व्रतं ॥१५३॥

१ वृद्धीच्छा, बुद्धीस्था इत्यपि पाठौ ।

चतुराहारहानं यन्निरारंभस्य पर्वसु । स प्रोषधोपवासोऽक्षाण्युपेत्यास्मिन्वसंति यत् ॥१५४॥
गंधमाल्यान्नपानादिरुपभोग उपेत्य यः । भोगोऽन्यः परिभोगो यः परित्यज्यासनादिकः ॥१५५॥
परिमाणं तयोर्यत्र यथाशक्ति यथायथं । उपभोगपरीभोगपरिमाणव्रतं हि तत् ॥१५६॥
मांसमद्यमधुद्यूतवेश्यास्त्रीनक्तभुक्तितः । विरतिर्नियमो ज्ञेयोऽनंतकायादिवर्जनं ॥१५७॥
स संयमस्य वृद्ध्यर्थमततीत्यतिथिः स्मृतः । प्रदानं संविभागोऽस्मै यथाशुद्धिर्यथोदितं ॥१५८॥
भिक्षौषधोपकरणप्रतिश्रयविभेदतः । संविभागो तिथिभ्यस्तु चतुर्विध उदाहृतः ॥१५९॥
सम्यक्कायकषायाणां वहिरंतर्हि लेखना । सल्लेखनापि कर्तव्या कारणे मारणांतिकी ॥१६०॥
रागादीनां समुत्पत्तावागमोदितवर्त्मना । अशक्यपरिहारे हि सांते सल्लेखना मता ॥१६१॥
अष्टौ निश्शंकतादीनामष्टानां प्रतियोगिनः । सम्यग्दृष्टेरतीचारास्त्याज्याः शंकादयः सतां ॥१६२॥
पंच पंच त्वतीचारा व्रतशीलेषु भाषिताः । यथाक्रममभी वेद्याः परिहार्याश्च तद्व्रतैः ॥१६३॥
गतिरोधकरो बंधो वधो दंडाहिताडना । कर्णाद्यपनयच्छेदोप्यतिभारातिरोपणं ॥१६४॥
अन्नपाननिरोधस्तु क्षुद्बाधाधिकरोंगिनां । अहिंसाणुव्रतस्योक्ता अतिचारास्तु पंच ते ॥१६५॥
अतिसंधापनं मिथ्योपदेश इह चान्यथा । यदभ्युदयमोक्षार्थक्रियास्वन्यप्रवर्तनं ॥१६६॥

रहोभ्याख्यानमेकांतस्त्रीपुंसेहाप्रकाशनं । कूटलेखक्रियान्येन त्वनुक्तस्य स्वलेखनं ॥१६७॥
विस्मृतन्यस्तसंख्यस्य स्वल्पं स्वं संप्रगृह्णतः । न्यासापहार एतावदित्यनुज्ञापकं वचः ॥१६८॥
साकारमंत्रभेदोसौ भ्रूविक्षेपादिकेंगितैः । पराकूतस्य बुद्ध्वाविर्भावनं यदसूयया ॥१६९॥
यत्सत्याणुव्रतस्यामी पंचातीचारकाश्चिरं । परिहार्याः समर्यादैर्विचार्याचार्यवेदिभिः ॥१७०॥
त्रेधस्तेन प्रयोगस्तैराहृतादानमात्मनः । अन्यो विरुद्धराज्यातिक्रमश्चाक्रमकक्रिये ॥१७१॥
हीनेन दानमित्येषामधिकेनात्मनो ग्रहः । प्रस्थादिमानभेदेन तुलाद्युन्मानवस्तुनः ॥१७२॥
रूपकैः कृत्रिमैः स्वर्णैर्वंचनः प्रतिरूपकः । व्यवहारस्त्वीचारास्तृतीयाणुव्रतस्य ते ॥१७३॥
परविवाहाकरणमनंगक्रीडया गती । गृहीतागृहीतेत्वर्यो कामतीव्राभिवेशनं ॥१७४॥
एते स्वदारसंतोषव्रतस्याणुव्रतात्मनः । अतीचाराः स्मृताः पंच परिहार्या प्रयत्नतः ॥१७५॥
हिरण्यस्वर्णयोर्वास्तु क्षेत्रयोर्धनधान्ययोः । दासीदासाद्ययोः पंच कूप्यस्यैते व्यतिक्रमाः ॥१७६॥
दिग्विरत्यभिचारोधस्तिर्यगूर्ध्वव्यतिक्रमाः । लोभात्स्मृत्यंतराधानं क्षेत्रवृद्धिश्च पंचधा ॥१७७॥
प्रेष्ये प्रयोगानयनपुद्गलक्षेपलक्षणाः । शब्दरूपानुपातौ द्वौ तद्देशविरतिव्रते ॥१७८॥
पंच कंदर्पकौत्कुच्यमौखर्याणि तृतीयके । असमीक्ष्याधिकरणोपभोगादिनिरर्थने ॥१७९॥

योगनिःप्रणिधानानि त्रीण्यनादरता च ते। पंच स्मृत्यनुपस्थानं स्युः सामायिकगोचराः॥१८०॥
अनवेक्ष्यमलोत्सर्गादानसंस्तरसंक्रमाः । स्युः प्रोषधोपवासस्य तेनैकाग्र्यमनादरः ॥१८१॥
सचित्ताहारसंबंधसन्मिश्राभिषवास्तु ते । उपभोगपरीभोगे दुष्पक्काहार एव च ॥१८२॥
ते सचित्तेन निक्षेपः सचित्तावरणं परं । व्यपदेशश्च मात्सर्यं कालातिक्रमतातिथौ ॥१८३॥
आशंसे जीविते मृत्यौ निदानं दीनचेतसः । सुखानुबंधमित्रानुरागौ सल्लेखनामलाः ॥१८४॥
सम्यग्ज्ञानादिवृद्ध्यादिस्वपरानुग्रहेच्छया। दानं त्यागो निसर्गाख्यः प्रासुकं स्वस्य पात्रगं ।१८५।
विधिदेयविशेषाभ्यां दातृपात्रविशेषतः । भेदः फलस्य भूम्यादेर्भेदात्सस्यर्द्धिभेदवत् ॥१८६॥
प्रतिग्रहादिषु प्रायः सादरानादरत्वतः । दानकाले विधौ भेदः फलभेदस्य कारकः ॥१८७॥
तपः स्वाध्यायवृद्ध्यादेर्देयभेदोऽपि हेतुता । एकं हि साम्यकृद्देयं ततो वैषम्यकृत्परं ॥१८८॥
अनुसूयाविषादादिरसूयादिपरस्त्वयं । दायकस्य विशेषोऽपि विचित्रा हि मनोगतिः ॥१८९॥
मोक्षकारणभूतानां दानानां धारणे सतां । तारतम्यं मनःशुद्धेर्विशेषः पात्रगोचरः ॥१९०॥
पुण्यास्रवः सुखानां हि हेतुरभ्युदयावहः । हेतुः संसारदुःखानामपुण्यास्रव इष्यते ॥१९१॥

१ अप्रवेक्ष्य इति ख पुस्तके ।

मिथ्यादर्शनमात्मस्थं हिंसाद्यविरतिस्तथा। प्रमादश्च कषायश्च योगो बंधस्य हेतवः ॥१९२॥
तन्मिथ्यादर्शनं द्वेधा निसर्गान्योपदेशतः। मिथ्याकर्मोदयादाद्यं तत्त्वाश्रद्धानलक्षणं ॥१९३॥
परोपदेशपूर्वं तु चतुर्धा मतभेदतः। क्रियावाद्यक्रियावादिविनयाज्ञानिकत्वतः ॥१९४॥
एकांतविपरीतत्वविनयाज्ञानसंशयैः। निमित्तैः पंचधा चापि मिथ्यादर्शनमिष्यते ॥१९५॥
द्विषोढा विरतिर्ज्ञेया प्रमादोनेकधा स्थितः। नवभिर्नोकषायैस्तु कषायाः पंचविंशतिः ॥१९६॥
चत्वारः स्युर्मनोयोगा वाग्योगाश्च तथैव ते। काययोगास्तु पंचापि मनोयोगास्त्रयोदश ॥१९७॥
समस्तव्यस्तरूपास्तु पंचैते बंधहेतवः। मिथ्यादृष्टेर्हि पंचोर्ध्वं चत्वारस्त्रिषु पश्चिमाः ॥१९८॥
विरत्याविरतिर्मिश्रा प्रमादाद्यास्त्रयः परे। संयतासंयतस्योक्ताः कर्मबंधस्य हेतवः ॥१९९॥
प्रमत्तसंयतस्यापि योगांतास्त्रय एव ते। तत ऊर्ध्वं चतुर्णां तु कषायायोगसंगताः ॥२००॥
शांतक्षीणकषायौ तौ सयोगकेवली तथा। बंधकायोगतन्मात्रादयोगो नैव बंधकः ॥२०१॥
कषायकलुषो ह्यात्मा कर्मणो योग्यपुद्गलान्। प्रतिक्षणमुपादत्ते स बंधो नैकधा मतः ॥२०२॥
प्रकृतिश्च स्थितिश्चापि स बंधोनुभवस्ततः। प्रदेशबंधभेदेन चातुर्विध्यं प्रपद्यते ॥२०३॥
प्रकृतिःस्यात्स्वभावोऽत्र निंबादेस्तिक्ततादिवत्। कर्मणामिह सर्वेषां यथास्वं नियता स्थिता २०४

अज्ञानं प्रकृतिर्ज्ञेया ज्ञानावरणकर्मणः । दृश्यार्थादर्शनं दृश्या दर्शनावरणस्य सा ॥२०५॥
सदसल्लक्षणस्यापि वेदनीयस्य कर्मणः । संवेदनं विदां वेद्यं प्रकृतिःसुखदुःखयोः ॥२०६॥
दृष्टा दर्शनमोहस्य तत्त्वाश्रद्धानमेव सा । तथा चारित्रमोहस्य महतोऽसंयमः सदा ॥२०७॥
प्रकृतिः प्रतिपत्ता तु भवधारणमायुषः । देवनारकनामादिकरणं नामकर्मणः ॥२०८॥
गोत्रस्योच्चैश्च नीचैश्च स्थानसंशब्दनं तथा । अंतरायस्य दानादिविघ्नानां करणं घनं ॥२०९॥
तदेवं लक्षणं कार्यं यत्तत्प्रक्रियते ततः । प्रकृतिस्तत्स्वभावस्य तथैवाप्रच्युतिःस्थितिः ॥२१०॥
यथाजागोमहिष्यादिक्षीराणां स्वस्वभावतः । माधुर्यादच्युतिस्तद्वत्कर्मणां प्रकृतिस्थितिः ॥२११॥
तीव्रमंदादिभावेन क्षीरे रसविशेषवत् । कर्मपुद्गलसामर्थ्यविशेषोऽनुभवो मतः ॥२१२॥
कर्मत्वपरिणत्यात्मपुद्गलस्कंधसंहतेः । प्रदेशः परमाण्वात्मपरिच्छेदावधारणा ॥२१३॥
प्रकृतेः सप्रदेशाया नित्यं योगनिमित्तता । स्थितेःसानुभवायास्तु स्यात्कषायनिमित्तता ॥२१४॥
अनेनाव्रियते ज्ञानमावृणोतीति वा स्वयं । ज्ञानावरणमाख्यातं दर्शनावरणं तथा ॥२१५॥
वेद्यते वेदयत्येवं वेदनीयमनेन वा । मोह्यते मोहयत्येवं मोहनीयमपीरितं ॥२१६॥
नारकादिभवानेति त्वनेनेत्यायुरित्यपि । नम्यतेऽनेन वात्मानं नमयत्यपि नाम तत् ॥२१७॥

गूयते शब्दते गोत्रमुच्चैर्नीचैश्च यत्नतः। अंतरोयोंतरं मध्यं देयादेरेति यत्नतः ॥२१८॥
एकात्मपरिणामेन गृह्यमाणा हि पुद्गलाः। नानाकर्मत्वमायांति प्रभुक्तान्नरसादिवत् ॥२१९॥
मूलप्रकृतिभेदोयमष्टभेदः प्रभावितः। उत्तरप्रकृतीनां तु भेदोऽतःपरमुच्यते ॥२२०॥
पंचधा ज्ञानावरणं नवधा दर्शनावृतिः। द्विधानुवेदनीयं स्यान्मोहोष्टाविंशतिःस्थितिः ॥२२१॥
आयुश्चतुर्विधं नाम द्विचत्वारिंशदीरितं। द्विविधं गोत्रमुद्गीतमंतरायस्तु पंचधा ॥२२२॥
मतिश्रुतावधिज्ञानमनःपर्ययकेवलैः। आवृत्यैरावृतीः पंच ह्युत्तरप्रकृतीर्विदुः ॥२२३॥
द्रव्यार्थादेशतः शक्तिर्मनःपर्ययकेवली। अभव्योप्यस्ति यत्तस्थं ज्ञानावरणपंचकं ॥२२४॥
व्यक्तियोग्यत्वसद्भावापेक्षा भव्यस्य भव्यता। कैवल्यव्यक्त्ययोग्यत्वादभव्यस्य ह्यभव्यता ॥२२५॥
चक्षुषोऽचक्षुषो दृष्टेरवधेः केवलस्य च। चत्वार्यावरणान्येवं निद्राद्यैः पंचभिर्नव ॥२२६॥
मदखेदविनोदार्थः स्वापो निद्राधिकत्वतः। उपर्युपरि तद्वृत्तिर्निद्रानिद्राभिधीयते ॥२२७॥
श्रमादिप्रभवात्मानं प्रचलाप्रचलयत्यलं। सा पुनः पुनरावृत्ताः प्रचलाप्रचलाभिधा ॥२२८॥
स्त्यानगृद्धिर्यास्त्याने स्वप्ने गृध्यति दीप्यते। आत्मा यदुदयाद्रौद्रं बहुकर्म करोति सा ॥२२९॥

---

१ अभव्येऽप्यस्ति इति क पुस्तके।

शारीरं मानसं सौख्यं दुःखं चोदयते ययोः। स्यातां ते वेदनीये स्तः सातासाते यथाक्रमं॥२३०॥
सम्यक्त्वं चापि मिथ्यात्वं सम्यग्मिथ्यात्वमित्यदः। इत्थं दर्शनमोहस्य ह्युत्तरं प्रकृतित्रिकं ॥२३१॥
शुभात्मपरिणामेन निरुद्धस्वरसे स्थिते। मिथ्यात्वे श्रद्दधानस्य सम्यक्त्वप्रकृतिर्भवेत् ॥२३२॥
मिथ्यात्वे त्वर्धसंशुद्धे कोद्रवे मदशक्तिवत्। शुद्धाशुद्धात्मको भावः सम्यग्मिथ्यात्वमुच्यते ॥२३३॥
द्वेधा चारित्रमोहस्तु नोकषायकषायतः। नवधा नोकषायोत्र कषायाः षोडशोदिताः ॥२३४॥
उदयाद्यस्य हासाविर्भावो हास्यं तदुत्सुकः। यस्योदयाद्रतिः सा स्यादरतिस्तद्विपर्ययः ॥२३५॥
शोचनं यद्विपाकात्स शोक उद्वेगकृद्भयं। स्वदोषगोपनं यस्य जुगुप्सा सा जुगुप्सिता॥२३६॥
भावांस्त्रैणान्यतो याति स स्त्रीवेदोऽतिगर्हितः। पुन्नपुंसकवेदौ स्तः पौंस्नान्नपुंसकान् यतः ॥२३७॥
कषायाः क्रोधमानौ च मायालोभौ च घातकाः। सम्यक्त्वस्य सवृत्तस्य तत्रानंतानुबंधिनः॥२३८॥
यदीयोदयतो ह्यात्मा प्रत्याख्यातुं न शक्नुयात्। हिंसादीत्युदयास्ते स्युरप्रत्याख्यानसंज्ञकाः २३९
यदीयोदयतो वृत्तं यथाख्यातं न जायते। ज्वलंतः संयमेनामा ख्याताः संज्वलनास्तु ते ॥२४१॥
यदीयोदयतो जीवः संयमं न प्रपद्यते। ते क्रोधमानमायाद्याः प्रत्याख्यानविनिःश्रुताः ॥२४०॥

१ हिंसादीन्युदयाः इति क पुस्तके।

नारकं नरकोद्भूतं तैर्यग्योनं च मानुषं। दैवं चायुर्भवेत्तेषु चतुर्विधमितीरितं ॥२४२॥
यदीयोदयतो जंतुर्भवांतरमियर्ति सा। गतिश्चतुर्विधादेव नरकादिविभेदतः ॥२४३॥
आत्मनो नरकादित्वं यन्निमित्तं प्रजायते। तत्स्यान्नरकगत्यादि गतिनाम चतुर्विधं ॥२४४॥
गतिष्वेकीगतार्था सा साम्येनाभ्यभिचारिणा। जातिस्तस्या निमित्तं तु जातिनामात्र पंचधा २४५
एकेंद्रियादिकां जातिमुदयाद्यस्य जंतवः। प्रयांत्येकेंद्रियाद्ये तज्जातिनामाभिधीयते ॥२४६॥
शरीरपंचकस्यास्य निवृत्तिर्यस्य चोदयात्। औदारिकशरीरादि नाम पंचविधं तु तत् ॥२४७॥
अंगोपांगविवेकःस्याच्छरीराणां यतस्तु तत्। त्रिधांगोपांगनामाख्यमौदारिकपुरस्सरं ॥२४८॥
चक्षुरादींद्रियस्थानप्रमाणे यदपेक्षया। यो निर्मापयतस्ते स्तो नाम्ना निर्माणनामनी ॥२४९॥
कर्मोदयवशोपात्तपुद्गलान्योन्यबंधनं। शरीरेषूदयाद्यस्य भवेद्बंधननाम तत् ॥२५०॥
यस्योदयाच्छरीराणां नीरंध्रान्योन्यसंहतिः। संघातनाम तन्नाम्ना संघाता नाम सत्वया ॥२५१॥
शरीराकृतिनिर्वृत्तिर्यतो भवति देहिनां। संस्थाननाम तत् षोढा संस्थानकरणार्थतः ॥२५२॥
समादिचतुरस्रांतो न्यग्रोधपरिमंडलं। सातिसंस्थाननामापि कुब्जवामनहुंडकं ॥२५३॥

१ सत्त्वयात् इति क पुस्तके, सत्वया इति ख पुस्तके पाठा परन्तु नतौ सुष्ठू प्रतिभातः।

यतो भवति सुश्लिष्टमस्थिसंधानबंधनं । तत्संहरनामापि नाम्ना षोढा विभज्यते ॥२५४॥
तद्वज्रर्षभनाराचवज्रनाराचकीलकाः । सनाराचार्धनाराचा ससंप्राप्तसृपाटिकाः ॥२५५॥
स्पर्शनस्योदयाद्यस्य प्रादुर्भावेन भूयते । स्पर्शनाम भवत्येतत्प्रविभक्तमिवाष्टधा ॥२५६॥
ख्यातं कर्कशनामैकं मृदुनाम तथापरं । गुरुनाम लघुस्निग्धरूक्षशीतोष्णनाम च ॥२५७॥
यद्धेतुरसभेदः स्याद्रसनाम तदीरितं । कटुतिक्तकषायाम्लमधुरध्वनिनाम तत् ॥२५८॥
यस्योदयाच्चवेद्गंधो गंधनाम तदुच्यते । द्विविधं तत्तु बोद्धव्यं सुरभ्यसुरभीति च ॥२५९॥
यद्धेतुवर्णभेदस्तद्वर्णनामाख्यपंचधा । कृष्णनीलत्वरक्तत्वपीतशुक्लत्वयोगतः ॥२६०॥
उदयाद्यस्य पूर्वात्मशरीराकृतिसंक्षयः । चतुर्गत्यानुपूर्व्यं तत्तथागुरुलघूदितं ॥२६१॥
यस्योदयादयोवत्तु गुरुत्वान्न पतत्यधः । न गच्छति पुमानूर्ध्वं लघुत्वादर्कतूलवत् ॥२६२॥
स्वकृतो बंधनाद्यैःस्यादुपघातो यतस्तु तत् । उपघातं समुद्दिष्टं परघातं पराद्धधः ॥२६३॥
यदीयोदयनिर्वृत्तं भवत्यापतनं महत् । आदित्यवद्वर्तमानं मतं सातपनाम तत् ॥२६४॥
यद्धेतुर्घोतनं देहे वेद्यमुद्योतनाम तत् । चंद्रखद्योतकाद्येषु वर्तमानं यदीक्षते ॥२६५॥

उच्छ्वासकारणं यत्तु मतमुच्छ्वासनाम तत् । विहायोगतिराकाशे शस्ताशस्तगतिप्रभुः ॥२६६॥
तत्प्रत्येकशरीराख्यं नाम त्वत्र शरीरकं । सदैवात्मोपभोगस्य हेतुर्निर्वर्तते यतः ॥२६७॥
साधारणमनेकेषामेकं यस्माच्छरीरकं । साधारणशरीराख्यं नाम तद्योगकारणं ॥२६८॥
उदयाद्यस्य जीवानां द्वींद्रियादिषु जन्म यत् । त्रसनाम विपर्यस्त्वं स्थावराख्यं तु नाम तत्॥२६९॥
सर्वे प्रीतिकरो यस्मात्प्राणी सुभगनाम तत् । यतोऽप्रीतिकरोऽन्येषां नाम्ना दुर्भग नाम तत् २७०॥
मनोज्ञस्वरनिर्वृत्तिर्यतः सुस्वरनाम तत् । अनिष्टस्वरहेतुर्यत्प्रोक्तं दुःस्वरनाम तत् ॥२७१॥
यतस्तु रमणीयत्वं शुभनाम तदीरितं । अतिवैरूप्यहेतुश्च नामाशुभमशोभनं ॥२७२॥
यत्र सूक्ष्मशरीरस्य कारणं सूक्ष्म नाम तत् । परबाधाकृतो हेतुः शरीरस्य तु बादरः ॥२७३॥
यदाहारादिपर्याप्तिभेदनिवृत्तिकारणं । पर्याप्तिनाम तन्नाम्ना षड्विधमुदितं बुधैः ॥२७४॥
आहारस्य शरीरस्य प्राणापानेंद्रियस्य च । पर्याप्त्यभावहेतुस्तु भाषायां मनसोऽपर ॥२७५॥
कारणं स्थिरभावस्य स्थिरमस्थिरमन्यथा । नामादेयमनादेयं मप्रभाप्रभेदेहकृत् ॥२७६॥
हेतुः पुण्यगुणाख्यातेः यशःकीर्तिरितीर्यते । अयशःकीर्तिनामापि तद्विपर्यासकारणं ॥२७७॥
हेतुस्तीर्थकरत्वस्य सतीर्थकरनाम तत् । नाम्नः प्रकृतिभेदास्त्रिनवतिस्तूत्तरोत्तराः ॥२७८॥

गोत्रमुच्चैश्च नीचैश्च तत्र यस्योदयात्कुले । पूजिते जन्म तदुच्चैर्नीचैर्नीचकुलेषु तत् ॥२७९॥
दीयते दातुकामैर्न लब्धुकामैर्न लभ्यते । यदुदयात्प्रणीतौ तौ दानलाभांतरायकौ ॥२८०॥
भोक्तुंकामोपि नोभुंक्ते नोपभुंक्ते तथेच्छुकः । यदेतावंतरायौ तौ ज्ञेयौ भोगोपभोगयोः ॥२८१॥
तथोत्सहितुकामो यो यतो नोत्सहते स हि । वीर्यांतराय एषोऽसौ बंधः प्रकृतिलक्षणः ॥२८२॥
स्थितिबंधविकल्पस्तु जघन्योत्कृष्टभेदवान् । अष्टानां कर्मणामेषां द्विविधोऽपि निरूप्यते ॥२८३॥
ज्ञानदर्शनसंवृत्योर्वेदनीयांतराययोः । सागरोपमकोटीनां कोट्यस्त्रिंशत्परा स्थितिः ॥२८४॥
सप्ततिर्मोहनीयस्य विंशतिर्नामगोत्रयोः । संज्ञिपंचेंद्रियस्येयं ज्ञेया पर्याप्तकस्य तु ॥ २८५॥
आयुषस्तु त्रयस्त्रिंशत्सागरोपमिका परा । स्थितिः सा वेदनीयस्य मुहूर्ता द्वादशावरा ॥२८६॥
साष्टावेव मुहूर्ता स्याज्जघन्या नामगोत्रयोः । पंचानामपि शेषाणां स्थितिरंतर्मुहूर्तिका ॥२८७॥
कषायतीव्रमंदादिभावास्रवविशेषतः । विशिष्टपाक इष्टस्तु विपाकोनुभवोऽथवा ॥२८८॥
स द्रव्यक्षेत्रकालोक्तभवभावविभेदतः । विविधो हि विपाको यः सोनुभवः समुच्यते ॥२८९॥
प्रकृष्टोनुभवः पुण्यप्रकृतीनां शुभो यथा । अशुभप्रकृतीनां तु निकृष्टोऽनुभवस्तथा ॥२९०॥

१ योऽनुभवश्च स उच्यते इति ख पुस्तके ।

अशुभप्रकृतीनां तु परिणामविशेषतः। प्रकृष्टोनुभवोन्यासां निकृष्टोनुभवस्तदा ॥२९१॥
स्वमुखेनानुभूयंते मूलप्रकृतयोऽखिलाः । उत्तरास्तुल्यजातीयाद्द्वयान्मोहायुषी विना ॥२९२॥
कर्मणोऽनुभवात्तस्मात्तपसश्चापि निर्जरा । विपाकजा तु तत्रैका परा चाप्यविपाकजा ॥२९३॥
संसारे भ्रमतो जंतोः प्रारब्धफलकर्मणः । क्रमेणैव निवृत्तिर्या निर्जरासौ विपाकजा ॥२९४॥
यत्तूपायविपाच्यं तदाम्रादिफलपाकवत् । अनुदीर्णमुदीर्याशु निर्जरा त्वविपाकजा ॥२९५॥
सर्वेश्वात्मप्रदेशेष्वनंतानंतप्रदेशकाः । घनांगुलस्यासंख्येयभागे क्षेत्रावगाहिनः ॥२९६॥
एकद्वित्र्यादिसंख्येयसमयस्थितयः सदा । प्रदेशबंधसंतानेप्यासते कर्मपुद्गलाः ॥ २९७ ॥
शुभायुर्नामगोत्राणि सद्वेद्यं च चतुर्विधः । पुण्यबंधोन्यकर्माणि पापबंधः प्रपंचितः ॥ २९८ ॥
आस्रवस्य निरोधस्तु संवरः परिभाष्यते । स भावद्रव्यभेदाभ्यां द्वैविध्येन निरुच्यते ॥२९९॥
क्रियाणां भवहेतूनां निवृत्तिर्भावसंवरः । तत्कर्मपुद्गलादानविच्छेदो द्रव्यसंवरः ॥ ३०० ॥
त्रिसंख्या गुप्तयः पंचसंख्याः समितयस्तथा । दशद्वादशधर्मानुप्रेक्षाश्चारित्रपंचकं ॥ ३०१ ॥
द्वाविंशतिभिदा भिन्नपरीषहजयोऽपि च । हेतवः संवरस्यैते सप्रपंचाः समन्विताः ॥ ३०२ ॥
बंधहेतोरभावाद्धि निर्जरातश्च कर्मणां । कार्त्स्न्येन विप्रमोक्षस्तु मोक्षो निर्ग्रंथरूपिणः ॥ ३०३ ॥

जीवादिसप्ततत्वानामेतेषां ज्ञानसंगतं । श्रद्धानं तच्चरित्रं च साक्षान्मोक्षस्य साधनं ॥ ३०४ ॥
भवेनैकेन मार्गस्थः केचित्सप्ताष्टभिः परे। भुक्तस्वर्गसुखा भव्याः सिध्यंति ध्यानिनः सदा ॥३०५॥
इति श्रुत्वा जिनेंद्रोक्तं मोक्षमार्गमनाविलं । प्रणेमुर्द्वादश गणाः प्रकृत्यांजलयो विभुं ॥ ३०६ ॥
ते सम्यग्दर्शनं केचित्संयमाऽसंयमं परे । संयमं केचिदायाताः संसारावासभीरवः ॥ ३०७ ॥
द्वे सहस्रे नरेंद्रास्ते कन्याश्च नृपयोषितः । सहस्राणि बहून्यापुः संयमं जिनदेशितं ॥ ३०८ ॥
शिवा च रोहिणी देवी देवकी रुक्मिणी तथा । देव्योन्याश्च सुचारित्रं गृहिणां प्रतिपेदिरे ॥३०९॥
यदुभोजकुलश्रेष्ठा राजानः सुकुमारिकाः । जिनमार्गविदो जाता द्वादशाणुव्रतस्थिताः ॥३१०॥
कृतपूजाः सुरैरिंद्राः प्रणम्य जिनभास्करं । प्रयाताः स्वास्पदं रामकेशवाद्याश्च यादवाः ॥३११॥
विश्वासा विशदाः शरद्विदधती धौतं पयोदैस्तथा विस्पष्टग्रहतारकाकुसुमितं रम्यं नभोमंडलं ।
बंधूकाज्वसु सप्तपर्णसुरभिप्रत्यग्रपुष्पांजलिं मुंचंती जिनपादयोरुपगता भक्तेव लोकत्रयी ॥३१२॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ श्रीनेमिनाथधर्मोपदेशवर्णनो नाम अष्टपंचाशः सर्गः ।

---

१ 'प्रकृताञ्जलयो' इति ख पुस्तके ।

एकोनषष्टितमः सर्गः ।

विहाराभिमुखेगोंग्राज्जिनेंद्रेऽवतरिष्यति स्वर्गाग्रादिव भूलोकं समुद्धर्तुं भवोदधेः ॥१॥
गृह्यतां गृह्यतां काम्यं यथाकाममिहार्थिभिः । इति नित्यं धनेशेन घुष्यते कामघोषणा ॥२॥
कामदा कामवद्भूमिः कल्पते मणिकुट्टिमा । मांगल्यविजयोद्योगे विभोः किं वा न कल्पते ॥३॥
महाभूतानि सर्वाणि कर्तुंभूतहितोद्यमे । सर्वभूतहितानि स्युस्तादृशी खलु सार्वता ॥४॥
प्रावर्षण्यांबुधारेव वसुधारा वसुंधरां । दिवोन्वर्थाभिधानत्वं नयती न्यपतत्पथि ॥५॥
प्रोद्भुख्यंति सुराः सद्यः प्रणामचलमौलयः । भासा व्याप्य दिशो भर्तुःप्रभाकारानुगिणः ॥६॥
ये द्वे पूर्वोत्तरे पंक्ती हेमांबुजसहस्रयोः । सहस्रपत्रं तत्पूतं भुवः कंठे गुणाकृतिः ॥७॥
पद्मरागमयं भास्वच्चित्ररत्नविचित्रितं । प्रवृत्तप्रतिपत्रस्थपद्मभागमनोहरं ॥८॥
सहस्राक्षसहस्राक्षिभृंगावलिनिषेवितं । देवासुरनरालोकमधुपापानमंडलं ॥९॥
पद्मोऽभासि परं पुण्यं पद्मयानं प्रकाशते । सद्यो योजनविष्कंभं तच्चतुर्भागकार्णिकं ॥१०॥
महिमाग्रेसरे साष्टमूर्तिस्पष्टगुणश्रियः । वसवोष्टौ पुरोधाय वासवं वरिवस्यया ॥११॥

१ पर्वताग्रात्—गिरनारशिखरतः । २ प्रादुष्यंति इति ख पुस्तके ।

जय प्रसीद भर्तुस्ते वेला लोकहितोद्यमे । जाताद्येत्यानमंतीशं स हि विश्वसृजो विधिः ॥१२॥
ततः प्रक्रमते सिंधुरारोढुं पद्मयानकं । तत्क्षणं भूयते भूम्या हृष्टसंभ्रातयापि च ॥ १३ ॥
विजये विहरत्येष विश्वेशो विश्वभूतये । धर्मचक्रपुरस्सारी त्रिलोकी तेन संपदा ॥ १४ ॥
वर्धतां वर्धतां नित्यं निरीतिर्मरुतामिति । श्रूयतेत्यंबुदध्वानः प्रयाणपटहध्वनिः ॥ १५ ॥
वीणावेणुमृदंगोरुभल्लरीशंखकाहलैः । तूर्यमंगलघोषोऽपि पयोधिमधिगर्जति ॥ १६ ॥
संकथाक्रोशगीताट्टहासैः कलकलोत्तरैः । दिवः पृथिव्यौ प्राप्नोति प्रस्थानीकमहारवः ॥ १७ ॥
फल्गु गायंति किन्नर्यो नृत्यंत्यप्सरसो दिवि । स्पृशंत्यातोद्यमानार्तां गंधर्वादय इत्यपि ॥१८॥
स्तुवंति मंगलस्तोत्रैर्जयमंगलपूर्वकैः । तत्र तत्र सतां वंद्यं वंदिता नृसुरासुराः ॥ १९ ॥
चित्रैश्चित्तहरैर्दिव्यैर्मानुषैश्च समंततः । नृत्यसंगीतवादित्रैर्भूतलेऽपि प्रभूतये ॥ २० ॥
पालयंति सदिग्नागैर्लोकपालाः सभूतयः । भर्तृसेवा हि भृत्यानां स्वाधिकारेषु सुस्थितिः ॥२१॥
धावंति परितो देवा केचिच्चासुरदर्शनाः । हिंसया ज्यायसः सर्वानुत्सार्योत्सार्य दूरतः ॥२२॥
उदस्तैरत्नवलयैर्वीचिहस्तैः कृतांजलिः । मन्ये प्रीतस्तदोदन्वान्वेलामूर्ध्ना नमस्यति ॥ २३ ॥

१ हिंसापापीयसः सर्वान् इति क पुस्तके ।

विलंबितसहस्रार्कयुगपत्पतनोदयौ । नमतानंदितालोकनामोन्नामैः पदे पदे ॥ २४ ॥
शूराणां भूतलस्पर्शिमकुटैर्बहुकोटिभिः । भूः पुरःसोपहारेव शोभतेऽबुजकोटिभिः ॥ २५ ॥
लौकांतिकाः पुरो यांति लोकांतस्थापितेजसः। लोकेशस्य यथालोकाः पुरोगा मूर्तिसंभवाः ॥२६॥
पद्मा सरस्वतीयुक्ता परिवारात्तमंगला । पद्महस्ता पुरो याति परीत्य परमेश्वरं ॥२७॥
प्रसीदेत इतो देवेत्यानम्य प्रकृतांजलिः । तद्भूमिपतिभिः सार्धं पुरो याति पुरंदरः ॥२८॥
एवमीशस्त्रिलोकेशपरिवारपरिस्कृतः । लोकानां भूतये भूतिमुद्वहन् सार्वलौकिकीं ॥२९॥
पद्मकेतुः पवित्रात्मा परमं पद्मयानकं । भव्यपद्मैकसद्बंधुर्यदारोहति तत्क्षणात् ॥३०॥
जय नाथ जय ज्येष्ठ जय लोकपितामह । जयात्मभूर्जयात्मेश जय देव जयाच्युत ॥३१॥
जय सर्वजगद्बंधो जय सद्धर्मनायक । जय सर्वशरण्यश्रीर्जय पुण्यजयोत्तम ॥३२॥
इत्युदीर्णासकृद्घोषोरुंधानो रोदसी स्फुटः । जयत्युच्चैतिगंभीरो घनाघनघनध्वनिः ॥३३॥
स देवः सर्वदेवेंद्रव्याहतालोकमंगलः । तन्मौलिभ्रमरालीढभ्रमत्पादपयोरुहः ॥३४॥
तत्पयोरुहवासिन्या पद्मयानंदयज्जगत् । विरहत्परमोद्भूतिर्भूतानामनुकंपया ॥३५॥
देवमार्गोत्स्थिते दिव्ये विन्यस्यान्जे पदांबुजं। स्वच्छांभोवाहमुखांभोजप्रतिबिंबश्रिणि प्रभुः ॥३६॥

उद्यतस्तस्य लोकार्थं राजराजपुरस्सरः । राजते राजयन्मार्गं पुरोभानोर्यथारुणः ॥३७॥
पद्वीजातरूपांगी स्फुरन्मणिविभूषणा । श्लाघ्यते सा सती भर्त्रे स्वभर्त्रे भामिनी यथा ॥३८॥
परितः परिमार्जंति मरुतो मधुरे--रणैः । अवदातक्रियायोगैः स्वां वृत्तिं साधवो यथा ॥३९॥
अभ्युक्षंति सुरास्तत्र गंधांभोंबुदवाहनः । स्फुरत् सौदामिनीदीप्तिभासिताखिलदिङ्मुखाः ॥४०॥
मंदारकुसुमैर्मत्तभ्रमद्भ्रमरचुंबितैः । नंद्यते सुरसंघातैर्मार्गो मार्गविदुद्यमे ॥४१॥
ज्योतिर्मंडलसंकाशैः सौवर्णरसमंडलैः । सुलग्नैः शोभते मार्गो रत्नचूर्णतलोचितैः ॥४२॥
गुह्यकाश्चित्रपत्राणि चिन्वते कुंकुमै रसैः । चित्रकर्मकृतां चित्रां स्वामाचिक्षासवो यथा ॥ ४३ ॥
कदलीनालिकेरेक्षुक्रमुकाद्यैः क्रमस्थितैः । संपन्नैर्मार्गसीमापि रम्याऽऽरामायते द्वयी ॥४४॥
तत्राक्रीडपदानि स्युः सुंदराणि निरंतरं । यत्र दृष्ट्वा स्वकांताभिराक्रीडंते नरामराः ॥४५॥
भोग्यान्यपि यथा कामं भोगिनां भोगभूमिवत् । सर्वाण्यन्यूनभूतीनि संभवंत्यंतरेऽन्तरे ॥ ४६ ॥
योजनत्रयविस्तारो मार्गो मार्गांतयोर्द्वयोः । सीमानौ द्वावपि ज्ञेयौ गव्यूतद्वयविस्तृतौ ॥ ४७ ॥
तोरणैः शोभते मार्गः करणैरिव कल्पितैः । दृष्टिगोचरसंपन्नैः सौवर्णैरष्टमंगलैः ॥ ४८ ॥

१ अनून इति ख पुस्तके ।

कामशालाविशालाः स्युः कामदास्तत्र तत्र च । भागवत्यो यथा मूर्ताः कामदा दानशक्तयः ॥४९॥
तोरणांतरभूतुंगसमस्तकदलीध्वजैः । संछन्नोध्वा घनच्छायो रुणद्धि सवितुश्छविं ॥ ५० ॥
वनवासिसुरैर्वन्यमंजरीपुंजपिंजरः । स्वपुण्यप्रचयाकारः कल्प्यते पुष्पमंडपः ॥ ५१ ॥
युक्तो रत्नलताचित्रभित्तिभिः सद्वियोजनः । चंद्रादित्यप्रभारोचिर्मंडलोपांतमंडितः ॥ ५२ ॥
घटिकाकलनिर्ह्लादीघंटानादैर्निनादयन् । दिशो मुक्तागुणा मुक्तं प्रांतमध्यांततांतरः ॥ ५३ ॥
सद्गंधाकृष्टसंभ्रांतभृंगमालोलसद्युतिः । वियतीशयशोमूर्तवितानच्छविरिष्यते ॥ ५४ ॥
स्वोत्तंभस्तंभसंकाशैः स्थूलमुक्तागुणोद्भवैः । चतुर्भिर्दामभिर्भाति विद्रुमांतांतराचितैः ॥ ५५ ॥
तस्यांतस्थो दयामूर्तिः प्रयाति दयिताहितः । हिताय सर्वलोकस्य स्वयमीशः स्वयंप्रभः ॥५६॥
पश्यंत्यात्मभवान् सर्वे सप्त सप्त परापरान् । यत्र तद्भासतेऽत्यर्कं पश्चाद्भामंडलं प्रभोः ॥ ५७ ॥
त्रिलोकीवांतसाराभात्युपर्युपरि निर्मला । त्रिछत्री सा जिनेंद्रश्रीस्त्रैलोक्येशित्वशंसिनी ॥ ५८ ॥
चामराण्यभितो भांति सहस्राणि दमेश्वरं । स्वयंवीज्यानि शैलेंद्रं हंसा इव नभस्तले ॥५९॥
ऋषयोनुव्रजंतीशं स्वर्गिणः परिवृण्वते । प्रतीहारः पुरो याति वासवो वसुभिः सह ॥६०॥
ततः केवललक्ष्मीतः प्रतिपाद्या प्रकाशते । साकं शच्या वि(त्रि)लोकोरुभूतिलक्ष्मीः समंगला ॥६१॥

श्रीसनाथैस्ततः सर्वैर्भूयते पूर्णमंगलैः । मंगलस्य हि मांगल्या यात्रा मंगलपूर्विका ॥६२॥
शंखपद्मौ ज्वलन्मौलिसार्थार्थौ सत्वकामदौ । निधिभूतौ प्रवर्तेते हेमरत्नप्रवर्षिणौ ॥६३॥
भास्वत्फणामणिज्योतिर्दीपिका भांति पन्नगाः । हतांधतमसज्ञानदीपदीप्त्यनुकारिणः ॥६४॥
विश्वे वैश्वानरा यांति धूतधूमघटोद्धताः । यद्गंधो याति लोकांतं जिनगंधस्य सूचकः ॥६५॥
सौम्याग्नेयगुणादेव भक्ताः सोमदिवाकराः । स्वप्रभामंडलादर्शमंगलानि वहंत्यहो ॥६६॥
तपनीयमयैश्छत्रैर्नभस्तपनरोधिभिः । तपनीयैरेव सर्वत्र संरुद्धमिव दृश्यते ॥६७॥
पताका हस्तविक्षेपैः संतर्ज्य परिवादिनः । दयामूर्ता इवेशांशा नृत्यंति जयकेतवः ॥६८॥
वैभवी विजया ख्याति वैजयंती पुरेडिता । राजते त्रिजगन्नेत्रकुमुदामलचंद्रिका ॥६९॥
भुवः स्वभूर्निवासिन्यो भुवि यद्व्यंतराःस्थिताः । नरीनृत्यंति देव्योग्रे प्रेमानंदरसाष्टकं ॥७०॥
आमंद्रमधुरध्वाना व्याप्तदिग्विदिगंतराः । धीरं नानद्यते नांदी जित्वा प्रावृड्घनावलीं ॥७१॥
जितार्को धर्मचक्रार्कः सहस्राराशुदीधितिः । यतिदेवपरीवारो वियतीति तमोपहः ॥७२॥
लोकानामेकनाथोयमेतैत नमतेति च । घुष्यते स्तनितैरग्रैर्घोषणामयघोषणा ॥७३॥
सर्वप्रभावसदृशा सत्पूर्वं व्याप्य दिक्पथे । प्रकुर्वंति जयाह्वानं धावंतः प्रथमोद्यमाः ॥७४॥

देवयात्रामिमां दिव्यामन्वेत्य परमाद्भुतां । अद्भुतान्यर्थदृष्ट्यादि सर्वाण्यसुभृतां भुवि ॥ ७५ ॥
आवयोर्नैव जायंते व्याधयो व्यापयंति नः । ईतयश्चाज्ञया भर्तुर्नेति तद्देशमंडले ॥ ७६ ॥
अंधा पश्यंति रूपाणि श्रण्वंति बधिराः श्रुतिं । मूका स्पष्टं प्रभाषंते विक्रयंते च पंगवः ॥ ७७ ॥
नात्युष्णा नातिशीताः स्युरहोरात्रादिवृत्तयः । अन्यच्चाशुभमत्येति शुभं सर्वं प्रवर्धते ॥७८॥
भूवधूः सर्वसंपन्नसस्यरोमांचकंचुका । करोत्यंबुजहस्तेन भर्तुः पादग्रहं मुदा ॥ ७९ ॥
जिनार्कपादसंपर्कप्रोत्फुल्लकमलावली । प्रथयंत्युद्वहंती द्यौरस्यायि सरसीश्रियं ॥ ८० ॥
स्वर्वेत्युक्ताः समात्मानः समदृष्टेश्वरेक्षिता । ऋतवः सममेधंते निर्विकंपा हि सेशिता ॥ ८१ ॥
निधानानि निर्धारन्नान्याकराण्यमृतानि च । सूयंते तेन विख्याता रत्नसूरिति मेदिनी ॥८२॥
अंते कौंतकजिद्वीर्यपराजितपराक्रमः । धर्मचक्रोर्जिते लोके नाकाले करमिच्छति ॥ ८३ ॥
कालः कालहरस्याज्ञामनुकूलभयादिव । प्रविहाय स्ववैषम्यं पूज्येच्छामनुवर्तते ॥ ८४ ॥
तत्र स्थावरकाः सर्वे सुखं विंदंति देहिनः । सैषा विश्वजनीना हि विभुता भुवि वर्तते ॥ ८५ ॥
जन्मानुबंधवैरो यः सर्वो हि नकुलादिकः । तस्यापि जायते जयें संगतं सुगताज्ञया ॥ ८६ ॥
गंधवाहो वहद्गंधं भर्तुस्तत्कथाप्नुयात् । अचंडः सेहते सेवां शिक्षयन्ननुजीविनः ॥ ८७॥

रजस्तिमिरिकापायवैमल्याभरणत्विषः । दिक्कन्याः पुष्पजापैस्तं पूजयंति दिशां पतिं ॥ ८८ ॥
नभः स्वच्छतरं स्पष्टतारातरलभासुरं । सरः शरत्प्रसन्नांभः कुमुद्वदिव दृश्यते ॥ ८९ ॥
दूराच्चाल्पधियः सर्वे नयंति किमुतेतरे । चतुरास्यश्चतुर्दिक्षु छायादिरहितो विभुः ॥ ९० ॥
भुक्त्यभावो जिनेंद्रस्योपसर्गस्य तथैव च । अहो लोकैकनाथस्य माहात्म्यं महदद्भुतं ॥९१॥
शुभंयवो नमंत्येत्याहंयवोऽपि प्रवादिनः । अवसानाद्भुतं चैतान्निर्द्वंद्वं प्राभवं हि तत् ॥९२॥
यस्यां यस्यां दिशीशःस्यात्त्रिदशेशपुरस्सरः। तस्यां तस्यां दिशीशाः स्युः प्रत्युद्याताः सपूजनाः९३
यतो यतश्च यातीशस्तदीशाश्च समंगलाः । अनुयांत्या स्वसीमानः सार्वभौमो हि तादृशः॥९४॥
त्रिमार्गगा प्रयात्येवं देवसेना त्वमार्गगा । पवित्रयति भूलोकं पवित्रेण प्रभाविता ॥९५॥
तस्यामेकः समुत्तुंगो मार्दंडो दंडसन्निभः । अधरोपरिलोकांतः प्राप्तः प्रत्यागतांशुभिः ॥९६॥
त्रिगुणीकृततेजस्कः स्थूलदृश्यः स्वतेजसा । भासते भास्करादन्याज्ज्योतिष्टमविरस्करः ॥९७॥
आलोको यस्य लोकांतव्यापी निःप्रतिबंधनः । ध्वस्तांधतमसो भास्वत्प्रकाशमतिवर्तते ॥९८॥
तस्यांतस्तैजसो भर्ता तेजोमय इवापरः । रश्मिमालिसहस्रैकरूपाकृतिरनाकृतिः ॥९९॥
परितो भाति तूत्सर्पद्घनो भर्तुर्महोदयः । राशिगव्यूतविस्तारो युक्तोच्छ्रायतनूद्भवः ॥१००॥

दृश्यते दृष्टिहारीव सुखदृश्यः सुखावहः । पुण्यमूर्तिस्तदंतस्थः पूज्यते पुरुषाकृतिः ॥१०१॥
काधियोऽपुण्यजन्मानः स्वापुण्यजरुषान्विताः । न पश्यंते च तद्भासं भानुभासमुलूकवत् ॥१०२॥
तिरयंती रवेस्तेजः पूरयंती दिशोऽखिलाः । तत्प्रभा भानवीयेव पूर्वं व्याप्नोति भूतलं ॥१०३॥
तस्याश्चानुपदं याति लोकेशो लोकशांतये । लोकानुद्भासयन् सर्वानतिदीधितिमप्रभः ॥१०४॥
आसंवत्सरमात्मांगैः प्रथयन्प्राभवीं गतिं । भासते रत्नवृष्ट्या वा परीत्यैरावतो यथा ॥ १०५ ॥
अनुबंधावनिप्रख्यं दिवि मार्गादि दृश्यते । त्रिलोकातिशयोद्भूतं तद्धि प्राभवमद्भुतं ॥ १०६ ॥
पटूभवंति मंदाश्च सर्वे हिंस्रास्नपर्धयः । खेदः स्वेदार्तिचिंतादि न चैषामस्ति तत्क्षणे ॥ १०७ ॥
विहारानुगृहीतायां भूमौ न डमरादयः । दशाभ्यस्तैयुगं भर्तुरहोत्र महिमा महान् ॥ १०८ ॥
विभूत्योद्धतया भूत्यै जगतां जगतां विभुः । विजहार भुवं भव्यान् बोधयन् बोधदः क्रमात् ॥१०९॥
सुराष्ट्रमत्स्यलाटोरुसूरसेनपटच्चरान् । कुरुजांगलपांचालकुशाग्रमगधांजनान् ॥ ११० ॥
अंगवंगकलिंगादीनानाजनपदान् जिनः । विहरन् जिनधर्मस्थांचक्रे क्षत्रियपूर्वकान् ॥ ११२ ॥
ततो मलयनामानं देशमागत्य स क्रमात् । सहस्राम्रवने तस्थौ पुरे भद्रिलपूर्वके ॥ ११३॥

१ द्विशतयोजनं ।

पूर्ववद्रचिते तत्र चतुर्भेदैः सुरासुरैः। समवस्थानभूभागे जिनोऽभाद्गणवेष्टितः ॥ ११४ ॥
तत्पुराधिपतिः पौंड्रः पौरलोकसमन्वितः। सस्तुतिर्जिनमानम्य समासीनः कृतांजलिः ॥११५॥
देवक्यास्तनया ये षट् सुदृष्टचलकयोः स्थिताः। पुत्रप्रीतिं प्रकुर्वाणास्तेऽपि तत्रैव संगताः॥११६॥
प्रत्येकं योषितस्तेषां द्वात्रिंशद्गणनां गुणैः। रूपादिभिरपींद्रस्य जयंत्यः शुचयः शचीं ॥११७॥
अवतीर्य रथेभ्यस्ते षड्भ्यः षडपि सोदराः। नत्वा नुत्वा जिनं राज्ञा सहासीना महौजसः॥११८॥
जिनः श्रावकधर्मं च सम्यक्दर्शनभूषितं। यतिधर्मं च कर्मघ्नं जगाद सदसे तदा ॥ ११९ ॥
ततो विदिततत्त्वार्थाः श्रुत्वा धर्मामृतं जिनात्। जातसंसारनिर्वेदा बंधुभ्यो विनिवेद्य ते॥१२०॥
जिनपादांतिके दीक्षां मोक्षलक्ष्मीविधायिनीं। भ्रातरः सहनिस्संगा षडपि प्रतिपेदिरे ॥१२१॥
द्वादशांगं श्रुतज्ञानं लब्धबीजादिबुद्धयः। अधिगम्य तपो घोरं चक्रुस्ते राजसूनवः ॥ १२२ ॥
षष्ठादयः सहामीषां धारणापारणा सह। योगास्त्रैकालिकाः साकं साकं शय्यासनक्रियाः॥१२३॥
तेषां चरमदेहानां तपतां परमं तपः। देहानां परमा कांतिः पूर्वतोऽपि विवर्धते ॥ १२४ ॥
उपमानोपमेयत्वमन्योन्यस्य तपस्यमी। सबाह्याभ्यंतरे प्रापुस्तीर्थकृत्पदसेवकाः ॥ १२५ ॥
तथाविधमहाभूत्या विहृत्य स महीं जिनः। आगत्य समवस्थाने नोर्जयंतमभूषयन् ॥ १२६ ॥

इंद्राद्यैस्त्रिदशैस्तस्मिन्नुपेंद्राद्यैश्च यादवैः । द्वारिकापौरलोकेन सेव्यमानो जिनो बभौ ॥ १२७ ॥
एकादश गणाधीशा वरदत्तादयस्तदा । श्रुतज्ञानसमुद्रांतदर्शिनोऽत्र विरेजिरे ॥ १२८ ॥
चतुःशतानि तत्रान्ये मान्याः पूर्वधराः सतां । एकादशसहस्राष्टशतसंख्यास्तु शिक्षकाः ॥१२९ ।
शतान्यवधिनेत्रास्तु केवलज्ञानिनोऽपि च । ते पंचदशसंख्यानाः प्रत्येकमुपवर्णिताः ॥ १३० ॥
मत्या विपुलया युक्ता शतानि नव संख्यया । वादिनोष्टौ शतानि स्युरेकादश नु वैक्रियाः १३१
चत्वारिंशत्सहस्राणि राजीमत्या सहार्जिकाः । लक्षैकैकोनसप्तत्या सहस्रैः श्रावकाः स्मृताः १३२
षट्त्रिंशच्च सहस्राणि लक्षाणां त्रितयं तथा । सम्यग्दर्शनसंशुद्धाः श्राविकाः श्रावकव्रताः॥१३३॥
पूर्ववत्तीर्थकृन्मेघस्तृषितान् भव्यचातकान् । वर्षन् धर्मामृतं दिव्यं दिव्यध्वनिरतर्पयत् ॥१३४॥

इति दुरापमहोदयपर्वते जिनरवौ स्थितवत्यमितोदये ।
विकसति प्रकृतांजलिकुड्मलं सकललोकसरोजबुधांबुजं ॥ १३५ ॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवद्विहारवर्णनो नामैकोनषष्टितमः सर्गः ।

षष्टितमः सर्गः ।

अथ धर्मकथाछेदे प्रणिपत्य जिनेश्वरं । कृतांजलिरपृच्छत्सा देवकी विनयं श्रिता ॥ १ ॥
भगवन् भवने मेऽद्य जातरूपमनोहरं । मुनियुग्मं प्रविश्य त्रिरुपर्युपरि भुक्तवान् ॥ २ ॥
भगवन् भुक्तिवेलायामेकस्यामेकभुक्तये । बहुकृत्वो गृहेत्वेकं यतयः प्रविशंति किं ॥ ३ ॥
अथातिशयरूपत्वाद्यतियुग्मत्रयं मया । भ्रांत्या नालक्षि मे स्नेहो देहजेष्विव तेष्वभूत् ॥ ४ ॥
इत्युक्ते कथयन्नाथस्तनयास्ते षडप्यमी । युग्मत्रतया सूता भवत्या कृष्णपूर्वजाः ॥ ५ ॥
देवेन रक्षिताः कंसात्सुदृष्टयलकयोः पुनः । सुतत्वेन च वृद्धास्ते पुरे भद्रिलनामनि ॥ ६ ॥
धर्मं श्रुत्वा समं सर्वे मम शिष्यत्वमागताः। कृत्वा कर्मक्षयं सिद्धिं यास्यंत्यत्रैव जन्मनि ॥ ७ ॥
स्नेहोऽपत्यकृतोऽमीषु भवत्याः समभूदतः । धर्मचारिषु सर्वेषु स्नेहः किमुत सूनुषु ॥ ८ ॥
प्रणनाम ततस्तुष्टा देवकी देहजान्मुनीन् । यादवाश्च समस्तास्ते कृष्णाद्यास्तुष्टुवुर्नताः ॥ ९ ॥
प्रणम्यात्मभवान् पृष्टो जिनेंद्रः सत्यभामया । यदुलोकामराध्यक्षं दिव्यचक्षुर्जगाविति ॥ १० ॥
प्राग्भद्रिलपुरेऽत्राभून्मरीचिकपिलासुतः । काव्यकृत्पंडितंमन्यो विप्रो मुंडशलायनः ॥ ११ ॥
पुष्पदंतजिनेंद्रस्य तीर्थे व्युच्छेदभावतः । अभावे जिनमार्गज्ञभव्यानां भरतक्षितौ ॥ १२ ॥

गोभूकन्याहिरण्यादिदानानि विषयातुरः । पापबंधनिमित्तानि विप्रः प्रज्ञाप्य सोवनौ ॥ १३ ॥
मोहयित्वा जडं लोकं राजलोकपुरोगमं । प्रवृत्तः पापवृत्तेषु सप्तमीं पृथिवीमितः ॥ १४ ॥
उद्वर्त्यापि परिभ्रम्य तिर्यग्नारकयोनिषु । काकतालीययोगेन मानुषत्वमुपागतः ॥ १५ ॥
गंधावतीसरित्तीरे गंधमादनपर्वते । व्याधः पर्वतको नाम्ना वल्लरीवल्लभोऽभवत् ॥ १६ ॥
श्रीधरं धर्मसंज्ञं च चारणश्रवणौ गिरौ । दृष्टोपशमकृत्ताभ्यां प्रोषितं धर्मकालभाक् ॥ १७ ॥
ज्योतिर्मालाख्यखेचर्यामलकायां महाबलात् । जातः शतबलिभ्राता स पुत्रो हरिवाहनः ॥१८॥
राजा राज्ये नियोज्यैतौ प्रव्रज्य श्रीधरांतिके । प्रव्रज्यायाः फलं मुख्यं मोक्षसौख्यमवाप सः ॥१९॥
निर्वासितो विरोधस्थो ज्येष्ठेन हरिवाहनः । भगलीदेशशैलेऽस्थादंबुदावर्तनामनि ॥२०॥
श्रीधर्मानंतवीर्याख्यौ चारणौ वीक्ष्य तत्र सः । प्रव्रज्याराध्य स प्रापत्कल्पमैशानमेव च ॥२१॥
भुक्त्वा देवसुखं देवश्च्युत्वा संक्लेशभावतः । जाता स्वयंप्रभागर्भे भामा त्वं हि सुकेतुतः ॥२२॥
अत्र जन्मनि कृत्वांते तपो भूत्वामरोत्तमः । च्युत्वा जैनं तपः कृत्वा निर्वाणसुखमाप्स्यति ॥२३॥
आकर्ण्यात्मभवानेवं ज्ञात्वात्मासन्ननिर्वृतिं । आननाम जिनाधीशं सत्यभामा प्रमोदिनी ॥२४॥
रुक्मिण्यापि ततः पृष्टः पूर्वजन्मानि सर्ववित् । अवोचदिति लोकेशो प्रणिधानपरे स्थिते ॥२५॥

अत्रैव भरतक्षेत्रे विषये मगधाभिधे । ब्राह्मणी सोमदेवस्य लक्ष्मीग्रामेग्रजन्मनः ॥२६॥
आसील्लक्ष्मीमती नाम्ना लक्ष्मीरिव सुलक्षणा । रूपाभिमानतो मूढा पूज्यान्न प्रतिमन्यते ॥२७॥
धृतप्रसाधना वक्त्रं कदाचिच्चित्तहारिणी । नेत्रहारिणि चंद्राभे पश्यंती मणिदर्पणे ॥२८॥
समाधिगुप्तनामानं तपसातिकृशीकृतं । साधुं भिक्षागतं दृष्ट्वा निनिंद विचिकित्सिता ॥२९॥
मुनेर्निंदातिपापेन सप्ताहाभ्यंतरे च सा । क्लिन्नोदुंबरकुष्ठेन प्रविश्याग्निमगान्मृतिं ॥ ३० ॥
सा ह्यार्तेन खरी[1] भूत्वा मृत्वा लवणभारतः । शूकरी मानदोषेण जाता राजगृहे पुरे ॥ ३१ ॥
वराकी मारिता मृत्वा गोष्ठे जाताथ कुक्कुरी । गोष्ठागतेन सा दग्धा परुषेण दवाग्निना ॥३२॥
त्रिपदाख्यस्य मंडूक्यां मंडूकग्रामवासिनः । मत्स्यबंधस्य जाता सा दुहिता पूतिगंधिका ॥३३॥
मात्रा त्यक्ता स्वपापेन पितामह्या प्रवर्धिना । निष्कुटे वटवृक्षस्य जालेनाच्छादयन्मुनिं ॥३४॥
बोधितावधिनेत्रेण प्रभाते करुणावता । धर्मं समाधिगुप्तेन प्रोक्तपूर्वभवाग्रहीत्[2] ॥ ३५ ॥
पुरं सोपारकं याता तत्रार्या समुपास्यया । ययौ राजगृहं ताभिः कुर्वाणाचाम्लवर्धनं ॥ ३६ ॥
अत्र सिद्धशिला वंद्या वंदित्वा च स्थिता सती। कृत्वा नीलगुहायां सा सती सल्लेखनामृता ॥३७॥

१ गर्दभी । २ ऽजायत इति ख पुस्तके ।

अच्युतेंद्रमहादेवी नाम्ना गगनवल्लभा । वल्लभाभवदुत्कृष्टा स्त्रीस्थितिस्तत्र देव्यसौ ॥ ३८ ॥
ततोवतीर्य भीष्मस्य श्रीमत्यां त्वं सुताऽभवः। नगरे कुंडिनाभिख्ये रुक्मिणी रुक्मिणः स्वसा॥३९॥
कृत्वा चात्र भवे भव्ये प्रव्रज्यां विबुधोत्तमः। च्युत्वा तपश्च कृत्वात्र नैर्ग्रंथ्यं मोक्ष्यसे ध्रुवं ॥४०॥
भीष्मजा भीष्मसंसारभीहराकर्ण्य सा भवान् । ज्ञात्वासन्नस्वमोक्षाप्तिः प्रणनाम प्रभुं मुदा ॥४१॥
जांबवत्या जिनः पृष्टस्तस्याः प्राह पुराभवं । संसारभयभीतानां सन्निधौ निखिलांगिनां ॥४२॥
सुतासीत्पुष्कलावत्यां जंबूद्वीपस्य देविलात् । नगर्यां वीतशोकायां देवमत्यां यशस्विनी ॥४३॥
गृहपत्यात्मजा यासौ गृहपतेः शरीरजा । दत्ता सुमित्रसंज्ञाय मृते तत्र सुदुःखिता ॥ ४४ ॥
जैनेन जिनदेवेन जिनधर्मोपदेशिता । शाम्यमाना न सम्यक्त्वं लेभे मोहोदयादसौ ॥ ४५ ॥
दानोपवासविधिना लौकिकेन मृता सती । नंदने व्यंतरस्यासीत् सा मार्या मेरुनंदना॥ ४६ ॥
त्रिंशद्वर्षसहस्राणि लब्धाशीतियुतानि तत् । भोगं भुक्त्वा चिरं कालं संसारं संससार सा ॥४७॥
द्वीपेत्रैरावतक्षेत्रे पुरे विजयपूर्वके । बंधुषेणस्य भूपस्य बंधुमत्याः सुताऽभवत् ॥ ४८ ॥
नाम्ना बंधुयशाः कन्या श्रीमत्या प्रोषधव्रतं । कन्यया जिनदेवस्य प्रतिपद्य मृताभवत् ॥ ४९ ॥
धनदस्य प्रिया पत्नी नामतः सा स्वयंप्रभा । च्युत्वातः पुंडरीकिण्यां जंबूद्वीपे पृथौ पुरि ॥५०॥

वज्रमुष्टेः सुभद्रायां सुमतिस्तनयाभवत् । सुंदर्यार्जिकया पार्श्वे कृत्वा रत्नावलीतपः ॥ ५१ ॥
सा त्रयोदशपल्यायुर्ब्रह्मेंद्राग्रांगनाऽभवत् । च्युतातो दक्षिणश्रेण्यां विजयार्धस्य भारते ॥ ५२ ॥
नगरे जांबवाभिख्ये जांबवस्य खगेशिनः । जांबवत्यां प्रियायां त्वं जाता जांबवती सुता ॥५३॥
तपस्तपस्विनी कृत्वा भूत्वा कल्पामरोत्तमः । च्युत्वा नृपात्मजो भूत्वा तपसा सिद्धिमेष्यति ॥५४॥
सेत्युक्ते त्यक्तशंसीतिशीलालंकृतिशालिनी । प्रणम्य जिनमासीना मन्वाना भवनिर्गमं ॥ ५५ ॥
जननानि जिनो पृष्टो विनयेन सुसीमया । सभाजनमनोह्लादजननध्वनिनाब्रवीत् ॥ ५६ ॥
धातकीखंडपूर्वार्धमेरुपूर्वविदेहजे । विजयो मंगलावत्यां नगरे रत्नसंचये ॥ ५७ ॥
भूपतिर्विश्वसेनोभूद्भार्यास्यानुंधरीरिता । अमात्यः श्रावकोऽस्यैव विश्रुतः सुमतिश्रुतिः ॥५८॥
पद्मसेनेन निहतोऽयोध्याधिपतिना युधि । विश्वसेनोऽस्य जायायै सोऽमात्यो धर्ममब्रवीत् ॥५९॥
मोहादप्राप्तसम्यक्त्वा विजयद्वारवासिनः । मृत्वा ज्वलितवेगाभूद्व्यंतरी विजयस्य सा ॥६०॥
दशवर्षसहस्राणि भुक्त्वा तत्र सुखं ततः । च्युता चिरं परिभ्रम्य भीमं संसारसागरं ॥६१॥
जंबूद्वीपविदेहेंतः सीतायाः दक्षिणे तटे । रम्ये रम्याभिधे क्षेत्रे शालिग्रामे महाघने ॥६२॥
सुताभूद्देवसेनायां यक्षिलस्य गृहेशिनः । यक्षासभनतो लब्धा यक्षदेवी स्वनामतः ॥ ६३ ॥

सा यक्षगृहपूजार्थमन्यदा प्रगतात्र च । धर्मसेनगुरोरंते धर्मं शुश्राव गौरवात् ॥ ६४ ॥
आहारदानमस्मै सा पात्रायातिथयेऽन्यदा । दत्वा भक्तिमती कन्या पुण्यबंधं बबंध च ॥६५॥
सखीभिः क्रीडितुं याता कदाचिद्विमलाचलं । तत्र चाकालवर्षेण पीडिता प्राविशद्गुहां ॥६६॥
तत्र सिंहेन संत्रस्ता ग्रस्ता त्यक्तात्मविग्रहा । बभूव हरिवर्षेसौ द्विपल्योपमजीविता ॥ ६७ ॥
ज्योतिर्लोकमतो गत्वा पल्योपमसमस्थितिः । तच्च्युत्वा पुष्कलावत्यां जंबूद्वीपस्य भारते ॥६८॥
वीतशोकाभिधानायामशोकस्य महीपतेः । श्रीमत्यामभवत्कन्या श्रीकांता नामतः सुता ॥६९॥
जिनदत्तार्यिकोपांते विनिष्क्रम्य कुमारिका । रत्नावलिं तपः कृत्वा माहेंद्राधिपतेः प्रिया ॥७०॥
भूत्वैकादशपल्यायुर्भुक्त्वा स्वर्गसुखं च्युता । सुज्येष्ठायां सुराष्ट्रेषु राष्ट्रवर्धनभूभृतः ॥ ७१ ॥
सुसीमास्तनयाभूस्त्वं नगरे गिरिपूर्वके । देवो भूत्वा तपःशक्त्या मोक्ष्यसे नृभवे ततः ॥ ७२ ॥
निशम्यात्मभवानित्थं सुसीमा सौम्यमानसा । प्रकृष्टासन्ननिष्ठेति निष्ठितार्थं ननाम सा॥ ॥७३॥
पृष्टो लक्ष्मणया नत्वा जिनः प्रोवाच तद्भवान् । जिनाः सर्वहिता सर्वे यत्प्रश्नोत्तरवादिन ॥७४॥
द्वीपेऽस्मिन् कच्छकावत्यां सीताया उत्तरे तटे । राजारिष्टपुरे ह्यासीद्वासवो वासवोपमः ॥७५॥
सुमित्राख्या प्रियास्यासौ वंदितुं सांगनो ययौ । गुरुं सागरसेनाख्यं सहस्राम्रवनस्थितं ॥ ७६ ॥

धर्मं श्रुत्वा गुरो राजा राज्ये विन्यस्य देहजं। वसुसेनमदीक्षिष्ट न पत्नी पुत्रमोहतः॥ ७७॥
पतिपुत्रवियोगोग्रशोकदुःखहता मृता। पुलिंदीत्वं[1] गता दृष्ट्वा नंदिभद्रं खचारणं[2]॥ ७८॥
अवधिज्ञानिनं श्रुत्वा तस्मात्पूर्वभवं हि सा। स्मृतपूर्वभवा भूत्वानिंदितानशनव्रता॥ ७९॥
नारदस्याभवद्देवी नामतो मेघमालिनी। च्युत्वा च भरतक्षेत्रे रौप्याद्रेर्दक्षिणे तटे॥ ८०॥
सानुधर्या महेंद्रस्य पुरे चंदनपूर्वके। सुता कनकमालाभूद्विद्याधरमनोहरा॥ ८१॥
हरिवाहनविद्येशं महेंद्रनगरेश्वरं। कृत्वा स्वयंवरे कन्या मान्या जातास्य वल्लभा॥ ८२॥
अन्यदा चैत्यपूजार्थं सिद्धकूटमियं गता। श्रुत्वा च चारणाज्जातिमार्याभुक्तावलीं तपः॥८३॥
कृत्वा सनत्कुमारेंद्रवल्लभाभूत् सुरांगना। नवपल्योपमायुष्का सौख्यं भुक्त्वा ततश्च्युता॥८४॥
जातात्र श्लक्ष्णरोम्णस्त्वं कुरुमत्यां सुता भवे। तृतीये मुक्तिरित्युक्ते लक्ष्मणा प्रणता प्रभुं॥८५॥
स गांधार्या कृते प्रश्ने तद्भवान्भगवान् जगौ। नगर्या कोशलेष्वासीदयोध्यायां महीपतेः॥८६॥
महिषी रुद्रदत्तस्य विनयश्रीश्रुताख्यया। श्रीधराय ददौ दानं पत्या सिद्धार्थके वने॥ ८७॥
मृत्वोत्तरकुरुष्वासीद्दानात्पल्यचयस्थितिः। पल्याष्टभागतुल्यायुः सातश्चंद्रमसः प्रिया॥ ८८॥

[1] शबरी। [2] चारणमुनिं।

ततश्चात्रोत्तरश्रेण्यां पुरे गगनवल्लभे । विद्युद्वेगस्य कन्याऽभूद्विद्युन्मत्यां महाद्युतिः ॥ ८९ ॥
विनयश्रीर्गुणैः ख्याता नित्यालोकपुरेशिनः । महेंद्रविक्रमस्यैषा योषिद्गुणसमन्विता ॥ ९० ॥
चारणश्रमणाभ्यां तु धर्मं श्रुत्वा समंदरे । राज्ये नियोज्य निष्क्रांतो नंदनं हरिवाहनं ॥ ९१ ॥
विनयश्रीस्तु कृत्वासौ सर्वभद्रमुपोषितं । पंचपल्यस्थितिर्जाता सौधर्मेंद्रस्य वल्लभा ॥ ९२ ॥
पुर्यां त्वं पुष्कलावत्यां गांधारेषु दिवश्च्युता । गांधारींद्रगिरे राज्ञो मेरुमत्यामभूत्सुता ॥ ९३ ॥
तृतीयभवसिद्धिस्त्वामित्युक्ते सानमज्जिनं । गौर्या विज्ञापितो नत्वा तद्भवानाह विश्ववित् ॥९४॥
इभ्यस्येभ्यपुरेऽत्राभूद्धनदेवस्य कामिनी । यशस्विनी स्थिता हर्म्ये चारणौ वीक्ष्य सोवरे ॥९५॥
सस्मार स्वभवान् सर्वान् धातकीखंडमंडले । पूर्वस्य मंदरस्यास्तं विदेहेष्वपरेष्वहं ॥ ९६ ॥
आनंदश्रेष्ठिनः पत्नी नंदशोकपुरेऽर्हते । मितसागरनाम्नेत्र दानं दत्वा सभर्तृका ॥ ९७ ॥
पंचाश्चर्याण्यहं प्रापं कृतानि त्रिदशैर्मुदा । पीत्वा काशोदकं भर्त्रा सविषं मृतवत्यमा ॥ ९८ ॥
भूत्वा देवकुरुष्वासमैशानेंद्रप्रिया ततः । जाताश्राहमिति ज्ञात्वा सा संवेगपरायर्ति ॥ ९९ ॥
नत्वा सुभद्रनामानं प्रोषधव्रतमग्रहीत् । मृत्वा शक्रस्य देव्यासीत्पंचपल्यसमास्थितिः ॥१००॥
च्युत्वा विदेह कौशाम्ब्यां सुमित्रायां सुभद्रतः । इभ्याद्धर्ममतिर्नाम्ना कन्या धर्ममतिः सदा ॥१०१॥

जिनमत्यार्यिकापार्श्वे तपो जिनगुणाविधं । गृहीत्वोपोष्य जातासि महाशुक्रेंद्रवल्लभा ॥१०२॥
एकविंशतिपल्यायुश्च्युत्वा चंद्रमतिस्त्रियां । गौरी त्वं वीतशोकायां मेरुचंद्राद्भूत्सुता ॥ १०३ ॥
भवैः सिद्धिस्त्रिभिस्ते स्यादित्युक्ते सा नता विभुं । प्रणिपत्य ततः पृष्टः पद्मावत्या भवान् जगौ ।१०४।
उज्जयिन्यामिहैवासीदपराजितभूभृतः । तनया विनयश्रीः सा विजयावनितांगजा ॥ १०५ ॥
हस्तिशीर्षपुराधीशं हरिषेणमसौ पतिं । प्राप्ता पतियुता दानं वरदत्ताय संददौ ॥ १०६ ॥
कालागुरुकधूपेन भर्त्रा गर्भगृहे मृता । भूत्वा हैमवते भुक्त्वा सुखं पल्यसमस्थितिः ॥ १०७ ॥
जाता चंद्रप्रभादेवी ततश्चंद्रस्य वल्लभा । पल्योपमाष्टभागायुरतश्च्युत्वा तु भारते ॥ १०८ ॥
ग्रामेऽभूत्सात्मलीखंडे मगधेषु गृहेशिनोः । दुहिता पद्मदेवीति देविलाजयदेवयोः ॥ १०९ ॥
आचार्याद्वरधर्माख्यादेकदा व्रतमग्रहीत् । यावज्जीवं न भक्ष्यं मे फलमज्ञातमप्यसौ ॥ ११० ॥
प्रचंडशाल्मलीखंडे ग्रामेऽवस्कंदनामतः । अकांडे चंडवाणाख्यो व्याधमुख्योऽहरज्जनं ॥१११॥
वंदिगेहे गृहीत्वा तां पद्मदेवीं स्वदारतां । निनीषुः शीलवत्यासौ प्रत्याख्यातोऽनया नयात्।११२।
स राजगृहनाथेन राज्ञा सिंहरथेन तु । हठेन निहतोऽरण्ये शरण्ये जनताऽभ्रमत् ॥ ११३ ॥
बुभुक्षिता जनास्तत्र दिग्मूढा मूढबुद्धयः । मृया इव मृता दुःखात्किंपाक फलभक्षिणः ॥११४॥

अनास्वाद्य फलान्येषा पद्मा देवी दृढव्रता । प्रत्याख्यायैकपल्यायुरंते हैमवतेऽभवत् ॥ ११५ ॥
देवी स्वयंप्रभस्यातो व्यंतरस्य स्वयंप्रभा । स्वयंभूरमणद्वीपे स्वयंप्रभगिरावभूत् ॥ ११६ ॥
ततश्चागत्य भरते जयंतनगरेशिनः । श्रीमत्यां विमलश्रीः सा श्रीधरस्य सुताभवत् ॥ ११७ ॥
प्रादायि मेघनादाय सा भद्रिलपुरेशिने । लेभे च तनयं ख्यातं मेघघोषाख्ययाऽवनौ ॥ ११८ ॥
भर्तरि स्वर्गते सापि पद्मावत्यार्यिकांतिके । आचाम्लवर्धमानाख्यं तपः कृत्वा दिवं ययौ ॥११९॥
सा सहस्रारकल्पस्य पत्युर्भूत्वाग्रकामिनी । नवपंचकपल्यैस्तु तुल्यं कालमजीगमत् ॥ १२० ॥
जातास्यत्र ततश्च्युत्वा त्वमरिष्टपुरेशिनः । श्रीमत्यां स्वर्णनाभस्य सुता पद्मावती श्रुता ॥१२१॥
तपसा नाकमारुह्य देवश्च्युत्वा तपोबलात् । सेत्स्यति त्वमिति प्रोक्ते श्रुत्वा सा जिनमानमत् १२२
रोहिणी देवकीपूर्वा देव्योन्येऽपि च यादवाः । पृष्ट्वा श्रुत्वा स्वजन्मानि जाता संसारभीरवः ॥१२३॥
बुद्ध्वा नत्वा जिनेंद्रं तं सुरासुराश्च यादवाः । यांति स्वस्थानमायांति पूजनार्थं पुनः पुनः ॥१२४॥
विजहार पुनर्देशान् जिनो भव्यहिताय सः । सूर्यस्येव हि चर्यासीज्जगत्कार्याय वैभवी ॥१२५॥
इतश्च वसुदेवाभं वासुदेवमनःप्रियं । सुतं गजकुमाराख्यं देवकी सुषुवे शुभं ॥ १२६ ॥
यौवनं स परिप्राप्तः कन्याजनमनोहरं । ततोऽस्मै वरयांचक्रे चक्री राजकुमारिकाः ॥१२७॥

अभिरूपतरां कन्यां सोमशर्माग्रजन्मनः। प्रजातां क्षत्रियायां च सोमाख्यां वृतवान् हरिः॥ १२८॥
विवाहारंभसमये मुदिताखिलयादवे । जाते जिनपतिः प्राप्तो विहरन् द्वारिकां तदा ॥१२९॥
समागत्योपविष्टं तमद्रौ रैवतिके विभुं । वंदितुं निर्ययौ सर्वे यादवा बहुमंगलाः ॥१३०॥
दृष्ट्वा गजकुमारस्तमाटोपं द्वारिकोद्भवं । दृष्ट्वा कंचुकिनं जैनं विवेद हितमादितः ॥ १३१ ॥
ततो गजकुमारोऽपि प्रयातो वंदितुं जिनं । रथेनादित्यवर्णेन हर्षाद्रोमांचमुद्वहन् ॥ १३२ ॥
आर्हंत्यविभवोपेतं गणैर्द्वादशभिर्वृतं । जिनं नत्वोपविष्टोऽसौ कुमारश्चक्रपाणिना ॥ १३३ ॥
जगाद भगवांस्तत्र नृसुरासुरसंसदि । संसारतरणोपायं धर्मं रत्नत्रयोज्वलं ॥ १३४ ॥
प्रस्तावे हरिरप्राक्षीज्जिनेंद्रं प्रणिपत्य सः । अत्यंतादरपूर्णेच्छः श्रोत्रिलोकहितेच्छया ॥ १३५ ॥
अर्हतां चक्रिणामर्धचक्रिणां सीरधारिणां । उत्पत्तिः प्रतिशत्रूणां जिनानां च विशेषतः ॥१३६॥
यथा प्रश्नमितस्तस्मै संभूतिं विष्णवे ततः । त्रिषष्टियुगमुख्यानां प्रोवाच पुरुषेशिनां ॥ १३७ ॥
आद्यो वृषभनाथोऽभूदजितः संभवः प्रभुः । अभिनंदननाथश्च सुमतिः पद्मसंप्रभः ॥ १३८ ॥
सुपार्श्वनामधेयोऽन्यश्चंद्रप्रभ इतीश्वरः । सुविधिः शीतलः श्रेयान् वासुपूज्यश्च पूजितः ॥१३९॥
विमलोनंतजिद्धर्मः शांतिः कुंथुररो जिनः । मल्लिः शल्यकुशोद्धारो मुनींद्रो मुनिसुव्रतः ॥१४०॥

नमिश्च निवृतो नेमिर्वर्तमानोऽहमत्र तु । पार्श्वश्चापि महावीरो भवितारौ जिनेश्वरौ ॥ १४१ ॥
जंबूद्वीपविदेहेष्टौ भारते पंच ते जिनाः । सप्तैव धातकीखंडे चत्वारः पुष्करार्धजाः ॥१४२॥
प्राग्भवे पुंडरीकिन्यां वृषभः शांतिरीश्वरः । अजितस्तु सुसीमायां क्षेमपुर्यामरो जिनः ॥ १४३ ॥
रत्नसंचयजः कुंथुः संभवश्चाभिनंदनः । मल्लिश्च वीतशोकायां जंबूद्वीपविदेहजाः ॥ १४४ ॥
चंपायामिह कौशाम्ब्यां गजाह्नगरेऽपि ते, ऽयोध्यायां भरतक्षेत्रे छत्राकारपुरे क्रमात् ॥ १४५ ॥
मुनिसुव्रतनाथश्च नमिर्नेमिजिनस्तथा । पार्श्वाख्यश्च महावीरः पंचामी पूर्वजन्मनि ॥ १४६ ॥
पुंडरीकिण्यखंडश्रीः सुसीमाक्षेमपुर्यपि । धातकीखंडपूर्वार्धे सक्रमं रत्नसंचयं ॥ १४७ ॥
सुमत्यादिचतुर्णां च पुरः पूर्वत्र जन्मनि । सुविध्यादिचतुर्णां च पूर्वपुष्करजास्त्वमू ॥ १४८ ॥
तथैव धातकीखंडे पश्चादैरावतक्षितौ । अनंतजिद्भूत्पूर्वमरिष्टपुरसंभवः ॥ १४९ ॥
पूर्वार्धभारते तस्य विमलस्तु महापुरे । भद्रिलादौ पुरे धर्मस्तत्र नामान्यमूनि तु ॥ १५० ॥
वज्रनाभिरभूदाद्यो विमलस्तदनंतरः । विपुलो वाहनांत्योऽन्यो महाबल इतीरितः ॥ १५१ ॥
परोऽतिबल इत्यासीदपराजित इत्यतः । नंदिषेणस्तथा पद्मो महापद्मः स्मृतः परः ॥ १५२ ॥
पद्मगुल्मोऽपि नलिनगुल्मः पद्मोत्तरः परः । पद्मासनः पुनः पद्मस्तथा दशरथो नृपः ॥ १५३ ॥

राजा मेघरथः सिंहरथो धनपतिः परः । नाम्ना वैश्रवणो राजा श्रीधर्माख्यस्ततः परः ॥१५४॥
सिद्धार्थः सुप्रतिष्ठोहमानदो नंदनो नृपः । पूर्वजन्मनि नामानि जिनानामानुपूर्वतः ॥ १५५ ॥
चक्री पूर्वधरः पूर्वो महामंडलिकाः परे । एकादशांगिनः सांगैः सर्वेऽपि कनकप्रभाः ॥ १५६ ॥
सिंहविक्रीडितं कृत्वा प्रायोपगमनं गताः । मासक्षपणतः सर्वे यथास्वं स्वर्गलोकगाः ॥ १५७ ॥
वज्रसेन इति ख्यातस्तथारिंदमसंज्ञकः । स्वयंप्रभाभिधश्चान्यः परो विमलवाहनः ॥ १५८ ॥
सूरिः सीमंधराभिख्यो गुरुश्च पिहितास्रवः । अरिंदममुनिर्मान्यो वंदनीयो युगंधरः ॥ १५९ ॥
सर्वो सर्वजनानंदोप्युभयानंदनामकः । वज्रदत्तोऽपरो वेद्यो वज्रनाभिरभिष्टुतः ॥ १६० ॥
सर्वगुप्तस्त्रिगुप्ताढ्यश्चित्तरक्षाभिधः परः । विमलाचारसंपन्नो मान्यो विमलवाहनः ॥ १६१ ॥
गुरुर्घनरथाभिख्यः संवरः संवरान्वितः । वरधर्मस्त्रिलोकीयः सुनंदो नंदसंज्ञकः ॥ १६२ ॥
व्यतीतशोकनामान्यो दामरः प्रौष्ठिलः परः । जिनानां गुरवोऽमी न क्रमेणातीतजन्मनि ॥१६३॥
बुधो धर्मश्च शांतिश्च कुंथुः सर्वार्थसिद्धितः । चत्वारः प्रच्युता ज्ञेया विजयादभिनंदनः ॥१६४॥
चंद्रप्रभसुमत्याख्यौ वैजयंताज्जयंततः । नेम्यरौ नमिमल्लीशावपराजिततश्च्युतौ ॥ १६५ ॥
आरणात्पुष्पदंतेशः शीतलेशोऽच्युताच्च्युतः । पुष्पोत्तरविमानेशः श्रेयोनंतौ च सन्मतिः ॥१६६॥

सहस्रारात्तु विमलश्रीपार्श्वमुनिसुव्रताः । क्रमात्संभवसुपार्श्वपद्मप्रभजिनाः पुनः ॥ १६७ ॥
अधोमध्योपरिग्रैवेयकपरिच्युताः । वासुपूज्यो महाशुक्रादितितीर्थकृतां दिवः ॥ १६८ ॥
वृषभश्चैत्रकृष्णस्य नवम्यामुदपद्यत । माघशुक्लनवम्यां तु तथैवाजिततीर्थकृत् ॥ १६९ ॥
उत्पन्नो मार्गशीर्षस्य पौर्णमास्यां हि संभवः । द्वादश्यां माघशुक्लस्य जिनेंद्रस्त्वभिनंदनः ॥१७०॥
सुमतिः श्रावणस्यासीदेकादश्यां सितात्मनि । ऊर्जकृष्णत्रयोदश्यां पद्मप्रभजिनेश्वरः ॥१७१॥
द्वादश्यां ज्येष्ठमासस्य शुक्लायां सप्तमो जिनः । पौषस्य कृष्णपक्षेभूदेकादश्यां जिनोऽष्टमः ॥१७२॥
सुविधिर्मार्गशीर्षस्य शुक्लप्रतिपदि प्रभुः । शीतलो माघकृष्णस्य द्वादश्यामभवज्जिनः ॥१७३॥
फाल्गुनासितपक्षेऽभूदेकादश्यां जिनोऽपरः । पक्षेत्रैव चतुर्दश्यां वासुपूज्यजिनेश्वरः ॥१७४॥
माघशुक्लचतुर्दश्यां विमलो विमलात्मकः । द्वादश्यां ज्येष्ठकृष्णस्य संजातोऽनंतजिज्जिनः॥१७५॥
माघशुक्लत्रयोदश्यां जज्ञे धर्मो जिनाधिपः । ज्येष्ठकृष्णचतुर्दश्यां शांतिनाथश्च शांतिकृत् ॥१७६॥
कुंथुर्वैशाखमासस्य शुक्लायां प्रतिपद्यभूत् । मार्गशीर्षस्य शुक्लायां चतुर्दश्यामरो जिनः ॥१७७॥
एकादश्यां तु तस्यैव शुक्लायां मल्लिरीश्वरः । शुक्लायां माश्वयुज्यां च द्वादश्यां मुनिसुव्रतः १७८
जातश्च कृष्णदशम्यामाषाढस्य नमिर्जिनः । नेमिर्वैशाखशुक्लस्य त्रयोदश्यां जिनेश्वरः ॥१७९॥

स कृष्णैकादशीं पार्श्वः पौषमासस्य भूषयन्। शुक्लत्रयोदशीं वीरश्चैत्रस्य जिनजन्मना॥१८०॥
पितरौ जन्म नक्षत्रं जन्मभूमिं जिनेशिनां। चैत्यवृक्षं च निर्वाणभूमिं वच्मि निबुध्यतां॥१८१॥
विनीता मरुदेवी च नाभिर्न्यग्रोधपादपः। कैलाशश्चोत्तराषाढवृषभो वृषभो नृणां॥ १८२॥
अयोध्या विजया राजा जितशत्रुर्जिनोऽजितः। सम्मेदः सम्मदायास्तु रोहिणी विषमच्छदः१८३
श्रावस्ती—संभवः सेना जितारिः शालपादपः। ज्येष्ठा नक्षत्रमेनांसि सम्मेदश्च पुनंतु वः॥१८४॥
सरलः संवरो योध्या सिद्धार्था च पुनर्वसुः। जिनोऽभिनंदनः शैलः स एवास्तु मुदे सतां॥१८५॥
मेघप्रभो मघायोध्या प्रियंगुश्च सुमंगला। सुमतिः सुमतिर्नित्यं सम्मेदश्च दिशंतु वः॥ १८६॥
कौशांबी धरणश्चित्रा सुसीमा जिनपुंगवः। पद्मप्रभःप्रियंगुश्च मंगलं वः स पर्वतः॥ १८७॥
पृथिवी सुप्रतिष्ठोऽस्य काशी वा नगरी गिरिः। स विशाखा शिरीषश्च सुपार्श्वश्च जिनेश्वरः।१८८।
चंद्या चंद्रपुरी चंद्रप्रभो नागतरुर्गिरिः। सोनुराधामहासेनो लक्ष्मणा जननी सतां॥ १८९॥
काकंदी पुष्पदंतश्च रामा सुग्रीवभूपतिः। मूलर्क्षं मालिवृक्षश्च सगिरिर्भूतयेऽस्तु वः॥ १९०॥
भद्रिला प्रथमाषाढा प्लक्षो दृढरथो नृपः। सुनंदा शीतलः शैलः स एव हितचेतसः॥१९१॥
विष्णुश्रीर्विष्णुराजश्च सिंहनादपुरं जिनः। श्रवणः श्रेयान् संदद्युस्तिंदुकः स च भूधरः॥१९२॥

चंपा जन्मनि मुक्तोभूद्वासुपूज्यो जयांघ्रिपः । पाटला वसुपूज्यश्च पूज्या शतभिषापि च ॥१९३॥
शर्मा च कृतवर्मा च जंबूः प्रोष्ठपदोत्तरा । कांपिल्यं सगिरिःशल्यं विमलश्चोद्धरंतु वः ॥१९४॥
साकेता सिंहसेनश्च रेवत्यश्वत्थपादपः । पांतु सर्वयशा सोऽद्रिरनंतश्चापि वः सदा ॥ १९५ ॥
धर्मश्च दधिपर्णश्च भानुराजश्च सुव्रता । पुष्पो रत्नपुरं सोद्रिर्धर्मे बुद्धिं ददातु वः ॥ १९६ ॥
ऐरा च विश्वसेनश्च भरणीभ[1]पुरं तरुः । नंदीश्च शांतिनाथश्च सोगः शांतिं दिशंतु वः ॥१९७॥
सोगो नागपुरं सूर्यः श्रीमती कृत्तिका तथा । तिलकश्च तरुः कुंथुर्मथ्नंतु दुरितानि वः ॥१९८॥
चूतो गजपुरं मित्रा पार्थिवश्च सुदर्शनः । सम्मेदो रोहिणी चारो दुरितं दारयंतु वः ॥ १९९ ॥
मिथिला रक्षिता कुंभो जिनेंद्रो मल्लिराश्विनी । अशोकश्च तरुः सोऽद्रिरशोकाय भवंतु वः॥२००॥
पद्मावती सुमित्रोऽस्तु कुशाग्रनगरं मुदे । चंपकः श्रवणर्क्षं च सोऽद्रिर्वो मुनिसुव्रतः ॥२०१॥
मिथिला विजयो वप्रा वकुलो नमिराश्विनी । नमयंतु महामानं सम्मेदश्च महीधरः ॥ २०२ ॥
नेमिः सूर्यपुरं चित्रा समुद्रविजयः शिवा । ऊर्जयंतो जयंतेऽमी मेषशृंगो दिशंतु वः ॥ २०३ ॥
वाराणसी च वर्मा च विशाखा च धवांघ्रिपः । अश्वसेननृपः पार्श्वः सम्मेदश्च मुदेऽस्तु वः ॥२०४॥

---

१ इभपुरं—हस्तिनापुरं ।

शालः कुंडपुरे वीरः सिद्धार्थः प्रियकारिणी । उत्तराफाल्गुनी पावा पापा निघ्नंतु वः सदा ॥२०५॥
चैत्यवृक्षस्तु वीरस्य द्वात्रिंशद्धनुरुच्छ्रितः । देहोत्सेधाच्च शेषाणां स द्वादश गुणो मतः ॥ २०६ ॥
सुपार्श्वेशोनुराधायां ज्येष्ठासु च शशिप्रभः । श्रेयानपि प्रतिष्ठासु वासुपूज्योश्विनीषु सः ॥ २०७ ॥
भरणीषु जिनो मल्लिर्वीरः स्वातिषु सिद्धिभाक् । जन्मनक्षत्रवर्गेषु शेषाणां परिनिर्वृतिः ॥ २०८ ॥
शांतिकुंथ्वरनामानस्तीर्थकृच्चक्रवर्तिनः । शेषास्तीर्थकराः सर्वे पृथिवीपतयो नृपाः ॥ २०९ ॥
चंद्राभ एव चंद्राभः सुविधिः शंखसत्प्रभः प्रियंगुमंजरीपुंजवर्णः सुपार्श्वतीर्थकृत् ॥ २१० ॥
मेघश्यामवपुः श्रीमान् पार्श्वस्तु धरणस्तुतः । पद्मगर्भनिभाभश्च पद्मप्रभजिनाधिपः ॥ २११ ॥
रक्तकिंशुकपुष्पाभो वासुपुज्यो जिनेश्वरः । नीलांजनाचलच्छायो मुनींद्रो मुनिसुव्रतः ॥ २१२ ॥
नीलकंठस्फुरत्कंठरुचिर्नेमिः समीक्षितः । सुतप्तकनकच्छायाः शेषास्तु जिनपुंगवाः ॥ २१३ ॥
निष्क्रांतिर्वासुपूज्यस्य मल्लेर्नेमिजिनांत्ययोः । पंचानां तु कुमाराणां राज्ञां शेषजिनेशिनां ॥२१४॥
वृषभस्य विनीतायां परिनिष्क्रमणं तथा । नेमेस्तु द्वारवत्यां तु शेषाणां जन्मभूमिषु ॥ २१५ ॥
निष्क्रांतिः सुमतेर्भुक्त्वा मल्लेः साष्टमभक्तका । तथा पार्श्वजिनस्यापि जयाजस्य चतुर्थका॥२१६॥
षष्ठभक्तपूर्वा दीक्षा शेषाणां तीर्थदर्शिनः । श्रेयः सुमतिमल्लीशां पूर्वान्हे नेमिपार्श्वयोः ॥ २१७ ॥

अन्येषामपराह्णे तां वीरो ज्ञातृवनेऽश्रयत्। क्रीडोद्याने जयासूनुः ससिद्धार्थवने वृषः॥ २१८॥
धर्मस्तु वप्रकास्थाने विंशो नीलगुहाश्रये। पार्श्वो मनोरमोद्याने तपोभागाश्रमाश्रये॥ २१९॥
सहस्राम्रवनाद्येषु पुरोद्यानेषु भूमिषु। शेषतीर्थकृतां वेद्यं परिनिष्क्रमणं बुधैः॥ २२०॥
सुदर्शना तु शिविका सुप्रभा तदनंतरा। सिद्धार्थाचार्यसिद्धा च तत्राभयंकरी प्रभा॥ २२१॥
सा निवृत्तिकरी षष्ठी सप्तमी सुमनोरमा। परा मनोहरा सूर्य–प्रभाशुक्रप्रभा परा॥ २२२॥
ततः परेण विज्ञेया शिविका विमलप्रभा। पुष्पाभा देवदत्ताख्या परा सागरपत्रिका॥ २२३॥
नागदत्ताभिधा चान्या चार्वी सिद्धार्थसिद्धिका। विजया वैजयंती च जयंताख्या पराजिता॥२२४॥
नाम्नोत्तरकुरुश्चान्या दिव्या देवकुरुश्रुतिः। विमलाभा च चंद्राभा जिनानां शिविकाः क्रमात् २२५
दीक्षा कृष्णनवम्यां तु चैत्रस्य वृषभेशिनः। मुनिसुव्रतदीक्षास्यां वैशाखस्य बभूव सा॥ २२६॥
वैशाखस्येव शुद्धस्य प्रतिपद्यभिनंद्यते। कुंथोर्निष्क्रमणं लोके नवम्यां सुमतेः पुनः॥ २२७॥
द्वादश्यां ज्येष्ठकृष्णस्य त्रयोदश्यां च संक्रमं। अनंतस्य च शांतेश्च परिनिष्क्रमणं स्मृतं॥ २२८॥
द्वादश्यां ज्येष्ठकृष्णस्य सुपार्श्वस्य जिनेशिनः। नमेराषाढकृष्णस्य दशम्यां कथितं हि तत्॥२२९॥
नेमेः शिवचतुर्थ्यां तु श्रावणस्योपवर्णितं। पद्माभस्य त्रयोदश्यां कृष्णायां कार्तिकस्य तु॥२३०॥

कृष्णस्य मार्गशीर्षस्य दशम्यां सुमतेस्तु तत् । शुक्लप्रतिपदि प्रोक्तं पुष्पदंतजिनेशिनः ॥ २३१॥
तस्यैवारो दशम्यां तु पौर्णमास्यां च संभवः । एकादश्यां तु मल्लीशः परिनिष्क्रमणं श्रितः ॥२३२॥
पौषस्य कृष्णपक्षस्य ह्येकादश्यां सुकालजं । ज्ञेयं निष्क्रमणं चंद्रप्रभपार्श्वजिनेंद्रयोः ॥ २३३ ॥
माघस्य कृष्णपक्षस्य द्वादश्यां शीतलस्य च । विमलस्य सितायां हि चतुर्थ्यां परिकीर्तितं २३४
अजितस्य नवम्यां तु द्वादश्यामाभिनंदनः । धर्मस्य तु त्रयोदश्यां परिनिष्क्रमणं मतं ॥ २३५ ॥
फाल्गुनासितपक्षस्य त्रयोदश्यां जिनेशिनः । श्रेयसो वासुपूज्यस्य चतुर्दश्यां तदीरितं ॥ २३६॥
वर्षेण पारणाद्यस्य जिनेंद्रस्य प्रकीर्तिता । तृतीयदिवसेऽन्येषां पारणा प्रथमा मता ॥ २३७ ॥
आद्येनेक्षुरसो दिव्यः पारणायां पवित्रितः । अन्यैर्गोक्षीरनिष्पन्नपरमान्नमलालसैः ॥ २३८ ॥
श्रीहास्तिनपुरं रम्यमयोध्या नगरी शुभा । श्रावस्ती च विनीता च पुरं विजयपूर्वकं ॥ २३९॥
पुरं मंगलकं नाम्ना पाटलीखंडसंज्ञकं । पद्मखंडपुरं कांतं तथा श्वेतपुरं परं ॥ २४० ॥
अरिष्टपुरमिष्टं तु सिद्धार्थपुरमप्यतः । महापुरमतो नाम्ना स्फुटं धान्यवटं पुरं ॥ २४१ ॥
वर्धमानपुरं ख्यातं पुरं सौमनसाह्वयं । मंदरं हास्तिनपुरं तथा चक्रपुरं मतं ॥ २४२ ॥
मिथिला राजगृहकं पुरं वीरपुरं तथा । पुरी द्वारवती काम्या कृतं कुंडपुरं पुरं ॥ २४३ ॥

चतुर्विंशति संख्यानांसंख्यातानि यथाक्रमं। जिनानां वृषभादीनां पारणानगराणि तु ॥२४४॥
स श्रेयान् ब्रह्मदत्तश्च सुरेंद्र इव संपदा। राजा सुरेंद्रदत्तोन्य इंद्रदत्तश्च पद्मकः ॥ २४५ ॥
सोमदत्तो महादत्तः सोमदेवश्च पुष्पकः। पुनर्वसुः सुनंदश्च जयश्चापि विशाखकः ॥ २४६ ॥
धर्मसिंहः सुमित्रश्च धर्ममित्रोऽपराजितः। नंदिषेणश्च वृषभदत्तो दत्तश्च सञ्जयः ॥ २४७॥
वरदत्तश्च नृपतिर्धन्यश्च वकुलस्तथा। पारणासु जिनेंद्रेभ्यो दायकाश्च त्वमी स्मृताः ॥ २४८ ॥
सर्वेषामादिभिक्षासु दातारोऽपि जिनेशिनां। सर्वासु वर्धमानस्य वसुधारानियोगतः॥ २४९॥
अर्धत्रयोदशोत्कर्षाद्वसुधारासु कोटयः। तांवत्येव सहस्राणि दशघ्नानि जघन्यतः ॥ २५० ॥
आद्यौ द्वौ दायकौ श्यामौ ज्ञेयावंत्यौ च वर्णतः। शेषास्तु दायका सर्वे संतप्तकनकप्रभाः॥२५१॥
तपस्थिताश्च ते केचित्सिद्धास्तेनैव जन्मना। जिनांते सिद्धिरन्येषां तृतीये जन्मनि स्मृताः॥२५२॥
वृषभमल्लीशपार्श्वानामष्टमेन चतुर्थतः। जयाजस्य ययुः शेषा पद्मस्था ह्यानिषष्ठतः ॥ २५३ ॥
ज्ञानाप्तिः पूर्वतालेंत्या वृषस्य सकटामुखे। ऊर्जयंते गिरौ नेमेः पार्श्वस्याप्याश्रमांतिके ॥२५४॥
वीरस्य केवलोत्पादः ऋजुकूलासरित्तटे। अन्येषां तु जिनेंद्राणां स्वोद्यानेषु यथायथं ॥ २२५ ॥
वृषभस्य श्रेयसो मल्लेः पूर्वान्हे नेमिपार्श्वयोः। केवलोत्पत्तिरन्येषामपरान्हे जिनेशिनां ॥ २५६ ॥

फाल्गुने कृष्णपक्षस्य त्वेकादश्यां वृषो भृतः। द्वादश्यां केवलं मल्लिः षष्ठ्यां तु मुनिसुव्रतः॥२५७॥
सप्तम्यामेव संप्राप्तः पक्षे तत्रैव केवलं। सुपार्श्वजिनचंद्रश्च चंद्रप्रभजिनस्तदा ॥ २५८ ॥
चतुर्थ्यां चैत्रकृष्णस्य पार्श्वदेवस्य केवलं। अमावास्यामनंतस्य जिनेंद्रस्य तदिष्यते ॥ २५९ ॥
पक्षे सिते तृतीयस्यां नमेः कुंथोश्च केवलं। दशम्यां सुमतेर्जातं पद्मप्रभजिनस्य च ॥ २६० ॥
ज्ञेयं वैशाखशुक्लस्य दशम्यां वीरकेवलं। सिते ऽश्वयुजि पक्षेऽभून्नेमेस्तत्प्रतिपद्दिने ॥ २६१ ॥
कार्तिकासितपंचम्यां शंभवस्य सितात्मनि। सुविधेस्तु तृतीयस्यां तद्द्वादश्यामरस्य तु ॥२६२॥
पुष्यकृष्णचतुर्दश्यां शीतलः केवलं श्रितः। दशम्यां विमलं शुक्ले शांतिरेकादशे दिने ॥२६३॥
अजितोत्र चतुर्दश्यां केवलं प्रत्यपद्यत। अभिनंदनधर्माख्यौ पौर्णमास्यामवाप तु ॥ २६४ ॥
ज्ञानोत्पत्त्या त्वमावास्या माघस्य श्रेयसा कृता। श्रेयसी वासुपूज्येन द्वितीया शुक्लपक्षजा ॥२६५॥
माघकृष्णचतुर्दश्यां वृषस्य परिनिर्वृतिः। फाल्गुनस्यासिते पक्षे चतुर्थ्यां पद्मभासिनः ॥२६६॥
षष्ठ्यां सुपार्श्वनाथस्य द्वादश्यां मौनिसुव्रतः। सिता फाल्गुनपंचम्यां मल्लिश्रीवासुपूज्ययोः २६७
अमावस्यां तु चैत्रस्य निर्मिताभ्यां पवित्रिता। अनंतारजिनेंद्राभ्यां शुक्लपक्षस्य तु क्रमात् ॥२६८॥
पंचम्यामजितः षष्ठ्यां संभवः परिनिर्वृतः। दशम्यां सुमतिर्नाथः सुरनाथगणस्तुतः ॥ २६९ ॥

वैशाखस्यापुनात्सिद्ध्या नमिः कृष्णचतुर्दशीं । सितां प्रतिपदं कुंथुः सप्तमीमभिनंदनः ॥२७०॥
शांतेः सिद्धितिथिः सिद्धा ज्येष्ठकृष्णचतुर्दशी । तस्य शुक्लचतुर्थी तु धर्मस्य प्रतिपादिता ॥२७१॥
आषाढकृष्णपक्षस्य विमलस्याष्टमी मता । नेमेः शुक्लाष्टमी मान्या निर्वाणतिथिरिष्यते ॥२७२॥
श्रावणे शुक्लसप्तम्यां पार्श्वस्य परिनिर्वृतिः । श्रेयसः पौर्णमास्यां तु धनिष्ठासु प्रतिष्ठिता ॥२७३॥
चंद्राभः शुक्लसप्तम्यां सिद्धो भाद्रपदस्य तु । अष्टम्यां पुष्पदंतोऽस्य शीतलोऽश्वयुजस्य तु ॥२७४॥
निर्वृतः सितपंचम्यां कृष्णायां परिनिर्वृतिः । श्रीवीरस्य चतुर्दश्यां कार्तिकस्य विनिश्चिता ॥२७५॥
वृषोऽजितोऽपि च श्रेयान् शीतलश्चाभिनंदनः । सुमतिश्च सुपार्श्वश्च पूर्वान्हे चंद्रभस्तथा ॥२७६॥
संभवः पद्मभासश्च पुष्पदंतो भवांतकः । अपरान्हे जिनाः सिद्धा वासुपूज्यजिनस्तथा ॥ २७७ ॥
विमलानंतशांतीनां कुंथोर्मल्लीशविंशयोः । प्रदोषसमये ज्ञेया निर्वृतिर्नेमिपार्श्वयोः ॥ २७८ ॥
धर्मस्यारजिनेंद्रस्य नमिवीरजिनेंद्रयोः । प्रत्यूषे सिद्धिरुद्दिष्टा नष्टाष्टविधकर्मणां ॥ २७९ ॥
वृषस्य वासुपूज्यस्य नेमेः पर्यंकबंधतः । कायोत्सर्गस्थितानां तु सिद्धिः शेषजिनेशिनां ॥ २८० ॥
चतुर्दशदिनान्यग्रः संहृत्य विहृतिं जिनः । वीरोहर्द्वितयं शेषा मासं संहृत्य मुक्तिगाः ॥२८१॥
वीरस्यैकस्य निर्वाणः षड्विंशतिसहितस्य तु । पार्श्वस्य सह नेमेः षट्त्रिंशता पंचभिः शतैः ॥२८२॥

माल्लिः पंचशतैः सिद्धः शांतिर्नवशतैः सह । सैकैरष्टशतैर्धर्मो द्वादशः सैकषट्शतैः ॥ २८३ ॥
सहस्रैर्विमलः षड्भिरनंतस्त्वैस्तु सप्तभिः । सप्तमः पंचशत्यामा पद्माभोष्टशतैस्त्रिभिः ॥ २८४ ॥
वृषो दशसहस्रैस्तु मुनिभिर्मुक्तिमाश्रितः । प्रत्येकं तु जिना शेषाः सहस्रेण समन्विताः ॥२८५॥
भरतश्चक्रवर्त्याद्यः सगरो मघवांस्ततः । सनत्कुमारनामान्यः शांतिः कुंथुररस्तथा ॥ २८६॥
सुभूमश्च महापद्मो हरिषेणो जयोऽपरः । ब्रह्मदत्तश्च षट्खंडनाथा द्वादशचक्रिणः ॥ २८७ ॥
त्रिपृष्टश्च द्विपृष्टश्च स्वयंभूः पुरुषोत्तमः । पुरुषोपपदौ सिंहपुंडरीकौ प्रचंडकौ ॥ २८८ ॥
दत्तो नारायणो कृष्णो वासुदेवा नवोदिताः । त्रिखंडभरताधीशाः पराखंडितपौरुषाः ॥२८९॥
विजयोऽचलः सुधर्माख्यः सुप्रभश्च सुदर्शनः । नांदी च नंदिमित्रश्च रामः पद्मो बला नव ॥२९०॥
अश्वग्रीवो भुवि ख्यातस्तारको मेरुकस्तथा । निशुंभः शुभदंभोजवदनो मधुकैटभः ॥ २९१ ॥
बलिः प्रहरणाभिख्यो रावणः खेचरान्वयाः । भूचरस्तु जरासंधो नवैते प्रतिशत्रवः ॥ २९२ ॥
ऊर्ध्वगा बलदेवास्ते निर्निदाना भवांतरे। अधोगाः सनिदानास्तु केशवाः प्रतिशत्रवः ॥२९३॥
वृषभे भरतश्चक्री सगरोप्यजिते जिने । मघवांस्तुर्यश्चक्री च धर्मशांत्यंतरे मतौ ॥ २९४ ॥
निजं जिनांतरं ज्ञेयं शांतिकुंथ्वरचक्रिणां । चक्रवर्ती सुभूमोऽभूदरमल्लिजिनांतरे ॥ २९५ ॥

मुनिसुव्रतमल्ल्यंतर्महापद्मः प्रकीर्तितः। मुनिसुव्रतनम्यंतर्हरिषेणस्तु चक्रभृत् ॥ २९६ ॥
नमिनेम्यंतरे चक्री जयसेनोऽभवत्ततः। ब्रह्मदत्तोऽपि निर्दिष्टो नेमिपार्श्वजिनांतरे ॥ २९७ ॥
अष्टानां सिद्धिरुद्दिष्टा ब्रह्मदत्तसुभूमयोः। सप्तमीं मघवांस्तुर्यो तृतीयं कल्पमाश्रितौ ॥ २९८ ॥
श्रेयः प्रभृतिधर्मांतान् पंचापश्यन्वलोर्जितान्। त्रिपृष्ठाद्या नृसिंहांताः पंचसंख्यास्तु केशवाः॥२९९॥
पुंडरीकोऽरमल्ल्यंतर्वासुदेवः प्रकीर्तितः। मुनिसुव्रतमल्ल्यंतर्दत्तनामा तु केशवः ॥ ३०० ॥
मुनिसुव्रतनम्योस्तु मध्ये नारायणः स्मृतः। प्रत्यक्षं वंदको नेमेः कृष्णः पद्मसमन्वितः ॥३०१॥
एकस्य सप्तमी पृथ्वी पंचानां षष्ठ्युदीरिता। पंचम्येकस्य चान्यस्य पर्यंतस्य तृतीयभूः॥३०२॥
अष्टानां मुक्तिरुद्दिष्टा बलानां तु तपोबलात्। अंतस्य ब्रह्मकल्पस्तु तीर्थे कृष्णस्य सेत्स्यतः॥३०३॥
धनुःशतानि पंचाद्ये हानिः पंचशतोष्टसु। दशानां पंचसु प्रोक्ता पंचानामष्टसु क्षयः ॥३०४॥
उत्सेधः पार्श्वनाथस्य नवारत्निमितस्ततः। वीरस्यारत्नयः सप्त जिनोत्सेधः क्रमादयं ॥३०५॥
पंच चापशतान्याद्ये चक्रिण्युत्सेध इष्यते। चतुःशतानि सार्धानि धनूंषि सगरस्य तु ॥३०६॥
द्वाचत्वारिंशदिष्टानि सार्धानि तु धनूंष्यतः। सार्धेनैकेन युक्तानि चत्वारिंशद्धनूंषि तु ॥ ३०७ ॥
चत्वारिंशद्यथोक्तानि पंचमस्य तु चक्रिणः। पंचत्रिंशत्ततस्त्रिंशदष्टाविंशतिरष्टमे ॥ ३०८ ॥

द्वाविंशतिर्महापद्मे विंशतिश्च चतुर्दश । ततः सप्त धनूंषि स्यादुत्सेधश्चक्रवर्तिनां ॥ ३०९ ॥
अशीतिः सप्ततिःषष्टिः पंचाशत्पंचभिः सह । चत्वारिंशद्धनूंषि स्युः षड्विंशतिस्ततः परः ॥३१०॥
द्वाविंशतिस्तथोक्तानि षोडशापि दशैव तु । उत्सेधो वासुदेवानां बलदेवप्रतिद्विषां ॥ ३११ ॥
आयुश्चतुरशीतिश्च पूर्वलक्षा जिनेशिनां । द्वासप्ततिश्च षष्टिश्च पंचाशच्च यथाक्रमं ॥ ३१२ ॥
चत्वारिंशत्तथा त्रिंशद्विंशतिश्च दशैव ताः । लक्षे लक्षं च पूर्वाणां दशानामायुरीरितं ॥ ३१३ ॥
वर्षलक्ष्यास्ततो लक्ष्या अशीतिश्चतुरुत्तरा । द्वासप्ततिस्ततः षष्टिस्त्रिंशद्दश तथैककं ॥ ३१४ ॥
ततो वर्षसहस्राणि सपंचनवतिश्च तु । अशीतिः पंचपंचाशत्त्रिंशद्दश तथैककं ॥ ३१५ ॥
ततो वर्षशतं पूर्णं द्वासप्ततिरिति क्रमात् । जिनानामायुराख्यातमायुर्वृद्धिं करोतु वः ॥ ३१६ ॥
लक्षाश्चतुरशीतिस्तु द्वासप्ततिरितिक्रमात् । पूर्वाणां वर्षलक्षास्तु पंचत्र्येकाः प्रपंचिताः ॥ ३१७॥
ततो वर्षसहस्राणि नवतिः पंचभिर्युता । तथा चतुरशीतिः स्यादष्टाषष्टिस्ततः पुनः ॥ ३१८ ॥
त्रिंशत् षड्विंशतिस्त्रीणि वर्षसप्तशतानि च । आयुःप्रमाणमेतत्तु कथितं चक्रवर्तिनां ॥ ३१९ ॥
वर्षाणां चतुरशीतिर्लक्षा द्वासप्ततिस्ततः । षष्टिस्त्रिंशद्दशातोऽपि पंचषष्टिसहस्रकं ॥ ३२० ॥
द्वात्रिंशद्द्वादशैकं च प्रोक्तं वर्षसहस्रकं । केशवानां यथासंख्यमायुः संख्याविदां मता ॥३२१॥

आयुर्लक्षा बलानां स्युः सप्ताशीतिश्च सप्ततिः। सप्तोत्तरा तथा षष्टिः पंचत्रिंशद्दश क्रमात् ॥३२२॥
षष्टिर्वर्षसहस्राणि त्रिंशद्दश च सप्तभिः। द्विशत्यब्दसहस्रं तु तच्चरमस्य बलस्य तु ॥ ३२३ ॥
वृषाद्याः धर्मपर्यंता जिनाः पंचदश क्रमात्। निरंतरास्ततः शून्ये त्रिजिनाश्शून्ययोर्द्वयं ॥३२४॥
जिने शून्यद्वयं तस्माज्जिनः शून्यद्वयं पुनः। जिने शून्यं जिनः शून्यं द्वौ जिनेंद्रौ निरंतरौ ॥३२५॥
चक्रिणौ भरताद्यौ द्वौ तौ शून्यानि त्रयोदश। षट् चक्रिणस्त्रिशून्यानि चक्री शून्यं च चक्रभृत् ३२६
ततः शून्यद्वयं चक्री शून्यं चक्रधरस्ततः। शून्ययोर्द्वितयं तस्मादिति चक्रधरक्रमः ॥ ३२७ ॥
शून्यानि दशपंचातस्त्रिपृष्ठाद्यास्तु केशवाः। शून्यषट्कं ततश्चैकः केशवो व्योमकेशवः ॥३२८॥
त्रिशून्यं केशवश्चैकः शून्यद्वितयमप्यतः। केशवस्त्रीणि शून्यानि केशवानामयं क्रमः ॥ ३२९ ॥
पादः कुमारकालः स्यादायुषो वृषभस्य सः। न्यूनः संयमकालस्य राज्यकालस्ततोऽपरः ॥३३०॥
पादोष्टादशसंख्यानां पूर्णः शेषजिनेशिनां। कुमारकालः शेषस्य राज्यसंयमकालता ॥ ३३१ ॥
कुमाराणां जिनानां तु संयमानेहसोज्झितः। आयुः कालः सकुमारः पंचानामपि वर्ण्यते ॥३३२॥
जिनसंयमकालस्तु पूर्वलक्षाथ सोज्झिता। पूर्वांगेन चतुर्भिश्च ह्यष्टाभिद्वार्दशांगकैः ॥ ३३३ ॥
ततः षोडशभिर्हीनो विंशत्या तु ततः परं। चतुर्विंशतिपूर्वांगैरष्टाविंशतिसंख्यकैः ॥ ३३४ ॥

दशानामायुषः पादः पादोनो द्वादशस्य सः । मल्लेर्वर्षशतेनोनो नेमेर्वर्षशतैस्त्रिभिः ॥ ३३५ ॥
त्रिंशद्वर्षविहीनस्तु प्रत्येकं पार्श्ववीरयोः । द्वेधा संयमकालोयं छाद्मस्थः केवली स्थितः ॥३३६॥
वृषछद्मस्थकालोऽत्र स्यात्सहस्रवर्षाण्यतः । द्वादशाब्दानि पूर्णानि स्युर्वर्षाणि चतुर्दश ॥३३७॥
ततोष्टादशवर्षाणि विंशतिस्तु ततः परे । षण्मासा नव वर्षाणि त्रिचतुस्त्रिद्विमासकाः ॥३३८॥
एकत्रिद्वयेकमासाश्च वर्षाणि त्रिश्च षोडश । षडेकादशसंख्याहर्मासा वर्षाण्यतो नव ॥ ३३९ ॥
षट्पंचाशद्दिनानि स्युर्मासाश्चत्वार एव च । वर्षाणि द्वादशैवातः परं केवलिनो जिनाः ॥३४०॥
आद्यस्य गणिनो भर्तुरशीतिश्चतुरुत्तरा । नवतिः पंचसंयुक्तं शतंत्र्युत्तरमप्यतः ॥ ३४१ ॥
शतमेव पुनर्ज्ञेयं षोडशैकादशाधिकं । पंचोत्तरा च नवतिस्त्र्युत्तरा नवतिस्तथा ॥ ३४२ ॥
ततोऽष्टैकादशाशीतिः सप्ततिः सप्तभिर्युता । षट् षष्टिः पंच पंचाशत्पंचाशच्च ततः परं ॥ ३४३ ॥
त्रिचत्वारिंशदेवातः षट्त्रिंशत्त्रिंशदन्विता । पंचभिस्त्रिंशदप्यस्मादष्टाविंशतिरेव तु ॥ ३४४ ॥
अष्टादशगणाधीशास्तथा सप्तदश क्रमात् । एकादश दशैव स्युरेकादश च ते पुनः ॥३४५॥
आद्यस्याद्यो गणी नाम्ना सेनांतो वृषभः प्रभोः । सिंहसेनस्ततोप्यन्यश्चारुदत्त इतीरितः ॥३४६॥
वज्रश्च चमरो वज्रचमरो बालिदत्तकौ । वैदर्भोश्चानगारश्च कुंथुश्चापि सुधर्मकः ॥ ३४७ ॥

मंदरार्यो जयोरिष्टसेनश्चक्रायुधस्ततः। स्वयंभूः कुंथुनामा च विशाखो मल्लिसोमकौ ॥ ३४८ ॥
वरदत्तः स्वयंभूः स्यादिंद्रभूतिर्गणप्रभुः। ऋद्धिभिः सप्तभिर्युक्ताः सर्वे ते श्रुतपारगाः ॥३४९॥
वीरस्यैकस्य निष्क्रांतिस्त्रिशतैर्मल्लिपार्श्वयोः। षडुत्तरैः शतैः षड्भिर्वासुपूज्यजिनस्य तु ॥३५०॥
चतुःसहस्रसंख्यानैर्निष्क्रांतो वृषभो नृपैः। सहस्रपरिवारास्तु प्रत्येकमितरे जिनाः ॥३५१॥
चतुर्भिरधिकाशीतिः सहस्राणि वृषस्य तु। लक्षं लक्षे त्रिलक्षाश्च द्वित्रिलक्षाः सहस्रकैः ॥३५२॥
विंशत्या त्रिंशता युक्तास्तास्तु लक्षात्रयं ततः। सार्धलक्षे पुनर्लक्षे लक्षाशीतिश्चतुर्युता ॥३५३॥
सहस्रगुणिता सा तु द्वासप्ततिरपीदृशी। अष्टाषष्टिश्च षट्षष्टिश्चतुःषष्टिसहस्रकं ॥३५४॥
द्वाषष्टिश्च सहस्राणि षष्टिः पंचाशदेव च। चत्वारिंशत्सहस्राणि त्रिंशद्विंशतिरेव तु ॥३५५॥
अष्टादशसहस्राणि षोडशापि चतुर्दश। सहस्राणि यथासंख्यं गणसंख्या जिनेशिनां ॥३५६॥
संघःसप्तविधः पूर्वधरशिक्षकभेदतः। सावधिः केवली वादी विक्रिया विपुलायुताः ॥३५७॥
स्युश्चत्वारि सहस्राणि तथा सप्तशतानि च। पंचाशच्च वृषस्यामी सर्वे पूर्वधरा विभोः ॥३५८॥
चतुः सहस्रगणनाः शतं पंचाशदुत्तरं। शिक्षकाः सावधिज्ञानाः सहस्राणि नव स्मृताः ॥३५९॥
विंशतिस्तु सहस्राणि पूज्याः केवलिनः सतां। सहस्राण्येव तावंति षट्शतानि च वैक्रियाः ॥३६०॥

स्युर्द्वादशसहस्राणि मत्या विपुलया युताः। शतानि सप्तपंचाशत्तत्संख्यावादिनोऽपि च ॥३६१॥
अजितस्य सहस्राणि त्रीणि सप्तशतानि च। पंचाशच्च सतां सेव्याः सभ्यानां पूर्वधारिणः॥३६२॥
शिक्षकाः षट्शतैः सार्धं सहस्राण्येकविंशतिः। चतुःशत्या सहस्राणि नव सावधयो मताः ॥३६३॥
स्युर्विंशतिसहस्राणि केवलाप्तासु वैक्रियाः । ज्ञेयास्तावत्सहस्राणि पंचाशच्च चतुःशती ॥३६४॥
द्वादशैव सहस्राणि प्रत्येकं च चतुःशती । मत्या विपुलया युक्ता वादिनो हितवादिनः ॥३६५॥
संयमस्य सहस्रे द्वे शतं पंचाशता समं । पूज्याः पूर्वभृतो ज्ञेयाः पूर्वसद्भाववेदिनः ॥३६६॥
एकोनत्रिंशतालक्षो सहस्रैस्त्रिशतानि च। संख्याशिक्षकसाधूनां संख्याताः प्रश्रया स्मृताः ॥३६७॥
षट् शतानि सहस्राणि नव सावधयः स्मृताः। तथा दशसहस्राणि पंचभिः केवलाश्रिताः ॥३६८॥
तथैवैकोनविंशत्या सहस्रैरष्टभिः शतैः । पंचाशद्वैक्रियाः प्रोक्ता विक्रियाशक्तिधारिणः ॥३६९॥
द्वाभ्यां दशसहस्राणि विपुलां मतिमाश्रिताः। शताधिकानि तावंति सहस्राणि च वादिनः ।३७०।
शतानि पंच तुर्यस्य द्वे सहस्रेथ पूर्विणः । द्विलक्षे शिक्षकास्त्रिंशत्सहस्राण्यर्द्धितं शतं ॥३७१॥
शतान्यष्टौ सहस्राणि नवैवावधिवीक्षणाः । षोडशैव सहस्राणि मुनयः केवलेक्षणाः ॥३७२॥
एकान्नविंशतिर्ज्ञेया सहस्राणि तु वैक्रियाः । एकादशसहस्राणि पंचाशत्षट्शतानि च ॥३७३॥

विपुलोपगता ये ते बोद्धव्या भव्यदेहिनां। वादिनोऽपि च तावंति सहस्राणीष्टवादिनः ॥३७४॥
सुमतेर्द्वे सहस्रे तु चतुःशत्यपि पूर्विणः। द्वे लक्षे शिक्षका दृश्याश्चतुःपंचाशदेव च ॥३७५॥
सहस्राण्यभियुक्तानि पंचाशच्च शतत्रयं। एकादशसहस्राणि विमलावधयस्तथा ॥३७६॥
त्रयोदशसहस्राणि केवलज्ञानदृष्टयः। अष्टादशसहस्राणि चतुःशत्यपि वैक्रियाः ॥३७७॥
दृश्या दशसहस्राणि विपुलाप्ताश्चतुःशती। तावंतो वादिनस्तेभ्यः सर्वे पंचाशताधिकाः ॥३७८॥
पद्माभस्य सहस्रे द्वे शतानि त्रीणि पूर्विणः। लक्षे द्वे शिक्षकाः षष्टिसहस्राणि नवापि च ॥३७९॥
ज्ञेया दशसहस्राणि मुनयोऽवधिलोचनाः। द्वादशाष्टशतैर्युक्ताः सहस्राण्याप्तकेवलाः ॥३८०॥
षोडशैव सहस्राणि त्रिशती वैक्रिया नव। वादिनो विपुलाप्ताः षट् शत्यामा दश तानि वै ॥३८१॥
द्वे सहस्रे सुपार्श्वस्य त्रिशता पूर्विणश्चतुः। चत्वारिंशत्सहस्राणि लक्षे नवशतैः सह ॥३८२॥
शिक्षका विंशतिः प्राप्ताः सहस्राणि नवावधिं। एकादश सहस्राणि त्रिशती केवलान्विताः ॥३८३॥
शतं पंचाशता पंच सहस्राणि दशापि च। वैक्रियाविपुलाद्याः षट् शती नवसहस्रकैः ॥३८४॥
वादिनोष्टसहस्राणि ततश्चंद्रप्रभस्य तु। पूर्विणो द्वे सहस्रे तु शैक्षालक्षे चतुःशती ॥ ३८५ ॥
संचावष्टसहस्राणि पृथक् सविपुलावधी। दशकेवलिनस्तानि वैक्रियास्तु चतुःशती ॥ ३८६ ॥

ज्ञेयाः सप्त सहस्राणि षट् शतानि च वादिनः । सुविधेः पूर्विणः पंच दशशत्युपवर्णिता ॥३८७॥
लक्षैका पंच पंचाशत्सहस्राणि शतानि च । पंच शिक्षकसाधूनामवधिज्ञानिनोष्ट तु ॥ ३८८ ॥
सहस्राणि चतुःशत्या पंचशत्या तु सप्त वै । सहस्राण्याप्तकैवल्याः स्युस्त्रयोदश वैक्रियाः ॥३८९ ॥
षट् सहस्राणि विपुलां पंचशत्या मतिं श्रिताः । वादिनः षट् शतैः सप्त सहस्राणि विनिश्चिताः ॥३९०॥
शीतलस्य चतुःशत्या सहस्रं पूर्ववेदिनः । द्विशत्यैकान्नषष्टिस्तु सहस्राणि सुशिक्षकाः ॥ ३९१ ॥
द्विशत्या सावधिः संघसहस्राणि हि सप्त सः । सप्तकेवलिनस्तानि द्वादशैतानि वैक्रियाः ॥३९२॥
पंचशत्या सहस्राणि सप्तैते विपुलेश्वराः । सप्तशत्या सहस्राणि पंच सद्वादवादिनः ॥३९३ ॥
त्रयोदश शतानि स्युः पूर्विणः श्रेयसोऽष्टभिः । चत्वारिंशत्सहस्राणि द्विशती शैक्षसाधवः ॥३९४॥
सावधिः षट् सहस्राणि गणः केवलिनामपि । पंचशत्या सहस्राणि तथैकादश वैक्रियाः ॥३९५॥
ततोन्ये षट् सहस्राणि पंच तानि ततः परे । शतानि द्वादशैव स्युर्वासुपूज्यस्य पूर्विणः ॥३९६॥
द्विशत्या शिक्षकास्त्रिंशत्सहस्राणि नवापि च । चतुःशत्या सहस्राणि पंच सावधयो मताः॥३९७॥
सर्वज्ञाः षट् सहस्राणि वैक्रियाः दश षट् परे । वादिनस्तु सहस्राणि चत्वारि द्विशती तथा ॥३९८॥
शतान्येकादश ज्ञेया विमलस्य तु पूर्विणः । अष्टात्रिंशत्सहस्राणि पंचशत्या तु शैक्षकाः ॥३९९॥

अष्टाशत्या सहस्राणि चत्वार्यवधिलोचनाः । पंचशत्या सहस्राणि पंच केवलिनो नव ॥४००॥
वैक्रियाश्च सहस्राणि ततोन्ये केवलिप्रमाः। वादिनस्त्रिसहस्री च षट् शती च विनिश्चिता ॥४०१॥
पूर्विणोऽनंतनाथस्य सहस्रगणनाः स्मृताः । पंचशत्या सहस्राणि त्रिंशन्नव च शिक्षकाः॥४०२॥
स्याश्चत्वारि सहस्राणि त्रिशत्या सावधिर्गणः । अन्ये पंचाष्टपंचत्रिसहस्राण्यंतगे शते ॥ ४०३ ॥
शतानि नव धर्मस्य पूर्विणः शिक्षकाः पुनः । चत्वारिंशत्सहस्राणि तथा सप्तशतानि च ॥४०४॥
षट् शतानि सहस्राणि त्रीणि सावधयः स्मृताः। पंचशत्या सहस्राणि चत्वारि सकलेक्षणाः॥४०५॥
संतः सप्तसहस्राणि वैक्रिया विपुलान्विताः । पंचशत्या तु चत्वारि द्विसहस्रयष्टशत्यतः॥४०६॥
पूर्विणोऽष्टशती शांतेरष्टशत्यात्र शिक्षकाः । चत्वारिंशत्सहस्र्येकं त्रिसहस्रीगणः परः ॥ ४०७ ॥
चत्वारि षट् चत्वारि द्वे सहस्रे चतुःशती । कुंथोस्तु सप्तशत्येव पूर्विणः शिक्षकाः पुनः ॥४०८॥
चत्वारिंशत्सहस्राणि त्रीणि पंचशता शतं । सावधिः पंचशत्या तु द्वे सहस्रे गणो मतः ॥४०९॥
त्रिसहस्री द्विशत्या तु गणः केवलिनां स्मृतः। शतैकं वैक्रियाःपंच सहस्राणि च संमताः॥४१०॥
त्रिशत्या त्रिसहस्री तु पंचाशद्विपुलेश्वराः । वादिनां जितवादीनां सहस्रद्वितयी मता ॥ ४११॥
पूज्यः पूर्वभृतोरस्य षट्शती तु दशोत्तरा । शैक्षास्तु पंचाग्रत्रिंशत्सहस्रैरष्टभिः शतैः ॥ ४१२ ॥

पंचत्रिंशन्मताः सर्वे सावधिः परिषत्पुनः । सकेवलावधिर्ज्ञेया द्विसहस्त्यष्टशत्यपि ॥ ४१३ ॥
वैक्रियास्तु सहस्राणि चत्वारि त्रिशती तथा । सहस्रे पंच पंचाशन्मत्या विपुलयान्विताः ४१४॥
शतानि षोडशैव स्युर्वादिनः पटुवादिनः । मल्लेस्तु पूर्विणः सर्वे पंचाशत् सप्तशत्यपि ॥ ४१५ ॥
एकाच त्रिंशदुद्दिष्टाः सहस्राणि तु शिक्षकाः । द्वाविंशतिः शतानि स्युर्मुनयोऽवधिचक्षुषः ॥४१६॥
सहस्रे षट् च शत्यामा पंचाशञ्च सकेवला । चतुःशत्या सहस्रं तु वैक्रिया यतयो मताः ॥४१७॥
द्वे सहस्रे शते द्वे च मता विपुलबुद्धयः । तावंत एव जेतारो वादिनः प्रतिवादिनां ॥ ४१८ ॥
मुनिसुव्रतनाथस्य पूर्विणः पंचशत्यभूत् । शिक्षका शिक्षया युक्ता सहस्राण्येकविंशतिः ॥४१९॥
अष्टादश शतान्येव मताः सावधिलोचनाः । द्वाविंशतिः पंचदश द्वादशैवान्यतः परे ॥ ४२० ॥
पंचाशता शतानि स्युश्चत्वारि नमिपूर्विताः । षड्भिः शतैः सहस्राणि द्वादशैव तु शिक्षकाः॥४२१॥
शतानि षोडश ख्याताः केवलावधिलोचनाः । वैक्रियास्तु शतानि स्युस्तथा पंचदशैव तु॥४२२॥
शतानि द्वादश प्रोक्ताः पंचाशद्विपुलेक्षणाः । सहस्रपरिमाणास्तु वादिनः प्रतिवादिनां ॥४२३॥
चतुःशतानि नेमेस्तु पूर्विणः शिक्षकाः स्मृताः । एकादश सहस्राणि शतैरष्टभिरेव तु ॥ ४२४ ॥
सकेवलावधी संघौ सहस्रं पंचशत्यपि । सहस्रं वैक्रियाश्चापि शतं च शुभवैक्रियाः ॥४२५॥

शतानि नव विज्ञेयाः शांता विमलबुद्धयः । वादिनोऽष्टौ शतानीह निःप्रतिप्रतिभान्विताः ॥४२६॥
पंचाशत्त्रिशती चापि स्युः पार्श्वस्य तु पूर्विणः । शैक्षा दश सहस्राणि शतानि नव च स्मृताः ४२७
चतुःशत्या सहस्रं तु निर्मलावधिबोधनाः । सहस्रं केवलालोका वैक्रियाश्च तथा मताः ॥४२८॥
शतानि सप्त पंचाद्विमलामलबुद्धयः । वादिनः षट् शतानि स्युर्वादन्यायविधौ बुधाः ॥४२९॥
वर्धमानजिनेंद्रस्य त्रिशती पूर्वधारिणः । शैक्षा नव सहस्राणि शतानि च नवोदिताः ॥ ४३० ॥
त्रयोदश शतानि स्युरवधिज्ञानिनः परे । ये सप्त नव पंच स्युश्चत्वारि च शतानि वै ॥ ४३१ ॥
आर्यास्तिस्रोऽभवँल्लक्षा जिनपंचकसंसदि । पंचाशद्विंशतिस्त्रिंशत्त्रिंशस्त्रिंशत्सहस्रकैः ॥ ४३२ ॥
चतस्रो विदिता लक्षाः पद्माभस्य सभांतरे । विंशतिश्च सहस्राणि सहस्राणि वरोचिषां ॥४३३॥
तिस्रस्त्रिंशत्सहस्राणि सप्तमस्य सभांबुधौ । ततः परं त्रयाणां तास्तिस्रोऽशीतिसहस्रकैः ॥४३४॥
स्याद्विंशतिसहस्रैस्तु लक्षैकान्यस्य संसदि । एका लक्षा त्रयाणां च षड्त्रिकाष्टसहस्रकैः ॥४३५॥
स्युद्वाषष्टिसहस्राणि धर्मस्यापि चतुःशती । शांतेः षष्टिसहस्राणि शतानां त्रितयं तथा ॥४३६॥
कुंथोः षष्टिसहस्राणि पंचाशच्च शतत्रयं । पुनः षष्टिसहस्राणि जिनस्यारस्य संसदि ॥४३७॥
मल्लेस्तु पंच पंचाशत्सहस्राणि सभांतरे । सहस्राण्येव पंचाशन्मुनिसुव्रतसंसदि ॥४३८॥

चत्वारिंशत्सहस्राणि नमेः पंचोत्तराणि ताः । चत्वारिंशत्सहस्राणि नेमेः सदसि ताः स्मृताः ॥४३९॥
अष्टात्रिंशत्सहस्राणि त्रयोविंशस्य संसदि । पंचत्रिंशत्सहस्राणि चतुर्विंशस्य सम्मताः ॥४४०॥
तिस्रोष्टानां पृथग्लक्षा जिनानां श्रावकाः स्मृताः । द्वे लक्षे च ततोऽष्टानां लक्षाष्टानां मता ततः ।४४१।
पंचलक्षास्तथाष्टानां मंसदि श्राविकाः स्मृताः । चतस्रस्तास्ततोष्टानां तिस्रोष्टानां जिनेशिनां ।४४२।
सिद्धाः षष्टिसहस्राणि नवशत्या वृषस्य ते । सप्तसप्ततिरन्यस्य सहस्राणि शतान्विताः ॥४४३॥
शिक्षा लक्षा तृतीयस्य सहस्राणि च सप्ततिः । शतं चातः शतं लक्षं सहाशीतिसहस्रकैः ॥४४४॥
तिस्रो लक्षाः सहस्रं च षट्शतानि ततस्ततः । त्रयोदशसहस्राणि तिस्रो लक्षाश्च षट्शती ॥४४५॥
पंचाशीतिसहस्राणि द्वे लक्षे षट्शती ततः । चतुस्त्रिंशत्सहस्राणि द्वे लक्षे च ततः परं ॥४४६॥
लक्षैकेन विनाशीतिः सहस्राण्यपि षट्शती । ततोऽशीतिसहस्राणि षट्शतानि च निर्वृताः ॥४४७॥
पंचषष्टिसहस्राणि श्रेयसः षट्शती यथा । चतुः पंचाशदेव स्यात्सहस्राण्यपि षट्शती ॥४४८॥
सहस्राण्येकपंचाशत् त्रिशती विमलस्य तु । अनंतस्यापि तावंति सहस्राण्येव केवलं ॥४४९॥
धर्मस्यैकाग्रपंचाशत सहस्री सप्तशत्यपि । चत्वारिंशत्ततोष्टौ च सहस्राणि चतुःशती ॥४५०॥
चत्वारिंशत्सहस्राणि षट् चाष्टौ च शतान्यतः । सप्तत्रिंशत्सहस्राणि द्विशत्यारजिनस्य तु ॥४५१॥

अष्टशत्या सहस्राणि ततोष्टाविंशतिस्तथा । एकान्नविंशतिस्तस्मात्सहस्राणि शतद्वयं ॥४५२॥
नमेर्नव सहस्राणि षट् शतानि च निर्वृताः । नेमेरष्टौ सहस्राणि षट् सप्त द्वेशते द्वयोः ॥४५३॥
यदैव केवलोत्पत्तिः षोडशानां जिनेशिनां । तदैव तेषां शिष्याणां सिद्धिः केषांचिदिष्यते ॥४५४॥
एकद्वित्रिकषण्मासैरन्येषां शिष्यनिर्वृत्तिः । एक-द्वि-त्रिचतुर्वर्षैरपरेषां विनिश्चिता ॥४५५॥
त्रिविंशतिसहस्राणि पंचानां द्वादशैव तु । तान्येकादश पंचानां पंचानां दश तान्यतः ॥४५६॥
अष्टाशीति शतान्येव शिष्याः पंचजिनेशिनां । षट् सहस्राणि वीरस्य शिष्यास्तेनुत्तरोद्भवाः ॥४५७॥
ऊर्ध्वग्रैवेयकांतासु सौधर्मादिषु भूमिषु । शतं त्रीणि सहस्राणि बभूवुर्वृषभशिष्यकाः ॥ ४५८ ॥
एकान्तात्रिसहस्राणि द्वितीयस्य दिवं गताः । नवान्यस्य सहस्राणि शिष्या नवशतीयुताः ॥४५९॥
नवशत्या सहस्राणि तुरीयस्य तु सप्त वै । ततश्चतुःशतीयुक्ता षट्सहस्री दिवंगता ॥४६०॥
ततश्चतुःसहस्राणि चतुःशत्यान्वितानि तु । द्विसहस्री चतुःशत्यातः सहस्रचतुष्टयी ॥४६१॥
ततो नव सहस्राणि सहितानि चतुःशतैः । ततोष्टौ सप्त षड्वापि सहस्राणि चतुःशतैः ॥४६२॥
ततः पंचसहस्राणि सप्तशत्या ततोऽपि च । पंचैव तु सहस्राणि चत्वारि त्रिशतैस्ततः ॥४६३॥
ततस्त्रीणि सहस्राणि शतैः षड्भिस्ततः पुनः । त्रीण्येव तु सहस्राणि द्विशते च दिवंगताः ॥४६४॥

सहस्रद्वितयं चातो द्वयोरष्ट चतुःशतैः । द्वे सहस्रे ततोन्यस्य सहस्रं षट् शतान्यतः ॥ ४६५ ॥
द्विशत्यातः सहस्रं हि सहस्रं केवलं ततः । अष्टौ शतानि वीरस्य शिष्यास्ते स्वर्गगामिनः॥ ४६६ ॥
कोटीलक्षास्तु पंचाशत्त्रिंशद्दश नवाब्धयः । नवतिश्च सहस्राणि नवतिश्च शतान्यपि ॥ ४६७ ॥
तथा नवशतान्येव नवतिर्नवकोटयः । जिनानां वृषभादीनामंतराणि नव क्रमात् ॥ ४६८ ॥
षट्षष्टिर्वर्षलक्षाभिः षड्विंशतिसहस्रकैः । विहीनाब्दशतेनाब्धिः कोटीदशमनंतरं ॥ ४६९ ॥
चतुःपंचाशदेवातस्त्रिंशन्नव च सागराः । चत्वारस्ते त्रयस्तूनास्त्रिचतुर्भागपल्यकैः ॥ ४७० ॥
पल्यार्धं च चतुर्भागो हीनकोटीसहस्रकः । कोटीसहस्रमब्दानां चतुर्लक्षाः शतार्धगाः ॥४७१॥
षट् लक्षाः पंचलक्षाश्च त्रयोऽशीति सहस्रकैः । सार्धसप्तशतान्यर्धतृतीये च शते मते ॥ ४७२ ॥
वर्धमानजिनेंद्रस्य सहस्राण्येकविंशतिः । तीर्थकालस्तु तावंति सहस्राण्यतिदुःषमः ॥ ४७३ ॥
आदावष्टौ तथांतेष्टावव्युच्छिन्नानि षोडश । मध्ये तु सप्ततीर्थानि व्युच्छिन्नानीह भारते॥४७४॥
पादः पल्यस्य पल्यार्धं त्रिपादी पल्यमेव तु । त्रिपाद्यर्धं च पादश्च व्युच्छेदानेहसः क्रमात् ॥४७५॥
आदितः सप्ततीर्थेषु केवलश्रीर्निरंतरा । चंद्राभस्य मुनेरंते सुविधेर्नवतौ मता ॥ ४७६ ॥
तीर्थे चतुरशीतिस्तु शीतलस्य निरंतरा । केवलज्ञानिनोन्यस्य द्वासप्ततिरुदाहृता ॥ ४७७ ॥

चत्वारिंशच्चतुर्युक्ता वासुपूज्यस्य पूजिता । चतुर्हानिस्तु दशसु द्वयोः केवलिनस्त्रयः ॥ ४७८ ॥
वीरकेवलिनां कालो द्वाषष्ट्यब्दानि संस्तुतः । ततो वर्षशतं पूर्णं स्याच्चतुर्दशपूर्विणां ॥ ४७९ ॥
त्रयोऽशीत्या शताब्दानि भवंति दशपूर्विणां । विंशत्यंगभृतां युक्ताः कालो वृषशतद्वयं ॥४८०॥
आचारांगभृतांगीतैः शतमष्टादशोत्तरं । त्रिपंचैकादश ज्ञेया पंच चत्वार एव ते ॥ ४८१ ॥
वीरस्य गणिनां वर्षाण्यायुर्द्वानवतिश्चतुः । विंशतिः सप्ततिश्च स्यादशीतिः शतमेव च ॥४८२॥
त्रयोऽशीतिश्च नवतिः पंचभिः साष्टसप्तभिः । द्वाभ्यां च सप्तभिः षष्टिश्चत्वारिंशच्च संयुताः ॥४८३॥
षट्सु कालेषु पल्याष्टभागे शेषे तृतीयके । भूतिः कुलकराणां च ततोऽपि वृषभस्य तु ॥ ४८४ ॥
जन्मक्रमेण शेषाणां जिनानां चक्रवर्तिनां । हलिनां वासुदेवानां तुर्ये काले विनिश्चितं ॥ ४८५ ॥
अष्टाष्टमासमासार्धशेषयोरिह कालयोः । तृतीयतुर्ययोः सिद्धिः प्रसिद्धा वृषवीरयोः ॥ ४८६ ॥
वीरनिर्वाणकाले च पालकोऽत्राभिषिच्यते । लोकेऽवंतिसुतो राजा प्रजानां प्रतिपालकः ॥४८७॥
षष्टिर्वर्षाणि तद्राज्यं ततो विषयभूभूजां । शतं च पंचपंचाशद्वर्षाणि तदुदीरितं ॥ ४८८ ॥
चत्वारिंशत्पूरूढानां भूमंडलमखंडितं । त्रिंशत्तु पुष्पमित्राणां षष्टिर्वस्वग्निमित्रयोः ॥ ४८९ ॥

१ 'शतांगीतः' इति ख पुस्तके ।

शतं रासभराजानां नरवाहनमप्यतः । चत्वारिंशत्ततो द्वाभ्यां चत्वारिंशच्छतद्वयं ॥ ४९० ॥
मद्रबाणस्य तद्राज्यं गुप्तानां च शतद्वयं । एकविंशश्च वर्षाणि कालविद्भिरुदाहृतं ॥ ४९१ ॥
द्विचत्वारिंशदेवातः कल्किराजस्य राजता । ततोऽजितंजयो राजा स्यादिंद्रपुरमंस्थितः ॥४९२॥
कौमार्ये मंडलेशत्वे विजये राज्यसंयमे । चक्रयादीनां यथायोग्यमितः कालो निरूप्यते॥४९३॥
पूर्वलक्षाः कुमारेऽगुर्भरते सप्तसप्ततिः । वर्षाणां च सहस्रं तु मंडलाधिपतौ मतं ॥ ४९४ ॥
षष्टिर्वर्षसहस्राणि विजयो राज्यमूर्जितं । एकपूर्वांगहीनास्तु पूर्वलक्षाः षडेव तु ॥ ४९५ ॥
अंगलक्षास्त्रयोऽशीतिर्नवतिर्नवभिः सह । सहस्राणि नवान्यानि शतानि नवतिर्नव ॥ ४९६ ॥
वर्षलक्षास्त्रयोशीतिस्त्रिंशन्नवसहस्रकैः । चक्रिसंयमकालस्तु पूर्वलक्षैव केवलाः ॥ ४९७ ॥
पंचाशत्तु सहस्राणि पूर्वाणां पूर्वकालयोः । त्रिंशदब्दसहस्राणि विजयः सगरस्य तु ॥४९८॥
एकान्नसप्ततिर्लक्षा पूर्वाणां नवतिर्नव । सहस्राणि नवापीह शतानि नवतिर्नव ॥ ४९९ ॥
पूर्वांगप्रमितिः पूर्वा सप्ततिश्च सहस्रकैः । राज्यं लक्षास्त्रयोऽशीतिः पूर्वलक्षैव संयमः ॥ ५०० ॥
पंचविंशतिसंख्याब्दसहस्राणि कुमारकः । मंडलेशश्च मघवान् जये दशसहस्रवान् ॥ ५०१ ॥

---

१ 'एकपूर्वविहीनास्तु' इति ख पुस्तके ।

तिस्रोस्य वर्षलक्षास्तु नवत्यब्दसहस्रकैः । राज्यं तपस्तु पंचाशत्सहस्राणि तपस्विनः ॥ ५०२ ॥
सनत्कुमारकौमार्यं मंडलेशत्वमेव च । सहस्राणि तु पंचाशद्विजयो दश तानि वै ॥ ५०३ ॥
नवत्यब्दसहस्राणि राज्यं प्राज्यमुदीरितं । वर्षलक्षास्ततस्तस्य संयमः संयमात्मनः ॥ ५०४ ॥
शांतेर्मंडलिकत्वे तु पंचविंशतिरेव तु । सहस्राण्यष्टशत्येव विजये गदितं परं ॥ ५०५ ॥
कुंथोर्मंडलिकत्वे हि त्रिसहस्रैस्तु विंशतिः । पंचाशत्सप्तशत्यामा षट् शती विजयः पुनः ॥५०६॥
अरमंडलिकत्वेऽपि सहस्राण्येकविंशतिः । चतुः शतानि विजयः शेषः प्रागेव भाषितं ॥ ५०७ ॥
सुभौमस्य सहस्राणि पंच कौमार्यमिष्यते । विजयः पंचशत्येव प्रचंडस्य कुमंडले ॥ ५०८ ॥
द्राषष्टयब्दसहस्राणि तथा पंचशतानि च । बालत्वे गूढवृत्तस्य तस्य राज्यमिहोर्जितं ॥ ५०९ ॥
शतानि पंच कौमार्यं तथामंडलनाथता । महापद्मस्य विजयो वर्षाणां तु शतत्रयं ॥ ५१० ॥
अष्टादश सहस्राणि राज्यं सप्त शतान्यपि । दशवर्षसहस्राणि संयमःसंयमार्थिनः ॥ ५११ ॥
हरिषेणस्य कौमार्यं त्रिशती पंचविंशतिः । पंचाशता तु विजयस्तस्य वर्षशतं मतं ॥ ५१२ ॥
पंचविंशतिसंख्यानि सहस्राणि तथा शतं । राज्यं च पंचसप्तत्या पंचाशत्त्रिशती तपः ॥ ५१३॥

---

१ सहस्राणि ।

जयसेनस्य कौमार्यं त्रिशती मंडलेशिता । विजयस्तु शतं राज्यं सहस्रं नवशत्यपि ॥ ५१४ ॥
चतुः शती तपस्तस्य ब्रह्मदत्तकुमारता । अष्टाविंशतिवर्षाणि षट्पंचाशत्समंडली ॥ ५१५ ॥
विजयः षोडशाब्दानि षट् शतानि तु राजता। ब्रह्मदत्तस्य विज्ञेया केशवानां तु कथ्यते ॥५१६॥
त्रिपृष्ठस्य सहस्राणि कौमार्ये पंचविंशतेः । विज्ञेयोऽब्दसहस्रे तु विजयः स्नेहवाहिनः ॥ ५१७ ॥
वर्षलक्षास्त्रयोऽशीतिसहस्राणि तु सप्ततिः । चतुर्भिरधिका तस्य राज्यं राजकराजितं ॥ ५१८ ॥
द्विपृष्ठस्यापि कौमार्यं मंडलैश्यमपि स्फुटं । सहस्राणि समाख्यातं प्रत्येकं पंचविंशतिः ॥५१९॥
विजयोब्दशतं लक्षा राज्यं तस्यैकसप्ततिः । चत्वारिंशत्सहस्राणि नवतिर्नवशत्यपि ॥ ५२० ॥
द्वादशैव सहस्राणि पंचशत्या स्वयंभुवः । कौमार्यं मंडलेशत्वं विजयो नवतिः पुनः ॥ ५२१ ॥
एकाब्दषष्टिलक्षाश्च चतुःसप्ततिरेव च । सहस्राणि शतै राज्यं नवभिर्दश पंचकैः ॥ ५२२ ॥
पुरुषोत्तमकौमार्यं मतं सप्त शतानि तु । अशीतिर्विजयस्त्रीणि शतान्यब्दसहस्रकं ॥ ५२३ ॥
मंडलेशत्वमेताद्धि त्रिंशल्लक्षा विनैककं । नवतिश्च सहस्राणि सप्तभिर्नवशत्यपि ॥ ५२४ ॥
विंशतिश्चैव वर्षाणि राज्यमत्यंतमूर्जितं । पुरुषोत्तमतां भूमौ भूम्ना तस्येह बिभ्रतः ॥ ५२५ ॥
कौमार्यं त्रिशती पंचविंशत्या शतमीरितं । मंडलैश्यं हि विजयः सप्ततिः प्रतिपादितः ॥५२६॥

नवलक्षा सहस्राणि नवतिर्नव च स्मृता । राज्यं पुरुषसिंहस्य पंचभिः पंचशत्यापि ॥ ५२७ ॥
पंचाशता शते द्वे तु कौमार्यं मंडलेशता । विजयः षष्टिवर्षाणि विजयोर्जिततेजसः ॥ ५२८ ॥
चत्वारिंशच्च वर्षाणि स्याच्चत्वारि शतान्यपि । चतुःषष्टिसहस्राणि पुंडरीकस्य राजता ॥ ५२९॥
शते दत्तस्य कौमार्यं पंचाशत्कालयोर्द्वयं । एकत्रिंशत्सहस्राणि सप्तशत्यापि राजता ॥ ५३० ॥
शतं लक्ष्मणकौमार्यं चत्वारिंशाद्विजेतृता । एकादशसहस्राष्टशतषष्टयब्दराजता ॥ ५३१ ॥
कुमारकालः कृष्णस्य षोडशाब्दानि षड्युता । पंचाशन्मंडलेशत्वं विजयोष्टाब्दकं स्फुटं ॥५३२॥
शतानि नव विंशत्या कृष्णराजस्य सम्मितिः । तथैकादश रुद्राणां कालसंख्या निरूप्यते ॥५३३॥
तीर्थे भीमावलिर्जातो वृषभस्याजितस्य तु । जितशत्रुरिति ख्यातो–रुद्राख्यः सुविधेः पुनः५३४
विश्वानलस्तु दशमे श्रेयसः सुप्रतिष्ठकः । अचलो वासुपूज्यस्य पुंडरीकस्तु वैमले ॥ ५३५ ॥
अजितंधरोऽनंतस्य धर्मस्याजितनाभिकः । पीठाख्यः शांतितीर्थेऽभूत् सुतो वीरस्य सत्यकेः ५३६
भीमावलेस्तनूत्सेधः पंचचापशतान्यतः । तान्यर्धपंचमान्येकं दशहानिस्तु पंचसु ॥ ५३७ ॥
अष्टाविंशतिरन्यस्य चतुर्विंशतिरप्यतः । सप्तैवारत्नयोंत्यस्य वपुरुत्सेध इष्यते ॥ ५३८ ॥
पूर्वाण्यायुस्त्रयोशीतिलक्षास्त्वेकसप्ततिः । द्वे लक्षे चैकलक्षा च लक्ष्यालक्ष्यविचक्षणैः ॥ ५३९ ॥

लक्षाश्चतुरशीतिश्च षष्टिः पंचाशदेव च । चत्वारिंशच्च वर्षाणां विंशतिर्लक्षया क्रमात् ॥५४०॥
आयुरेकादशस्यापि वर्षाण्येकान्नसप्ततिः । अभिन्नदशपूर्वाणां रुद्राणां रौद्रकर्मणां ॥ ५४१ ॥
त्रयः कालास्तु सर्वेषां रुद्राणां क्रमशः स्थिताः । कौमारः संयमोपेतो गृहीतोज्झितसंयमः ॥५४२॥
कालस्त्रिभागशेषेण चतुर्णां संयमाधिकः । समाद्वयोस्त्रयोप्यन्ये कौमाराधिक इष्यते ॥ ५४३ ॥
संयमाधिक एकस्य कौमारोन्यस्य साधिकः । दशमस्यापि रुद्रस्य संयमाधिक एव सः ॥५४४॥
वर्षाणि सप्त कौमार्ये विंशतिः संयमेऽष्टभिः । एकादशस्य रुद्रस्य चतुस्त्रिंशदसंयमे ॥ ५४५ ॥
द्वयोस्तु सप्तमी पृथ्वी पंचानां षष्ठ्यधिष्ठितिः । एकस्य पंचमी भूमिश्चतुर्थी तु द्वयोस्ततः ॥५४६॥
तृतीयांत्यस्य निर्दिष्टा यथोद्दिष्टा इमाःपुनः । तुर्यसंयमभाराणां रुद्राणां जन्मभूमयः ॥ ५४७ ॥
भीमश्चाथ महाभीमो रुद्रनामा तृतीयकः । महारुद्रोऽथ कालश्च महाकालश्चतुर्मुखः ॥ ५४८ ॥
नरवक्रोन्मुखाख्यौ द्वौ नवैते नारदा स्मृताः । वासुदेवसमानायुः स्थितिस्तेषां प्रजायते ॥५४९॥
कलहे प्रीतिसंयुक्ताः कदाचिद्धर्मवत्सलाः । हिंसानंदवशास्त्वेते महाभव्या जिनानुगाः॥५५०॥
वर्षाणां षट्शतीं त्यक्त्वा पंचाग्रं मासपंचकं । मुक्तिं गते महावीरे शकराजस्ततोऽभवत् ॥५५१॥
मुक्तिंगते महावीरे प्रतिवर्षसहस्रकं । एकैको जायते कल्की जिनधर्मविरोधकः ॥ ५५२ ॥

इहास्यामवसर्पिण्यां यथा तीर्थकरादयः । उत्सर्पिण्यां भविष्यंत्यां भविष्यंति तथा परे ॥५५३॥
भविष्यदुःखमाशेषे सहस्रपरिमाणके । चतुर्दश भविष्यंति प्रागिमे कुलकारिणः ॥ ५५४ ॥
कनत्कनकसंकाशः कनकः कनकप्रभः । त्रयः कनकपूर्वाः स्युस्ते राजध्वजपुंगवाः ॥ ५५५ ॥
नलिनीदलसंकाशो नलिनो नलिनप्रभः । नलिनोपपदास्त्वन्ये ते राजध्वजपुंगवाः ॥ ५५६ ॥
ततः पद्मप्रभो ज्ञेयः पद्मराजस्ततः परः । पद्मध्वजश्च बोद्धव्यः पद्मपुंगव एव च ॥ ५५७ ॥
तीर्थकृच्च महापद्मः सुरदेवो जिनाधिपः । सुपार्श्वनामधेयोऽन्यो यथार्थश्च स्वयंप्रभः ॥ ५५८ ॥
सर्वात्मभूत इत्यन्यो देवदेवः प्रभोदयः । उदकः प्रश्नकीर्तिश्च जयकीर्तिश्च सुव्रतः ॥ ५५९ ॥
अरश्च पुण्यमूर्तिश्च निष्कषायो जिनेश्वरः । विपुलो निर्मलाभिख्यश्चित्रगुप्तो परः स्मृतः ॥५६०॥
समाधिगुप्तनामान्यः स्वयंभूरनिवर्तकः । जयो विमलसंज्ञश्च दिव्यवाद इतीरितः ॥ ५६१ ॥
चरमोऽनंतवीर्योऽमी वीर्यधैर्यादिसद्गुणाः । चतुर्विंशतिसंख्याना भविष्यत्तीर्थकारिणः ॥५६२॥
भरतो दीर्घदंतश्च जन्मदंतश्च चक्रिणः । गूढदन्तोऽपरो नाम्ना श्रीषेण इति विश्रुतः ॥ ५६३ ॥
श्रीभूतिरितिभूतोन्यः श्रीकांतः पद्मनामकः । महापद्मस्तथैवान्यश्चित्रवाहनसंज्ञकः ॥ ५६४ ॥
विमुक्तमलसंपर्को नाम्ना विमलवाहनः । अरिष्टसेन इत्येते चक्रिणो द्वादशोदिताः ॥५६५॥

नंदी च नंदिमित्रश्च नंदिनो नंदिभूतिकः। महातिबलनामानौ बलभद्रश्च सप्तमः ॥ ५६६ ॥
द्विपृष्ठश्च त्रिपृष्ठश्च वासुदेवा नवैव ते। भविष्यंत्यंजनच्छायाच्छायाछन्नदिगंतराः ॥ ५६७ ॥
चंद्रश्चापि महाचंद्रस्तथा चंद्रधरश्रुतिः। सिंहचंद्रो हरिश्चंद्रः श्रीचंद्रः पूर्णचंद्रकः ॥ ५६८ ॥
सुचंद्रो बालचंद्रश्च नवैते चंद्रसप्रभाः। बलाः प्रतिद्विषश्चान्ये नवश्रीहारिकंठकौ ॥ ५६९ ॥
नीलकंठाश्वकंठौ च सुकंठशिखिकंठकौ। अश्वग्रीवहयग्रीवौ मयूरग्रीव इत्यपि ॥ ५७० ॥
प्रमदः सम्मदो हर्षः प्रकामः कामदो भवः। हरो मनोभवो मारः कामो रुद्रस्तथांगजः ॥५७१॥
भव्याः कतिपयैरेव तेऽपि सेत्स्यंति जन्मभिः। रत्नत्रयपवित्रांगाः संतः संतो नरोत्तमाः ॥५७२॥

अंतर्मुहूर्तमपि लब्धविमुक्तमेकं सम्यक्त्वरत्नमचिरेण विमुक्तिहेतुः।
रत्नत्रयस्य तु पवित्रितमस्य लोके साक्षाद्भवप्रमथनस्य किमत्र वाच्यं ॥ ५७३ ॥
वाक्यं त्रिकालविषयार्थनिरूपणार्थमाकर्ण्य कर्णसुखमित्थमिनस्य भूपाः।
कृष्णादयो हरिरविप्रमुखाश्च देवा नत्वा जिनं स्वपदमीयुरुपात्ततत्त्वाः ॥ ५७४ ॥

इति "अरिष्टनेमिपुराणसंग्रहे" हरिवंशे जिनसेनाचार्यस्य कृतौ त्रिषष्टिपुरुषजिनांतरवर्णनो नाम
षष्टितमः सर्गः समाप्तः।

एकषष्टितमः सर्गः ।

आकूतं श्रेणिकस्याथ ज्ञात्वा गणभृदग्रणीः । वृत्तं गजकुमारस्य जगादेति जगन्नुतं ॥ १ ॥
श्रुत्वा गजकुमारोऽसौ जिनादिचरितं तथा । विमोच्य सकलान्बंधून् पितृपुत्रपुरस्सरान् ॥ २ ॥
संसारभीरुरासाद्य जिनेंद्रं प्रश्रयान्वितं । गृहीत्वानुमतो दीक्षां तपः कर्तुं समुद्यतः ॥ ३ ॥
निरूपितास्तु याः कन्या कुमाराय गजाय ताः । प्रभावत्यादयः सर्वा निर्वेदिन्यः प्रवव्रजुः ॥४॥
कुमारश्रमणस्याथ गजस्यैकांतवर्तिनः । निशीथे प्रतिमास्थस्य सर्वद्वंद्वसहस्य सः ॥ ५ ॥
सोमशर्मा सुतात्यागक्रोधाग्निकणदीपितः । अदीदिपदुदाराग्निं शिरसि स्थिरचेतसः ॥ ६ ॥
दह्यमानशरीरोऽसौ शुक्लध्यानेन कर्मणां । अंतं कृत्वा ययौ मोक्षमंतकृत्केवली मुनिः ॥ ७ ॥
तस्य देहमहं चक्रुः समुपेत्य सुरासुराः । यक्षकिन्नरगंधर्वमहोरगपुरोगमाः ॥ ८ ॥
ज्ञात्वा तन्मरणं दुःखा यादवा बहवस्तथा । दशार्हाश्च विहायांत्यं दीक्षिता मोक्षकांक्षिणः ॥ ९ ॥
देव्यः शिवादयो बह्वो देवकी रोहिणीं विना । वसुदेवस्त्रियो विष्णोः कन्याश्चापि प्रवव्रजुः ॥१०॥
ततः सुरवराभ्यार्च्यो नानाजनपदान् जिनः । विजहार महाभूत्या भव्यराजीं प्रबोधयन् ॥११॥
उदीच्यान्नृपशार्दूलान् मध्यदेशनिवासिनः । प्राच्यानपि प्रजायुक्ता स धर्मे स्थापयन् बहून् ॥१२॥

विहृत्य चिरमीशानः पुनरागत्य पूर्ववत् । गिरौ रैवतिके तस्थौ समवस्थानमंडनः ॥ १३ ॥
तत्र स्थितं जिनेंद्रं तं देवेंद्राः सांद्रतेजसः। प्राप्य नत्वा नतिं कृत्वा निजस्थानेषु सुस्थिताः ॥१४॥
वसुदेवो बलः कृष्णः सांतःपुरसुहृज्जनः । द्वारिकापूजया युक्ताः प्रद्युम्नादिसुतान्वितः ॥ १५ ॥
विभूत्या परयागत्य शैवेयमभिवंद्य ते । आसीनाःधर्मस्थाने धर्मं शुश्रूषुरीश्वरात् ॥ १६ ॥
तत्र धर्मकथांतेऽसौ जिनं नत्वा हलायुधः । पप्रच्छ वस्तुचित्तस्थं करकुड्मलितालिकः ॥ १७ ॥
नाथ वैश्रवणेनेयं निर्मिता द्वारिकापुरी । कियतानेहसांतोऽस्याःकृतका हि विनश्वराः ॥ १८ ॥
निमज्जेत् स्वत एवेयं किमु कालांतरेऽम्बुधौ । निमित्तांतरसान्निध्ये केनचिद्वाविनास्य ते ॥१९॥
स्वांतकाले निमित्तत्वं को वा कृष्णस्य यास्यति।जातानां हि समस्तानां जीवानां नियता मृतिः २०
संयमप्रतिपत्तिर्वा का केन कियता प्रभो । कृष्णस्नेहमहापाशबद्धचित्तस्य मेऽभवत् ॥ २१ ॥
इति पृष्टो जिनोगादीदृष्टाशेषपरापरः । याथातथ्यं यथाप्रश्नं यत्प्रश्नोत्तरवागसौ ॥ २२ ॥
पुरीयं द्वादशे वर्षे राममद्येन हेतुना । द्वीपायनकुमारेण मुनिना धक्ष्यते रुषा ॥ २३ ॥
कौशांबवनसुप्तस्य कृष्णस्य परमायुषः । प्रांते जरत्कुमारोऽपि संहारे हेतुतां व्रजेत् ॥ २४ ॥
अनंतरस्य सान्निध्ये हेतोः परिणतेर्वशात् । बाह्यो हेतुर्निमित्तं हि जगतोऽभ्युदये क्षये ॥ २५ ॥

जानंतो वस्तुसद्भावमतोऽभ्युदयनाशयोः । हर्षे भुवि विषादं च न गच्छंति मनस्विनः ॥ २६ ॥
भवतोऽपि तपःप्राप्तिस्तन्निमित्तात्तदा भवेत् । भवपद्धतिभीतस्य ब्रह्मलोकोपपादिनः ॥ २७ ॥
द्वीपायनकुमारोऽसौ रोहिण्याः सोदरो यतिः । तदाकर्ण्य वचो जैनं निर्वेदी तपसि स्थितः ॥२८॥
अवधेः पूरणायातः पूर्वदेशमुपेत्य सः । तपश्चरितुमारब्धः कषायतनुशोषणं ॥ २९ ॥
दुःखी जरत्कुमारश्च दुःखितान् भ्रातृबांधवान् । परित्यज्य गतः क्वापि स हरिर्यत्र नेक्ष्यते ॥३०॥
जरत्कुमारे प्रगते वनमेकाकिनि स्थिते । हरिः स्नेहाकुलो मेने शून्यमात्मानमात्मनि ॥ ३१ ॥
चचार मृगसामान्यं विजनो विजनं वनं । हरिः प्राणप्रियः प्राणान् प्रियान् हातुमना क्वचित् ३२
इतोऽपि जिनमानम्य यादवा विविशुः पुरीं । आगामिदुःखसंभारचिंतासंतप्तमानसाः ॥३३॥
घोषणां कारयांचक्रे चक्री पुरि बलान्वितः । मद्यांगानि च मद्यानि विसृजंतामिति द्रुतं ॥३४॥
पिष्टकिण्वादिमद्यांगैस्ततो मद्यानि मद्यपैः । क्षिप्तानि सशिलाकुंडे कादंबगिरिगह्वरे ॥ ३५ ॥
कदंबवनकुंडेषु युक्ता कादंबरी तु या । साऽश्मपाकविशेषस्य हेतुत्वेनावतिष्ठते ॥ ३६ ॥
तथान्या घोषणादायि कृष्णेन हितबुद्धिना । द्वारिकायां महापुर्यां स्त्रीणां पुंसां च शृण्वतां ॥३७॥
पिता मे यदि वा माता सुता चांतःपुरांगना । तपस्यंतु मते जैने वारयामि न तानहं ॥ ३८ ॥

ततः प्रद्युम्नभान्वाद्याः कुमाराश्चरमांगकाः । अन्ये च बहवो यातास्तपोवनमसंगिनः ॥ ३९ ॥
रुक्मिणीसत्यभामाद्या महादेव्योऽष्ट सस्नुषा । लब्धानुज्ञा हरेः स्त्रीभिः सपत्नीभिः प्रवव्रजुः ४०
सिद्धार्थसारथिर्भ्राता बलदेवनयान्वितः । बोधनं व्यसने स्वस्य प्रतिपाद्य तपोऽगृहीत् ॥४१॥
ततः संघेन महता जिनः पल्लवदेशभाक् । बभूव भव्यबोधार्थं भव्यांभोरुहभास्करः ॥ ४२ ॥
राजस्त्रीनरसंघातो यावान् प्रव्रजितस्तदा । जिनेनैव समं पायादुत्तरापथमुद्यमी ॥ ४३ ॥
वर्षे द्वादश चोद्वस्य पुर्याः लोकः क्वचिद्वने । कृत्वा वासं पुनस्तत्र त्वागतश्च विधेर्वशात् ॥४४॥
इतो द्वारवतीं लोकः परलोकभयान्वितः । व्रतोपवासपूजासु सुतरां निरतोऽभवत् ॥ ४५ ॥
द्वीपायनोऽपि महता तपसा सहितस्ततः । व्यतीतं द्वादशं वर्षं मन्वानो भ्रांतिहेतुना ॥ ४६ ॥
व्यतिक्रांतो जिनादेश इति ध्यात्वा विमूढधीः । संप्राप्तो द्वादशे वर्षे सम्यग्दर्शनदुर्बलः ॥४७॥
धृतातापनयोगश्च तस्थौ प्रतिमया पथि । द्वारिकाबहिरभ्याशे कदाचिन्निकटे गिरेः ॥४८॥
वनक्रीडापरिश्रांता पिपासाकुलिता जलं । इति कादंबकुंडेषु शंबाद्यास्तां सुरां पपुः ॥ ४९ ॥
कदंबवनसंन्यस्तां कदंबकतया स्थितां । पीत्वा कादंबरीं मृष्टां कुमारा विकृतिं गताः ॥ ५० ॥
वारुणी सा पुराणापि परिपाकवशाद्वशान् । तरुणानकरोद्गाढं तरुणीवारुणेक्षणान् ॥ ५१ ॥

असंबद्धानि गायंतो नृत्यंतः स्खलितक्रमाः। मुक्तकेशाः कृतोत्तंसा कंठालंबिवनस्रजः ॥ ५२ ॥
आगच्छंतः पुरः सर्वे दृष्ट्वार्काभिमुखं मुनिं। प्रत्यभिज्ञाय चावोचन् घूर्णमाननिरीक्षणाः ॥५३॥
सोयं द्वीपायनो योगी द्वारावत्या किलांतकृत्। भवितास्माकमद्याग्रे क प्रयाति वराककः ॥५४॥
इत्युक्त्वा तं कुमारास्ते लोष्टुभिः सर्वतोऽश्मभिः। प्रजघ्नुर्निर्घृणास्तावद्यावत्पतति भूतले ॥५५॥
क्रोधाधिक्यात्ततो दध्रे दष्टोष्ठो भृकुटीकुटीं। प्रलयाम यदूनां सः प्रायः स्वतपसोऽपि च ॥५६॥
प्रविष्टास्तु पुरीं व्याला व्याला इव चलाचलाः। कुमाराः कैश्चिदुक्तं तु दुर्वृत्तं लघु विष्णवे॥५७॥
बलनारायणौ श्रुत्वा द्वीपायनमुपप्लुतं। द्वारिकायाः क्षयं प्राप्तं मेनाते जिनभाषितं ॥ ५८ ॥
संभ्रमेण परिप्राप्तौ परित्यक्तपरिच्छदौ। मुनिं क्षमयितुं क्रोधाज्ज्वलंतमिव पावकं ॥ ५९ ॥
दृष्टः संक्लिष्टधीस्ताभ्यां भ्रूभंगविषमाननाः। दुर्निरीक्ष्येक्षणः क्षीणः कंठप्राणो बिभीषणः ॥६०॥
कृतांजलिपुटाभ्यां स प्रणिपत्य महादरात्। याच्यते याचना बंध्यं ज्ञानढ्यामपि मोहतः॥६१॥
रक्ष्यतां रक्ष्यतां साधो चिरं सुपाररक्षितः। क्षमामूलस्तपो भारो धक्ष्यते क्रोधवन्हिना ॥६२॥
मोक्षसाधनमप्येष तपो दूषयति क्षणात्। चतुर्वर्गारपुः क्रोधः क्रोधः स्वपरनाशकः ॥ ६३ ॥
क्षम्यतां क्षम्यतां मूढैः प्रमादबहुलैः कृतं। दुर्विचेष्टितमस्मभ्यः प्रसादः क्रियतां यते ॥ ६४ ॥

इत्यादिप्रियवादिभ्यां प्रार्थ्यमानो निवर्तकः । सप्राणद्वारिकादाहे पापधोः कृतनिश्चयः ॥६५॥
संज्ञयादर्शयत्ताभ्यामंगुलीद्वयदर्शनं । युवयोरेव मोक्षोत्र नान्यस्येति परिस्फुटं ॥ ६६ ॥
अतिवर्तकरोषं तं विदित्वा विदितक्षयौ । विषण्णौ तौ पुरीं यातौ किंकर्तव्यत्वविह्वलौ ॥६७॥
शंबाद्यास्तु तदानेके यादवाश्चरमांगकाः । पुर्या निष्क्रम्य निष्क्रांतास्तस्थुर्गिरिगुहादिषु ॥६८॥
मृत्वा क्रोधाग्निनिर्दग्धतपः सारधनश्च यः । बभूवाग्निकुमाराख्यो मिथ्यादृग्भवनामरः ॥ ६९ ॥
अंतर्मुहूर्तकालेन पर्याप्तः प्रतिबुद्धवान् । विभंगेन विकारं स्वं कृतं यदुकुमारकैः ॥ ७० ॥
रौद्रध्यानं स दध्यौ मे तपस्यस्य निरागसः । हिंसकानां पुरीं सर्वां दहामि सह जंतुभिः ॥७१॥
इति ध्यात्वा सुदुर्बुद्धिरो यावदायाति दारुणः । द्वारावत्यां महोत्पातास्तावज्जाताः क्षयावहाः॥७२॥
बभूवुः प्रत्यगारं च रोमहर्षविकारिणः । प्रजानां निशि सुप्तानां स्वप्नाश्च भयशंसिनः ॥७३॥
प्राप्य पापमतिश्चासौ पुरीमारभ्य बाह्यतः । कोपी दग्धुं समारेभे तिर्यग्मानुषपूरितां ॥ ७४ ॥
धूमज्वालाकरान् वृद्धस्त्रीबालपशुपक्षिणः । नश्यतोग्नौ क्षिपत्येष कारुण्यं पापिनः कुतः ॥ ७५ ॥
प्राणिजातस्य सर्वस्य जातवेदसि मज्जतः । आक्रंदनस्वना जाता येऽत्र जाता न जातुचित् ॥७६॥
दिव्येन दह्यमानायां दहनेन तदा पुरि । नूनं क्वापि गता देवा दुर्वारा भवितव्यता ॥ ७७ ॥

अन्यथा देवराजस्य राजराजेन शासनात्। निर्मिता रक्षता चासौ दह्यते कथमग्निना ॥ ७८ ॥
रक्षतां बलकृष्णौ च चिरेणाग्निभयार्दिताः। इति स्त्रीबालवृद्धानामालापा ययुराकुलाः॥ ७९ ॥
आकुलौ बलकृष्णौ च भित्वा प्राकारमंबुधेः। विध्यापयितुमालग्नौ प्रवाहैस्तं हुताशनं ॥ ८० ॥
सागरांबु हलाकृष्टं हलिना बलशालिना। जज्वाल ज्वलनस्तेन तैलभावमुपेयुषा ॥ ८१ ॥
असाध्यतां विदित्वाग्नेर्जनन्यौ जनकं जनं। सुबहुं रथमारोप्य संयोज्य गजवाजिनः ॥ ८२ ॥
रथं नोदयतो क्षोण्यां रथचक्राणि पंकवत्। निमज्जंति विपत्काले क गजा वाजिनः क च ॥८३॥
स्वयमेव रथं दोर्भ्यामाकृष्य प्रयतोस्तयोः। निरुद्धः कीलयित्वाऽसाविंद्रकीलेन पापिना ॥८४॥
अवष्टघ्नति पादेन यावत्कीलं हलायुधः। पिहितं गोपुरद्वारं तावद्दैत्येन कोपिना ॥ ८५ ॥
कपाटं पादघातेन ताभ्यां पातितमाशु तत्। द्विषोक्तं निर्गमोऽन्यस्य युवाभ्यां नानुविद्यते ॥८६
ततः पित्रा च मातृभ्यां पुत्रौ यातमितीरितौ। विनिश्चित्योपसंहारमात्मीयमिति दुःखिभिः ॥८७॥
भवतोः जीवतोः पुत्रौ कदाचिद्वंशसंततिः। न क्राम्यदप्यतो घातमिति तद्वाक्यमस्तकौ ॥ ८८ ॥
तान्प्रशाम्य गतौ दीनौ दुःखितौ दुःखपीडितान्। प्रपत्य पादयोर्यातौ गुरुवाक्यकरौ पुरः॥८९॥
निर्गत्य निर्गतौ पुर्या ज्वालालीलीढवेश्मनः। रुदित्वा कंठलग्नौतौ दक्षिणां दिशमाश्रितौ ॥९०॥

इतोऽपि वसुदेवाद्या यादवाश्च तदंगनाः । प्रायोपगमनं प्राप्ता संप्राप्ता बहवो दिवः ॥ ९१ ॥
केचिच्चरमदेहास्तु बलदेव–सुतादयः । गृहीतसंयमा नीता लं(जं)भकैर्जिनसन्निधिं ॥ ९२ ॥
यदूनां यादवीनां च धर्म्यध्यानवशात्मनां । सम्यग्दर्शनशुद्धानां प्रायोपगममाश्रितां ॥ ९३ ॥
बहूनां दह्यमानानामपि देहविनाशनः । यातो हुताशनो रौद्रो न तु ध्यानाविनाशनः ॥ ९४ ॥
आर्तध्यानकरः प्रायो मिथ्यादृष्टिषु जायते । उपसर्गश्चतुर्भेदो न सद्दृष्टेस्तु जातुचित् ॥ ९५ ॥
आगाढे वाप्यनागाढे मरणे समुपास्थिते । न मुह्यंति जना जातु जिनशासनभाविताः ॥ ९६ ॥
मिथ्यादृष्टेः सतो जंतोर्मरणं शोचनाय हि । न तु दर्शनशुद्धस्य समाधिमरणं शुचे ॥ ९७ ॥
मृतिर्यातस्य नियता संसृतौ नियतेर्वशात् । सा समाधियुजो भूयादुपसर्गेऽपि देहिनः ॥ ९८ ॥
धन्याः शिखिशिखाजालकवलीकृतविग्रहाः । अपि साधुसमाधाना ये त्यजंति कलेवरं ॥ ९९ ॥
तपो वा मरणं वापि शस्तं स्वपरसौख्यकृत् । तच्च द्वीपायनस्यैव स्वपरासुखकारणं ॥ १०० ॥
परस्यापकृतिं कुर्वन् कुर्यादेकत्र जन्मनि । पापी परवधं स्वस्य जंतुर्जन्मनि जन्मनि ॥१०१॥
कषायवशगः प्राणी हंता स्वस्य भवे भवे । संसारवर्धनोऽन्येषां भवेद्वा वधको न वा ॥ १०२ ॥
परं हन्मीति संध्यातं लोहपिंडमुपाददत् । दहत्यात्मानमेवादौ कषायवशगस्तथा ॥ १०३ ॥

संसारांतकरं पुंसामेकेषां परमं तपः । द्वीपायनस्य तज्जातं दीर्घसंसारकारणं ॥ १०४ ॥
जंतोः को वापराधोऽत्र स्वकर्मवशवर्तिनः । यत्नत्रानपि यज्जंतुर्मोह्यते मोहवैरिणा ॥ १०५ ॥
अपि क्रियेतापि परः कथंचिदतितिक्षणः । उपक्रियेत यद्यात्मा तथेहपरलोकयोः ॥ १०६ ॥
परदुःखविधानेन यत्स्वदुःखपरंपरा । अवश्यंभाविनी तस्मात्तितिक्षैवातिभाष्यतां ॥१०७॥
क्रोधाग्निना विधेर्वशेन नगरी द्वीपायनेनाखिला बालस्त्रीपशुवृद्धलोककलिता द्वाराकुला द्वारिका ।
मासैः षड्भिरशेषिता विलसिता संत्यज्य जैनं वचो धिक्क्रोधं स्वपरापकारकरणं संसारसंवर्धनं१०८
इत्यारिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ द्वारावती विनाशवर्णनो नामैकषष्टितमः सर्गः ।

द्विषष्टितमः सर्गः ।

पुण्योदयात्पुरा प्राप्तामुन्नतिं योजनातिगां । चक्रादिरत्नसंपन्नौ बलिनौ बलकेशवौ ॥ १ ॥
पुण्यक्षयात्तु तावेव रत्नबंधुविवर्जितौ । प्राणमात्रपरीवारौ शोकभारवशीकृतौ ॥ २ ॥
प्रस्थितौ दक्षिणामाशां जीविताशावलंबिनौ । क्षुत्पिपासापरिश्रांतौ यातौ यत्कांक्षिणौ पथि ॥३॥
उद्दिश्य पांडवान् यातौ मथुरां दक्षिणामुभौ । हस्तवप्रं पुरं प्राप्तौ तत्रोद्याने हरिः स्थितः ॥४॥

गतोऽन्नपानमानेतुं कृतसंकेतकोग्रजः । वस्त्रसंवृतसर्वांगः प्रविष्टश्च ततः पुरं ॥ ५ ॥
अच्छदंतो नृपस्तत्र धार्तराष्ट्रोऽवतिष्ठते । पृथिव्यां प्रथितो धन्वी यदुरंध्रदुरंतधीः ॥ ६ ॥
जनैर्जनितसंघट्टैः रूपपाशवशीकृतैः । प्रविश्य तत्पुरीं वीरो दृश्यमानः सविस्मयैः ॥ ७ ॥
कंठकं कुंडलं चापि दत्वा कस्य चिदापणे । अन्नपानमुपादाय निर्गच्छन् वीक्ष्य रक्षकैः ॥ ८ ॥
विज्ञाय बलदेवोयमिति राज्ञे निवेदितः । ततस्तेन वधायास्य प्रेषितं सकलं बलं ॥ ९ ॥
संघट्टोभूत्पुरद्वारे सैन्यस्य बलरोधिनः । बलेन संज्ञया हूतः कृष्णश्च द्रुतमागतः ॥ १० ॥
अन्नं पानं च सुस्थाप्य गजस्तंभं बलोऽग्रहीत् । कृष्णस्तु परिघं घोरं किंचित्कुपितमानसः॥११॥
चतुरंगं ततः सैन्यं सनायकमितस्ततः । हन्यमानं ननाशाभ्यां विह्वलीभूतमानसं ॥ १२ ॥
समादायान्नपानं तौ निर्गत्य नगरात्ततः । वनं विजयमागत्य सरो रम्यमपश्यतां ॥ १३ ॥
स्नात्वा सरसि तौ तत्र जिनं नत्वा मनःस्थितं । चित्रमभ्यवहृत्यान्नं पयः पीत्वातिशीतलं ॥१४॥
विश्रम्य च क्षणं वीरौ प्रयातौ दक्षिणां दिशं । कौशांब्याख्यं वनं भीमं प्रविष्टौ परदुर्गमं ॥१५॥
खगरावखरारावमुखरीकृतदिग्मुखं । तृष्णार्तमृगयूथानां गम्यं प्रोन्मृगतृष्णकं ॥ १६ ॥

१ 'स तत्पुरं' इति ख पुस्तके ।

ग्रीष्मोग्रतापपरुषवहन्मारुतदुस्सहं । दावदग्धलताजालगुल्मपादपखंडकं ॥ १७ ॥
असंभाव्यांभसि भ्राम्यत्-श्वापदश्वासशब्दके । वने वनेचरोद्भिन्नकुंभिकुंभास्तमौक्तिके ॥१८॥
आरोहति वियन्मध्यं सुतीव्रे तीव्ररोचिषि । जगौ जनार्दनो ज्येष्ठं गुणज्येष्ठमिति श्रमी ॥१९॥
पिपासाकुलितोत्यर्थमार्य शुष्कौष्ठतालुकः । शक्नोमि पदमप्येकं न च यातुमतः परं ॥ २० ॥
तत्पायय पयः शीतमार्य तृष्णापहारि मां । सद्दर्शनमिवानादौ संसारे सारवर्जिते ॥ २१ ॥
इत्युक्ते स्नेहसंचारसमार्द्रीकृतमानसं । स जगाद बलः कृष्णमुष्णनिश्वासमोचिनं ॥ २२ ॥
ततः शीतलमानीय पानीयं पाययाम्यहं । त्वं जिनस्मरणांभोभिस्तावत्तृष्णां विमर्दय ॥२३॥
निरस्यति पयस्तृष्णां स्तोकां वेलामिदं पुनः । जिनस्मरणपानीयं पीतं तां मूलतोऽस्यति ॥२४॥
छायायामस्य वृक्षस्य शीतलायामिहास्यतां । आनयामि जलं तेऽहं शीतलं शीतलाशयात्॥२५॥
अग्रजः प्रतिपाद्यैव मनुजं मनसा वहन् । जगाम जलमानेतुं निजं श्रममचिंतयन् ॥ २६ ॥
कृष्णोऽपि च यथोद्दिष्टां तरुच्छायां घनां श्रितः । क्षितौ मृदु मृदि श्लक्ष्णवाससा संभृतांगकः॥२७॥
वामे जानुनि विन्यस्य दक्षिणं चरणं क्षणं । श्रमव्यपोहनायासा वसेत गहने हरिः ॥ २८ ॥
तं प्रदेशं तदेवासौ जरासूनुर्यदृच्छया । एकाकी पर्यटन्प्राप्तो मृगयाव्यसनप्रियः ॥ २९ ॥

यो हरिस्नेहसंभारो हरिप्राणरिरिक्षया। द्वारिकाया विनिर्गत्य प्राविशन्मृगवद्वनं ॥ ३० ॥
स तत्र विधिनानीय तदानीं विनियोजितः। अद्राक्षीद्दूरतोऽस्पष्टं किंचिदग्रे धनुर्धरः ॥ ३१ ॥
मरुच्चलितवस्त्रांतजनितभ्रांतिरंतिके। प्रसुप्तमृगकर्णोऽयं चलतीति विचिंत्य सः ॥ ३२ ॥
गुल्मगूढवपुर्गाढमाकर्णाकृष्टकार्मुकः। विव्याध व्याधधीस्तीक्ष्णशरेण चरणं हरेः ॥ ३३ ॥
विद्धतालपदः शौरिरुत्थाय सहसाखिलाः। दिशो निरीक्ष्य सो दृष्ट्वा परमुच्चैर्जगाविति ॥ ३४ ॥
विद्धपादतलोऽहं भो केनाकारणवैरिणा। कथ्यतां कुलमात्मीयं नाम च स्फुटमत्र मे ॥ ३५ ॥
अज्ञातकुलनामानं नरं नावधिषं रणे। कदाचिदपि योऽहं ही किं ममेदमुपागतं ॥ ३६ ॥
तद् ब्रवीतु भवान् को भो यज्ज्ञातकुलनामकः। अज्ञातवैरसंबंधो वने जातो मर्मांतकः ॥ ३७ ॥
इत्युक्ते सोऽब्रवीदस्ति हरिवंशोद्भवो नृपः। वसुदेव इति ख्यातः पिता यो हलिचक्रिणोः ॥ ३८ ॥
सूनुर्जरत्कुमारोऽस्मि तस्याहमतिवल्लभः। एकवीरो भ्रमाम्यत्र वने भीरुदुरासदे ॥ ३९ ॥
सोऽहं नेमिजिनादेशभीरुर्वनचरैर्वने। द्वादशाब्दप्रमाणं च वसाम्यत्र प्रियानुजः ॥ ४० ॥
इयंतं वसता कालमरण्ये वचनं मया। आर्यलोकस्य कस्यापि न श्रुतं को भवानिह ॥ ४१ ॥
इति श्रुत्वा हरिर्ज्ञात्वा भ्रातरं स्नेहकातरः। एह्येहि भ्रातरत्रेति संभ्रमेण तमाह्वयत् ॥ ४२ ॥

सोऽपि ज्ञात्वानुजं प्राप्तो हाकारमुखराननः । क्षितिक्षिप्तधनुर्बाणो निपत्यास्थाच्च पादयोः॥४३॥
उत्थाप्य तं हरिः प्राह कंठलग्नमहाशुच । मातिशोकं कृथा ज्येष्ठ दुर्लंघ्या भवितव्यता ॥ ४४ ॥
प्रमादस्य निरासाय निरस्तसुखसंपदा । चिरं पुरुषशार्दूल सेविता वनवासिता ॥ ४५ ॥
करोति सज्जनो यत्नं दुर्यशःपापभीरुकः । दैवे तु कुटिले तस्य स यत्नः किं करिष्यति ॥४६॥
ततस्तेन हरिः पृष्टो वनागमनकारणं । आदितोऽकथयद्वृत्तं द्वारिकादाहदारुणं ॥ ४७ ॥
श्रुत्वा गोत्रक्षयः सोऽपि प्रलापमुखरोऽवदत् । हा भ्रातः कृतमातिथ्यं मया ते चिरदर्शनात्॥४८॥
किं करोमि क गच्छामि क लभे चित्तनिर्वृतिं । दुःखं च दुर्यशो लोके हंत्रा ते हा मयार्जितं ॥४९॥
इत्यादि प्रलपन्नुक्तः कृष्णेनासौ सुचेतसा । प्रलापं त्यज राजेंद्र कृत्स्नं स्वकृतभुग् जगत् ॥५०॥
सुखं वा यदि वा दुःखं दत्ते कः कस्य संसृतौ । मित्रं वा यदि वामित्रः स्वकृतं कर्म तत्त्वतः॥५१॥
तोयार्थं मे गतो रामो यावन्नायाति सत्वरं । प्रयाहि तावदक्षांतिः कदाचित्स्यात्त्वयि प्रभौ ॥५२॥
गच्छ त्वमादितो वार्तां पांडवेभ्यो निवेदय । हितास्तेऽस्मत्कुलस्याप्ताः करिष्यंति तव स्थितिं॥५३॥
उक्त्वेति कौस्तुभं तस्मै दत्त्वाभिज्ञानमादरात् । परावृत्त्यांतरं स्तोकं व्रजेति प्रतिपादितः ॥५४॥
उक्त्वासौ क्षम्यतां देव ममेति करकौस्तुभः । शनैरुद्धृत्य तं वाणं परावृत्तपदोऽगमत् ॥ ५५ ॥

तस्मिन्गते हरिस्तीव्रव्रणवेदनमार्दितः। उत्तराभिमुखो भूत्वा कृतपंचनमस्कृतिः॥ ५६॥
कृत्वा नेमि-जिनेंद्राय वर्तमानाय सांजलिः। पुनः पुनर्नमस्कारं गुणस्मरणपूर्वकं॥ ५७॥
जिनेंद्रविनतिध्वंस्तसमस्तोपद्रवा यतः। ततः कृतशिराः शौरिः क्षितिशय्यामाधिश्रितः॥५८॥
वस्त्रसंवृतसर्वांगः सर्वसंगनिवृत्तधीः। सर्वत्र मित्रभावस्थः शुभचिंतामुपागतः॥ ५९॥
पुत्रपौत्रकलत्राणि ते भ्रातृगुरुबांधवाः। अनागतविधातारो धन्या ये तपसि स्थिताः॥ ६०॥
अंतःपुरसहस्राणि सहस्राणि सुहृद्गणाः। अभिधाय तपः कष्टं कष्टं वन्हिमुखे मृताः॥ ६१॥
कर्मगौरवदोषेण मयापि न कृतं तपः। सम्यक्त्वं मेऽस्तु संसारपातहस्तावलंबनं॥६२॥
इत्यादिशुभचिंतात्मा भविष्यत्तीर्थकृद्धरिः। बद्धायुष्कतया मृत्वा तृतीयां पृथिवीमितः॥६३॥
दक्षो दक्षिणभारतार्धविभुतामुद्भाव्य भव्यप्रजा बंधुर्बंधुजनांबुधेरहरहर्वृद्धिं विहाय प्रभुः।
पूर्णां वर्षसहस्रमेकमगमत्संजीव्य कृष्णो गतिं भोगी स्वाचरणोचितां जनतया यो योक्ष्यते दर्शनात्॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ हरिगत्यंतरवर्णनो नाम द्वाषष्टितमः सर्गः।

त्रिषष्टितमः सर्गः ।

स्नेहवानथ जलार्थमाकुलो विष्णुमात्मनि वहन् हलायुधः ।
वारितोऽपि शकुनैः पदे पदे दूरमंतरमितो वनांतरे ॥ १ ॥
धावतोऽस्य मृगयूथवर्त्मना लोभितस्य मृगतृष्णिकांभसा ।
प्रत्यभासत दिशां कदंबकं प्रोत्तरंगसरसीमयं तदा ॥ २ ॥
अभ्यलोकि कलिता कलस्वनैश्चक्रवाककलहंससारसैः ।
सीरिणाथ सरसी तरंगिणी भृंगनादितसरोजसकुला ॥ ३ ॥
चेतसास्य सहसा तदीक्षणाद्दीर्घमुच्छ्वसितमंगसंगिना ।
मारुतेन शिशिरेण सौहृदं सन्मुखेन गदितं सुगंधिना ॥ ४ ॥
संपतद्भिरभितः पिपासुभिः श्वापदैः सभयमीक्षितस्ततः ।
आससाद सरसीं स सादरो वन्यहस्तिमदवारिवासितां ॥ ५ ॥
वारितीर्थमवगाह्य शीतलं संप्रपाय निरपास्य तृड्व्यथा ।
पद्मपत्रपुटिकां स वारिणा संप्रपूर्य परिवृत्य वाससा ॥ ६ ॥

आदधाव पदधूतधूलिभिर्धूसरीकृतशरीरमूर्धजः ।
कंपमानहृदयः सशंकया प्रत्यपायबहुले वने हरौ ॥७॥
दूरतस्तमथ तत्र दृष्टवान् संवृतांगमभितोऽम्बरेण सः ।
आस्त एव भुवि यत्र शायितः सूरिसौरिरिति दीर्घनिद्रया ॥८॥
सुप्त एव सुखनिद्रया हरिः सुप्रबोधमुपगच्छतु स्वयं ।
इत्यपेक्ष्य हरिबोधनं तदा तत्प्रबोधनमसौ प्रतीक्ष्यते ॥९॥
वीर ! किं स्वपिषि दीर्घमित्यलं स्वापमुज्झ पिब तोयमिच्छया ।
इत्युदीर्णमधुरस्वरः पुनः सन्निरुध्य वचनोऽवतिष्ठते ॥१०॥
सीरिणा क्षतजगंधतस्ततः कृष्णसंवरणवाससोंतरे ।
संप्रवेशनिजनिर्गमाकुलाः प्रैक्षि तीक्ष्णमुखकृष्णमक्षिकाः॥११॥
संघटोद्घटिततन्मुखो हरिं वीक्ष्य वांतजनकांतजीवितं ।
हा हतोऽस्मि मृत एव तृष्णया विष्णुरित्युपारि तस्य सोऽपतत् ॥१२॥
मोहमूढमनसोऽस्य मूर्छया प्राप्तयोपकृतमप्यनिष्टया ।

स्नेहपाशदृढबंधनो हली प्राणहानमकरिष्यदन्यथा ॥१३॥
बोधमाप्य परितः परामृशन् केशवस्य वपुरात्मपाणिना ।
पश्यतिस्म चरणव्रणव्रजं तीव्रगंधरुधिरारुणक्षमं ॥१४॥
सुप्त एव विषमेषुणा हरिः विद्धः एव चरणेन केनचित् ।
दुष्प्रबोधहरिमारकोऽत्र कोऽपूर्वमद्य मृगयाफलं श्रितः ॥१५॥
इत्युदीर्य कुपितो हली बली सिंहनादमकरोद्भयंकरं ।
व्यापिनं विपिनदुर्गसंचरद्व्याघ्रसिंहकरिदर्पशातनं ॥१६॥
संजगौ च शयितो ममानुजः छद्मना विधिविधानयोगतः ।
येन केनचिदहेतुवैरिणा संददातु लघु सोऽद्य दर्शनं ॥१७॥
सुप्तमात्रमपशस्त्रमानतं मुक्तमानमसकृत्पलायिनं ।
प्रत्यवाययुतमंगनां शिशुं घ्नंति शत्रुमपि नो यशोधनाः ॥१८॥
उच्चकैरिति गदन् समंततः संप्रधाय किमदप्यवांतरं ।
सोऽन्यदीय पदवीमनाप्नुवन्नेत्य कृष्णमुपगृह्य रोदिति ॥१९॥

हा जगत्सुभग ! हा जगत्पते ! हा जनाश्रयण ! हा जनार्दन !
हाऽपहाय गतवानसि क मां हानुजेहि लघु हेति चारुदत् ॥२०॥
हारिवारिपरितापहारितं पाययत्यपि विचेतनं मुहुः।
क्राम्यतीषदपि तन्न तद्गले दूरभव्यमनसीव दर्शनं ॥२१॥
मार्ष्टि मार्दवगुणेन पाणिना सन्मुखं मुखमुदीक्ष्यते मुदा।
लेढि जिघ्रति विमूढधीर्वचः श्रोतुमिच्छति धिगात्ममूढतां ॥२२॥
द्यौरिवोरुविभवाग्निभस्मिता द्वारकेति किमिवासि तृप्तवान्।
अक्षयैर्बहुविधाकरैश्रिता प्रागिवास्ति ननु भारतावनिः ॥ २३ ॥
भोजराजकुलयादवक्षये भ्रष्टबंधुरिति किं विमुह्यसि।
सत्यसंध मयि ते मम त्वयि प्राणितीह सकलास्ति बंधुता ॥ २४ ॥
पूर्वजन्मसु बहुष्वनारतं पश्यतो हि तव मामिहापि च।
एकताननयनस्य नोदभूत्तृप्तिरद्य किमिवासि तृप्तवान् ॥ २५ ॥
त्वां पयोर्थमपहाय मोहतो हा मतेन नररत्नभूषणं।

लोकसारमपहारितं मया सन्निधौ तु मम कोऽस्य हारकः ॥ २६ ॥
कंसकोपमदपर्वताशने भूनभोगविषधृग्गरुत्मनः ।
पीतमागधयशोऽम्बुधेरभूद्गोष्पदे वत निमज्जनं तव ॥ २७ ॥
शार्वरं तिमिरमुग्रतेजसा शात्रवं त्वमिव निर्विधूय यः ।
विष्टपं तपति विष्टरश्रवः पश्य सोऽस्तमुपयात्यहर्पतिः ॥ २८ ॥
दीर्घनिद्रमिव वीक्ष्य संहृतैरस्तमस्तकनिवेशितैः करैः ।
त्वां विशोचति रविर्भुवां त्रये स्वाप एष तव कस्य नो शुचे ॥ २९ ॥
वारुणीमतिनिषेव्य वारुणश्चक्रवाकनिवहैरुदश्रुभिः ।
शोचितः पतति भानुमानधः को न वा पतति वारुणीप्रियः ॥ ३० ॥
शोकभारमपनीय सांप्रतं सन्निमज्जति पयोनिधौ रविः ।
दातुमेष तव वा जलांजलिं कालविद्धि कुरुते यथोचितं ॥ ३१ ॥
सांध्यरागपटलेन सर्वतः पश्य संस्थगितमंग विष्टपं ।
त्वय्यति–स्वपिति रोदनोद्गतैराश्रिरामनिवहैरिहांगिनां ॥ ३२ ॥

देवभक्त भज सांध्यवंदनां वंध्यया किमपि देव ! निद्रया ।
संध्ययापि गलितं गलद्रुचा वेगवद्रविरथानुबंध्यया ॥ ३३ ॥
एकवर्णमखिलं जगत्खला कुर्वती समवसर्पति द्रुतं ।
ध्वांतसंततिरपेतदर्शना कालवृत्तिरतिदुःषमा यथा ॥ ३४ ॥
श्वापदानि पदशब्दगंधतो घ्राणकर्णबलतोंऽति विंदते ।
एहि दुर्गमिह संश्रयावहे क्षेमतो व्रजति तत्र नौ निशा ॥ ३५ ॥
चित्रिते कुसुमचित्रमंडपे दत्तबंधुनृपलोकदर्शनः ।
श्रीयुषि स्वपिषि यो वधूजनैः सोपधानशयने महामृदौ ॥ ३६ ॥
त्वं महीध्रवनरंध्रवृत्तिभिर्गृद्धकाककुलजंबुकादिभिः ।
सोद्यभक्षकगणैरुपासितः श्रीपते स्वपिति तक्षितक्षितौ ॥ ३७ ॥
कामिनीप्रणयकेलिकोपिनीस्त्वं प्रसाद्य कुपितः प्रसादितः ।
यः पुरा नयति यामिनीं रतैः सोद्य किं विगतचेतनात्मना ॥ ३८ ॥
चारुवारवनितासुगीतकैर्वंदिवृंदपटुपाठनिस्वनैः ।

यः प्रबोधमुषसि प्रपद्यसे सोद्य वीर ! विरसैः शिवारुतैः ॥३९॥
त्वत्प्रवृत्तिमिव वेदितुं परः पूर्वमित्रपतिसुप्रयुक्तया ।
संध्ययाप्युषसि सानुरागया रज्यते शयनतो विरज्यतां ॥४०॥
अभ्युदेति करभिन्नपंकजश्रीसमग्रमुदयाचलादयं ।
द्राक् मधानपुरुषायतेऽधुना दातुमर्घमिव घर्मदीधितिः ॥४१॥
चाटुकारशतमत्र सीरिणा प्राणवल्लभतया कृतं हरौ ।
निष्फलं सफलमप्यभूत्पुरा गाढसुप्त इव मुग्धबालके ॥४२॥
तं प्रधृत्य भुजपंजरोदरे स्पर्शनेंद्रियसुखं भजन् शिशोः ।
जन्मनीव वनमध्यमाट स छत्रधारपुरकंसशंकया ॥४३॥
इत्यनेकदिनरात्रियापनैः सोत्यतंद्रितमनोवचोवपुः ।
प्रत्यहं हरिवपुर्वहन् भ्रमन् प्रत्यपद्यत रतिं न कानने ॥४४॥
तीव्रघर्मसमयत्यये ततः प्रावृषा शमितधर्मसंपदा ।
गर्जदंबुदघटांबुवर्षणैः प्रापितं जगदितस्ततः शिवं ॥४५॥

वासुदेववचनाज्जरासुतः शावरं विषमवेषमुद्वहन् ।
दाक्षिणां मथुरलोकसंकुलां प्राप्य पांडवपुरीमखंडितः ॥४६॥
सोऽवगाह्य हरिदूतकार्यकृत् प्रश्रयेण विहितोचितस्थितिः ।
सन्निषण्णमुदपृच्छयतोशितुः क्षेममित्यथ युधिष्ठिरादिभिः ॥४७॥
मन्युरुद्धगलगद्गदस्वरः सन्निवेद्य स जरात्मको जगौ ।
द्वारिकास्वजनदाहपूर्वकं स्वप्रमादवशतो मृतिं हरेः ॥४८॥
प्रत्ययाय हरिदत्तकौस्तुभं प्रस्फुरत्किरणजालकं पुरः ।
संप्रदर्श्य पुरुदुःखपूरितः पूत्कृतिं व्यतनुतातनुस्वनः ॥४९॥
तत्क्षणेलमुदतिष्ठदाकुलः कुंन्यधिष्ठितकलत्रकंठजः ।
पांडुपुत्रभवनेऽखिले रुदत्याकुलस्य जलधेरिव ध्वनिः ॥५०॥
हा प्रधानपुरुषैकधीर हा हा जगद्व्यसननोदनोद्यत ।
हा त्वयीह विधिना किमीहितं हा वतेति रुदितं चिरं त्वभूत् ॥५१॥
संहृतातिबहुरोदनैस्ततः पांडवादिबहुबांधवैर्जगत् ।

वृत्तवेदिभिरदायि विष्णवे संस्थितस्वजनतृप्तये जलं ॥५२॥
जारसेयमपनीय पूर्वदुर्वेषमीषदवधीरिताधिकं ।
अग्रतस्तमभिकृत्य पांडवा जग्मुरार्तहलभृद्दिदृक्षया ॥५३॥
ते कियद्भिरपि वासरैर्द्रुतं द्रौपदीप्रभृतिभामिनीजनैः ।
मातृपुत्रसहिताः ससाधनाः प्राप्य तं ददृशुरादृता वने
व्यर्थिकाः शवशरीरगोचरोद्वर्तनस्तपनमंडनक्रियाः ।
वर्तयंतमुपगृह्य तं चिरं बांधवा रुरुदुरुच्चकैःस्वनाः ॥५५॥
कुंत्यधीनतनया विनम्य तं बोधयंति हरिसंस्क्रियां प्रति ।
कोपनः स न ददाति याचितस्तं तदा विषफलं शिशुर्यथा ॥५६॥
सज्यतां सुलघु मज्जनक्रियां पांडवास्तदनुपानभोजनं ।
भोक्तमिच्छति पिपासितः प्रभुः क्षिप्रमित्यभिहिते तथाकृते ॥५७॥
मज्जयत्यभिनिवेश्य विष्टरे भोजयत्यपि स पाययत्यपः ।
व्यर्थतामपि तदास्य पांडवा मेनिरेऽनुचरणाः कृतार्थतां ॥५८॥

निन्युरित्थमनुवृत्तितस्तु ते तत्र मेघसमयं बलानुगाः ।
मोहमेघपटलं बलस्य वा भेत्तुमाविरभवत्तदा शरत् ॥५९॥
सप्तपर्णसुरभेः सदा तदा वैष्णवस्य वपुषो वपुष्मतः ।
दूरदेशमगमद्विगंधता गंधयोर्हि न तयोः सहस्थितिः ॥६०॥
आययावथ कृतव्यवस्थितिर्भ्रातृपूर्वनिजसारथिः सुरः ।
सोयमाभिमुखकाललब्धितः बोधनाय बलदेवसान्निधिं ॥६१॥
भूभृतोऽतिविषमं तटं रथः संव्यतीत्य दलितः समे पथि ।
संधिमस्य दधता पुरः पुनर्दर्शितः सपदि तेन सीरिणे ॥६२॥
सीरिणा स गदितस्तटे गिरेः स्यंदनस्तव नु भज्यते स्मयः ।
मार्गशीर्णपतितस्य तस्य भो जन्मनीह पुनरुद्गतिः कुतः ॥६३॥
प्रत्युवाच विबुधो हरेर्महाभारतांभरणपारदर्शिनः ।
जारसेयकरकांडकांडकापातमात्रपतितस्य सा कुतः ॥६४॥
इत्युदीर्य मृदुपद्मिनी पुना रोपयत्यसलिले शिलातले ।

पर्यपृच्छत्कुतः शिलातले पद्मिनीप्रभव इत्यनेन सः ॥६५॥
सोंतरे रुत हली सुधाशिना सिंचता सुचिरशुष्कपादपं ।
गोकुले वरतृणांबुदायिना कृच्छ्रतः प्रतिविबोधितस्तदा ॥६६॥
सत्यमेव विगतासुभिर्हरिर्यद् ब्रवीषि मम मानुषे दृशी ।
सत्यमेतदिह नान्यथेति सन् भव्य ! भव्यमर्थमगदीर्यथास्थितिं ॥६७॥
सर्वमत्र जिनभाषितं पुरा जानतापि भवता भवस्थितिं ।
मासषट्कमतिवाहितं वृथा केशवस्य वहता कलेवरं ॥६८॥
कोऽत्र कस्य बहिरंगर्हिसकः स्वांतरंगशुभकर्मरक्षकं ।
आयुकर्मनिजत्राणकारणं तत्क्षये भवति सर्वथा क्षयः ॥६९॥
संपदत्र करिकर्णचंचला संगमाः प्रियवियोगदुःखदाः ।
जीवितं मरणदुःखनीरसं मोक्षमक्षयमतोऽर्जयेद्बुधः ॥७०॥
पूर्वरूपधरवंशदेवतो लब्धबोधिरितिवीतमोहकः ।

१ ' संपदोऽत्र ' इति ख पुस्तके ।

निर्बभौ हलधरस्तदाधिकं धूतमेघपटलः शशी यथा ॥७१॥
पांडवैः सह जरासुतान्वितैस्तुंग्यभिख्यगिरिमस्तके ततः ।
संविधाय हरिदेहसंस्क्रियां जारसेयसुवितीर्णराज्यकः ॥७२॥
शृंगमेवमचलस्य तस्य तैः संगतैः सवितर्तं ततः श्रितः ।
संगहानकृतनिश्चयो बलो भंगुरं समधिगम्य जीवितं ॥७३॥
पल्लवस्थजिननाथशिष्यतां संसृतोस्म्यहमिह स्थितोऽपि सन् ।
इत्युदीर्य जगृहे मुनिस्थितिं पंचमुष्टिभिरपास्य मूर्धजान् ॥७४॥
पारणासु पुरसंप्रवेशने वैपरीत्यमवगम्य योषितां ।
सन्नियोगभृदतोरणव्रती संतुतोष वनभैक्ष्यवर्तनैः ॥७५॥
पांडवास्तु बहुराजकन्यकाः संप्रदाय हरिवंशभूभुजे ।
प्रेक्षसूर्यपुरसंद्रिकं निजं आत्मजान्यसुनिधाय शासने ॥७६॥
त्यक्तरागमपि पांडुनंदना संविभज्य निजसंपदा मुदा[1] ।

---

[1] 'इमे द्वे पंक्ती' ख पुस्तके न स्तः ।

पुत्रयोजितनिजश्रियोऽगमन् पल्लवाख्यविषयं जिनं प्रति ॥७७॥
द्रौपदीप्रभृतयस्तदंगनाः संयमं प्रति निविष्टबुद्धयः ।
पांडवाननुगता विमोहिता संसृतौ विगतरूक्षधीयुषा ॥७८॥
द्वादशात्मभिदयासतामनुप्रेक्षयानुमतया हलायुधः ।
व्यावृतोऽभवदखंडितस्थितिः सत्रिदंडदृढखंडनोन्मुखः ॥७९॥
तन्निमित्तमिति यत्र मूर्छना स्थानदेहधनसौख्यबंधुषु ।
तत्र किंचिदपि नास्ति नित्यता आत्मनोऽन्यदिति चिंतयत्यसौ ॥८०॥
मृत्युदुःखपरिपीडितस्य मे व्याघ्रवक्त्रमृगशावकस्य वा ।
बांधवा न शरणं धनादि वा धर्मतोऽन्यदिति चिंतनामितः ॥८१॥
नैकयोनिकुलकोटिकूटसंसारचक्रमिह यांति जंतवः ।
प्रेरिताः कटुककर्मयंत्रकैः स्वामिभृत्यपितृपुत्रपूर्वतां ॥८२॥
एक एव भवभृत्प्रजायते मृत्युमेति पुनरेक एव तु ।

१ 'पांडवाननुगता जनन्यपि स्निग्धता विगतरूक्षधीस्तु या' इति ख पुस्तके ।

धर्ममेकमपहाय नापरः सत्सहाय इति चैकतास्मृतिः ।।८३।।
नित्यता मम तनोरनित्यता चेतनोऽहमपचेतना तनुः ।
अन्यता मम शरीरतोऽपि यत्तत्किमंग ! पुनरन्यवस्तुनः ।।८४।।
शुक्रशोणितकुबीजजन्मके सप्तधातुमयके त्रिदोषके ।
कः शुचं तदनुगाशुचौ शुची रज्यते स्वपरयोः शरीरके ।।८५।।
कायवाङ्मनसयोगभेदवानास्रवो भवति पुण्यपापयोः ।
कर्मबंधदृढशृंखलाश्चिरं संसरत्यसुभृदुग्रसंसृतौ ।।८६।।
स्याद्द्विधास्रवनिरोधलक्षणः संवरः समितिगुप्तिपूर्वकैः ।
संवरे सति सनिर्जरेऽसुभृत्सिध्यति स्वकृतकर्मसंक्षयात् ।।८७।।
दुर्गतिष्वकुशलानुबंधिनी संयमाश्च कुशलानुबंधिनी ।
निर्जरा निरनुबंधिनी च सा चिंतिता परमयोगिनी शुभा ।।८८।।
लोकसंस्थितिरनाद्यनंतिका लोकगर्भबहुमध्यभागभाक् ।
अत्र ही षडसुकायसंहतिर्दुःखिनीति खलु लोकचिंतना ।।८९।।

स्थावरे त्रसकुलेऽखिलेंद्रियैः पूर्णतादिषु सुधर्मलक्षणा।
बोधिलब्धिरतिदुर्लभा भवेत्सत्समाधिमरणाप्तिसत्फला ॥९०॥
धर्म एष जिनभाषितः शिवप्राप्तिहेतुरवधादिलक्षणः।
त्यागतोऽस्य भवदुःखितेत्यनुप्रेक्षिकांत्यशुभचिंत्यनात्मकाः ॥९१॥
इत्यनुश्रुतमनूनधीरनुप्रेक्षिकार्थमनुभावयन् मुहुः।
भ्रातृमोहमजयज्जयन्मुनिः सद्विविंशतिपरीषहद्विषः ॥९२॥
बह्वभिग्रहपरिग्रहोज्वलज्जाठराग्निजठरोपरोधतः।
मोक्षसाधनतयार्धमुग्ध्यधात्क्षुत्परीषहजयं महामुनिः ॥९३॥
देहनिर्यदवयवाटवीप्लुषा[१] दावमूर्तिनिभया पिपासया।
निष्प्रतिक्रियधृतिर्न बध्यते क्षांतिनीरदघटाभिषिक्तया ॥९४॥
स्थंडिले निशि दिवा च योगिना तीव्रवातहिमवृष्टचनेहसि।
वातवर्षविषमे तरोरधोऽयोधि शीतपरुषः परीषहः ॥ ९५ ॥

---

१ 'गिर्यवयवाटवी' इति ख पुस्तके।

पर्वताग्रशिखरस्थितोऽजयद्ग्रैष्ममुष्णमभितः परीषहं ।
दावधूमवलयातपत्रसंछायमेव विनिवारितातपः ॥ ९६ ॥
गूढवृत्तिभिरनश्रिजंतुभिर्गाढपीतरुधिरोऽप्यकंपितः ।
सोढवान् दृढमसौ परीषहं प्रौढदंशमशकोपलक्षितं ॥ ९७ ॥
सोंगलग्नमनपायमप्यविश्वास्यमेकदिनदुःखपालनं ।
सत्कलत्रमिव सत्रपं न्यधान्नाग्न्यमात्मवशगं परीषहं ॥ ९८ ॥
ध्यानयोग्यगिरिमार्गदुर्गभृदेक एव हि विहृत्य निग्रहे ।
धर्मसाधनरतिर्यथा रिपोर्व्यावृतो रतिपरीषहस्य सः ॥ ९९ ॥
भ्रूलताकुटिलचापयोजितस्त्रीकटाक्षशरवर्षिणं वृथा ।
कुर्वता मदनयोधमूर्जितस्त्रीपरीषहजयः कृतोऽमुना ॥ १०० ॥
तीर्थभूमिविहृतिः ससंयमावश्यकेष्वपरिहाणितो व्रजन् ।
वाहनाद्यनभिसंध्य चर्यया खिद्यतेस्म न परीषहाख्यया ॥ १०१ ॥
प्रासुकास्वथ विविक्तभूमिषु ध्यानधौतधिषणो विभूतधीः ।

क्षेत्रकालनियतासनेष्वसौ बाध्यतेस्म न निषद्ययाऽनिशं ॥ १०२ ॥
ध्यानतोध्ययनतो मुनिः क्रमादल्पकालनियताल्पनिद्रया ।
एकपार्श्वकृतभूमिशय्यया नावृतोऽपि निशि न प्रपीडितः ॥ १०३ ॥
दुर्जनैर्निशितदुर्वचोऽस्त्रकैराहतोऽपि हृदयेऽतिदुस्सहैः ।
क्रोशबाधसहनः क्षमावृतः स्यामिति स्मृतिमदत्त धीरधीः ॥ १०४ ॥
अस्त्रशस्त्रनिवहैर्वपुर्वधः प्राप्यते यदि नु मे तथाप्यलं
सह्यते वधपरीषहो मयेत्येष बुद्धिमदधादनागतं ॥ १०५ ॥
बाह्यमांतरमसौ तपश्चरन्नस्थिशेषवपुषः स्थितिं प्रति ।
व्यापृतोऽपि समयव्यवस्थया याचनाख्यमजयत्परीषहं ॥ १०६ ॥
मौनिना निजशरीरदर्शिना संहितेन हितचंडचर्यया ।
लब्ध्यलब्धिसुधियामुना जितोऽलाभनामविदितः परीषहः ॥ १०७ ॥
रूक्षशीतलविरुद्धभुक्तिजां वातपित्तकफकोपजां रुजं ।
सोऽप्रतिक्रियतयाऽवधीरयन् रोगसंज्ञमजयत्परीषहं ॥ १०८ ॥

लाक्षलेशतृणशर्करादिभिः कर्कशैः स शयनासनादिषु ।
पीडितोऽप्यविकृतांतरस्तृणस्पर्शरूढिमरणत्परीषहं ॥ १०९ ॥
अस्पृशन् करनखैस्तनुं मुनिः शोभते स्म धवलो मलावृतः ।
शैलतुंगशिखराश्रितो यथा कालमेघपटलावृतः शशी ॥ ११० ॥
नादरे परकृते कृतादरोऽनादरे च न मनोविकारवान् ।
शुद्धधीर्विषहतेस्म तत्पुरस्काररूढमपरं परीषहं ॥ १११ ॥
वादित्वाग्मिगमको महाकविः सांप्रतं सकलशास्त्रविद्भुवि ।
नास्मदन्य इति हि स्मयो मनाक् प्रज्ञया न परिषह्य दूषितः ॥११२॥
अज्ञ एष न पशुर्न मानुषो वीक्ष्यते न हि न भाषते मृषा ।
मौनमित्यबुधवाच्यवज्ञयाऽज्ञानमेष सहते परीषहं ॥ ११३ ॥
वार्तमुग्रतपसा महर्धयः पूर्वमित्यनुपलब्धितोऽधुना ।
इत्यनुक्तिरतिशुद्धदर्शनो दर्शनाख्यमसहत्परीषहं ॥ ११४ ॥

इत्यशेषितपरीषहारिणा सीरिणा विषयदोषहारिणा ।
अभ्यतप्यत तपोऽतिहारिणा जैनसच्चरणभूविहारिणा ॥ ११५ ॥

इति "अरिष्टनेमिपुराणसंग्रहे" हरिवंशे जिनसेनाचार्यस्य बलदेवतपोवर्णनो नाम
त्रिषष्टितमः सर्गः ।

चतुःषष्टितमः सर्गः ।

अथ ते पांडवाश्चंडसंसारभयभीरवः । प्राप्य पल्लवदेशेषु विहरंतं जिनेश्वरं ॥ १ ॥
चतुर्विधामराकीर्णसमवस्थानमंडनं । तं ते ववंदिरे देवं परीत्य परमेश्वरं ॥ २ ॥
पीत्वा धर्मामृतं लब्धजिनेंद्रघनकालतः । पूर्वजन्मानि तेऽपृच्छन् जिनेंद्रोऽप्यगदीदिति ॥ ३ ॥
अत्रैव भरतक्षेत्रे चंपायां मेघवाहने । रक्षति क्षितिपे क्षोण्यां कुरुवंशविभूषणे ॥ ४ ॥
विप्रस्य सोमदेवस्य सोमिलायां त्रयः सुताः । प्रथमः सोमदत्तोऽभूत्सोमिलः सोमभूतिना ॥ ५ ॥
अग्निभूत्यग्निलोद्भूतास्तेषां मातुलजाः क्रमात् । धनश्रीरपि सोमश्रीनागश्रीरिति योषितः ॥ ६ ॥
शरीरभोगसंसारनिर्वेदं सर्ववेदवित् । सोमदेवः परिप्राप्य प्राव्राजीज्जिनशासने ॥ ७ ॥

त्रयोऽत्र भ्रातरस्तेऽपि जिनशासनभाविताः। गृहधर्मरता जाता धर्मकामार्थसेविनः ॥ ८ ॥
भिक्षाकालेऽन्यदा तेषां गृहं धर्मरुचिर्यतिः । धर्मपिंड इवाखंडः प्रविष्टश्चंद्रचर्यया ॥ ९ ॥
प्रतिगृह्य तमुत्थाय सोमदत्तो यमीश्वरं । कार्यव्यग्रतया दाने नागश्रियमयोजयत् ॥ १० ॥
सा स्वपापोदयात्साधौ कोपावेशवशाऽददात् । विषान्नमेष सन्यासकारी सर्वार्थसिद्धिमैत् ॥ ११ ॥
नागश्रीदुष्कृतं ज्ञात्वा ते त्रयोऽपि सहोदराः । दीक्षां वरुणगुर्वंते निर्विण्णाः प्रतिपेदिरे ॥ १२ ॥
धनश्रीश्चापि मित्रश्रीर्गुणवत्यार्यिकांतिके । अदीक्षिषातां निःशेषभववासविषादतः ॥ १३ ॥
ज्ञानपंचकसिद्ध्यै ते दर्शनत्रिकशुद्धये । चारित्रतपसां शुद्ध्यै प्रवृत्ताश्चरणोद्यताः ॥ १४ ॥
स्यात्सामायिकचारित्रं सर्वत्र समभावकं । सर्वसावद्ययोगस्य प्रत्याख्यानमखंडितं ॥ १५ ॥
स्वप्रमादकृतानर्थप्रबंधप्रतिलोपने । सम्यक् प्रतिक्रिया या सा छेदोपस्थापना मता ॥ १६ ॥
विशिष्टा परिहारेण शुद्धिर्यत्र प्रतिष्ठिता । परिहारविशुद्ध्याख्यं चारित्रं तत्प्रकथ्यते ॥ १७ ॥
संपरायाः कषायास्तु यत्र ते सूक्ष्मवृत्तयः । तत्सूक्ष्मसांपरायाख्यं चारित्रं पापनोदनं ॥ १८ ॥
यथाख्यातमथाख्यातमिति वा परिभाषितं । सुशांततीक्ष्णमोहं तच्चारित्रं मोक्षसाधनं ॥ १९ ॥
तपः षोढा भवेद्बाह्यमथानशनपूर्वकं । अभ्यंतरं तपः षोढा प्रायश्चित्तादिकं मतं ॥ २० ॥

संयमादिकसद्ध्यानसिद्धिदृष्टफलाप्तये । रागोच्छित्त्यै तपो नानाविधं ह्यनशनं स्मृतं ॥ २१ ॥
दोषोपशमसंतोषस्वाध्यायध्यानसिद्धये । संयमायावमोदर्यं प्रजागरणकारणं ॥ २२ ॥
भिक्षार्थिमुनिसंकल्पा ये वेस्माद्याभिगोचराः । आशानिवृत्तये वृत्तिपरिसंख्यानमिष्यते ॥२३॥
घृतक्षीरादिवृष्यात्मरसानां विरहः परं । तयो रसपरित्यागो निर्द्रेंद्रियजयाय सः ॥२४॥
पशुस्त्रीप्रविविक्तेषु स्थानेषु प्रासुकेषु यत् । वर्तनं व्रतशुद्ध्यै तद्विविक्तशयनासनं ॥२५॥
त्रिकालयोगप्रतिमास्थानपूर्वः स्वयंकृतः । कायक्लेशः सुखत्यागो मोक्षमार्गप्रभावनः ॥२६॥
वाह्यद्रव्यव्यपेक्षत्वात्परप्रत्ययहेतुकः । षड्विधस्यास्य बाह्यत्वं तपसः प्रतिपादनं ॥२७॥
मनोनियमनार्थत्वादाभ्यंतरमभिष्टुतं । प्रायश्चित्तं कृतावद्यशोधनं नवधात्र तु ॥२८॥
चतुर्धा विनय पूज्येष्वादरो दशधा पुनः । वैय्यावृत्त्यं स्वकामेनान्यद्रव्यैरप्युपासनं ॥२९॥
स्वाध्यायः पंचधा ज्ञानभावनालस्य वर्जनं । स्वसंकल्पपरित्यागो व्युत्सर्गो द्विविधः पुनः॥३०॥
चित्ताक्षेपपरित्यागो ध्यानं चापि चतुर्विधं । आर्तं रौद्रं च दुर्ध्यानं धर्म्यशुक्ले तु शोभने ॥३१॥
तत्रालोचनकं कृच्छं दशदोषविवर्जितं । प्रमादकृतदोषाणां गुरवे विनिवेदिनं ॥३२॥
मिथ्या मे दुष्कृताद्यैर्यत्स्वाभिव्यक्तिः प्रतिक्रिया । दोषव्यपोहनं साधु तत्प्रतिक्रमणं मतं ॥३३

आलोचनाद्यतः शुद्धिः प्रतिक्रमणतोऽपि च । तदुभयं तु तदुद्दिष्टं प्रायश्चित्तं विशुद्धिकृत् ॥३४॥
स्याद्विवेको विभजनं यः संसक्तान्नपानयोः । कामोत्सर्गादिकरणं व्युत्सर्गः संप्रकीर्तितः ॥३५॥
तपस्त्वनशनाद्येव प्रायश्चित्तमुदीरितं । प्रव्रज्या हापनं छेदो दिनमासादिभिर्यतेः ॥३६॥
पक्षमासादिभेदेन दूरतः परिवर्जनं । परिहारः पुनर्दीक्षा स्यादुपस्थापना पुनः ॥३७॥
कालानतिक्रमादौ तु ज्ञानाचारोऽष्टधा मते । यथोक्तग्रहणादिर्यः स ज्ञानविनयो मतः ॥३८॥
अष्टधा दर्शनाचारे निश्शंकादिषु संस्थिते । विनयो दर्शने दृश्यो गुणदोषविवेकिता ॥३९॥
त्रयोदशविधोदारचारित्राचारगोचरा । निरतीचारता चारुश्चरित्रविनयः परः ॥४०॥
या प्रत्यक्षपरोक्षेषु प्रत्युत्थानादिकाः क्रियाः । गुर्वादिषु यथायोग्यं विनयश्चौपचारिकः ॥४१॥
आचार्ये चाप्युपाध्याये तपःश्रेष्ठे तपस्विनि । शिक्षाशीले यतौ शैक्षे ग्रस्ते ग्लाने रुजादिभिः ॥४२॥
गणे स्थविरसंतानलक्षणे च कुलेऽपि च । दीक्षकाचार्यशिष्यादिसंस्त्याय निजलक्षणे ॥४३॥
गृहिश्रमणसंघाते संघे च गुणसंघके । चिरप्रव्रजिते साधौ मनोज्ञे लोकसम्मते ॥४४॥
व्याधिमिथ्यात्वसंपातपरीषहरिपूदये । वैय्यावृत्त्यं यथायोग्यं विचिकित्साव्यपोहनं ॥४५॥
ग्रंथार्थयोः प्रदानं हि वाचना पृच्छनं पुनः । परानुयोगो निश्चित्यै निश्चितानुबलाय वा ॥४६॥

ज्ञानस्य मनसाभ्यासोऽनुप्रेक्षा परिवर्तनं । आम्नाये देशनान्येषामुपदेशोऽपि धर्मगः ॥४७॥
प्रशस्ताध्यवसायार्थप्रतिज्ञाशयलब्धये । संवेगाय तपोवृद्ध्यै स्वाध्यायः पंचधा भवेत् ॥४८॥
क्रोधाद्यभ्यंतरोपाधेः कायस्य सविचारता । बाह्योपधेरकल्पस्य त्यागोप्युत्सर्ग इष्यते ॥४९॥
निस्संगनिर्भयत्वाय जीविताशानिवृत्तये । स बाह्याभ्यंतरोपध्योर्व्युत्सर्गः संप्रजायते ॥५०॥
तपसा निर्जरा मुक्त्यै संवृतस्योपजायते । परिणामस्य भेदेन प्रतिस्थानं तु भिद्यते ॥५१॥
भव्यः पंचेंद्रियः संज्ञी पर्याप्तो लब्धिभिर्युतः । अंतःशुद्धिप्रवृद्धो स्याद्बहुकर्मविनिर्जरः ॥५२॥
ततः प्रथमसम्यक्त्वलाभकारणसन्निधौ । सम्यग्दृष्टिर्भवेत्स स्यादसंख्यगुणनिर्जरः ॥५३॥
ततः श्रावकतापन्नोऽसंख्येयगुणनिर्जरः । ततोऽपि विरतस्तस्मादनंतानां वियोजकः ॥५४॥
ततो दर्शनमोहस्य क्षपकः क्षायिकोद्धकृत् । ततश्चारित्रमोहस्य सर्वोपशमको यतिः ॥५५॥
उपशांतकषायोऽतोऽसंख्येयगुणनिर्जरः । ततश्चारित्रमोहस्य क्षपकः क्षपकाभिधः ॥५६॥
ततः क्षीणकषायाख्योऽसंख्येयगुणनिर्जरः । जिनेंद्रः केवली तस्मादनंतज्ञानदर्शनः ॥५७॥
पुलाको वकुशश्चैव कुशीलो गुणशीलवान् । निर्ग्रंथः स्नातकश्चेति निर्ग्रंथः पंचधा मताः ॥५८॥
पुलाका भावनाहीना ये गुणेषूत्तरेषु ते । न्यूनाः कचित्कदाचिच्च पुलाकाभा व्रतेष्वपि ॥५९॥

अखंडितव्रताः कायभूषोपकरणानुगाः । अविविक्तपरीवारा सबला बकुशाः स्मृताः ॥६०॥
परिपूर्णोभया जातूत्तरगुणविरोधिनः । प्रतिसेवनाकुशीला ये अविविक्तपरिग्रहाः ॥६१॥
शमितान्यकषाया ये ससंज्वलनमात्रकाः । ते कषायकुशीलाः स्युः कुशीला द्विविधा यतः ॥६२॥
अव्यक्तोदयकर्माणो ये पयोदंडराजिवत् । निर्ग्रंथास्ते मुहूर्तोर्ध्वोद्भिद्यमानात्मकेवलाः ॥६३॥
प्रक्षीणघातकर्माणः स्नातकाः केवलीश्वराः । एते पंचापि निर्ग्रंथा नैगमादिनयाश्रयात् ॥६४॥
संयमादिभिरष्टाभिरनुयोगैर्यथाक्रमं । ते पुलाकादयः साध्याः साध्यसाधनभेदिनः ॥६५॥
प्रतिसेवनाकुशीलाः पुलाका बकुशा द्वयोः । प्राक्कषायकुशीलाः स्युरंतवर्ज्ये चतुष्टये ॥६६॥
संयमे च यथाख्याते निर्ग्रंथस्नातकाः स्थिताः । श्रुतादयोऽपि पंचानां प्रकथ्यंते यथाक्रमं ॥६७॥
प्रतिसेवनाकुशीलाः पुलाका बकुशाः स्थिताः । दशपूर्वाण्यभिन्नानि बिभ्रत्युत्कर्षतः श्रुतं ॥६८॥
ये कषायकुशीला ये निर्ग्रंथाख्याश्च संयताः । ते चतुर्दशपूर्वाणि सर्वे बिभ्रति सर्वथा ॥६९॥
जघन्येन पुलाकस्य श्रुतमाचारवस्तु तत् । निर्ग्रंथांतयतीनां त्वष्टौ प्रवचनमातरः ॥७०॥
व्रतानां रात्र्यभुक्तेश्च बलादन्यतमं प्रति । सेवमानः पुलाकः स्यात्परेषामभियोगतः ॥७१॥
बकुशः सोपकरणो बहूपकरणप्रियः । शरीरबकुशः कायसंस्कारं प्रतिसेवते ॥७२॥

प्रतिसेवनाकुशील उत्तरेषु विराधनं । गुणेषु सेवते कांचिदविराधितमूलकः ॥७३॥
स्युः कषायकुशीलास्तु रहितप्रतिसेवनाः । निर्ग्रंथाः स्नातकाश्चापि ते सर्वे सर्वतीर्थजाः ॥७४॥
भावलिंगं प्रतीत्यामी निर्ग्रंथाः पंच लिंगिनः। प्रतीत्य द्रव्यलिंगं तु भजनीया मनीषिभिः॥७५॥
पुलाकस्योत्तरास्तिस्रो वकुलप्रतिसेवना – कुशीलयोश्च षड्भेदा कषाये चतुरुत्तराः ॥७६॥
स्यात्सूक्ष्मसांपराये च निर्ग्रंथस्नातकेऽपि च । शुक्लैव केवला लेश्याऽयोगाः लेश्याविवर्जिताः ॥
पुलाकस्योपपादः स्यात्सहस्रारे परायुषः । प्रतिसेवनाकुशीलवकुशस्यारणेऽच्युते ॥७८॥
तथा सर्वार्थसिद्धौ तु निर्ग्रंथांत्यकुशीलयोः । द्विसागरोपमायुष्काः सौधर्मे ते जघन्यतः ॥७९॥
संयमस्थानभेदास्तु स्युः कषायनिमित्तकाः । असंख्येयतमानंतगुणसंयमलब्धयः ॥८०॥
तत्र सर्वजघन्यानि लब्धिस्थानानि सर्वदा । स्युः कषायकुशीलस्य पुलाकस्य च योगिनः॥८१॥
गच्छतस्तावसंख्येयस्थानानि युगपत्ततः। व्युच्छिद्यते पुलाकोऽन्यस्त्वसंख्येयानि गच्छति॥८२॥
वकुशेन कुशीलौ द्वौ स्थानानि युगपत्ततः । असंख्यानि च तौ यातौ वकुशस्त्ववहीयते ॥८३॥
असंख्येयानि गत्वातः स्थानानि प्रतिसेवना – कुशीलो हीयते तस्माद्यः कषायकुशीलकः ॥८४॥

स्थानान्यतोऽकषायाणि निर्ग्रंथः प्रतिपद्यते । सोऽसंख्येयानि गत्वातो व्युच्छेदमुपगच्छति॥८५॥
स्थानमेकमतस्तूर्ध्वं गत्वानंतगुणाधिकः । स्नातकः कृतकर्मांतो निर्वाणं प्रतिपद्यते ॥८६॥
क्षेत्रकालादिभिः सिद्धाः साध्या द्वादशभिस्तु ते । अनुयोगैर्यथायोग्यं नयद्वयविवक्षया ॥८७॥
सिद्धिक्षेत्रेमला सिद्धिरात्माकाशप्रदेशयोः । प्रत्युत्पन्नप्रतिग्राहिनययोगादसंगिनां ॥८८॥
कर्मभूमिषु सर्वासु जन्म प्रति च संहृतिं । संसिद्धिर्मानुषे क्षेत्रे भूतग्राहिनयेक्षया ॥८९॥
एकस्मिन् समये कालात्प्रत्युत्पन्ननयेक्षया । भूतग्राहिनयेक्षातो जन्मतोऽप्यविशेषतः ॥९०॥
उत्सर्पिण्यवसर्पिण्योर्जातः सिद्ध्यति जन्मवान् । विशेषेणावसर्पिण्यां तृतीयांततुरीययो ः॥९१॥
दुःखमायां तु संजातो दुःखमायां न सिद्ध्यति । उत्सर्पिण्यवसर्पिण्योः संहारात्सर्वदा पुनः ॥९२॥
सिद्धिः सिद्धिगतौ ज्ञेया सुमनुष्यगतौ यथा । अवेदत्वेन लिंगेन भावतस्तु त्रिवेदतः ॥९३॥
न द्रव्याद्द्रव्यतः सिद्धिः पुल्लिंगेनैव निश्चिता । निर्ग्रंथेन च लिंगेन सग्रंथेनाथवा न या ॥९४॥
तीर्थसिद्धिर्द्विधा तीर्थकारीतरविकल्पतः । सति तीर्थकरे सिद्धा असतीतीतरे द्विधा ॥९५॥
सिद्धिरव्यपदेशेन नयादेकेन वा पुनः । चतुर्भिः पंचभिर्वापि चारित्रैरुपजायते ॥ ९६॥
सिद्धिः प्रत्येकबुद्धानां स्वतो बोधिमुपेयुषां । तथा बोधितबुद्धानां परतो बोधिलाभिनां ॥९७॥

सिद्धिर्ज्ञानविशेषैरेकद्वित्रिचतुर्थकैः । अवगाहेन चोत्कृष्टजघन्यांतभिदावता ॥९८॥
अवगाहनमुत्कृष्टमूनं पंचधनुःशती । पंचविंशा च देशोनारत्नयोर्धचतुर्थकाः ॥९९॥
मध्येऽनेकविकल्पास्तु यथासंभवमीरिताः । तत्र सिद्ध्यति चैतस्मिन्नेकस्मिन्नवगाहने ॥१००॥
अंतरः शून्यकालः स्यादंतरं सिद्ध्यतां पुनः । जघन्येनैकसमयो मासानां षण्मन्यथा ॥१०१॥
जघन्येनैक एवैकसमये सिद्ध्यति ध्रुवं । तथोत्कर्षेणाष्टशतसंख्यास्ते संख्यया स्मृताः ॥१०२॥
क्षेत्रादिभेदभिन्नानां संख्याभेदः परस्परं । ख्यातमल्पबहुत्वं च सिद्धिक्षेत्रे न विद्यते ॥१०३॥
भूतपूर्वव्यपेक्षातश्चिंत्यते तन्नु तद्यथा । जन्मनः संहृतेश्चेति क्षेत्रसिद्धा द्विधा यतः ॥१०४॥
अल्पे संहारसिद्धास्ते जन्मसिद्धास्तु तत्त्वतः । स्युः संख्येयगुणाः सर्वे सार्वसर्वज्ञशासने ॥१०५॥
ऊर्ध्वलोकस्य सिद्धा ये स्तोकास्तेऽधोजगद्गताः। स्युः संख्येयगुणास्तिर्यग्लोकसिद्धास्तथा ततः॥
स्तोकाः समुद्रसिद्धास्तु स्युः संख्येयगुणाः पुनः द्वीपसिद्धा इतीहेत्थमप्यशेषेण भाषिताः॥१०७॥
लवणोदे त्रयःसिद्धाः सर्वस्तोकास्तु ते स्तुताः। कालोदसिद्धा बोद्धव्यास्ततसंख्येयगुणाः सदा १०८
ये जंबूद्वीपसिद्धास्ते स्युः संख्येयगुणास्तथा । धातकीखंडसिद्धाश्च पुष्करद्वीपगास्तथा ॥१०९॥
यथा क्षेत्रविभागेन प्रोक्ताल्पबहुता तथा । सा कालादिविभागेन वेदितव्या यथागमं ॥११०॥

इतिदृग्ज्ञानचारित्रतपसामत्युपासकाः । सोमदत्तादयोंत्ये ते पंच भूत्वारणाच्युते ॥१११॥
देवाः सामानिका भोगं द्वाविंशत्यब्धिजीविनः । भुंजानस्तस्थुरत्यंतशुद्धदर्शनदर्शनाः ॥११२॥
नागश्रीरपि मृत्वाप फलं धूमप्रभावनौ । अनुभूय महादुःखं सा सप्तदशसागरं ॥११३॥
भूत्वा स्वयंप्रभद्वीपे दुष्टो दृष्टिविषोरगः । त्रिसागरोपमायुष्कां मृत्वागाद्वालुकाप्रभां ॥११४॥
तत्रानुभूय दुःखौघांश्चिरादुद्वृत्य पापतः । तत्र स्थावरकायेषु सानयत्सागरद्वयं ॥ ११५ ॥
ततो मातंगकन्याभूच्चंपायां सान्यदा मुनेः । समाधिगुप्ततः कृत्वा मधुमांसादिवर्जनं ॥११६॥
जीवितांते सुबंधोःस्याच्चंपायामेव वैश्यतः । धनवत्यां सुता जाता नाम्ना च सुकुमारिका ॥११७॥
पापानुबंधदोषेण सुदुर्गंधशरीरिका । रूपवत्यपि विद्वेष्या जाता युवजनस्य सा ॥११८॥
वैश्यस्य धनदेवस्याशोकदत्तासमुद्भवौ । तनयौ जिनदेवश्च जिनदत्तश्च विश्रुतौ ॥११९॥
कन्यां तामपि दुर्गंधां वृतां बंधुभिरग्रजः । परित्यज्य प्रवव्राज सुव्रतः सुव्रतांतिके ॥१२०॥
कनीयान् जिनदत्तस्तां बंधुवाक्योपरोधनः । परिणीयापि तत्याज दुर्गंधामतिदूरतः ॥१२१॥
आत्मानमपि निंदंती सोपवासान्यदा च सा । क्षांतार्यामार्यिकायुक्तां भोजयित्वातिभक्तितः ॥
अभिवंद्य तदापृच्छदार्यिके केन हेतुना । इमे परमरूपिण्यौ स्थिते तपसि दुष्करे ॥१२३॥

सेति पृष्टा जगौ हेतुमार्ययोस्तपसस्तयोः । प्रबोधनाय तस्याश्च करुणापरिनोदिता ॥१२४॥
श्रूयतां सुकुमारि द्वे सुकुमारकुमारिके । हेतुना येन तापस्ये तपस्विन्यौ व्यवस्थिते ॥१२५॥
सौधर्मादिपतेर्देव्याविमे पूर्वत्र जन्मनि । विमला सुप्रभा चेति सुप्रसिद्धे बभूवतुः ॥१२६॥
ते नंदीश्वरयात्रायां जिनपूजार्थमागते । कथंचिज्जातसंवेगे चित्तांतरमिति श्रिते ॥१२७॥
मनुष्यभवसंप्राप्तौ करिष्यावो महत्तपः । आवां स्त्रीत्वनिमित्तं तु येन दुःखं न दृश्यते ॥१२८॥
इति संगीर्य ते देव्यौ दिवः प्रच्युत्य भूपते । श्रीषेणस्येह साकेते श्रीकांतायां सुयोषिति ॥१२९॥
हरिषेणा सुता ज्येष्ठा श्रीषेणा च कनीयसी । जाते जाते च कांते ते यौवनश्रीविभूषिते ॥१३०॥
स्वयंवरविधौ स्मृत्वा पूर्वं जन्म च संगरं । बंधुलोकं परित्यज्य कुमार्यौ तपसि स्थिते ॥१३१॥
इति श्रुत्वार्यिकावाक्यं निर्विण्णा सुकुमारिका । तदंते सा प्रवव्राज संसारभयवेदिनी ॥१३२॥
तपस्विनीभिरन्याभिस्तपस्यंती तपस्विनी । कालं नीतवती नीत्या तपसा शोषितांगिका ॥१३३॥
वसंतसेनां गणिकां कामुकैः परिवेष्टितां । दृष्ट्वा वनविहारेऽसावेकदा क्रीडनोद्यतां ॥१३४॥
निदानमकरोत्क्लिष्टा दुर्यशःप्राप्तिकारणं । सौभाग्यमीदृशं मेऽन्ये जन्मन्यस्त्विति सादरा ॥१३५॥

स्वभर्तुः सोमभूतेस्तु भूत्वाभूदारणाच्युते । देवी सा पंचपंचाशत्पल्यतुल्यानिजास्थितिः ॥१३६॥
च्युत्वा ते पांडुराजस्य सोमदत्तादयस्त्रयः । कुंत्यां युधिष्ठिरो भीमः पार्थश्चेत्यभवत्सुताः॥१३७॥
धनश्रीपूर्वको देवो मित्रश्रीपूर्वकस्तथा । नकुलः सहदेवश्च मद्र्यां जातौ शरीरजौ ॥१३८॥
सा कुमारी दिवश्च्युत्वा द्रुपदस्य शरीरजा । जाता दृढरथाख्यायां स्त्रियां द्रौपद्यभिख्यया॥१३९॥
द्रौपद्यर्जुनयोर्योगः पूर्वस्नेहेन सांप्रतं । सुव्यक्तं सांप्रतं जातो राधावेधपुरस्सरः ॥१४०॥
ज्येष्ठानां भविता सिद्धिस्त्रयाणामिह जन्मनि । सर्वार्थसिद्धिर्हि तयोरंत्यपांडवयोरिह ॥१४१॥
सम्यग्दर्शनशुद्धाया द्रौपद्यास्तपसः क्रमात् । आरणाच्युतदेवत्वपूर्विका सिद्धिरिष्यते ॥१४२॥
इत्थं ते पांडवाः श्रुत्वा धर्मं पूर्वभवांस्तथा । संवेगिनो जिनस्यांते संयमं प्रतिपेदिरे ॥१४३॥
कुंती च द्रौपदी देवी सुभद्राद्याश्च योषितः । राजीमत्याः समीपे ताः समस्तास्तपसि स्थिताः ॥
ज्ञानदर्शनचारित्रैर्व्रतैः समितिगुप्तिभिः । आत्मानं भावयंतस्ते पांडवाद्यास्तपोऽचरन् ॥१४५॥

कुंत्यग्रेण वितीर्णभैक्षनियमः क्षुत्क्षामगात्रः क्षमः
षण्मासैरथ भीमसेनमुनिर्निष्ठाप्य स्वांतक्रमं ।

षष्ठाद्यैरुपवासभेदविधिभिर्निष्ठाभिमुख्यैः स्थितै-
र्ज्येष्ठाद्यैर्विजहार योगिभिरिलां जैनागमांभोधिभिः ॥१४६॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ युधिष्ठिरादिपंचपांडव-
प्रव्रज्यावर्णनो नाम चतुःषष्टितमः सर्गः।

पंचषष्टितमः सर्गः।

अथ सर्वामराकीर्णस्तीर्थकृत्कृतदेशनः। उत्तरापथतो देशं सुराष्ट्रमभितो ययौ ॥ १ ॥
उत्तरायणमुत्क्रम्य दक्षिणायनमागते। जिनार्के तेजसो वृत्तिः प्राग्वत्सर्वत्रगाभवत् ॥२॥
आर्हंत्यविभवोपेते महीं विहरतीश्वरे। दक्षिणां दक्षिणादेशा भेजिरे स्वर्गविभ्रमाः ॥३॥
तत्रोर्जयंतमंतेऽसावंतकल्याणभूतिभाक्। आरुरोह स्वभावेन नृसुरासुरसेवितः ॥४॥
पूर्ववत्समवस्थानभूमिस्तत्राभवत्प्रभोः। तिर्यग्मानवदेवौघैरनघैः समधिष्ठिताः ॥५॥
धर्मं तत्र जिनोऽवोचद्रत्नत्रितयपावनं। स्वर्गापवर्गसौख्यैकसाधनं साधुसम्मतं ॥६॥

निषद्यायां यथाद्यायां पूर्वं सर्वहितो जिनः । अंत्यायां च तथा धर्मं स सविस्तरमब्रवीत् ॥७॥
ऊर्ध्वज्वलनमुष्णत्वं यथाग्नेः शीततापपां । जवनं मरुतस्तिर्यग्भास्वरत्वं च तेजसः ॥८॥
अमूर्तत्वं यथा व्योम्नः स्वभावाद्धारणं क्षितेः । कृतार्थस्य जिनेंद्रस्य तथा धर्मस्य देशनं ॥९॥
अघातिकर्मणामंतं ततो योगनिरोधकृत् । कृत्वानेकशतैः सिद्धिं जिनेंद्रो मुनिभिर्ययौ ॥१०॥
परिनिर्वाणकल्याणपूजामंत्यशरीरगां । चतुर्विधसुरा जैनीं चक्रुः शक्रपुरोगमाः ॥११॥
गंधपुष्पादिभिर्दिव्यैः पूजितास्तनवः क्षणात् । जैनाद्या द्योतयंत्यो द्यां विलीना विद्युतो यथा॥१२॥
स्वभावोयं जिनादीनां शरीरपरमाणवः । मुंचंति स्कंधतामंते क्षणात्क्षणरुचामिव ॥१३॥
ऊर्जयंतगिरौ वज्री वज्रेणालिख्य पावनं । लोके सिद्धिशिलां चक्रे जिनलक्षणयुक्तिभिः ॥ १४ ॥
वरदत्तादिसंघं च वंदित्वा वासवादयः । देवा नृपतयश्चापि ययुः सर्वे यथायथं ॥१५॥
दशार्हादयो मुनयः षट्सहोदरसंयुताः । सिद्धिं प्राप्तास्तथान्येऽपि शंबप्रद्युम्नपूर्वकाः ॥१६॥
ऊर्जयंतादिनिर्वाणस्थानानि भुवने ततः । तीर्थयात्रागतानेकभव्यसेव्यानि रेजिरे ॥१७॥
ज्ञात्वा भगवतः सिद्धिं पंच पांडवसाधवः । शत्रुंजयगिरौ धीराः प्रतिमायोगिनः स्थिताः ॥१८॥

दुर्योधनान्वयस्तत्र स्थितो युधवरोधनः[1]। श्रुत्वागत्याकरोद्वैरादुपसर्गं सुदुस्सहं ॥१९॥
तप्तायोमयमूर्तीनि मुकुटानि ज्वलंत्यलं। कटकैः कटिसूत्रादि तन्मूर्धादिष्वयोजयत् ॥२०॥
रौद्रं दाहोपसर्गं ते मेनिरे हिमशीतलं। वीराः कर्मविपाकज्ञाः कर्मक्षयकृतौ क्षमाः ॥२१॥
शुक्लध्यानसमाविष्टा भीमार्जुनयुधिष्ठिराः। कृत्वाष्टविधकर्मांतं मोक्षं जग्मुस्त्रयोऽक्षयं ॥२२॥
नकुलः सहदेवश्च ज्येष्ठदाहं निरीक्ष्य तौ। अनाकुलितचेतस्कौ जातौ सर्वार्थसिद्धिजौ ॥२३॥
नारदोऽपि नरश्रेष्ठः प्रव्रज्य तपसो बलात्। कृत्वा भवक्षयं मोक्षमक्षयं समुपेयिवान् ॥२४॥
अन्येऽपि बहवो भव्याः सुरत्नत्रयधारिणः। मोक्षं प्राप्ताः परे स्वर्गमासन्नभवसंख्यया ॥२५॥
तुंगिकाशिखरारूढो बलदेवोऽपि दुष्करं। तपो नानाविधं चक्रे भवचक्रक्षयोद्यतः ॥२६॥
एकद्वित्र्यादिषण्मासपर्यंतोपोषितैरसौ। कषायवपुषां चक्रे शोषणं पोषणं धृतेः ॥२७॥
कांतारभिक्षया प्राणधारणां कर्तुमुद्यतः। भ्रमन् कांतारमध्येन्यैर्व्यलोकि शशिविभ्रमः ॥२८॥
पुरग्रामादिषु ख्यातां श्रुत्वा वार्तां तथाविधां। पर्यंतवासिनो भूपाः प्राप्ताः क्षुभितमानसाः ॥२९॥
शंकाविषसमापन्नाअनानाप्रहरणाश्रितान्। सिद्धार्थस्तान् तथालोक्य सृष्टवान् सिंहसंततिं ॥३०॥

[1] 'क्षुपवरोधन' इति ख पुस्तके।

मुनिपादसमीपे तान् सिंहानालोक्य भूभृतः । ते ज्ञातमुनिसामर्थ्याः प्रणम्योपशमं ययुः ॥३१॥
ततः प्रभृत्यसौ लोके नरसिंहः इति श्रुतिं । सिंहोरस्को हली प्राप्तः सिंहानुचरसंयतः ॥३२॥
एकं वर्षशतं कृत्वा तपो हलधरो मुनिः । समाराध्य परिप्राप्तो ब्रह्मलोके सुरेशतां ॥३३॥
तत्र पद्मोत्तरे नाम्नि विमाने रत्नभास्वरे । देवदेवीगणाकीर्णे प्रासादोद्यानमंडिते ॥३४॥
मृदूपपादशय्यायामुदपादि बलोऽमरः । महामणिरिवोदाररत्नाकरमहाक्षितौ ॥३५॥
भाषामनःशरीराक्षप्राणाहारप्रसिद्धिभिः । षड्भिः पर्याप्तिभिः सद्यः पर्याप्तोऽभूत्सुरोत्तमः ॥३६॥
शयने सर्वतोभद्रे वस्त्राभरणभूषितः । विबुधः सुखनिद्रांते यथात्र नवयौवनः ॥३७॥
विलोक्यमानमालोक्य शब्दैरमरयोषितां । सुराणामनुरक्तानामप्यसावभिनंदितः ॥३८॥
चंद्रादित्याधिकोदारप्रभावलयदेहभृत् । इति दध्यौ धृतध्यानः प्रमदापूर्णमानसः ॥३९॥
कोऽयं रम्यतमो देशः कोयं प्रमुदितो जनः। कोहं क्वाद्य भवोयं मे धर्मः को वार्जितो मया॥४०॥
बोधितः सुरमुख्यैः स सभवप्रत्ययावधिः । विवेद सहसा देवः पौर्वापर्यमशेषतः ॥४१॥
ज्ञातपूर्वभवाशेषबंधुर्बंधुहितोद्यतः । प्राप्ताभिषेककल्याणः स्वीकृतात्मपरिच्छदः ॥४२॥
अवधिज्ञातकृष्णश्च गत्वासौ वालुकाप्रभां । दृष्ट्वाऽनुजं निजं देवो दुःखितं दुःखितोऽभवत् ॥४३॥

महाप्रभावसंपन्ने देवे तत्र तथास्थिते । शब्दगंधरसस्पर्शाः शुभतामशुभा ययुः ॥४४॥
एह्येहि कृष्ण योहं ते भ्राता ज्येष्ठो हलायुधः। ब्रह्मलोकाधिपो भूत्वा त्वत्समीपमिहागतः ॥४५॥
इत्युक्त्वा तं समुद्धृत्य स्वर्लोकं नेतुमुद्यते । देवे तस्य व्यलीयंते गात्राणि नवनीतवत् ॥४६॥
ततः कृष्णो जगौ देव भ्रातः किं व्यर्थचेष्टितैः। किन्न ज्ञातं यथा सर्वे जीवाः स्वकृतभोगिनः ॥
यद्येन यादृशं कर्म संसारे समुपार्जितं । तत्तेन तादृशं भ्रातर्नियमादनुभूयते ॥४८॥
शक्नुयुः सुखमाहर्तुं हर्तुं वा दुःखमंगिनां । देवा यदि ततो घ्नंति मृत्युदुःखं निजं न किं ॥४९॥
भ्रातर्याहि ततः स्वर्गे भुंक्ष्व पुण्यफलं निजं । आयुषोंतेऽहमप्येमि मोक्षहेतुं मनुष्यतां ॥५०॥
आवां तत्र तपः कृत्वा जिनशासनसेवया । मोक्षसौख्यमवाप्स्यावः कृत्वा कर्मपरिक्षयं ॥५१॥
आवां पुत्रादिसंयुक्तौ महाविभवसंगतौ । भारते दर्शयान्येषां विस्मयव्याप्तचेतसां ॥५२॥
शंखचक्रगदापाणिर्मदीयप्रतिमा गृहैः । भारतं व्यापय क्षेत्रं मत्कीर्तिपरिवृद्धये ॥५३॥
इत्यादि वचनं तस्य प्रतिपद्य सुरेश्वरः । सम्यक्त्वे शुद्धिमाख्याप्य भारतं क्षेत्रमागतः ॥५४॥
भ्रातृस्नेहवशो देवो यथोद्दिष्टं स विष्णुना । चक्रे दिव्यविमानस्थं चक्रिलांगलदर्शनं ॥५५॥
वासुदेवगृहैश्चक्रे नागरादिनिवेशितैः । विष्णुमोहमयं लोकं स्नेहात्किं वा न चेष्टयते ॥५६॥

ब्रह्मलोकं समासाद्य कृतजैनमहामहः । विंदन्सुरसुखं सोऽस्थात्सुरस्त्रीनिवहावृतः ॥५७॥

उच्चैर्देशस्थितोऽपि प्रतिभयपतनं याति पातालमूलं ।
भुंक्ते नैवोपलब्धं विषयसुखरसं सारसंसारसारं ॥
स्नेहाधिक्यादधीतं स्मरति न तनुभृत्सेवते प्रत्यनीकं ।
धिक् धिक् स्वर्मोक्षसौख्यप्रतिघमतिघनस्नेहमोहं जनानां ॥५८॥

तीर्थे नेमिजिनस्य तत्र वहति व्यामोहविच्छेदने ।
संजाते वरदत्तनामनि मुनौ कैवल्यचक्षुष्मति ॥
राजासौ हरिवंशसंततिधरो धीरो धरायाः सुतो ।
दध्रे राज्यधुरां धुरंधरधराधीशश्रियं धारयन् ॥ ५९ ॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्निर्वाणवर्णनो
नाम पंचषष्टितमः सर्गः ।

षट्षष्टितमः सर्गः।

प्रतापवश्याखिलराजके नृपे प्रशासति क्ष्मातलमुग्रशासने।
जरत्कुमारे जनितादराः प्रजाः प्रकाममायुःप्रमदं धरातले ॥ १ ॥
कलिंगराजस्य नृपस्य देहजा जरत्कुमारस्य वधूर्वधूत्तमाः।
सुखेन लेभे जगतःसुखावहं वसुध्वजं राजकुलध्वजं सुतं ॥ २ ॥
स तत्र यूनि व्यवसायिनि क्षितिं जरत्कुमारो हरिवंशशेखरे।
निधाय यातस्तपसे वनं सतां कुलव्रतं तीव्रतपोनिषेवणं ॥ ३ ॥
सुतोभवच्चंद्र इव प्रजाप्रियो वसुध्वजाच्चासुवसुर्वसूपमः।
समीमवर्मास्य कलिंगपालकस्तदन्वयेऽतीयुरनेकशो नृपाः ॥ ४ ॥
कपिष्टनामान्वयभूषणस्त्वभूदजातशत्रुस्तनयस्ततोऽभवत्।
स शत्रुसेनोस्य जितारिरंगजस्तदंगजो यंत्रितशत्रुरीश्वरः ॥५॥
भवान्न किं श्रेणिक वेत्ति भूपतिं नृपेंद्रसिद्धार्थकनीयसीपतिं।
इमं प्रसिद्धं जितशत्रुमाख्यया प्रतापवंतं जितशत्रुमंडलं ॥६॥

जिनेंद्रवीरस्य समुद्भवोत्सवे तदागतः कुंडपुरं सुहृत्परः ।
सुपूजितः कुंडपुरस्य भूभृता नृपोयमाखंडलतुल्यविक्रमः ॥७॥
यशोदयायां सुतया यशोदया पवित्रया वीरविवाहमंगलं ।
अनेककन्यापरिवारयारुहत्समीक्षितुं तुंगमनोरथं तदा ॥८॥
स्थितेऽथ नाथे तपसि स्वयंभुवि प्रजातकैवल्यविशाललोचने ।
जगद्विभूत्यै विहरत्यपि क्षितिं क्षितिं विहाय स्थितवांस्तपस्ययं ॥९॥
अमुष्य याताद्य तपोबलान्मुनेरवाप्तकैवल्यफला मनुष्यता ।
मनुष्यभावो हि महाफलं भवे भवेदयं प्राप्तफलस्तपः फलात् ॥१०॥
इतीरितेयं हरिवंशसत्कथा समासतः श्रेणिक लोकविश्रुता ।
त्रिषष्टिसंख्यानपुराणपद्धतिप्रदेशसंबंधवती श्रियेऽस्तु ते ॥११॥
सुगौतमायुष्यपुराणपद्धतिं सपार्थिवैः श्रेणिकपार्थिवस्तदा ।
सुदृष्टिराकर्ण्य सकर्णतां गतो गतः पुरं स्फीतमतिः कृतानतिः ॥१२॥
चतुर्णिकायामरखेचरादयो जिनं परीत्य प्रणिपत्य भक्तितः ।

यथायथं जग्मुरजन्मकांक्षिणः प्रसिद्धसद्धर्मकथानरागिणः ॥१३॥
विहृत्य पूज्योऽपि महीं महीयसीं महामुनिर्मोचितकर्मबंधनः ।
इयाय मोक्षं जितशत्रुकेवली निरंतसौख्यप्रतिबद्धमक्षयं ॥ १४॥
जिनेंद्रवीरोऽपि विबोध्य संततं समंततो भव्यसमूहसंततिं ।
प्रपद्य पावानगरीं गरीयसीं मनोहरोद्यानवने तदीयके ॥१५॥
चतुर्थकालेऽर्धचतुर्थमासकैर्विहीनताविश्चतुरब्दशेषके ।
सकार्तिके स्वातिषु कृष्णभूतसुप्रभातसंध्यासमये स्वभावतः ॥ १६ ॥
अघातिकर्माणि निरुद्धयोगको विधूय घातींधनवद्विबंधनः ।
विबंधनस्थानमवाप शंकरो निरंतरायोरुसुखानुबंधनं ॥ १७॥
स पंचकल्याणमहामहेश्वरः प्रसिद्धनिर्वाणमहे चतुर्विधैः ।
शरीरपूजाविधिना विधानतः सुरैः समभ्यर्च्यत सिद्धशासनः ॥१८॥
ज्वलत्प्रदीपालिकया प्रवृद्धया सुरासुरैः दीपितया प्रदीप्तया ।
तदा स्म पावानगरी समंततः प्रदीपिताकाशतला प्रकाशते ॥ १९ ॥

तथैव च श्रेणिकपूर्वभूभृतः प्रकृत्य कल्याणमहं सहप्रजाः ।
प्रजग्मुरिंद्राश्च सुरैर्यथायथं प्रयाचमाना जिनबोधिमर्थिनः ॥ २० ॥
ततस्तु लोकः प्रतिवर्षमादरात्प्रसिद्धदीपालिकयात्र भारते ।
समुद्यतः पूजयितुं जिनेश्वरं जिनेंद्रनिर्वाणविभूतिभक्तिभाक् ॥ २१ ॥
त्रयः क्रमात्केवलिनो जिनात्परे द्विषष्टिवर्षान्तरभाविनोऽभवन् ।
ततःपरे पंच समस्तपूर्विणस्तपोधना वर्षशतांतरे गताः ॥ २२ ॥
त्र्यशीतिके वर्षशते तु रूपयुक् दशैव गीता दशपूर्विणः शते ।
द्वये च विंशेऽङ्गभृतोऽपि पंच ते शते च साष्टादशके चतुर्मुनिः ॥ २३ ॥
गुरुः सुभद्रो जयभद्रनामा परो यशोबाहुरनंतरस्ततः ।
महार्हलोहार्यगुरुश्च ये दधुः प्रसिद्धमाचारमहांगमत्र ते ॥ २४ ॥
महातपोभृद्विनयंधरश्श्रुतामृषिश्रुतिं गुप्तपदादिकां दधत् ।
मुनीश्वरोऽन्यः शिवगुप्तसंज्ञको गुणैः स्वमर्हद्बलिरप्यधात्पदं ॥ २५ ॥
स मंदरार्योऽपि च मित्रवीरविं (वित ?) गुरू तथान्यौ बलदेवमित्रकौ ।

विवर्धमानाय त्रिरत्नसंयुतः श्रियान्वितः सिंहबलश्च वीरवित् ॥ २६ ॥
स पद्मसेनो गुणपद्मखंडभृद्गुणाग्रणीर्व्याघ्रपदादिहस्तकः ।
स नागहस्ती जितदंडनामभृत्सनंदिषेणः प्रभुदीपसेनकः ॥ २७ ॥
तपोधनः श्रीधरसेननामकः सुधर्मसेनोऽपि च सिंहसेनकः ।
सुनंदिषेणेश्वरसेनकौ प्रभू सुनंदिषेणाभयसेननामकौ ॥ २८ ॥
स सिद्धसेनोभयभीमसेनकौ गुरू परौ तौ जिनशांतिषेणकौ ।
अखंडषट्खंडमखंडितस्थितिः समस्तसिद्धांतमधत्त योर्थतः ॥ २९ ॥
दधार कर्मप्रकृतिं श्रुतिं च यो जिताक्षवृत्तिर्जयसेनसद्गुरुः ।
प्रसिद्धवैय्याकरणप्रभाववानशेषराद्धांतसमुद्रपारगः ॥ ३० ॥
तदीयशिष्योऽमितसेनसद्गुरुः पवित्रपुन्नाटगणाग्रणी गणी ।
जिनेंद्रसच्छासनवत्सलात्मना तपोभृता वर्षशताधिजीविना ॥ ३१ ॥
सुशास्त्रदानेन वदान्यतामुना वदान्यमुख्येन भुवि प्रकाशिता ।
यदग्रजो धर्मसहोदरः शमी समग्रधीधर्म इवात्तविग्रहः ॥ ३२ ॥

तपोमयीं कीर्तिमशेषदिक्षु यः क्षिपन्बभौ कीर्तितकीर्तिषेणकः ।
तदग्रशिष्येण शिवाग्रसौख्यभागरिष्टनेमीश्वरभक्तिभाविना ।
स्वशक्तिभाजा जिनसेनसूरिणा धियाल्पयोक्ता हरिवंशपद्धतिः ॥ ३३ ॥
यदत्र किंचिद्रचितं प्रमादतः परस्परव्याहृतिदोषदूषितं ।
तदप्रमादास्तु पुराणकोविदाः सृजंतु जंतुस्थितिशक्तिवेदिनः ॥ ३४ ॥
प्रशस्तवंशो हरिवंशपर्वतः क मे मतिः काल्पतराल्पशक्तिका ।
अनेन पुण्यप्रभवस्तु केवलं जिनेंद्रवंशस्तवनेन वांछितः ॥ ३५ ॥
न काव्यबंधव्यसनानुबंधतो न कीर्तिसंतानमहामनीषया ।
न काव्यगर्वेण न चान्यवीक्ष्यया[१] जिनस्य भक्त्यैव कृता कृतिर्यथा ॥ ३६ ॥
जिनाश्चतुर्विंशतिरत्र कीर्तिताः सुकीर्तयो द्वादश चक्रवर्तिनः ।
नवत्रिधा सीरिहरिप्रतिद्विषस्त्रिषष्ठिरित्थं पुरुषाः पुराणगाः ॥ ३७ ॥
अवांतरेऽनेकशतानि पार्थिवा महीचरा व्योमचराश्च भूरिशः ।
क्षितौ चतुर्वर्गफलोपभोगिनः पुराणमुख्येऽत्र यशस्विनस्तुताः ॥ ३८ ॥

१ नवान्यदीर्ष्यया इति खपुस्तके ।

अगण्यपुण्यं हरिवंशकीर्तिना यदत्र गण्यं गुणसंचितं मया।
फलादमुष्मान्नु मनुष्यलोकजा भवंतु भव्या जिनशासनस्थिताः ॥ ३९ ॥
जिनस्य नेमेश्चरितं चराचरप्रसिद्धजीवादिपदार्थभासनं।
प्रवाच्यतां वाचकमुख्यसज्जनैः सभागतैः श्रोत्रपुटैः प्रपीयतां ॥ ४० ॥
जिनेंद्रनामग्रहणं भवत्यलं ग्रहादिपीडापगमस्य कारणं।
प्रवाच्यमानं दुरितस्य दारणं सतां समस्तं चरितं किमुच्यते ॥ ४१ ॥
कुर्वंतु व्याख्यानमनन्यचेतसः परोपकाराय स्वमुक्तिहेतवे।
सुमंगलं मंगलकारिणामिदं निमित्तमप्युत्तममर्थिनां सतां ॥ ४२ ॥
महोपसर्गे शरणं सुशांतिकृत् सुशाकुनं शास्त्रमिदं जिनाश्रयं।
प्रशासनाः शासनदेवताश्च या जिनाश्चतुर्विंशतिमाश्रिताः सदा ॥ ४३ ॥
हिताः सतामप्रतिचक्रयान्विताः प्रयाचिताः सन्निहिता भवंतु ताः।
गृहीतचक्रा प्रतिचक्रदेवता तथोर्जयंतालयसिंहवाहिनी।
शिवाय यस्मिन्निह सन्निधीयते क्व तत्र विघ्नाः प्रभवंति शासने ॥ ४४ ॥

ग्रहोरगा भूतपिशाचराक्षसा हितप्रवृत्तौ जनविघ्नकारिणः ।
जिनेशिनां शासनदेवतागणाः प्रभावशक्त्याथ समं श्रयंति ते ॥ ४५ ॥
प्रकाममाकांक्षितकामसिद्धयः प्रसिद्धधर्मार्थविमोक्षलब्धयः ।
भवंति तेषां स्फुटमल्पयत्नतः पठंति भक्त्या हरिवंशमत्र ये ॥ ४६ ॥
निवार्यमात्सर्यमवार्यवीर्यया धिया सुधैर्योर्जितया जिनादराः ।
अनार्यवर्याः सहिताः सपर्यया पुराणमार्याः प्रथमं तु विष्टपे ॥ ४७ ॥
किं मेऽथवा प्रार्थनया यतस्ततः स्वभावतो विश्वभरक्षणाविदः ।
पयोधरोन्मुक्तशिवांबुभूधरा निधाय मूर्ध्नि प्रथमं तु भूतले ॥ ४८ ॥
सुपुष्टपुत्स्पष्टमुदात्तशब्दकैर्नवं पुराणं च पुराणवारि सत् ।
महाभ्रकूलैर्जनिता सरित्कुलैश्चतुःसमुद्रांतमिदं प्रतन्यते ॥ ४९ ॥
जयंति देवाः सुरसंघसेविताः प्रजातिशांतिप्रदशांतशासनाः ।
विशुद्धकैवल्यविनिद्रदृष्टयो सुदृष्टतत्त्वा भुवने जिनेश्वराः ॥ ५० ॥

जयत्वजय्या जिनधर्मसंततिः प्रजास्विह क्षेमसुभिक्षमस्त्विह ।
सुखाय भूयात्प्रतिवर्षवर्षणैः सुजातसस्या वसुधासुधारिणा ॥ ५१ ॥

शाकेष्वब्दशतेषु सप्तसु दिशं पंचोत्तरेषूत्तरां पातींद्रायुधनाम्नि कृष्णनृपजे श्रीवल्लभे दक्षिणां ।
पूर्वां श्रीमदवंतिभूभृति नृपे वत्सादिराजे परां सौर्याणामधिमंडलं जययुते वीरेवराहेऽवति ॥५२॥

कल्याणैः परिवर्धमानविपुलश्रीवर्धमाने पुरे श्रीपार्श्वालयनन्नराजवसतौ पर्याप्तशेषः पुरा ।
पश्चाद्दोस्तटिकाप्रजाप्रजनितप्राज्यार्चनावर्चने शांतेः शांतगृहे जिनस्य रचितो वंशो हरीणामयं ५३

व्युत्सृष्टापरसंघसंततिबृहत्पुन्नाटसंघान्वये प्राप्तः श्रीजिनसेनसूरिकविना लाभाय बोधे पुनः ।
दृष्टोयं हरिवंश पुण्यचरितः श्रीपर्वतः सर्वतो व्याप्ताशामुखमंडलः स्थिरतरः स्थेयात् पृथिव्यां चिरं ॥

इति "अरिष्टनेमिपुराणसंग्रहे" हरिवंशे जिनसेनाचार्यस्य कृतौ गुरुपादकमल-
वर्णनोनाम षट्षष्टितमः सर्गः।

इति श्रीहरिवंशपुराणं सम्पूर्णं ।

---

१ श्रीपार्श्वतः इत्यपि पाठः ।

प्रार्थना

इस ग्रन्थमालाको सहायता देना प्रत्येक धर्मात्माका कर्तव्य होना चाहिए । प्रत्येक दानके अवसरपर इसका स्मरण रखिए । सब तरहकी सहायता मंत्रीके पास अथवा " जौहरी माणिकचन्द पानाचन्द एण्ड कम्पनी, जौहरी बाजार, बम्बई " के पतेपर भेजना चाहिए ।

प्राचीन और अप्रकाशित हस्तलिखित ग्रन्थोंकी सूचना भी मंत्रीको देनेके लिए प्रार्थना है ।